A

POPULAR EDITION

OF

THE FIRST TANTRA

OF

VISHNUS'ARMAN.

(Containing a full Glossary and a literal translation of the verses occurring in the Text.)

BY

MAHÀDEVA SHIVARÁMA ÁPTE, B. A.

PRINTED AT THE ARYA BHUSHAN PRESS,

BY

HARI NARAYAN GOKHALE

AND

PUBLISHED BY

MRS. RADHABAI ATMARAM SAGOON,

BOOKSELLER AND PUBLISHER, BOMBAY.

(Second Edition.)

1803.

PREFACE.

The following is a Popular Edition of the First 'Tantra, containing full explanatory notes and a glossary of words, adapted to meet the requirements of less advanced students. By Popular Edition is meant such a one as can be easily understood without the help of a teacher even by a student who has studied the first few lessons of Dr. Bhandarkar's 2nd Book. It is thus oped that it will be largely availed of by the nerality of students and especially by those 'io study privately. An experience of some ars as a teacher of Sanskrit has convinced the litor that a book of the kind now presented ould be generally acceptable. Hence he thinks at the publication of the book meets a longe t want.

No pains have been spared to make this book eful to those for whom it is intended. Al iost all the verses have been literally translat l into English except only a few which, it as thought, could be easily understood.

How far the object in view is carried out is elt entirely to the public to judge.

Any suggestions as to the meaning of a rticular passage or individual words will be emed a favour.

THE EDITOR.

अथ

पञ्चतंत्रम् ।

प्रस्ताविका ।

ओं नमः श्रीशारदागणपतिगुरुभ्यो नमः ॥ नमो मनुबृहस्पतिव्यास वाल्मीकिप्रभृतिभ्यः ॥ महाकविभ्यो नमः ॥

सकलार्थशास्त्रसारं जगति समालोक्य विष्णुशर्मेदम् ।
तन्त्रैः पञ्चभिरेतच्चकार सुमनोहरं शास्त्रम् ॥ १ ॥

१ A sacred syllable (om) made up of अ (Vishnu), (Siva) and म (Brahman) more generally uttered at the beginning and end of a reading of the Vedas. २ It is used as an honorific title prefixed to the names of deities; here of course it is prefixed to the names शारदा (the Hindu Goddess of eloquence), गणपति (the God of learning and one that removes all obstacles) and गुरु (a preceptor considered equal in dignity to a deity. शारदा......भ्यः a Dvandva compound शारदा च गणपतिश्च गुरुश्च. ३ मनु and बृहस्पति are the celebrated writers of law, and व्यास and वाल्मीकि are the authors of the well-known epic poems Mahābhārata and Ramayana respectively. ४ This word means, beginning, commencement and in this sense it stands at the end of a Bahu Comp. मनुबृहस्पतिव्यासवाल्मीकिप्रभृतयः येषां ते. ५ Great poets—महान्तः कवयः Karm. Comp. ६ Having perceived this (what is treated of in the Panchatantra) to be the essence of the whole science of polity or moral and political Government in this world, Vishnus'arman composed this very pleasing scientific treatise (शास्त्रं), in five parts or sections.(तन्त्रैः) (सकलं अर्थशास्त्रं Karm. Compound, तस्य सारं . Comp.).

तद्यथानुश्रूयते । अस्ति दाक्षिणात्ये जनपदे महिलारोप्यं नाम नगरम् । तत्र सकलार्थिसार्थकल्पद्रुमः प्रवरनृपमुकुटमणिमरीचिचयचर्चितचरणयुगलः सकलकलापारंगतोमरशक्तिर्नाम राजा बभूव । तस्य तावत् त्रयः पुत्राः परमदुर्मेधसो वसुशक्तिरुग्रशक्तिरनेकशक्तिश्चेतिनामानो बभूवुः । अथ राजा ताञ्शास्त्रविमुखानालोक्य सचिवानाहूय प्रोवाच । भो ज्ञातमेतद्भवद्भिर्यन्ममैते त्रयोपि पुत्राः शास्त्रविमुखा विवेकरहिताश्च । तदेतान्पश्यतो मे महदपि राज्यं न सौख्यमावहति । अथवा साध्विदमुच्यते ।

१ It is heard or reported as follows. २ There was-this is an instance of historical present, where the present is used for the past. ३ In the southern country or region (जनपद जनाना पदं स्थानं Gen. Tat. compound). ४ Name of a city in the South. ५ A wish-tree (or a tree supposed to grant all desires) for the multitude of all supplicants सकलाना अर्थिनां सार्थाय कल्पद्रुम. D. T. Comp ६ Whose feet (lit pair of feet) were, as it were, covered with the collection of the rays issuing from the diamonds on the crowns of excellent or distinguished princes. This, of course, happened when other kings bent down at his feet as their suzerain. The whole is a Bah Comp. Dis.-प्रवरनृपमुकुटमणिमरीचिचयेन चर्चितं चरणयुगलं यस्य. The other compounds are easy. ७ Who had mastered completely (lit. gone beyond) all arts सकलाः कलाः तासां पारंगत ८ By name called, named. ९ Perfect 3rd P Sing. of भू to be १० Very silly or stupid दुष्टा मेधा changed to मेधस् in Bahu Comp) येषां ते. ११ A Bahu Comp. वसुशक्तिः... ...नामानि येषां ते. १२ Then—that is when he saw that they were stupid. १३ Averse to the study of sciences शास्त्रेभ्यः विगतानि मुखानि येषां तान् Bahu. Comp. १४ Having seen (absolutive of लोक् with आ) १५ Ministers. १६ Abs. of ह्वे with आ-Having called. १७ 3rd P. Sing. Perfect of वच् with प्र to speak, to address. १८ This is known to your honours or your honours are aware that &c. १९ Void of consideration or thought, thoughtless विवेकेन रहिताः तृ. त. २० So that when I look at them, my kingdom though large, does not bring (न आवहति) me any happiness. २१ Or rather, (used to modify or correct a foregoing statement). २२ This (what follows) is well-said or what follows is a good saying.

अजातमृतमूर्खेभ्यो मृताजातौ सुतौ वरम्।
यतस्तौ स्वल्पदुःखाय यावज्जीवं जडो दहेत्॥ २॥
वरं गर्भस्रावो वरमृतुषु नैवाभिगमनं
वरं जातप्रेतो वरमपि च कन्यैव जनिता।
वरं वन्ध्या भार्या वरमपि च गर्भेषु वसति-
र्नचाविद्वान्रूपद्रविणगुणयुक्तोऽपि तनयः॥ ३॥
किं तया क्रियते धेन्वा या न सूते न दुग्धदा।
कोऽर्थः पुत्रेण जातेन यो न विद्वान्न भक्तिमान्॥ ४॥
तदेतेषां यथा बुद्धिप्रबोधनं भवति तथा कोऽप्युपायोनुष्ठीयताम्। अ

---

२ Of the three kinds of sons,—viz., unborn, dead and stupic the two former are to be preferred (वरं) to the latter; sinc they (dead and unborn) cause little grief, (while) a stupi son will cause grief (lit. burn) as long as life endure अजात &c. is a द्वंद्व, and so is मृताजातौ. वरम् is derived from to choose, to prefer, to select and means—better, preferabl and is, in this sense, always followed by न—वरं—न should b therefore, translated by *better than, preferable to* &c. स्वल्प दुःखाय is, a कर्म. for this idiomatic use of the Dative, se Student's Guide; and यावज्जीवं—अ. स. जीवपर्यन्तं यावज्जीवम्. ३ It is better that there should be miscarriage, it is bette not to have sexual intercourse with one's wife during th favourable period (ऋतुषु), it is better to have a still-bor son, it is better to have even a daughter born, it is bette to have a barren wife, and it is also better that the chil should remain in the womb, than an illiterate son, thoug possessed of the qualities of beauty and wealth. Some edi tions omit this verse. गर्भस्रावः ष. त. जातप्रेत—क. आदौ जात पश्चात् प्रेतः. जनिता—P. P. of the caus. of जन्. अविद्वान्—न. त. विद्वान्. रूपद्रविणगुण—can be taken as a द्वंद्व—रूपं च द्रविणं च गुणा or as a क. रूपद्रविणे एव गुणैः and ताभ्यां युक्तः तृ. त. ४ What i to be done with, or what is the use of, that cow whic neither brings forth calves nor gives milk; what is the goo of a son being born, who is neither learned nor pious? दुग्ध दा—उपपद. दुग्धं ददातीति. कोऽर्थः—to be construed with the Ins trumental—See S. G. S. Comp. विद्वान् and भक्तिमान् are adje tives showing possession formed by the terminations मत् व वत्. ५ So that, in such a way that. ६ Awakening of intel another reading is प्रकाश: which means the same. It is ष. त ६ Any whatever. ७ Should be adopted or devised. It i 3rd P. Sing. of the Imperative of the Pass. of स्था with अनु

मद्दत्तां वृत्तिं भुञ्जानानां पण्डितानां पञ्चशती तिष्ठति । ततो यथा मम प्रयोजनं तथानुष्ठीयताम् । तत्रैकः प्रोवाच । देव द्वादशभिर्वर्षैर्व्याकरणं श्रूयते । ततो धर्मशास्त्राणि मन्वादीन्यर्थशास्त्राणि चाणक्यादीनि कामशास्त्राणि वात्स्यायनादीनि । एवं च ततो धर्मार्थकामशास्त्राणि ज्ञायन्ते । ततः प्रतिबोधनं भवति । तन्मध्यतोऽथापरः सुमतिनामा प्राह । अशाश्वतोऽयं जीवितव्यविषयः । प्रभूतकालज्ञेयानि शब्दशास्त्राणि । तत्संक्षेपमात्रं शास्त्रं किंचिदेतेषां प्रबोधनार्थं चिन्त्यतामिति । उक्तं च यतः ।

अनन्तपारं किल शब्दशास्त्रं स्वल्पं तथायुर्बहवश्च विघ्नाः ।
सारं ततो ग्राह्यमपास्य फल्गु हंसैर्यथा क्षीरमिवाम्बुमध्यात् ॥ ५ ॥

१ Given or granted by me (मया दत्ता. तृ. त.) २ Means of livelihood or subsistence ३ Gen. Plu. of भुञ्जान Pre. Part. of भुज् 7 A., to enjoy ४ An unusual form for पञ्चशत five hundred. ५ To succeed, (lit. go to or achieve success). ६ One from among them. Here तत्र तेषां or तेषु ७ In the course of twelve years. The Instrumental here denotes the time required for the completion of anything. See Student's Guide. ८ Is heard, that is, studied 3rd P. Sing. of the Passive of श्रु to hear, learn. ९ Then, after that. १० The Hindu Scriptures or codes of law. ११ Composed by Manu and others मनु आदिः येषां तानि &c. १२ Chanakya is the author of the science of polity १३ The science of love, or the Institutes of Love composed by Vatsyayana. All these subjects have श्रूयन्ते as the verb understood. १४ And then, in this way are learnt the three sciences Religion, Morality and Love. १५ Then there takes place the awakening (of the intellect) १६ Another person from among them. १७ Of the name of Sumati-सुमतिर्नाम यस्य. १८ Transitory. न शाश्वत. न. त. १९ The scope or limit of life. जीवितव्य is the Pot. Pass. Participle from जीव् formed by the affix तव्य. and here used as a substantive २० To be mastered (lit. known) after a long time प्रभूतकालेन ज्ञेयानि. तृ. त. २१ The sciences or treatises on grammar शब्दानां शास्त्रं. ष. त. २२ Short or brief संक्षेप. मात्रं यस्य. ब. २३ See 5 last page २४ Should be thought of. २५ And because it is said २६ The science of grammar is certainly of boundless extent, life is also short, and many are the obstacles in one's way through life; so the essence of it (science) should be taken, throwing off what is worthless, as milk is separated from the water with which it is mixed, by swans. अनन्त &c. न त्त. अन्तपारं यस्य तत्. ग्राह्य Pot. P.P. of ग्रह् formed by the affix य अपास्य absolutive from अस् to throw with अप. अम्बुमध्यात् अम्बुनः मध्यात्. ष. त.

तदत्रास्ति विष्णुशर्मा नाम ब्राह्मणः सकलशास्त्रपारंगमश्छात्र-संसदि लब्धकीर्तिः । तस्मै समर्पय त्वेतान् । स नूनं द्राक्प्रबुद्धान् करिष्यतीति । स राजा तदाकर्ण्य विष्णुशर्माणमाहूय प्रोवाच । भगवन्मदनुग्रहार्थमेतानर्थशास्त्रं प्रति द्रागनन्यसदृशान्विदधासि तथा कुरु । तदहं त्वां शासनशतेन योजयिष्यामि । अथ विष्णुशर्मा तं राजानमूचे । देव श्रूयतां मे तथ्यवचनम् । नाहं विद्याविक्रयं शासनशतेनापि करोमि । पुनरेतांस्तव पुत्रान्मासषट्केन यदि नीतिशास्त्रज्ञान्न करोमि ततः स्वनामत्यागं करोमि । अथासौ राजा ब्राह्मणस्यासंभाव्यां प्रतिज्ञां श्रुत्वा ससचिवः प्रहृष्टो विस्मयान्वितस्तस्मै सा-

---

१ शर्मन् (m.). Is an addition to the names of Bráhmans. २ See note 7 on page 2. ३ Who has acquired fame (for teaching) in the assembly of pupils. छात्रसंसदि=छात्राणां संसदि. ष. त. लब्धकीर्ति=लब्धा कीर्तिर्येन. ब. ४ Hand over, give in charge. ५ Indeed ६ Quickly speedily. ७ Wise, clever. ८ Abs. from कर्ण् U. with आ—to hear, listen. ९ Abs from ह्वे 1 P. with आ. १० Reverend in this sense it is used, in addressing divine or great personages. ११ To confer a favour on me मम अनुग्रहार्थम्. some editions add. कुमारान after एतान. १२ As regards the knowledge of अर्थशास्त्र. १३ Not like others, superior to other अन्य सदृशा न भवन्ति तान्. न त. १४ Then I shall confer on you a hundred grants (of lands &c..) शासनं a royal grant ; योजयिष्यामि 2nd Future 1st P. Sing. of the caus. of युज १५ The form is 3rd P. Sing. Imper. of श्रु Pass.-let (it) be heard hear. This is a polite way of command or order. १६ True words तथ्यं वचनं. क. १७ The sale of knowledge or learning १८ Even for a hundred grants. The Instr is used of that which denotes the price at which a thing is bought or sold. १९ But २० By the end of six months or collection of six months. २१ Conversant with the science of politics नीतिशास्त्रं जानतीति. उप. २२ I shall give up my name. This is a usual form of swearing; Cf. Maráthi नांव बदलून ठेवीन. २३ Impossible—न. त. २४ Promise, vow. २५ Together with the ministers सचिवैः सहितः. ब. २६ P. P. of हृष् 4 P. with प्र. to be glad. २७ Full of wonder. तृ. त २८ Respectfully आदरेण सहितं. अ.

कुमारान्समर्प्य परां निर्वृतिमाजगाम । विष्णुशर्मणापि नाना-तदर्थं मित्रभेदमित्रप्राप्तिकाकोलूकीयलब्धप्रणाशापरीक्षित-कारकाणि चेति पञ्च तन्त्राणि रचयित्वा पाठितास्ते राजपुत्राः । तेपि अधीत्य मासषट्केन यथोक्ताः संवृत्ताः । ततः प्रभृत्येतत्पञ्चतन्त्रकं नीतिशास्त्रं बालावबोधनार्थं भूतले संप्रवृत्तम् । किं बहुना ।

अधीते य इदं नित्यं नीतिशास्त्रं शृणोति च ।
न पराभवमाप्नोति शक्रादपि कदाचन ॥ ६ ॥

॥ कथामुखमेतत् ॥

---

१ Great. २ Happiness: and निर्वृतिमाजगाम means—Became or felt happy. ३ This is the agent of the verb पाठिता and the absolutives आदाय, रचयित्वा &c., are passive sense. It is to be noted that the forms of the Infinitive purpose in तुम् and absolutives in त्वा or य are the same both in the active and passive voices. ४ For their sake. ५ These are the titles of the five Tantras in order :—(a) मित्रभेद (प्र. त.) the separation of friends. (b) मित्रप्राप्ति the acquisition of friends. (c) काकोलूकीयं—Is the title of the 3rd Tantra. So called because it describes the war between काक (crows) and उलूक (owls). (d) लब्धप्रणाश (ष. त.) the loss of what is obtained and (e) अपरी. &c प. त. the doer of an inconsiderate action. ६ Were taught. P. P. of caus. of पठ् 1 P. to learn. ७ Having studied them. Abs. of इ with अधि. ८ Became (संवृत्ताः) as it was promised they should be, viz., नीतिशास्त्रज्ञाः. ९ Thenceforward. प्रभृति here means commencing &c. १० Containing 5 Tantras the क being added to a द्वि. compound. ११ On the surface of the earth. ष. त. १२ Became known or came into use. P. P. of वृत् 1 A. with सम्प्र. १३ What is the use of more? What need we say more? In short. १४ He who always studies this science of politics and hears it, never meets with a defeat even at the hands of S'akra (Indra). १५ The introductory portion of a tale.

अथ

प्रथमतन्त्रम् ।

[१]अथातः प्रारभ्यते[२] मित्रभेदं नाम प्रथमं तंत्रं यस्यायमादिमः श्लोकः[३] ।

वर्धमानो महान्स्नेहः सिंहगोवृषयोर्वने ।
पिशुनेनातिलुब्धेन जम्बुकेन विनाशितः ॥ १ ॥

तद्यथानुश्रूयते । अस्ति दाक्षिणात्ये जनपदे महिलारोप्यं नाम नगरम् । तत्र धर्मोपार्जितभूरिविभवो[६] वर्धमानको नाम वणिक्पुत्रो[७] बभूव । तस्य कदाचिच्चिन्ता[८] समुत्पन्ना[९] यत्प्रभूतेऽपि[१०] वित्ते सत्यर्थोत्पत्त्युपायाश्चि-न्तनीयाः कर्तव्याश्चेति[११] । यत उक्तं च ।

न[१२] हि तद्विद्यते किंचिद्यदर्थेन न सिध्यति ।
यत्नेन मतिमांस्तस्मादर्थमेकं प्रसाधयेत् ॥ २ ॥

---

१ Used to mark the beginning of a work. २ Is begun, begins, 1st P. of the pass. of रभ् with प्र and आ. ३ First. ४ Verse. A great and increasing friendship between a lion and an excellent bull (गोवृष) in the forest, was destroyed by a vary avaricious and malicious jackal. वर्धमान Pre. P. of वृध् 1 A. Another reading for सिंहगोवृषयोः is मृगेन्द्रवृषयोः :— where मृगेन्द्र means the best of, or the lord of, lions. सिंहश्च गोवृषश्च. द्वंद्व. विनाशितः P. P. of नश् with वि caus. ६ One who had acquired immense riches by a just or honest course of conduct. धर्मेण उपार्जितः भूरिविभवः येन. ब. ७ The son of a merchant. ८ Once upon a time. ९ An anxiety arose. P.P. of पद् 4 A. with समुद्. १० Even though there was immense wealth. Loc. Abs. ११ The means of acquiring or producing wealth should be thought of and put in practice. अर्थोत्पत्त्युपायाः ष. त. चिन्तनीयाः and कर्तव्याः Pot. P. P. of चिन्त् and कृ. १२ There exists no such thing as does not succeed by means of wealth; a talented man, therefore, should acquire wealth exclusively or alone with efforts. प्रसाधयेत् Pot. 3rd. P. Sing. of the caus. of साध् 5 P. with प्र.

[1]यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः ।
यस्यार्थाः स पुमाँल्लोके यस्यार्थाः स च पण्डितः ॥ ३ ॥
[2]न सा विद्या न तद्दानं न तच्छिल्पं न सा कला ।
अर्थार्थिभिन तत्स्थैर्यं धनिनां यन्न गीयते ॥ ४ ॥
[3]इह लोके हि धनिनां परोपि स्वजनायते ।
स्वजनोपि दरिद्राणां तत्क्षणाद्दुर्जनायते ॥ ५ ॥
[4]अर्थेभ्योपि हि वृद्धेभ्यः संवृत्तेभ्यस्ततस्ततः ।
प्रवर्तन्ते क्रियाः सर्वाः पर्वतेभ्य इवापगाः ॥ ६ ॥
[5]पूज्यते यदपूज्योपि यदगम्योपि गम्यते ।
वन्द्यते यदवन्द्योपि स प्रभावो धनस्य च ॥ ७ ॥
[6]अशनादिन्द्रियाणीव स्युः कार्याण्यखिलान्यपि ।
एतस्मात्कारणाद्वित्तं सर्वसाधनमुच्यते ॥ ८ ॥

---

१ He who has wealth, has friends; he who has wealth, has relations, he who has wealth, is really a man in this world and he, who has wealth is clever or learned २ That is not learning, that is not charity, that is not skill in arts, that is not skill and that is not steadiness, of the rich which is not sung or praised by those who are in need of money; that is to say, that quality which the needy do not ascribe to the rich is not a quality. ३ For, in this world even a stranger becomes a relative or acts as a relative of the rich; (while) even a relative of the poor becomes wicked or acts wickedly towards them in a moment पर may also mean an enemy. स्वजनायते = स्वजनवदाचरति a denominative form: so also दुर्जनायते. ४ For, all actions proceed from riches increased and produced anew from time to time, as rivers proceed or issue from mountains. वृद्ध P P. of वृध् 1 A.; and संवृत्त is P. P. of वृत with सम्. ५ That he who deserves no respect, is respected, he who does not deserve to be resorted to, is resorted to, and he who does not deserve to be saluted, is saluted, is the power of wealth. अपूज्य, अगम्य and अवन्द्य are न त. ६ As the organs of sense depend on eating, so are all actions dependent on wealth; for this reason it (wealth) is said to be the means of accomplishing all things. उच्यते. 3rd P. Sing. Pass. of वच् 2 P. to speak.

[१]अर्थार्थी जीवलोकोऽयं श्मशानमपि सेवते ।
त्यक्त्वा जनयितारं स्वं निःस्वं गच्छति दूरतः ॥ ९ ॥
[२]गतवयसामपि पुंसां येषामर्था भवन्ति ते तरुणाः ।
अर्थेन तु ये हीना वृद्धास्ते यौवनेऽपि स्युः ॥ १० ॥

स चार्थः पुरुषाणां षड्भिरुपायैर्भवति भिक्षया नृपसेवया [३]कृषिकर्मणा [४]विद्योपार्जनया [५]व्यवहारेण च [६]वणिक्कर्मणा वा । [७]सर्वेषामपि तेषां वाणिज्येनातिरस्कृतोऽर्थलाभः स्यात् । उक्तं च यतः ।

[८]कृता भिक्षा रैकैर्वितरति नृपो नोचितमहो
कृषिः क्लिष्टावृष्ट्या प्रचुरगहनः सेवनविधिः ।
कुसीदाद्दारिद्र्यं परकरगतग्रन्थिशमना-
न्न मन्ये वाणिज्यात्किमपि परमं वर्तनमिह ॥ ११ ॥

१ This world of mortals, always hankering after wealth, frequents, even burial grounds (the most horrible places imaginable); and having deserted even him who gives birth (father) when destitute of wealth, goes far away or afar off. अर्थार्थी—अर्थं अर्थयते इति. उ. जीवलोक ष. त. निःस्वं—निर्गतं स्वं यस्मात्. ब. २ Even among those who are advanced in age, those who possess riches, become young (are considered to be young), but those who are destitute of riches though in full youth, are old (considered old). गत—गतानि वयांसि येषां तेषां. ब. ३ Agricultural operations. ४ Acquisition. ५ Trade, commerce. ६ The profession of a merchant. ७ Of all these means of being rich, that of trading is the best, because wealth acquired by it is not looked down upon with contempt. वाणिज्य abstract noun from वणिज्. ८ Begging alms is practised by the out-castes ; a king does not give what one deserves ; husbandry is spoiled by absence of rain ; the act of serving or the service or attendance on others (for acquiring knowledge) is very difficult ; poverty arises from usury by reason of the loss of the purse of money gone into the hands of others ; (so) I think there is no better means of livelihood than trade क्लिष्टा P. P. of क्लिश् 6 P. अवृष्टि न. त. प्रचुरगहन—प्रचुरं यथातथा गहन greatly distressing परकर.. शमनात्—ष. त. परम has the force of the comparative here.

[1]उपायानां च सर्वेषामुपायः पण्यसंग्रहः ।
धनार्थं शस्यते ह्येकस्तदन्यः संशयात्मकः ॥ १२ ॥

तच्च वाणिज्यं सप्तविधमर्थागमाय स्यात्तद्यथा गान्धिकव्यवहारो निक्षेपप्रवेशो गोष्ठिककर्म परिचितग्राहकागमो मिथ्याक्रयकथनं कूटतुलामानं देशान्तराद्भाण्डानयनं चेति । उक्तं च ।

[12]पण्यानां गान्धिकं पण्यं किमन्यैः काञ्चनादिभिः ।
यत्रैकेन च यत्क्रीतं तच्छतेन प्रदीयते ॥ १३ ॥
[13]निक्षेपे पतिते हर्म्ये श्रेष्ठी स्तौति स्वदेवताम् ।
निक्षेपी म्रियते तुभ्यं प्रदास्याम्युपयाचितम् ॥ १४ ॥
[14]गोष्ठिककर्मनियुक्तः श्रेष्ठी चिन्तयति चेतसा हृष्टः ।
वसुधा वसुसंपूर्णा मयाद्य लब्धा किमन्येन ॥ १५ ॥

१ Of all the means of acquiring wealth, the storing up of saleable wares is the best or the only one; for one (that of storing up wares) is praised for the sake of wealth, and all the rest besides it are doubtful. शस्यते Pass. of शंस्. संशयात्मक. ब. संशयः आत्मा यस्य. २ Of seven kinds or seven-fold सप्त विधाः यस्य सः. ब. ३ For the acquisition of weath. ४ It is as follows. ५ The occupation of a perfumer. ६ The revenue or income derived from deposits. ७ The transaction of business for a company of traders. ८ The coming of a customer of one's acquaintance. ९ The telling of false prices. १० Weighing out things to buyers out of false balances. ११ Bringing in or importing goods for sale from other countries. १२ Of all saleable wares that of a perfumer is the best; what need is there of gold and other valuable articles? in which (the profession of a perfumer) that which is bought for one is sold for a hundred. किमन्यैः...Another reading is किमुच्चैः कांचनादिभिः which means what need is there then of costly or high metals, such as gold &c. ? यत्र=यस्मिन् गांधिकव्यवहारे. १३ When a deposit is kept in a house, the merchant in whose house it is kept, prays his own deity, as follows :—" If the depositor should die or dies, I shall make you a present of anything. " श्रेष्ठिन् a big- merchant; Cf. Maráthi शेटजी. म्रियते=म्रियेत. १४ A trader engaged in transacting business for a company being delighted at heart thinks, " I have to-day obtained the whole of the earth full of wealth–what need is there of other things? " गोष्ठिक...नियुक्त. स. त. वसुसंपूर्णा–तृ. त.

परिचितमागच्छन्तं ग्राहकमुत्कण्ठया विलोक्यासौ।
हृष्यति तद्धनलुब्धो यद्वत्पुत्रेण जातेन ॥ १६ ॥

अन्यच्च। पूर्णापूर्णे माने परिचितजनवञ्चनं तथा नित्यम्।
मिथ्याक्रयस्य कथनं निजधर्मोयं किरातानाम् ॥ १७ ॥

अन्यच्च। द्विगुणं त्रिगुणं वापि भाण्डक्रयविधानतः।
प्राप्नुवन्त्युद्यमाँल्लोका दूरदेशान्तरं गताः ॥ १८ ॥

इत्येवं संप्रधार्य मथुरागामीनि भाण्डान्यादाय शुभायां तिथौ गुरुजनाभ्यनुज्ञातः सुरथाधिरूढः प्रस्थितः। तस्य च मङ्गलैवृषभौ संजीवकनन्दकनामानौ गृहोत्पन्नौ धूर्वोढारौ स्थितौ। तयोरेकः संजीवकाभिधानो यमुनाकच्छमवतीर्णः सन्पङ्कपूरमासाद्य कलितचरणो युगभंगं विधाय निषसाद। अथ तं तदवस्थमालोक्य वर्धमानः परं विषादमगमत्।

१ A shop-keeper having seen with eagerness a customer of his acquaintance going towards him, feels delighted being greedy of his money, as much as people do (feel delighted) at the birth of a son. २ And moreover. ३ Dealing out full and half measures, so also deceiving persons of acquaintance, telling false prices—this is (considered as) the proper duty of the *Kirātās*; or the first line may be differently translated; as always deceiving &c......as regards full and half measures of things. पूर्णापूर्ण–द्वंद्व. निजधर्मः—क. ४ People gone to distant, foreign countries obtain two or three-fold riches by selling their goods with great exertions. ५ Having resolved. ६ Going towards *Mathurā*. ७ On an auspicious day. ८ Being permitted by his elders. गुरुजनैरभ्यनुज्ञातः तृ. त. ९ Mounted on a good chariot. स. त. १० Bulls with auspicious marks or signs on their bodies. क. ११ Born or bred up in the house. १२ Bulls yoked to a carriage. १३ Bearing the name of *Sanjīvaka*–संजीवकः अभिधानं यस्य. ब. १४ When he had descended down to the bank of the *Yamunā*. अवतीर्ण P. P. of तॄ 1 P. with अव. १५ Having got to or reached a place full of deep mud. पंकपूर lit. a flood of mud, and आसाद्य abs. of सद् caus. with आ. १६ Whose leg was impelled or pushed forward or broken. कलित P. P. of कल् 10 U. To impel forward ब. १७ The breaking of the yoke. १८ Sat down. Perfect 3rd P. Sing. of सद् with नि. १९ In that condition. सा अवस्था यस्य ब. २० Dejection, sorrow.

तदर्थं च स्नेहार्द्रहृदयस्त्रिरात्रं प्रयाणभंगमकरोत् । अथ तं विषण्णमालोक्य सार्थिकैरभिहितम् । भोः श्रेष्ठिन्किमेवं वृषभस्य कृते सिंहव्याघ्रसमाकुलेऽस्मिन्वने बहूपाये समग्रोपि सार्थस्त्वया संदेहे नियोजितः । उक्तं च ।

न स्वल्पस्य कृते भूरि नाशयेन्मतिमान्नरः ।
एतदेव हि पाण्डित्यं यत्स्वल्पाद्भूरिरक्षणम् ॥ १९ ॥

अथासौ तदवधार्य संजीवकस्य रक्षापुरुषान्निरूप्य शेषसार्थं नीत्वा प्रस्थितः । अथ रक्षापुरुषा अपि बहूपायं तद्वनं विदित्वा संजीवकं परित्यज्य पृष्ठतो गत्वान्येद्युस्तं सार्थवाहं मिथ्याहुः । स्वामिन्मृतोसौ संजीवकोऽस्माभिस्तु सार्थवाहस्याभीष्ट इति मत्वा वह्निना संस्कृत इति । तच्छ्रुत्वा सार्थवाहः कृतज्ञः स्नेहार्द्रहृदयस्तस्यौर्ध्वदेहिकक्रिया वृषोत्सर्गादिकाः सर्वाश्च-

१ Whose heart was melted with affection for him. स्नेहेन आर्द्रं हृदयं यस्य सः. ब. २ For three nights-It is an accusative of time and the compound is समाहार-द्विगु-तिसृणां रात्रीणां समाहारः. ३ Made a halt. (lit. broke his journey or march. प्रयाण from या with प्र). ४ Dejected. P. P. of सद् 1 P. with वि ५ Traders, merchants. ६ P. P. of धा 3 U. with अभि to speak. ७ For, for the sake of-governing the Genitive. ८ Full of or abounding in lions and tigers त. त. ९ Full of many calamities or hardships बहवोऽपायाः यस्मिन्. ब. १० All, entire. ११ A caravan १२ Placed or put in danger. १३ A talented man should not cause the destruction of much for the sake of a little, this alone is wisdom or prudence, viz., saving much at the sacrifice of a little. भूरि is here used as a substantive. १४ Abs. of धृ 10 U. with अव To consider, to think of १५ A guard or watchman रक्षार्थं पुरुषाः च. त. १६ Having appointed (abs. of रूप् 10 with नि). १७ The remaining or rest of the caravan. १८ Having carried or led, that is, with. १९ From behind. २० The next day. २१ The leader or conductor of a caravan-सार्थं वाहयतीति. उ. स. २२ Falsely. २३ Optional form for ब्रुवन्ति. २४ Favourite. P. P. of इष् with अभि. २५ By fire. २६ Consecrated P. P. of कृ with सम्. २७ It is used to finish a report or speech. २८ Grateful कृतं जानातीति. उप. २९ Funeral ceremonies, adj. from ऊर्ध्वदेह. It is कर्मधारय. ३० In which the letting loose of a bull was the first or chief. वृषस्य उत्सर्गः आदिर्यासां ताः. ब.

ङ्कार। संजीवकोप्यायुःशेषतया यमुनासलिलमिश्रैः शिशिरतरवातैराप्यायितशरीरः कथंचिदप्युत्थाय यमुनातटमुपपेदे। तत्र मरकतसदृशानि बालतृणाग्राणि भक्षयमाणः कतिपयैरहोभिर्हरवृषभ इव पीनः ककुद्मान्बलवांश्च संवृत्तः प्रत्यहं वल्मीकशिखराग्राणि शृङ्गाभ्यां विदारयन्गर्जन्नास्ते। साधु चेदमुच्यते।

अरक्षितं तिष्ठति दैवरक्षितं
सुरक्षितं दैवहतं विनश्यति।
जीवत्यनाथोपि वने विसर्जितः
कृतप्रयत्नोपि गृहे विनश्यति ॥ २० ॥

अथ कदाचित्पिङ्गलको नाम सिंहः सर्वमृगपरिवृतः पिपासाकुल उदकग्रहणार्थं यमुनातटमवतीर्णः संजीवकस्य गम्भीरतरं शब्दं दूरादेवाशृ-

---

१ By reason of his life remaining unspent. आयुषः शेषः तस्य भाव–आयुःशेषता. २ Mixed with the water of the *Yamuná*, carrying with them the water of &c ३ By cool breezes. ४ Whose body was refreshed आप्यायित P. P of the caus. of प्यै with आ to increase–आप्यायितं शरीरं यस्य सः ब. ५ Somehow with difficulty. ६ Having stood up (abs. of स्था with उद्). ७ Approached. ८ Resembling or like emerald. मरकतेन सदृशानि. तृ. त. ९ The ends of tender grass १० Eating browsing. Pres P. of भक्ष् 1 A. ११ Several. १२ By days Instr. Plural of अहन्. १३ The bull of *Hara* or *S'iva* used by him as his vehicle. १४ P.P of प्यै 1P. to grow, increase. १५ Having a hump (ककुद्) on the shoulders. १६ Every day; adverbial compound अहनि अहनि इति प्रत्यहम्. १७ The ends of ant hills. १८ Tearing. १९ Roaring, thundering. २० And it is well said. २१ What is unprotected stands protected by fate; what is well-guarded perishes when struck by fate; one abandoned in the forest without any helper, lives, while one dies in the house, even though efforts be made to save him. In the first 2 lines something like वस्तु should be understood as the subjects of तिष्ठति and विनश्यति and in the last 2 lines कः or कोपि. अनाथः ब. नास्ति नाथो यस्य; कृताः प्रयत्नाः यस्मै. ब. Another reading for the second विनश्यति is न जीवति which gives the same sense. २२ Then once upon a time. २३ Surrounded by all beasts, तृ. त. २४ Afflicted by thirst पिपासया आकुलः–पिपासा–Noun from the desiderative of पा to drink. २५ For drinking water. २६ Bank. २७ Graver or louder.

णोत् । तं च श्रुत्वातीवं व्याकुलहृदयः ससाध्वसमाकारं प्रच्छाद्य वटवृक्षतले चतुर्मण्डलावस्थानेनावस्थितः । चतुर्मण्डलावस्थानं त्विदम् । सिंहः सिंहानुयायिनः काकरवाः किंवृत्ता इति । अथ तस्य करटकदमनकनामानौ द्वौ शृगालौ मन्त्रिपुत्रौ भ्रष्टाधिकारौ सदानुयायिनावास्ताम् । तौ च परस्परं मन्त्रयतः । तत्र दमनकोब्रवीत् । भद्र करटक अयं तावदस्मत्स्वामी पिङ्गलक उदकग्रहणार्थं यमुनाकच्छमवतीर्य स्थितः । स किं निमित्तं पिपासाकुलोपि निवृत्य व्यूहरचनां कृत्वा दौर्मनस्येनाभिभूतोत्र वटतले स्थितः । करटक आह । किमावयोरनेन व्यापारेण ।

अव्यापारेषु व्यापारं यो नरः कर्तुमिच्छति ।
स एव निधनं याति कीलोत्पाटीव वानरः ॥ २१ ॥

दमनक आह । कथमेतत् । सोब्रवीत् ।

१ Greatly. २ Frightened at heart व्याकुलं हृदयं यस्य सः. ३ Full of terror, frightened. ४ Appearance. ५ Having concealed or disguised. Abs. of छाद् 10 U. with प्र. ६ Under a banian tree. ७ Forming a circle of four. ८ Remained. ९ The followers of the lion. १० काकरवाः or काकरवर्गः. The middle class of attendants मध्यमवर्गः. ११ किंवृत्ताः Persons placed at the skirt of the forest probably to bring news from outside इत्तमतःप्रवृत्तमाः. १२ Jackals. १३ The sons of minister. ष. तः १४ Who had lost their authority or were removed from office *viz.*, of minister ब. १५ Always in attendance on the lion. सदा अनुयान्तीति . उप. १६ Mutually १७ Hold a consultation or consult with each other. १८ तत्र = तयोः—of the two. १९ It is a title of address and means, good sir, or sir. २० As regards, अथ तावदस्मत्स्वामी as to, or as regards, this our master. २१ Bank. २२ For what reason, Why? २३ Abs. of वृत् with नि I A. २४ Having formed a battle-array. व्यूहरचना [illegible]. २५ Mental pain or affliction. It is an abstract noun from दुर्मनस् evil minded. २६ Overtaken, P. P. of भू with अभि. २७ What have we (two) to do with this business or affair? For this peculiar use of the instrumental, see Student's Guide and the Lesson thereon. २८ That man who wishes to meddle *with affairs with which he is not concerned* (अव्यापारेषु) meets with certain death, as did the monkey drawing out a wedge (in the following story). १ How this was?

॥ कथा १ ॥

अस्ति कस्मिंश्चिन्नगराभ्यासे[1] केनापि वणिक्पुत्रेण[3] तरुषण्डमध्ये[4] देवतायतनं[5] कर्तुमारब्धम्[6]। तत्र ये च कर्मकराः[7] स्थपत्यादयस्ते[8] मध्याह्नवेलायामाहारार्थं[10] नगरमध्ये[11] व्रजन्ति। अथ कदाचित्तत्रानुषङ्गिकं[12] वानरयूथमितश्चेतश्च[14] परिभ्रमदागतम्[15]। तत्रैकस्य कस्यचिच्छिल्पिनोऽर्धस्फाटितो[17]ऽञ्जनवृक्षदारुमयः[18] स्तम्भः[19] खदिरकीलकेन[20] मध्यनिहितेन[21] तिष्ठति। अत्रान्तरे[22] वानरास्तरुशिखरप्रासादशृङ्गदारुपर्यन्तेषु[23] यथेच्छया[24] क्रीडितुमारब्धाः[26]। एकश्च तेषां प्रत्यासन्नमृत्युश्चापल्यात्तस्मिन्नर्धस्फाटितस्तम्भ उपविश्य पाणिभ्यां

---

१ In a certain. चित् added to the declensional forms of किम् gives them the sense of definiteness. २ Vicinity. ३ The son of (वणिज्) a trader. ४ A group, grove. Another reading is खंड having the same sense. ५ The temple of a deity (lit. abode or house of a deity). ६ Was begun to be erected or built. ७ Workmen. ८ Carpenters and others. (स्थपतिरादिर्येषां ते. ब.) ९ At the time of midday मध्यं अहः मध्याह्नः–अहन् being changed to अह्न at the end of a कर्मधारय. १० For taking their meals. ११ Into the middle of the town. १२ Attached to or associated with. It is an adjective from अनुषंग formed by the termination इक. १३ A herd. १४ Here and there, to and fro. १५ Wandering or roving. १६ Of an artisan or mechanic. १७ Half-split. १८ Of the wood or timber of a tree called अंजन. १९ A pillar; post. २० A wedge made of a tree called खदिर. २१ Put or placed between. स. त. २२ अत्रांतरे=अस्मिन्नन्तरे during this interval, in the mean time. २३ On the tops of trees and the pieces of wood at the summits of palaces. तरुशिखरं च प्रासादशृंगदारु च=तरुशिखरप्रासादशृंगदारुणी. द्वंद्व. तयोः पर्यन्तः ष. त. २४ An inaccurate form for यथेच्छम् at their will, as they pleased. २५ To sport. In. of purpose from क्रीड् 1 P. २६ P. P. forms are very frequently used for active verbal forms; here आरब्धा=आरभन्त. २७ He whose death was near or at hand प्रत्यासन्नो मृत्युर्यस्य. ब. २८ Through rashness or hastiness. २९ With the two hands.

कीलकं संगृह्य यावदुत्पाटयितुमारेभे तावत्तस्य स्तम्भमध्यगतवृषणस्य स्वस्थानाच्चलितकीलकेन यद्वृत्तं तत्प्रागेव निवेदितम् ॥

अतोऽहं ब्रवीमि । अव्यापारेष्विति । आवयोर्भक्षितशेष आहारोऽस्त्येव तत्किममुना व्यापारेण । दमनक आह । तत्किं भवानाहारार्थी केवलमेव । तन्न युक्तम् । उक्तं च ।

सुहृदामुपकारकारणाद्द्विषतामप्यपकारकारणात् ।
नृपसंश्रय इष्यते बुधैर्जठरं को न बिभर्ति केवलम् ॥ २२ ॥

किंच । यस्मिञ्जीवति जीवन्ति बहवः सोऽत्र जीवति ।
वयांसि किं न कुर्वन्ति चञ्च्वा स्वोदरपूरणम् ॥ २३ ॥

यज्जीव्यते क्षणमपि प्रथितं मनुष्यै-
र्विज्ञानशौर्यविभवार्यगुणैः समेतम् ।
तन्नाम जीवितमिह प्रवदन्ति तज्ज्ञाः
काकोऽपि जीवति चिरं च बलिं च भुङ्क्ते ॥ २४ ॥

---

१ यावत्—तावत् as soon as, no sooner than. २ To draw out, to extract. Inf. of the caus. of पट् 1 P. with उद्. ३ Whose testicles had been caught between the two pieces of the pillar स्तंभमध्ये गतो वृषणो यस्य. ब. व. ४ By the wedge being moved from its proper place, by reason of the removal of the wedge from its place. ५ What happened. ६ Already. ७ Has been told. ८ The remains of what is eaten, what remains after eating भक्षितात् शेषः पं. त. ९ Here एव means positively, surely. १० Longing for food. ११ Right, proper. १२ The patronage of a king is desired by wise persons with the two-fold motive of obliging their friends and injuring their enemies; who does not fill his belly only? १३ He is said to live in this world by whose living many live; do not birds (even) fill their bellies by means of their [illegible]? यस्मिन् जीवति Loc. abs. १४ That well-known or celebrated existence which is led even for a moment by men accompanied with knowledge, bravery and noble qualities is indeed to be so called, say the wise; (for otherwise) even a crow lives long and feeds on oblations. [illegible] Such a construction is not allowable in English. [illegible] आर्यगुणैः ... गुणाः, समेतम् P. P. of इ [illegible]. तज्ज्ञाः [illegible]

सुपूरा स्यात्कुनदिका सुपूरो मूषिकाञ्जलिः ।
सुसंतुष्टः कापुरुषः स्वल्पकेनापि तुष्यति ॥ २५ ॥
च । किं तेन जातु जातेन मातुर्यौवनहारिणा ।
आरोहति न यः स्वस्य वंशस्याग्रे ध्वजो यथा ॥ २६ ॥
रा च । परिवर्तिनि संसारे मृतः को वा न जायते ।
जातस्तु गण्यते सोऽत्र यः स्फुरत्यन्वयाधिकम् ॥ २७ ॥
च । जातस्य नदीतीरे तस्यापि तृणस्य जन्मसाफल्यम् ।
यत्सलिलमज्जनाकुलजनहस्तावलम्बनं भवति ॥ २८ ॥
रा च । स्तिमितोन्नतसंचारा जनसंतापहारिणः ।
जायन्ते विरला लोके जलदा इव सज्जनाः ॥ २९ ॥

A rivulet can be easily filled, the cavity of a mouse be easily filled, a mean fellw whose desires are limited pleased even with a little. सुपूरा-सुखेन पूरयितुं शक्या. कुनदिका-ता नदी a small or insiguificant river. स्वल्पक dimnuitive स्वल्प. २ What is the use at all of that person's birth who y deprives the mother of her youth but who never s to the top of his family as a banner floats on the of a bamboo? जातु=at all. यौवनहारिणा=यौवनं हरतीति. वंश (1) race, family; (2 a bamboo used for banners. n this ever-revolving world what person that is dead not possibly born again? (every one that dies, is born in); but he is considered to be really born in this ld who shines forth more than any member of his ily. वा possibly, I should like to know—अन्वयाधिकम् = न्वयात् अधिकं यथा तथा. ४ There is the fruitfulness of even that ass which grows on river-side and which serves as a sup-t for the persons who are in danger of being drowned in ter. साफल्य abstract noun from सफल fruitful. सलिल-मं-लिले मज्जनात् आकुलस्य जनस्य हस्तयोरवलंबनं. ५ Good men, who steady and move in high circles and who remove the tion of the wretched, are rarely born in this world, as ds, which are full of water or moisture and move high in the sky and allay the pain of those afflicted by heat arcely rise in the sky. स्तिमित (1) steady. (2) moist, wet नतसंचार is a ब. स्तब्धः संचारः येषां ते. Having the same sense both cases.

[1]निरतिशयं गरिमाणं तेन जनन्याः स्मरन्ति विद्वांसः ।
यत्कमपि वहति गर्भं महतामपि यो गुरुर्भवति ॥ ३० ॥
[2]अप्रकटीकृतशक्तिः शक्तोपि जनस्तिरस्क्रियां लभते ।
निवसन्नन्तर्दारुणि लङ्घ्यो वह्निर्न तु ज्वलितः ॥ ३१ ॥

करटक आह । आवां तावदप्रधानौ तत्किमावयोरनेन व्यापारेण ।
उक्तं च । [4]अपृष्टोत्राप्रधानो यो ब्रूते राज्ञः पुरः कुधीः ।
न केवलमसंमानं लभते च तिरस्क्रियाम् ॥ ३२ ॥
तथा च । [5]वचस्तत्र प्रयोक्तव्यं यत्रोक्तं लभते फलम् ।
स्थायीभवति चात्यन्तं रागः शुक्लपटे यथा ॥ ३३ ॥
दमनक आह । मा[6] मैवं वद ।

---

१ It is *for that reason* (तेन) that the learned remember the excessive greatness of the mother; since she gives birth to some one who (afterwards) becomes an object of adoration even to the great. निरतिशयं = नास्ति अतिशयः यस्मात्. ब. कमपि some one insignificant at birth. २ Even an able person, who has not put forth his strength, meets with contempt ; fire residing (concealed) in the wood can be passed over and not when it is blazing. अप्रक-क्तिः-न प्रकटीकृता शक्तिः येन सः. ब. ३ Not ministers, that is, not employed as ministers. ४ That stupid man, who not being a minister says anything before a king without being asked(to do so),meets not only with disrespect but also contempt. कुधीः–कु Ind. a prefix placed before words to show badness, reproach, &c. It assumes the forms कद् as in कदशन, कव as in कवोष्णा, का as in कापुरुष and किम् as in किंपुरुष. ५ Words should be spoken only there where when spoken, they produce the desired fruit or result and make a lasting impression, as red colour does on a white garment. प्रयोक्तव्य lit. should be used, or employed. स्थायीं भवति–Is one of those forms which show *being like or doing like the thing denoted by the base, e. g.* गंगीभवति, स्थिरीकरोति. ६ A prohibitive particle meaning *do not.*

[1]अप्रधानः प्रधानः स्यात्सेवते यदि पार्थिवम् ।
प्रधानोऽप्यप्रधानः स्याद्यदि सेवाविवर्जितः ॥ ३४ ॥

यत[2] उक्तं च । [3]आसन्नमेव नृपतिर्भजते मनुष्यं
विद्याविहीनमकुलीनमसंस्कृतं वा ।
प्रायेण भूमिपतयः प्रमदा लताश्च
यत्पार्श्वतो भवति तत्परिवेष्टयन्ति ॥ ३५ ॥

तथा च । [4]कोपप्रसादवस्तूनि ये विचिन्वन्ति सेवकाः ।
आरोहन्ति शनैःपश्चाद्धुन्वन्तमपि पार्थिवम् ॥ ३६ ॥
[5]विद्यावतां महेच्छानां शिल्पविक्रमशालिनाम् ।
सेवावृत्तिविदां चैव नाश्रयः पार्थिवं विना ॥ ३७ ॥
[6]ये जात्यादिमहोत्साहान्नरेन्द्रान्नोपयान्ति च ।
तेषामामरणं भिक्षा प्रायश्चित्तं विनिर्मितम् ॥ ३८ ॥

---

१ He, who is not a minister, will be one if he serve the king; (while) even one who is actually a minister will not be so, if he does not serve. सेवाविवर्जित नृ. त. वर्जित P. P. of वृज्. २ And because it is said. ३ A king honour (भजते) that man who is near him though destitute of learning, low-born and unsanctified by religious ceremonies (or him whose mind has received no culture); generally, *the lords of the earth* (kings), young women and creepers cling to that which lies by their side. पार्श्वतः पार्श्व side and तस् added in the sense of the locative=पार्श्वे ४ Those servants who (try to) seek for causes of displeasure and pleasure (of the king), gradually afterward get ascendency over a king who may be first *treating them roughly* (धुन्वंतं). कोप....वस्तु न–things of anger and pleasure-such things as will excite his anger or please him. धुन्वंत Pre. P. of धू to shake, to treat roughly. ५ There is no resort without a king to those who possess learning ambition, skill or ingenuity (शिल्प) and bravery and who know the mode or manner of serving: महेच्छानां=महती इच्छा येषां ते. ष. शालिन् at the end of compounds means endowed with ६ Beggary is destined till death for those who do not go to kings through the pride of caste and other things as the atonement for their sin (viz. of pride or conceit). Here take महोत्साह in the sense of *overweening pride.* जात्यादि-जाति आदिर्येषां तेष्वाः

¹ये च प्राहुर्दुरात्मानो दुराराध्या महीभुजः ।
प्रमादालस्यजाड्यानि ख्यापितानि निजानि तैः ॥ ३९ ॥
²सर्पान्व्याघ्रान्गजान्सिंहान्दृष्ट्वोपायैर्वशीकृतान् ।
राजेति कियती मात्रा धीमतामप्रमादिनाम् ॥ ४० ॥
³राजानमेव संश्रित्य विद्वान्याति परां गतिम् ।
विना मलयमन्यत्र चन्दनं न प्ररोहति ॥ ४१ ॥
⁴धवलान्यातपत्राणि वाजिनश्च मनोरमाः ।
सदा मत्ताश्च नागेन्द्राः प्रसन्ने सति भूपतौ ॥ ४२ ॥

करटक आह । अथ भवान्किं कर्तुमनाः । सोऽब्रवीत् । अद्यास्मत्स्वामी ...लको भीतो भीतपरिवारश्च वर्तते । तदेनं गत्वा भयकारणं विज्ञाय ...विमर्दयानासनसंश्रयद्वैधीभावानामेकतमेन संविधास्ये । करटक आह ।

...१ Those evil minded persons who say that kings (मही-...:) are hard to please, have simply made known or de-...red their own carelessness, laziness and dullness. दुराराध्याः ...म आराधयितुं शक्याः. ख्यापितानि P. P. of the caus. of ... to tell. २ Seeing that serpents, tigers, elephants and ...ns are tamed by remedies, *of what account are kings* (रा-... कियती मात्रा) to those who are talented and careful. ...शीकृतान्, Cf. स्थास्नीभवति मात्रा a measure, an account. ३ A ...rned man attains to an exalted position by resorting to ... king alone; sandal does not grow in any other ...ace except the Malaya mountain. ४ White um-...ellas, beautiful horses and great elephants always ... ruts, are obtained when a king is pleased. आतप-...त्राणि are marks of honour. भूपतौ—the word पति is ...lined like हरि in compounds. ५ Desirous of doing or ...nt to do The affix मनस् added to the Infinitives of verbs ...ve them this sense. In so doing the nasal is dropped. ...Whose retinue is frightened. भीतः परिवारः यस्य. ७ The ...use of fright or fear. ८ By one of the six means of ...aling with an enemy. They are:- (1) संधि (m.) Peace. (2) ...ग्रह (m.) Hostility or war. (3) यान (n.) Marching against; ...आसन (n.) Maintaining one's ground. ( ) संश्रय (m.) Taking ... [illegible] द्वैधीभाव (m.) Duplicity. ९ Shall bring about ... [illegible], 1st P. Sing. of the 2nd Fu. of धा with सं.

कथं वेत्ति[1] भवान्यदयं[2] भयाविष्टोयं[3] स्वामी । सोब्रवीत् । किमत्र ज्ञेयम् यत उक्तं च ।

उदीरितोर्थः[4] पशुनापि गृह्यते
हयाश्च नागाश्च वहन्ति चोदिताः ।
अनुक्तमप्यूहति पण्डितो जनः
परेङ्गितज्ञानफला हि बुद्धयः ॥ ४३ ॥

तथा[5] च मनुः । आकारैरिंगितैर्गत्या[6] चेष्टया भाषणेन च ।
नेत्रवक्त्रविकारैश्च लक्ष्यतेन्तर्गतं मनः ॥ ४४ ॥

तदद्यैनं भयाकुलं प्राप्य[7] स्वबुद्धिप्रभावेण[8] निर्भयं[9] कृत्वा वशीकृत्य[10] च निजां[11] साचिव्यपदवीं[12] समासादयिष्यामि[13] । करटक आह । अनभिज्ञो[14] भवान्सेवाधर्मस्य[15] तत्कथमेनं वशीकरिष्यसि । दमनक आह । यथैव नु पाण्डवानां विराटनगरप्रवेशकाले[16] धौम्यमहर्षिकथितः[17] सकलोप्यनुजीविधर्मो[18] विज्ञात[19] इति ।

१ Your honour knows. The peculiarity of भवत् is that takes a verb in the 3rd P. २ That (*conj.*). ३ Overtaken by fright P. P. of विश् 6 P. with आ. ४ The meaning when expressed in words is understood even by a beast; horses and elephants bear (burdens) when driven (by men); a clever man infers the sense though not uttered or expressed; for the fruit of talent is the knowledge of the secrets of others. परेषां इंगितानां ज्ञानं फलं यासां ताः (बुद्धयः). ५ So also (says) Manu. ६ The *inward thoughts* (अन्तर्गतं मनः) of a person can be known by means of his countenance or appearance, gestures, motion, actions, speech and the changes of the eyes and face नेत्रवक्त्रयोर्विकारैः क. ७ Having gone to or reached. Abs. of आप् 5 P. with प्र. ८ With the *power* of my talent. ९ Free from fear, नास्ति भयं यस्य or निर्गतं भयं यस्मात्. ब. १० Having won over. ११ My own, १२ The post of minister or ministership साचिव्य abstract noun from सचिव. १३ Obtain, 2nd Fu of the caus. of सद् with सम. १४ Ignorant. न अभिज्ञः=अनभिज्ञः न. १५ The duties or mode of servitude. १६ At the time of entering the capital of *Virāṭa*. १७ The great sage *Dhaumya* was the spritual adviser of the Pāndavas. १८ The duties of servants, lit. of those who live on others. After this सर्वे should be understood. १९ Known; studied.

[1]सुवर्णपुष्पितां पृथ्वीं विचिन्वन्ति त्रयो जनाः ।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ॥ ४५ ॥
[2]सा सेवा या प्रभुहिता ग्राह्या वाक्यविशेषतः ।
आश्रयेत्पार्थिवं विद्वांस्तद्द्वारेणैव नान्यथा ॥ ४६ ॥
[3]यो न वेत्ति गुणान्यस्य न तं सेवेत पण्डितः ।
न हि तस्मात्फलं तस्य सुकृष्टादूषरादिव ॥ ४७ ॥
[4]द्रव्यप्रकृतिहीनोऽपि सेव्यः सेव्यगुणान्वितः ।
भवत्याजीवनं तस्मात्फलं कालान्तरादपि ॥ ४८ ॥
[5]अपि स्थाणुवदासीनः शुष्यन्परिगतः क्षुधा ।
न त्वेवानात्मसंपन्नाद्वृत्तिमीहेत पण्डितः ॥ ४९ ॥
[6]सेवकः स्वामिनं द्वेष्टि कृपणं परुषाक्षरम् ।
आत्मानं किं स न द्वेष्टि सेव्यासेव्यं न वेत्ति यः ॥ ५० ॥

---

1 The three only gather fruit from the earth covered with golden flowers, *viz.*, he who is brave, he who is learned and he who knows how to serve. सुवर्णपुष्पितां = सुवर्णपुष्पैर्युक्ताम्; कृतविद्यः = कृता विद्या येन. ब. 2 According to a special proverb, that service, which is beneficial to the master, *should be considered acceptable* (ग्राह्या); a learned man should resort to a king only through that opening and not otherwise. प्रभुहिता = प्रभवे हिता. च. त. The word विशेष as the latter part of compounds means *some, special*; Cf. वृक्षविशेष, पुरुषविशेष &c. 3 A clever man should not serve him whose qualities he does not know; for there is no fruit from it (that service) as from a barren ground which is well-tilled. सुकृष्ट = सुष्ठु कृष्टात्. 4 He who is endowed with the qualities of a master should be served though he be without wealth and ministers; there is livelong fruit from him though after the lapse of some time. सेव्यगुणान्वितः = सेव्यस्य गुणैरन्वितः. त. ब. 5 Even though a person be sitting like a post having nothing to do, and be reduced to a skeleton through hunger a wise man should not wish to obtain livelihood from one who has not his senses under proper control. परिगत surrounded. अनात्मसंपन्न = न आत्मसंपन्नः = अजितेन्द्रियः. 6 A servant hates a master who is miserly and uses harsh language; why does not he hate himself who does not know who is fit to be served and who is not?

यमाश्रित्य न विश्रामं क्षुधार्ता यान्ति सेवकाः ।
सोर्कवन्नृपतिस्त्याज्यः सदापुष्पफलोपि सन् ॥ ५१ ॥
राजमातरि देव्यां च कुमारे मुख्यमन्त्रिणि ।
पुरोहिते प्रतीहारे वर्तितव्यं नृपे यथा ॥ ५२ ॥
जीवेति प्रब्रुवन्प्रोक्तः कृत्यं कृत्यविचक्षणः ।
करोति निर्विकल्पं यः स भवेद्राजवल्लभः ॥ ५३ ॥
प्रभुप्रसादजं वित्तं सुपात्रे यो नियोजयेत् ।
वस्त्राद्यं विदधत्यङ्गे स भवेद्राजवल्लभः ॥ ५४ ॥
अन्तःपुरचरैः सार्धं यो मन्त्रं न समाचरेत् ।
न कलत्रैर्नरेन्द्रस्य स भवेद्राजवल्लभः ॥ ५५ ॥

---

१ That king, by resorting to whom hungry servants are not satisfied, should be abandoned like the tree अर्क (Maráthi रुईचें झाड) though it always has flowers and fruits. क्षुधार्ता :—क्षुधा आर्ताः तृ. त. सदा पुष्पाणि फलानि यस्य. ब. सन् Nom. Sing. Masc. of the Pre. P. of अस् 2 P. २ One should act towards the king's mother, the queen, the prince, the prime minister, the family priest attached to the royal house-hold and the door-keeper, as towards the king himself. The word राजन् is changed to राज in compounds. ३ He, who, saying "*live*," is asked to do anything (कृत्यं), and who is well-versed in his duties and makes the king free from doubt or uncertainty, will be the favourite of the king. कृत्यविचक्षणः-विचक्षण added to substantives, means, well-versed or skilled in that which is denoted by the word to which it is affixed. निर्विकल्प—निर्गतः विकल्पः यस्मात्. ब. ४ He who spends on a fitting object the money derived from the favour of a king and puts on his person the clothing and other things (obtained from the king,) will be the favourite of a king. प्रभुप्रसादात् जातं. पं. त. सुपात्रे=शोभने पात्रे. क. वस्त्राद्यं=वस्त्रं आद्यं यस्य तत्. ब. विदधाति-lit. does on, puts on, wears. ५ He who does not hold counsel with those who move in the female apartment and also with the wives of the king, will be the favourite of a king. अन्तःपुरे चरंतीति=अन्तःपुरचराः. उप.

संमतोऽहं प्रभोर्नित्यमिति मत्वा व्यतिक्रमेत् ।
कृच्छ्रेष्वपि न मर्यादां स भवेद्राजवल्लभः ॥ ५६ ॥
[२]द्विषद्द्वेषपरो नित्यमिष्टानामिष्टकर्मकृत् ।
यो नरो नरनाथस्य स भवेद्राजवल्लभः ॥ ५७ ॥
[३]द्यूतं यो यमदूताभं हालां हालाहलोपमाम् ।
पश्येद्दारान्वृथाकारान्स भवेद्राजवल्लभः ॥ ५८ ॥
[४]युद्धकालेऽग्रगो यः स्यात्सदा पृष्ठानुगः पुरे ।
प्रभोर्द्वाराश्रितो हर्म्ये स भवेद्राजवल्लभः ॥ ५९ ॥

करटक आह । अथ भवांस्तत्र गत्वा किं तावद्वक्ष्यति तत्तावदुच्यताम् । दमनक आह ।

[६]उत्तरादुत्तरं वाक्यं वदतां संप्रजायते ।
सुवृष्टिगुणसंपन्नाद्बीजाद्बीजमिवापरम् ॥ ६० ॥

---

१ He who never transgresses the bounds of propriety thinking he is favoured by the king, even when reduced to difficulties, will be the king's favourite. संमत P. P. of मन् 4 A. Here यः is to be understood as the subject of व्यतिक्रमेत्. २ That man who is on enemical terms with the enemies, and accomplishes the desires of the friends of a king, will be the king's favourite. द्विषद्द्वेषपरः द्वेषपरः—द्वेषः परं यस्य. ब. इष्टं कर्म करोतीति=इष्टकर्मकृत्. उप. ३ He, who considers gambling as the messenger of death, wine as deadly poison and the king's wife as a phantom (of a vain form), will be the favourite of a king. यमदूताभं=यमदूतस्येवाभा यस्य. तं. ब. हाल हलोपमां similarly. वृथाकारान्=वृथा आकारा येषां तान्. ब. ४ He who walks in front at the time of battle and remains always behind when in the town and lives at the lord's door in the palace, will be the king's favourite. ५ तावत् in the first place. ६ Imper. 3rd P. Sing. of the Pass. of [illegible] P. ७ When people are conversing ([illegible]) one [illegible] rises [illegible] another, as one grain of seed [illegible] [illegible] obtained by the abundance [illegible] [illegible] गुणः=सुवृष्टिगुणः तस्मात् संपन्नात् बीजात्.

अपायसंदर्शनजां विपत्तिमुपायसंदर्शनजां च सिद्धिम् ।
मेधाविनो नीतिगुणप्रयुक्तां पुरः स्फुरन्तीमिव दर्शयन्ति ॥ ६१ ॥

ऐकेषां वाचि शुकवदन्येषां हृदि मूकवत् ।
हृदि वाचि तथान्येषां वल्गु वल्गन्ति सूक्तयः ॥ ६२ ॥

चाहमप्राप्तकालं वक्ष्ये । आकर्णितं मया नीतिसारं पितुः पूर्वमुत्सङ्गे हि नषेवना ।

अप्राप्तकालं वचनं बृहस्पतिरपि ब्रुवन् ।
लभते बुद्ध्यवज्ञानमपमानं च पुष्कलम् ॥ ६३ ॥

करटक आह ।

दुराराध्या हि राजानः पर्वता इव सर्वदा ।
व्यालाकीर्णाः सुविषमाः कठिना दुःखसेविताः ॥ ६४ ॥

---

१ Talented persons show calamity arising from the use [of] apparently futile means and success arising from [th]e employment of proper remedies and endowed with [th]e quality of good feeling to be evident or clear before [on]e's eyes. अपाय bad remedies, inadequate means. पुरः स्फुरन्ती [a]s if shining vividly before one. २ Good words or [sa]yings prove effective in the speech of some as those [o]f parrots, in the hearts of others as those of mute [p]ersons, and both in the heart and speech of some [o]thers. वल्गु वल्गंति dance beautifully, prove successful. [३] Anything for which there is no occasion or fitting opportunity. न प्राप्तः कालः यस्य. ब. Here understand something [li]ke वचनं. ४ Heard or listened to. P. P. of कर्ण् 10 U. with [आ]. ५ The essence of politics. ६ While I was sitting for[m]erly on the lap of my father. ७ Even Brihaspati saying [a]nything for which no occasion exists, is blamed as want[in]g in sense and meets with a deal of disrespect. बुध्य-[illegible]र्थं [illegible] अवज्ञातं ष. त. Another reading for पुष्कलं is प्राचलम् [illegible]. ८ Kings are always hard to please, surrounded [by illegible] (व्याल), hard to understand, hard-hearted and [illegible] with difficulty, like mountains, which are hard to [illegible] full of ferocious beasts, very rugged, hard and [illegible] and [illegible] are त. स.

तथा च । भोगिनः कञ्चुकाविष्टाः कुटिलाः क्रूरचेष्टिताः ।
सुदुष्टा मन्त्रसाध्याश्च राजानः पन्नगा इव ॥ ६५ ॥
दुरारोहं पदं राज्ञां सर्वलोकनमस्कृतम् ।
स्वल्पेनाप्यपकारेण ब्राह्मण्यमिव दुष्यति ॥ ६६ ॥
दुराराध्याः श्रियो राज्ञां दुरापा दुष्परिग्रहाः ।
तिष्ठन्त्याप इवाधारे चिरमात्मनि संस्थिताः ॥ ६७ ॥
दमनक आह । सत्यमेतत् । परं किंतु ।
यस्य यस्य हि यो भावस्तस्य तस्य हि तं नरः ।
अनुप्रविश्य मेधावी क्षिप्रमात्मवशं नयेत् ॥ ६८ ॥
भर्तुश्चिन्तानुवर्तित्वं सुवृत्तं चानुजीविनाम् ।
राक्षसाश्चापि गृह्यन्ते नित्यं छन्दानुवर्तिभिः ॥ ६९ ॥
सरुषि नृपे स्तुतिवचनं तदभिमते प्रेम तद्द्विषि द्वेषः ।
तद्दानस्य च शंसा अमन्त्रतन्त्रं वशीकरणम् ॥ ७० ॥

---

१ Kings are given to enjoyments; covered with armours, crooked in mind, of wicked actions, very cruel and can be gained over by counsel, and so they are like serpents, who have hoods, who are covered with skin, crooked, wicked in deeds, vindictive and tamed by charms or incantations. क्रूरचेष्टिताः. ब. क्रूराणि चेष्टितानि येषां ते. २ The dignity of kings which is difficult to attain and to which all bow, is defiled or sullied even by a slight fault like the purity of a Brahmana. ३ The glory of kings is hard to preserve, difficult to obtain and hard to grasp; but when once obtained it remains with one for a long time as do waters in a reservoir. दुरापाः=दुःखेन आपितुं शक्याः. ४ A man of talents having accommodated himself to the disposition of whomsoever he comes across, should soon win him over to his side. अनुप्रविश्य having entered into or adapted himself to ५ Following the inclinations of the master's mind is said to be the goodness of behaviour in servants; even demons are almost won or gained over by those who humour them चिन्तानुवर्तित्वं चिन्तां अनुवर्तित्वं. द्वि. त. ६ Making use of words of praise when the king is angry, showing affection for those who are in high favour with him, and hatred towards those who are his enemies and extolling [illegible] charities—this way of winning him over requires [illegible] counsel or advice (that is, he can be won over without charms or incantations) सरुषि=रुषा सहिते, ब. [illegible] मंत्राः तंत्राणि च यस्मिन्. ब.

करटक आह । यद्येवमभिमतं तर्हि शिवास्ते पन्थानः सन्तु । यथा-
लषितमनुष्ठीयतामिति । दमनकोपि करटकं प्रणम्य पिङ्गलकाभिमुखं
तस्थे । आगच्छन्तं दमनकमालोक्य पिङ्गलको द्वाःस्थमब्रवीत् ।
पसार्यतां वेत्रलता । अयमस्माकं चिरन्तनो मन्त्रिपुत्रः समागतः । तत्प्र-
स्थैतां द्वितीयमण्डलवर्ती यथार्थवादी च । अथोपदिष्टे दमनकः पिङ्गल-
प्रणम्य प्राप्तानुज्ञ उपविष्टः । स तु तस्य नखकुलिशालंकृतं दक्षिणपा-
मुपरि दत्त्वा मानपुरःसरमुवाच । अपि शिवं भवतः । कस्माच्चिराद्दृष्ट-
सि । दमनक आह । न किंचिद्देवपादानामस्माभिः प्रयोजनम् । तथा-
प्राप्तकालं वक्तव्यं । यत उत्तममध्यमाधमैः सर्वैरपि राज्ञां प्रयोजनम् ।
कं च ।

१ If such be the case, I give my consent. २ May you re well on your journey. (lit. may your ways be happy). his is said by way of farewell to those who are going some business. ३ Let what you like be done, please ourself. ४ Towards, facing. This word is joined to nouns form Gen. Tat. Compounds. Here पिंगलकस्याभिमुखम्. ५ A oor-keeper. ६ Let—(it) be removed. Imper. 3rd P. ng. of the caus. of the Pass. of सृ with अप. ७ The staff a door-keeper. ८ Of a long standing. तन added to adverbs time gives them the sense of definiteness, *e. g.*, तदानींतन दानींतन. ९ See 6 above for grammar. १० Occupying e rank next to the king, *viz.*, of सिंहानुयायिन्. ११ One who eaks what is right or true. यथार्थं वदतीति. १२ When these structions were issued. १३ Who had obtained permis- on (अनुज्ञा to take his seat). १४ Adorned with the underbolt-like nails. नखकुलिश=नखान्येव कुलिशः नखकुलिशः अलंकृतं qualifying पाणि. १५ The right hand. १६ Having aced on him (तस्य in the above line). १७ Respectfully. : पुरःसरः यस्मिन्कर्मणि यथा तथा. १८ Is your honour well ? at the beginnig asks a question. १९ How is it that are seen after a long time ? How is it that I you after a long time ? २० Your Majesty's feet no need whatever of us; we are not at all wanted you. २१ The best, middling and low.

दन्तस्य निष्कोषणकेन नित्यं
कर्णस्य कण्डूयनकेन वापि ।
तृणेन कार्यं भवतीश्वराणां
किमङ्ग वाग्घस्तवता नरेण ॥ ७१ ॥

तथा वयं देवपादानामन्वयागता भृत्या आपत्स्वपि पृष्ठगामिनो यद्यपि स्वमेधिकारं न लभामहे तथापि देवपादानामेतद्युक्तं न भवति । उक्तं च ।

स्थानेष्वेव नियोक्तव्या भृत्याश्चाभरणानि च ।
न हि चुडामणिः पादे प्रभवामीति बध्यते ॥ ७२ ॥

यतः । अनभिज्ञो गुणानां यो न भृत्यैरनुगम्यते ।
धनाढ्योपि कुलीनोपि क्रमायातोपि भूपतिः ॥ ७३ ॥

उक्तं च । असमैः समीयमानः समैश्च परिहीयमाणसत्कारः ।
धुरि यो न युज्यमानस्त्रिभिरर्थपतिं त्यजति भृत्यः ॥ ७४ ॥

---

१ The need of the rich is always served even by a blade of grass either for *scratching the ear or picking the teeth*; how much more useful will a man be who is endowed with speech and hands? किमङ्ग how much more or how much less-here of course it means how much more? २ Hereditary. ३ Going after, following. ४ Although; yet. ५ Our own office (*viz.* of ministers). ६ It does not become or behove your Majesty to keep us out of office. ७ Servants and ornaments should be put in their proper places (and not elsewhere); for a crest-jewel is never tied to the foot by any one simply because he can afford to do so. Here the predicate agrees with the nearest subject—भृत्याः. ८ A king who is not able to appreciate merits, though rich, nobly-born and hereditary, is not followed by the servants. धनाढ्यः—धनेन आढ्यः तृ. त. ९ For three causes, viz., when he is placed on a footing of equality with unequals, when he is not paid proper respect among equals, and when he is not placed at the head of all, a servant forsakes a king (अर्थपति lord of riches). [illegible]: Pre. P. of [illegible] formed from the [illegible]. सम[illegible] [illegible] सत्कारः [illegible] [illegible]

यत्राविवेकितया राजा भृत्यानुत्तमपदयोग्यान्हीनाधमस्थाने नि-
जयति न ते तत्रैव तिष्ठन्ति स भूपतेर्दोषो न तेषाम् । उक्तं च ।

कनकभूषणसंग्रहणोचितो
यदि मणिस्त्रपुणि प्रतिबध्यते ।
न स विरौति न चापि स शोभते
भवति योजयितुर्वचनीयता ॥ ७५ ॥

यच्च स्वाम्येवं वदति चिरादृश्यसे तदपि श्रूयताम् ।

सव्यदक्षिणयोर्यत्र विशेषो नोपलभ्यते ।
कस्तत्र क्षणमप्यार्यो विद्यमानगतिर्वसेत् ॥ ७६ ॥
काचे मणिर्मणौ काचो येषां बुद्धिः प्रवर्तते ।
न तेषां संनिधौ भृत्यो नाममात्रोपि तिष्ठति ॥ ७७ ॥
यत्र स्वामी निर्विशेषं समं भृत्येषु वर्तते ।
तत्रोद्यमसमर्थानामुत्साहः परिहीयते ॥ ७८ ॥

---

१ When a king through inconsiderateness appoints such rvants as are fit for the best places to very low ones d when they do not remain there, it is the king's fault d not theirs. २ If a jewel which is fit to be set in a gold nament is set in a tin one, it neither sounds nor shines d the blame lies with him who sets it. कनकभूषणे संग्रहणाय [illegible]तः च. त. Another reading for प्रतिबध्यते is [illegible] mean-g—is placed in or put in. वचनीयता abst. noun. from वचनीय amoworthy. ३ Even that, viz. answer to that. ४ hat respectable person possessing a resource will dwell en a moment in the place where no distinction between ht and left, that is, straightforward or otherwise observed. विद्यमानगतिः—विद्यमाना गतिर्यस्य. ब. (he who has other course open to him to take). ५ A servant s not stay even in name (much less in reality) r those who think a piece of glass to be jewel and ewel to be a glass-bead. नाममात्रः—नाम मात्रं यस्य. ब. ६ The gy of those who are capable of industry fails them e where the master acts towards all his servants ally without any distinction. [illegible] indiscriminately [illegible] परिहीयते [illegible]

१ विना पार्थिवो भृत्यैर्न भृत्याः पार्थिवं विना ।
तेषां च व्यवहारोयं परस्परनिबन्धनः ॥ ७९ ॥
२ भृत्यैर्विना स्वयं राजा लोकानुग्रहकार्यपि ।
मयूखैरिव दीप्तांशुस्तेजस्व्यपि न शोभते ॥ ८० ॥
३ अरैः संधार्यते नाभिर्नाभौ चाराः प्रतिष्ठिताः ।
स्वामिसेवकयोरेवं वृत्तिचक्रं प्रवर्तते ॥ ८१ ॥
४ शिरसा विधृता नित्यं तथा स्नेहेन पालिताः ।
केशा अपि विरज्यन्ते निःस्नेहाः किं न सेवकाः ॥ ८२ ॥
५ राजा तुष्टोपि भृत्यानामर्थमात्रं प्रयच्छति ।
ते तु संमानमात्रेण प्राणैरप्युपकुर्वते ॥ ८३ ॥
६ एवं ज्ञात्वा नरेन्द्रेण भृत्याः कार्या विचक्षणाः ।
कुलीनाः शौर्यसंयुक्ताः शक्ता भक्ताः क्रमागताः ॥ ८४ ॥

१ The king cannot exist without servants and the servants without the king-this relation of theirs (of master and servants) depends on each other–or on mutuality. परस्परं निबध्नातीति. उप. २ Even if a king bestow favours on the people, he does not shine without servants, as the sun (दीप्तांशुः) though resplendent, does not shine without rays. दीप्तांशुः–दीप्ताः अंशवः यस्य सः ब. ३ The navel of a wheel is supported by the spokes and the spokes are fixed in the navel ; the wheel of the relation of master and servants is just like this. ४ Even the hair which is always borne on the head and smeared with oil (स्नेह) turns gray, why should not then servants when no affection (स्नेह) is shown to them be disaffected ? Here the words स्नेह and विरज्यन्ते are used in a double sense : (1) oil (2) affection and (1) turning gray, (2) being disaffected. ५ Even when pleased, a king gives his servants only wealth ; but as to them, they repay his obligations for any slight favour shown even with their lives (at the cost of their lives). ६ Thus knowing, a king should empoly such servants as are clever, nobly-born, endowed with bravery, able, devoted and hereditary.

[1]यस्मिन्कृत्यं समावेश्य निर्विशङ्केन चेतसा ।
आस्यते सेवकः स स्यात्कलत्रमिव चापरम् ॥ ८५ ॥
[2]यः कृत्वा सुकृतं राज्ञो दुष्करं हितमुत्तमम् ।
लज्जया वक्ति नो किंचित्तेन राजा सहायवान् ॥ ८६ ॥
[3]यो नाहूतः समभ्येति द्वारि तिष्ठति सर्वदा ।
पृष्टः सत्यं मितं ब्रूते स भृत्योर्हो महीभुजाम् ॥ ८७ ॥
[4]अनादिष्टोपि भूपस्य दृष्ट्वा हानिकरं च यः ।
यतते तस्य नाशाय स भृत्योर्हो महीभुजाम् ॥ ८८ ॥
[5]ताडितोपि दुरुक्तोपि दण्डितोपि महीभुजा ।
यो न चिन्तयते पापं स भृत्योर्हो महीभुजाम् ॥ ८९ ॥
[6]न क्षुधा पीड्यते यस्तु निद्रया न कदाचन ।
न च शीतातपाद्यैश्च स भृत्योर्हो महीभुजाम् ॥ ९० ॥
[7]श्रुत्वा सांग्रामिकीं वार्तां भविष्यां स्वामिनं प्रति ।
प्रसन्नास्यो भवेद्यस्तु स भृत्योर्हो महीभुजाम् ॥ ९१ ॥

१ That servant, by entrusting any business to whom one can sit with his mind at ease or free from fear, is like a second wife (as useful as the wife herself). समावेश्य abs. of the caus. of विश् with सम्. २ A king is said to have a friend in that servant, who, having done a good action calculated to serve the best interest of the king, does not vaunt about it. ३ He is a deserving servant of kings, who goes near him uncalled, always stands at the door and when questioned speaks the truth in a few words. महीं भुनक्ति सः महीभुज्. ४ He who having seen anything causing damage to the king, strives to destroy it even without being told to do so, is a deserving servant of kings. हानिकरं stands for हानिकरं कार्यं or वस्तु. ५ He who, though struck, scolded and fined by the king, does not wish him any evil (पापं), is a deserving servant of kings. ६ He is a deserving servant of kings who never says that he is overtaken by hunger and sleep and also by cold, heat and others। शीतातपाद्यैः—शीतं च आतपश्च =शीतातपौ तौ आदी येषां तैः. ७ He who having heard the rumour that a war is impending, looks cheerful, is a deserving servant of kings. प्रसन्नास्य a.

^१^सीमा वृद्धिं समायाति शुक्लपक्ष इवोडुराट् ।
नियोगसंस्थिते यस्मिन्स भृत्योर्हो महीभुजाम् ॥ ६२ ॥
^२^सीमा संकोचमायाति वन्हौ चर्म इवाहितम् ।
स्थिते यस्मिन्स तु त्याज्यो भृत्यो राज्यं समीहता ॥ ६३ ॥

तथा शृगालोयमिति मन्यमानेन ममोपरि स्वामिना ^३^यद्यवज्ञा क्रियते तदप्ययुक्तम् । उक्तं च यतः ।

^४^कौशेयं कृमिजं सुवर्णमुपलाद्दूर्वापि गोरोमतः
पङ्कात्तामरसं शशाङ्क उदधेरिन्दीवरं गोमयात् ।
काष्ठादग्निरहेः फणादपि मणिर्गोपित्ततो रोचना
प्राकाश्यं स्वगुणोदयेन गुणिनो गच्छन्ति किं जन्मना ॥ ६४ ॥
^५^मूषिका गृहजातापि हन्तव्या सापकारिणी ।
उपप्रदानैर्मार्जारो हितकृत्प्रार्थ्यते जनैः ॥ ६५ ॥
^६^एरण्डभिण्डार्कनलैः प्रभूतैरपि संचितैः ।
दारुकृत्यं यथा नास्ति तथैवाज्ञैः प्रयोजनम् ॥ ६६ ॥

---

१ He, during whose tenure of office, the limits of the kingdom increase like the moon (the king of stars). in the bright half of a lunar month, is a deserving servant of kings. २ He, during whose term of office, the limits of the kingdom become contracted like leather put in fire, should be shunned by him who wishes for a kingdom. समीहता. Instr. of समीहत् Pre. P. of समीह् usually Atmanepadi only. ३ If your Majesty shows me disrespect. ४ Silk is produced from a worm, gold from a stone, the Dûrva grass from the cow's hair, a lotus from mud, the moon from the ocean, the lotus called इन्दीवर from cow-dung, fire from wood, a jewel from the hood of a snake, yellow pigment from the bile of the cow; the worthy attain to eminence by their own merits. What does birth signify? शशाङ्कः-शशः अंको यस्य. रोचना=गोरोचना. प्राकाश्यं=प्रकाशत्वं. ५ A female mouse though born in one's house should be killed because it is injurious; (while) the cat which does me good (by way of destroying the mischievous mice) is prayed to by the people with offers of gifts. ६ As the purpose of fuel is not served by the trees called एरंड &c. though stored in large quantities, so no purpose is served by ignorant persons.

¹किं भक्तेनासमर्थेन किं शक्तेनापकारिणा ।
भक्तं शक्तं च मां विद्धि नावज्ञातुं त्वमर्हसि ॥ १७ ॥

पिङ्गलक आह । भवत्वेवं तावत् । असमर्थः समर्थो वा चिरन्तनस्त्वमस्माकं मन्त्रिपुत्रस्तद्विश्रब्धं ब्रूहि यत्किंचिद्वक्तुमनाः । दमनक आह । देव विज्ञाप्यं किंचिदस्ति । पिङ्गलक आह । तन्निवेदयाभिप्रेतम् । सोऽब्रवीत् ।

अपि स्वल्पतरं कार्यं यद्भवेत्पृथिवीपतेः ।
तन्न वाच्यं सभामध्ये प्रोवाचेदं बृहस्पतिः ॥ १८ ॥

तदैकान्तिके मद्विज्ञाप्यमवधारयन्तु देवपादाः । यतः ।

षट्कर्णो भिद्यते मन्त्रश्चतुष्कर्णो न भिद्यते ।
तस्मात्सर्वप्रयत्नेन षट्कर्णं वर्जयेत्सुधीः ॥ १९ ॥

अथ पिंगलकाभिप्रायज्ञा व्याघ्रद्वीपिवृकपुरःसराः सर्वेपि तद्वचः समाकर्ण्य संसदि तत्क्षणादेव दूरीभूताः । ततश्च दमनक आह । उदकग्रहणार्थं प्रवृत्तस्य स्वामिनः किमिह निवृत्त्यावस्थानम् । पिंगलक आह सविलक्षस्मितम् । न किंचिदपि । सोऽब्रवीत् । देव यद्यनाख्येयं तत्तिष्ठतु । उक्तं च ।

---

१ What is the use of him who, though devoted is weak, and of him who, though able, is mischievous? Know me to be both devoted and able; you should not, therefore, despise me. २ Without fear; confidently. ३ There is some request (to make) विज्ञाप्य sub. from ज्ञा with वि caus. ४ What is desired, the object of desire. ५ Howsoever insignificant the affair of a king may be it should not be talked of in the assembly—so said Brihaspati. ६ In private or secret, in a solitude. ७ A secret confined to six ears, that is, three persons, is divulged and not that which is confined to two; for this reason a wise man should, with all efforts, avoid confiding a secret to three persons. ८ Knowing or guessing the meaning &c. ९ द्वीपिन् (m.) A panther. १० A wolf. ११ Went away. १२ With a smile of abashment. विलक्षस्मितेन सह यथा तथा. adv. १३ If it be such as should not be revealed, let it remain (do not give it out).

दारेषु किंचित्स्वजनेषु किंचि-
द्गोप्यं वयस्येषु सुतेषु किंचित्
युक्तं न वा युक्तमिदं विचिन्त्य
वदेद्विपश्चिन्महतोनुरोधात् ॥ १०० ॥

तच्छ्रुत्वा पिंगलकश्चिन्तयामास । योग्योयं दृश्यते । तत्कथयाम्येतस्याग्रे आत्मनोभिप्रायम् । उक्तं च ।

स्वामिनि गुणान्तरज्ञे गुणवति भृत्येनुवर्तिनि कलत्रे ।
मित्रे चानुपचर्ये निवेद्य दुःखं सुखी भवति ॥ १०१ ॥

भो दमनक शृणोषि शब्दं दूरान्महान्तम् । सोब्रवीत् । स्वामिन् शृणोमि । तत्किम् । पिङ्गलक आह । भद्र अहमस्माद्वनाद्गन्तुमिच्छामि । दमनक आह । कस्मात् । पिङ्गलक आह । यतोद्यास्मद्वने किमप्यपूर्वं सत्त्वं प्रविष्टं यस्यायं महाशब्दः श्रूयते । तस्य च शब्दानुरूपेण पराक्रमेण भवितव्यमिति । दमनक आह । यत्स्वामी शब्दमात्रादपि भयमुपगतस्तदप्ययुक्तम् । उक्तं च ।

अम्भसा भिद्यते सेतुस्तथा मन्त्रोप्यरक्षितः ।
पैशुन्याद्भिद्यते स्नेहो वाचा भिद्येत कातरः ॥ १०२ ॥

---

१ Some things are to be concealed from one's wife, some from one's relatives, some from one's friends and some from one's sons; a wise man (therefore) should give out anything with great consideration after thinking whether it is proper or improper to do so. २ Before, in the presence of. ३ A man becomes happy after having confided the secret of his grief to a master who can disitinguish between merits, to a servant who is virtuous, to a wife who is obedient, and to a friend who is unselfish गुणान्तरं-गुणयोः अंतरं. अनुवर्तिन् lit. following, obeying. अनुपचर्य. not to be waited on or served. ४ What then? what of that? ५ In the forest of which I am the lord. ६ Unheard of or unseen before, strange, extraordinary. ७ An animal. ८ Its prowess must be according to its voice, or it must correspond with the voice; as the voice so the strength. ९ Has been terrified only by hearing the sound. १० A bridge or causeway is broken by water, so also a counsel when not kept secret, is divulged; friendship is dissolved through backbiting or slander and a coward is cowed down simply by words (पैशुन्य is an abstract noun from पिशुन slanderer).

तन्न युक्तं स्वामिनः पूर्वोपार्जितं वनं त्यक्तुम् । यतो भेरीवेणुवीणामृदङ्गपटहशङ्खकाहलादिभेदेन शब्दा अनेकविधा भवन्ति तन्न केवलाच्छब्दमात्रादपि भेतव्यम् । उक्तं च ।

अत्युत्कटे च रौद्रे च शत्रौ यस्य न हीयते ।
धैर्यं प्राप्ते महीनाथे न स याति पराभवम् ॥ १०३ ॥

दर्शितभयेपि धातरि धैर्यध्वंसो भवेन्न धीराणाम् ।
शोषितसरसि निदाघे नितरामेवोद्धतः सिन्धुः ॥ १०४ ॥

तथा च । यस्य न विपदि विषादः संपदि हर्षो रणे न भीरुत्वम् ।
तं भुवनत्रयतिलकं जनयति जननी सुतं विरलम् ॥ १०५ ॥

तथा च । शक्तिवैकल्यनम्रस्य निःसारत्वाल्लघीयसः ।
जन्मिनो मानहीनस्य तृणस्य च समा गतिः ॥ १०६ ॥

अपि च । अन्यप्रतापमासाद्य यो दृढत्वं न गच्छति ।
जतुजाभरणस्येव रूपेणापि हि तस्य किम् ॥ १०७ ॥

१ Acquired by forefathers. २ A kettle-drum. ३ A flute. ४ A lute. ५ A double drum, a tabour. ६ A war-drum. ७ A conch, a drum ८ काहला (f.) A large drum. ९ Mere. १० He, whose courage does not fail him when a very furious and terrible king approaches as an enemy, never sustains a defeat. ११ The courage of the bold will never totter even if the creator threaten them; when the heat of summer has dried up lakes, the ocean rises very high (is greatly agitated). दर्शितभये—दर्शितं भयं येन. ब.; Cf. शोषितसरसि. १२ A mother rarely gives birth to a son, who feels no sorrow in adversity and delight in prosperity, who is not frightened in a battle and who is the frontal mark on the forehead of the three worlds, or who is the best of all men in the three worlds. भुवनत्रयतिलकं ष. त. १३ The condition of him (that being) who is humble through want of strength, who is insignificant through worthlessness, who is destitute of honour, is equal to that of grass. शक्तिवैकल्यात् नम्रस्य पं. त. मानहीन-मानेन हीनः तृ. त. १४ What, indeed, is the use of the beauty of him who, having come in contact with the prowess of another, does not become firm, like that of an ornament stuffed with lac which melts away by heat? प्रताप (1) Prowess (2) Heat.

तदेवं ज्ञात्वा स्वामिना धैर्यावष्टम्भः कार्यः। न शब्दमात्राद्भेतव्यम् । उक्तं च

पूर्वमेव मया ज्ञातं पूर्णमेतद्धि मेदसा ।
अनुप्रविश्य विज्ञातं यावच्चर्म च दारु च ॥ १०८ ॥

पिङ्गलक आह । कथमेतत् । सोऽब्रवीत् ।

॥ कथा २ ॥

कश्चिच्छृगालः क्षुत्क्षामकण्ठ इतस्ततः परिभ्रमन्वने सैन्यद्वयसंग्राम भूमिमपश्यत् । तस्यां च दुन्दुभेः पतितस्य वायुवशाद्वल्लीशाखाग्रैर्हन्यमानस्य शब्दमशृणोत् । अथ क्षुभितहृदयश्चिन्तयामास । अहो विनष्टोऽस्मि तद्यावन्नास्य प्रोच्चारितशब्दस्य दृष्टिगोचरे गच्छामि तावद्व्रजामि अथवा नैतद्युज्यते सहसैव पितृपैतामहं वनं त्यक्तुम् । उक्तं च ।

भये वा यदि वा हर्षे संप्राप्ते यो विमर्शयेत् ।
कृत्यं न कुरुते वेगान्न स संतापमाप्नुयात् ॥ १०९ ॥

तत्तावज्जानामि कस्यायं शब्दः । धैर्यमालम्ब्य विमर्शयन्यावन्मन्दं मन्दं गच्छति तावद्दुन्दुभिमपश्यत् । स च तं परिज्ञाय समीपं गत्वा स्वयमेव कौतुकादताडयत् । भूयश्च हर्षादचिन्तयत् । अहो चिरादेतदस्माकं भोजनमापतितम् । तन्नूनं प्रभूतमांसमेदोसृग्भिः परिपूरितं भविष्यति

Courage should be resorted to; should take heart. ... First I thought that it was filled with marrow, but entering it, I knew that it contained only leather and wood. ... With the throat parched with hunger. क्षुधा क्षामः कण्ठः ... ४ Two armies सैन्ययोः द्वयं. ५ A large kettle-drum. ६ Through the force or power of wind. ७ By the ends of the branches of creepers. ८ Being beaten or struck. हन्यमान Pre. P. of हन् 2 P. Pass. ९ Agitated or alarmed at heart. क्षुभितं हृदयं यस्य. ब. १० Oh, I am undone, ruined. ११ So long as not, before. १२ Go within the reach of the sound uttered loudly. १३ Or rather. The particle used to correct or modify a foregoing statement. ... Acquired by forefathers, hereditary. पितृपितामहयोः इदं. ... He, who considers well when, either a cause of fear or delight arises, and does not do anything through haste, will have no cause for repentance. संताप affliction, heat and hence, *remorse*. १६ Having taken heart or courage. १७ Slowly and slowly, gently. १८ Having ascertained. ... Through curiosity. २० Again. २१ Has approached ... [illegible] ... completely filled.

ततः परुष[1]चर्मावगुण्ठितं[2] तत्कथमपि विदार्य[3]एकदेशे छिद्रं कृत्वा संहृष्टमना[4] मध्ये प्रविष्टः। परं चर्मविदारणे[5] दंष्ट्राभङ्गः[6] समजनि[7]। अथ निराशीभूत[8]स्तद्दारुशेष[9]मवलोक्य श्लोक[10]मेनमपठत्पूर्वमेव मया ज्ञातमिति।

ततो न शब्दमात्राद्भेतव्यम्। पिङ्गलक आह। भोः पश्यायं मम सर्वोऽपि[11] परिग्रहो[12] भयव्याकुलित[13]चित्तः पलायितुमिच्छति। तत्कथमहं धैर्यावष्टम्भं करोमि। सोऽब्रवीत्। स्वामिन्नैतेषामेव दोषो यतः स्वामिसदृशा[14] एव भवन्ति भृत्याः। उक्तं च।

अश्वः[15] शस्त्रं शास्त्रं वीणा वाणी नरश्च नारी च।
पुरुषविशेषं प्राप्ता भवन्त्ययोग्याश्च योग्याश्च ॥ ११० ॥

तत्पौरुषा[16]वष्टम्भं कृत्वा त्वं तावदत्रैव प्रतिपालय[17] यावदहमेतच्छब्दस्वरूपं[18] ज्ञात्वागच्छामि। ततः पश्चाद्यथोचितं[19] कार्यमिति। पिङ्गलक आह। किं तत्र भवान्गन्तुमुत्सहते[20]। स आह। [21]किं स्वाम्यादेशात्सद्भृत्यस्य कृत्याकृत्यमस्ति। उक्तं च।

१ Harsh, tough. २ Enveloped. P. P. of गुंठ with अव ३ Having torn asunder or split (Abs. of दृ with वि). ४ Delighted at heart. ५ Of him who was tearing open the skin. ६ Breaking or fracture of the jaws. ७ Took place 3rd P. Sing. Aorist of जन् with सम—optional form for अजनिष्ट ८ Disappointed. ९ Having only wood remaining (दारु शेष यस्य. ब.) after the skin was torn open. १० Verse. ११ All, without any exception ; for this use of अपि see S. G. S. C. XXI. १२ Retinue १३ Frightened out of their wits. १४ Like the master. स्वामिना सदृशाः तृ. त. १५ A horse, weapon, any kind of lore, lute speech, man and woman, become fit and unfit (for anything) according as they are possessed by particular persons. विशेष (*m.*) from शिष 7 P. with वि to distinguish, to particularize. १६ Manliness. १७ Wait. Impor. of पा caus १८ Nature. १९ As it may suit you. २० Dare or make bold २१ What is there that is fit or unfit to do for a good servant at the command of the master ? That is, he must do what his master bids him do, whether it be fit or unfit.

तदेवं ज्ञात्वा स्वामिना धैर्यावष्टम्भः कार्यः । न शब्दमात्राद्भेतव्यम् । उक्तं च ।

पूर्वमेव मया ज्ञातं पूर्णमेतद्धि मेदसा ।
अनुप्रविश्य विज्ञातं यावच्चर्म च दारु च ॥ १०८ ॥

पिङ्गलक आह । कथमेतत् । सोऽब्रवीत् ।

॥ कथा २ ॥

कश्चिच्छृगालः क्षुत्क्षामकण्ठ इतस्ततः परिभ्रमन्वने सैन्यद्वयसंग्रामभूमिमपश्यत् । तस्यां च दुन्दुभेः पतितस्य वायुवशाद्वल्लीशाखाग्रैर्हन्यमानस्य शब्दमशृणोत् । अथ क्षुभितहृदयश्चिन्तयामास । अहो विनष्टोऽस्मि । तावदेतस्य प्रोच्चारितशब्दस्य दृष्टिगोचरे गच्छामि तावदन्यत्र व्रजामि । अथवा नैतद्युज्यते सहसैव पितृपैतामहं वनं त्यक्तुम् । उक्तं च ।

भये वा यदि वा हर्षे संप्राप्ते यो विमर्शयेत् ।
कृत्यं न कुरुते वेगान्न स संतापमाप्नुयात् ॥ १०९ ॥

तत्तावज्जानामि कस्यायं शब्दः । धैर्यमालम्ब्य विमर्शयन्यावन्मन्दं मन्दं गच्छति तावद्दुन्दुभिमपश्यत् । स च तं परिज्ञाय समीपं गत्वा स्वयमेव कौतुकादताडयत् । भूयश्च हर्षादचिन्तयत् । अहो चिरादेतदस्माकं महद्भोजनमापतितम् । तन्नूनं प्रभूतमांसमेदोऽसृग्भिः परिपूरितं भविष्यति ।

---

१ Courage should be resorted to; should take heart. २ First I thought that it was filled with marrow, but entering it, I knew that it contained only leather and wood. ३ With the throat parched with hunger. क्षुधा क्षामः कंठः [illegible] ४ Two armies सैन्ययोः द्वयं. ५ A large kettle-drum. ६ Through the force or power of wind. ७ By the ends of the branches of creepers. ८ Being beaten or struck. हन्यमान Pre. P. of हन् 2 P. Pass. ९ Agitated or confused at heart. क्षुभितं हृदयं यस्य. ब. १० Oh, I am undone, ruined. ११ So long as not, before. १२ Go within the reach of the sound uttered loudly. १३ Or rather. The [illegible] is used to correct or modify a foregoing statement. १४ Obtained by forefathers, hereditary. पितृपितामहयोः इदं. १५ He, who considers well when, either a cause of fear or delight arises, and does not do anything through rashness, will have no cause for repentance. संताप afflic- tion, heat and hence, *remorse.* १६ Having taken heart or courage. १७ Slowly and slowly, gently. १८ Having ascertain- ed. १९ Through curiosity. २० Again. २१ Has approached [illegible]. २२ With plentiful flesh, marrow and blood. [illegible] २३ Completely filled.

ततः परुष[१]चर्मावगुण्ठितं[२] तत्कथमपि विदार्यै[३]कदेशे छिद्रं कृत्वा संहृष्टमना[४] मध्ये प्रविष्टः। परं चर्मविदारिणो[५] दंष्ट्राभङ्गः[६] समजनि[७]। अथ निराशीभूत[८]स्तद्दारुशेष[९]मवलोक्य श्लोक[१०]मेनमपठत्पूर्वमेव मया ज्ञातमिति।

ततो न शब्दमात्राद्भेतव्यम्। पिङ्गलक आह। भोः पश्याय मम सर्वोऽपि[११] परिग्रहो[१२] भयव्याकुलितचित्तः[१३] पलायितुमिच्छति। तत्कथमहं धैर्यावष्टम्भं करोमि। सोऽब्रवीत्। स्वामिन्नैतेषामेष दोषो यतः स्वामिसदृशा[१४] एव भवन्ति भृत्याः। उक्तं च।

> अश्वः[१५] शस्त्रं शास्त्रं वीणा वाणी नरश्च नारी च।
> पुरुषविशेषं प्राप्ता भवन्त्ययोग्याश्च योग्याश्च ॥ ११० ॥

तत्पौरुषावष्टम्भ[१६] कृत्वा त्वं तावदत्रैव प्रतिपालय[१७] यावदहमेतच्छब्दस्वरूपं[१८] ज्ञात्वागच्छामि। ततः पश्चाद्यथोचितं[१९] कार्यमिति। पिङ्गलक आह। किं तत्र भवान्गन्तुमुत्सहते[२०]। स आह। [२१]किं स्वाम्यादेशात्सद्भृत्यस्य कृत्याकृत्यमस्ति। उक्तं च।

१ Harsh, tough. २ Enveloped. P. P. of गुंठ् with अव ३ Having torn asunder or split (Abs. of दृ with वि) ४ Delighted at heart. ५ Of him who was tearing open the skin. ६ Breaking or fracture of the jaws. ७ Took place 3rd P. Sing. Aorist of जन् with सम—optional form for अजनिष्ट ८ Disappointed. ९ Having only wood remaining (दारु शेषं यस्य स.) after the skin was torn open. १० Verse. ११ All, without any exception; for this use of अपि see S. G. S. C. XXI. १२ Retinue. १३ Frightened out of their wits. १४ Like the master. स्वामिना सदृशाः तृ. त. १५ A horse, weapon, any kind of lore, lute, speech, man and woman, become fit and unfit (for anything) according as they are possessed by particular persons. विशेष (*m.*) from शिष् 7 P. with वि to distinguish, to particularize. १६ Manliness. १७ Wait. Imper. of पा caus. १८ Nature. १९ As it may suit you. २० Dare or make bold. २१ What is there that is fit or unfit to do for a good servant at the command of the master? That is, he must do what his master bids him do, whether it be fit or unfit.

स्वाम्यादेशात्सुभृत्यस्य न भीः संजायते क्वचित् ।
प्रविशेन्मुखमाहेयं दुस्तरं वा महार्णवम् ॥ १११ ॥

तथा च । स्वाम्यादिष्टस्तु यो भृत्यः समं विषममेव च ।
मन्यते न स संधार्यो भूभुजा भूतिमिच्छता ॥ ११२ ॥

पिङ्गलक आह । भद्र यद्येवं तद्गच्छ शिवास्ते पन्थानः सन्त्विति । दमनकोपि तं प्रणम्य संजीवकशब्दानुसारी प्रतस्थे । अथ दमनके गते भयव्याकुलमनाः पिङ्गलकश्चिन्तयामास । अहो न शोभनं कृतं मया यत्तस्य विश्वासं गत्वात्माभिप्रायो निवेदितः । कदाचिद्दमनकोयमुभयवेतनो भूत्वा ममोपरि दुष्टबुद्धिः स्याद्भ्रष्टाधिकारत्वात् । उक्तं च ।

ये भवन्ति महीपस्य संमानितविमानिताः ।
यतन्ते तस्य नाशाय कुलीना अपि सर्वदा ॥ ११३ ॥

तत्तावदस्य चिकीर्षितं वेद्मन्यत्स्थानान्तरं गत्वा प्रतिपालयामि । कदाचिद्दमनकस्तमादाय मां व्यापादयितुमिच्छति । उक्तं च ।

१ A good servant has no fear anywhere when ordered to do anything by his master : he will enter the mouth of a serpent or the impassable sea. आहेय - अहेरिदं adj. from अहि. २ That servant, who thinks of the easiness or difficulty of doing a thing when ordered by his master, should not be entertained in service by a king who wishes for his own welfare. संधार्य Pot. P. Part. of the caus. of धृ I P. with सम्. ३ Following the sound of. शब्द अनुसरतीति. उप. स. ४ I have not acted well or I have not done well that I have &c. ५ Having put (lit. gone to) confidence. ६ Receiving wages or pay from both the parties (myself and my enemy संजीवक). उभयवेतन ब. ७ ill disposed or evil-disposed. ८ By reason of his having been thrown out of office. ९ Those who are first honoured and then dishonoured by a king, always strive to ruin him, even though they be nobly-born. संमानि...ताः is a कर्मधारय. आदौ संमानिताः पश्चाद्विमानिताः— Cf. जातप्रेत. १० कर्तुमिच्छितं what he desires to do. P. P. of the desid. of कृ 8 U. to do, used here as a substantive. ११ Here स्थानांतरं after अन्यत् is redundant, either अन्यत्स्थानं or स्थानांतरं would have been quite sufficient. स्थानांतरं. क. अन्यत्स्थानम्. क. १२ Having taken him, that is, having made ends with him.

[1] न वध्यन्ते ह्यविश्वस्ता बलिभिर्दुर्बला अपि ।
विश्वस्तास्त्वेव वध्यन्ते बलिनो दुर्बलैरपि ॥११४॥
[2] महामतिरपि प्राज्ञो न विश्वासं व्रजेद्रिपौ ।
विश्वासात्त्रिदशेन्द्रेण दितेर्गर्भो विदारितः ॥११५॥

एवं संप्रधार्य स्थानान्तरं गत्वा दमनकमवलोकयन्नेकाकी तस्थौ । दमनकोपि संजीवकसंकाशं[3] गत्वा वृषभोयमिति परिज्ञाय हृष्टमना व्यचिन्तयत् । अहो शोभनमापतितम्[4] । अनेनैतस्य[5] संधिविग्रहद्वारेण मम पिङ्गलके वश्यो भविष्यतीति । उक्तं च ।

[6] न कौलीन्यान्न सौहार्दान्नृपो वाक्ये प्रवर्तते ।
मन्त्रिणां यावदाप्नं न व्यसनं शोक एव च ॥ ११६ ॥
[7] सदैवापद्गतो राजा भोग्यो भवति मन्त्रिणाम् ।
अत एव हि वाञ्छन्ति मन्त्रिणः सापदं नृपम् ॥ ११७ ॥
[8] यथा नेच्छति नीरोगः कदाचित्सुचिकित्सकम् ।
तथापद्रहितो राजा सचिवं नाभिवाञ्छति ॥ ११८ ॥

१ Even those who are weak, are not killed even by the strong when they (the weak) have not put confidence or faith in them (the strong) ; but even the strong when they have confided (in the weak) are killed even by the weak. विश्वस्त is here used in the active sense. The prefix दुस in दुर्बल has a negative sense. वध्यन्ते for हन्यन्ते is not classical. २ A wise man though possessed of great talent should not place confidence in an enemy ; the lord of the gods (Indra) tore open the womb of Diti through confidence. महामतिः-ब. Diti, the wife of Kaśyapa and the mother of the demons. ३ Proximity, nearness. ४ A lucky thing has come to pass ! ५ By this (*viz* the fact that the object of the lion's fear is a bull) Pingalaka will come within my power by means of my uniting him (Sanjīvaka) with the lion and then separating him from him ६ A king does not act up to or follow the counsel of his ministers, either through nobility of birth or friendship, until a calamity or a source of grief befalls him (king). कौलीन्य abstract noun from कुलीन. ७ A king, who is always in anxiety or danger, becomes profitable to ministers ; and it is for this reason that ministers always wish the king to be involved in difficulties ८ As a person free from disease never wishes for a good physician, so a king free from difficulty never wishes to have a minister.

एवं विचिन्तयन्पिङ्गलकाभिमुखः प्रतस्थे । पिङ्गलकोपि तमायान्तमुत्प्रेक्ष्य स्वाकारं गूहमानो यथापूर्वमवस्थितः । दमनकोपि पिङ्गलकसकाशं गत्वा प्रणम्योपविष्टः । पिङ्गलक आह । किं दृष्टं भवता तन्महत्त्वम् । दमनक आह । दृष्टं स्वामिप्रसादात् । पिङ्गलकोप्याह । सत्यं दृष्टं भविष्यति । दमनक आह । किं स्वामिपादानामग्रेऽसत्यं विज्ञाप्यते । उक्तं च ।

अपि स्वल्पमसत्यं यः पुरो वदति भूभुजाम् ।
देवानां च विनश्येत स द्रुतं सुमहानपि ॥ ११९ ॥

तथा च । सर्वदेवमयो राजा मनुना संप्रकीर्तितः ।
तस्मात्तमेव सेवेत न व्यलीकेन कर्हिचित् ॥ १२० ॥
सर्वदेवमयस्यापि विशेषो भूपतेरयम् ।
शुभाशुभफलं सद्यो नृपाद्देवाद्भवान्तरे ॥ १२१ ॥

पिङ्गलक आह । सत्यं दृष्टं भविष्यति भवता । न दीनोपरि महान्तः कुप्यन्तीति न त्वं तेन निपातितः । यतः ।

१ Towards Pingalaka २ Concealing his own form, that is, his appearance as a spy on the actions of Damanaka. ३ As before ४ Through your Majesty's favour. ५ Can it be that you have actually seen it ? ६ What ! is a lie ever told before your Majesty ? Can I ever give you a false information ? ७ He, who, though great, tells even the least lie before kings and gods, will soon perish—Here नश् with वि is used in the Atmanepada. ८ A king is declared to be full of all gods by Manu; no one, therefore, should ever serve him deceitfully; for तस्मात्तमेव सेवेत we have तस्मात्तं दैववत्पश्येत meaning—he should, therefore, be looked upon as God ९ Though a king is full of all gods, this is the difference between him and the gods—*viz*., the fruit of good and evil is obtained from a king at once or immediately, while that from gods in the next birth or existence. भवान्तर compare स्थानान्तर. १० दीनोपरि is equivalent to दीनेभ्यः the dative plural of दीन which is the case which कुप् &c. govern. दीनानां उपरि with the poor. ११ Attacked or assaulted.

तृणानि नोन्मूलयति प्रभञ्जनो
मृदूनि नीचैः प्रणतानि सर्वतः ।
स्वभाव एवोन्नतचेतसामयं or समुच्छ्रितानेव तरून् प्रबाधते ।
महान्महत्स्वेव करोति विक्रमम् ॥ १२२ ॥

अपि च । गल्लस्थलेषु मदवारिषु बद्धराग-
मत्तभ्रमद्भ्रमरपादतलाहतोऽपि ।
कोपं न गच्छति नितान्तबलोऽपि नाग-
स्तुल्ये बले तु बलवान्परिकोपमेति ॥ १२३ ॥

दमनक आह । अस्त्येवं महात्मा स वयं कृपणाः । तथापि स्वामी यदि कथयति ततो भृत्यत्वे नियोजयामि । पिङ्गलक आह सोच्छ्वासम् । किं भवाञ्शक्तोऽस्त्येवं कर्तुम् । दमनक आह । किमसाध्य बुद्धेरस्ति । उक्तं च ।

न तच्छस्त्रैर्न नागेन्द्रैर्न हयैर्न पदातिभिः ।
कार्यं संसिद्धिमभ्येति यथा बुद्ध्या प्रसाधितम् ॥ १२४ ॥

पिङ्गलक आह । यद्येवं तर्ह्यमात्यपद आरोपितस्त्वम् । अद्यप्रभृति प्रसादनिग्रहादिकं त्वयैव कार्यमितिनिश्चयः । अथ दमनकः सत्वरं गत्वा

१ A violent wind does not up-root grass which is soft (yielding) and entirely bends down (salutes) lowly; it is but the inborn disposition of the lofty-minded; a great person displays his valour only against the great. उन्नत चेतसा. ब. २ An elephant, though possessed of great strength, does not get angry, even when trodden by the feet of bees hovering about with intoxication produced by their attachment to the temples of elephants covered with the rutting juice . . powerful person gets angry with persons of equal starngth. Another reading for गल्लस्थलेषु is गण्डस्थलेषु. मदवारिषु. ब. मदवारि विद्यते येषां तेषु. नितांतबल. ब. ३ Thus, *i. e.*, as described by you. ४ Miserly, wretched. ५ Shall appoint him a servant, shall make him (your) servant. ६ With a sigh or fetching a sigh उच्छ्वासेन सहितं यथा तथा. ७ What is impracticable to talent? What can talent not accomplish? ८ A business is not so well accomplished by means of weapons, elephants, horses and foot-soldiers as it is by means of talent. ९ Placed, seated. P. P. of रुह with आ caus. १० From to-day, hence forward. ११ Showing favours or awarding punishment &c. प्रसादश्च निग्रहश्च आदी यस्य-तत् (कार्यम्). १२ This is the resolution I have come to.

साक्षेपं[1] तमिदमाह । एह्येहि दुष्ट वृषभ । स्वामी पिङ्गलकस्त्वामाकारयति[2] । किं निःशङ्को[3] भूत्वा मुहुर्मुहुर्[4]नर्दसि[5] वृथेति । तच्छ्रुत्वा संजीवकोऽब्रवीत् । भद्र कोऽयं पिङ्गलकः । दमनक आह । किं स्वामिनं पिङ्गलकमपि न जानासि । तत्क्षणं प्रतिपालय । फलेन[6] ज्ञास्यसि । नन्वयं सर्वमृगपरिवृतो वटतले स्वामी पिङ्गलकनामा सिंहस्तिष्ठति । तच्छ्रुत्वा गतासुम्[7]आत्मानं मन्यमानः संजीवकः परं विषादमगमत् । आह च । भद्र भवान्साधुसमाचारो[8] वचनपटुश्च[9] दृश्यते । तद्यदि मामवश्यं तत्र नयसि तदभयदानेना[10]त्मीयस्वामिसकाशात्प्रसादः कारयितव्यः[11] । दमनक आह । भोः सत्यमभिहितं भवता । नीतिरेषा[12] । यतः ।

लभ्यते[13] भूमिपर्यन्तः समुद्रस्य गिरेरपि ।
न कथंचिन्महीपस्य चित्तान्तः केनचित्क्वचित् ॥ १२५ ॥

तत्त्वमत्रैव तिष्ठ यावदहं तं समये[14] दृष्ट्वा ततः पश्चात्त्वामानयामीति । तथानुष्ठिते[15] दमनकः पिङ्गलकसकाशं गत्वेदमाह । स्वामिन्न तत्प्राकृतं[16] सत्त्वं भगवतो महेशस्य[17] वाहनभूतो[18] वृषभ इति । मया पृष्ट इदमूचे । श्रीमहेशेन परितुष्टेन कालिन्दीपरिसरे[19] शष्पाग्राणि[20] चरितुं[21] समादिष्टः । किं बहुना[22] । मम प्रदत्तं क्रीडार्थं[23] वनमिदम् । पिङ्गलक

---

१ Revilingly आक्षेपेण सहितं यथा तथा. अव्य. २ Asks, demands (caus. of कृ 8 U. with आ). ३ Without fear. ४ Again and again, repeatedly ५ To bellow, to roar. ६ You will know by the result (who he is and what his power is). ७ Dead,—गताः असवः यस्य तं. ब. ८ Of good conduct, well-behaved. साधुः समाचारः यस्य. ब. ९ Clever in speech. स. त. १० By the gift of freedom from fear or by a promise of safety. ११ Favour should be caused to be shown (to me) at the hands of your lord. कारयितव्य Pot. Pass. Participle of कृ caus. १२ Policy, morality. १३ The extremity of the earth, sea and even of the mountain can be reached, but that of a king's mind can never be reached by any body. १४ On an opportunity offering itself. १५ It being so done. १६ Ordinary, common. १७ The god S'iva. १८ Become a vehicle १९ Ground on the skirts of the Kálindi or Yamuná. २० The ends of tender grass. २१ To graze, to eat. २२ What is the use of more? In short. २३ To sport or for sporting.

आह सभयम्। ज्ञातं[१] मयाधुना न देवताप्रसादं विना शष्पभोजिनो[२] व्यालाकीर्णे[३] वन एवं निःशङ्का नदन्तो भ्रमन्ति। ततस्त्वया किमभिहितम्। दमनक आह। स्वामिन्नेतदभिहितं यदेतद्[४] वनं चण्डिकावाहनभूतस्य[५] पिङ्गलकस्य विषयीभूतम्[६]। तद्भवानभ्यागतः[७] प्रियोऽतिथिः[८]। तत्तस्य सकाशं गत्वा भ्रातृस्नेहेनैकत्र[९] भक्षणपानविहरण[१०]क्रियाभिरेकस्थानाश्रयेण[११] कालो नेयः। तेनापि सर्वमेतत्प्रतिपन्नमुक्तं[१२] च सहर्षं स्वामिनः सकाशादभयदक्षिणा[१३] दापयितव्येति। [१४]तदत्र स्वामी प्रमाणम्। तच्छ्रुत्वा पिङ्गलक आह। [१५]साधु सुमते साधु मन्त्रिश्रोत्रिय[१६] साधु। मम[१७] हृदयेन सह संमन्त्र्य भवतेदमभिहितम्। तद्दत्ता मया तस्याभयदक्षिणा। परं सोऽपि मदर्थेऽभयदक्षिणां याचयित्वा[१८] द्रुततरमानीयतामिति। अथ साधु चेदमुच्यते।

अन्तःसारैरकुटिलैरच्छिद्रैः सुपरीक्षितैः[१९]।
मन्त्रिभिर्धार्यते राज्यं सुस्तम्भैरिव मन्दिरम्॥ १२६॥

१ Now I see. २ Grass eaters. शष्पं भुंजते इति शष्पभोजिनः. उप ३ Abounding in wild or ferocious animals. ४ That &c. ५ Who has become a vehicle of the wife of S'iva-चण्डिका the name of Pârvati, who has the lion for her vehicle. ६ Become a kingdom. ७ Approached or arrived. ८ A guest. ९ With such friendship as exists between brothers. १० With actions such as eating, drinking and sporting. भक्षणपानविहरणानि यत्र क्रियाः. क. ११ By resorting to one place, by living together. १२ Admitted, acknowledged P. P. of पद् with प्रति. १३ The gift of the promise of safety; for construction, see 11 in p. 42. १४ Then in this case your majesty is an authority, your majesty should decide what to do. १५ Well done, oh person of good talent, well done. १६ A learned minister. १७ You have said this, as if, in consultation with my mind, that is, you have said just what I would have said. १८ Here याचयित्वा the causal form is used for the primitive याचित्वा. This use is very frequent in the Panchatantras. १९ A kingdom is supported by ministers who are steady in mind, straight-forward, without defects and well-tried, as a house is held by pillars which are solid, straight, without holes and well-examined (before they are fixed in the ground). अन्तःसारैः अन्तः सारं येषां तैः. ब. धार्यते- caus. for primitive.

तथा च । [1]मन्त्रिणां भिन्नसंधाने भिषजां सान्निपातिके ।
कर्मणि व्यज्यते प्रज्ञा स्वस्थे को वा न पण्डितः ॥ १२७ ॥

दमनकोऽपि तं प्रणम्य संजीवकसकाशं प्रस्थितः सहर्षमचिन्तयत् [2]यदात्मप्रसादसंमुखो नः स्वामी [3]वचनैवशगश्च संवृत्तस्तन्नास्ति [4]धन्यतरो मम । उक्तं च ।

[5]अमृतं शिशिरे वह्निरमृतं प्रियदर्शनम् ।
अमृतं राजसंमानममृतं क्षीरभोजनम् ॥ १२८ ॥

अथ संजीवकसकाशमासाद्य [6]सप्रश्रयमुवाच । भो मित्र प्रार्थितोऽसौ मया [7]भवदर्थे स्वाम्यभयप्रदानम् । तद्विश्रब्ध गम्यतामिति । परं त्वया राजप्रसादमासाद्य [8]मया सह समयधर्मेण वर्तितव्यम् । न गर्वमासाद्य [9]स्वप्रभुतया [10]विचरणीयम् । अहमपि तव [11]संकेतेन सर्वां [12]राज्यधुरममात्यपदवीम् [13]आश्रित्योद्धरिष्यामि । एवं [14]कृते द्वयोरप्यावयो [15]राज्यलक्ष्मीर्भोग्या [16] भविष्यति । यतः ।

१ The wisdom of ministers is seen when peace is broken and the skill of physicians is tried when one is attacked by what is called सन्निपात (the complication of the three humours of the body); what man is not wise when there is all quiet or peace, that is, when there is no occasion for the display of skill ? भिन्नसंधाने-भिन्ने संधाने. क. सान्निपातिक an adjective from सन्निपात from पत् with सम् व्यज्यते from अंज् 7 P. with वि to manifest. २ Ready to show favour to me. ३ Gone into the power of my advice, that is, ready to abide by my advice. ४ More happy or blessed. मम = मत् ablative. ५ Fire is nectar itself (pleasant) in the cold season, the sight of a beloved person is nectar, the honour paid by a king is nectar and food containing milk, is nectar. क्षीरभोजन.— क्षीरयुक्तं भोजनं. संमान used here as a neuter noun. ६ Respectfully, courteously. ७ For your sake, on your behalf. ८ You should act with me on terms of friendship or mutual agreement for keeping on friendly terms. ९ On your own authority or power. १० To act or behave. ११ By agreement with you. १२ The yoke or responsibility of a kingdom or Government. It is the object of उद्धरिष्यामि. १३ Having attained to the dignity of a minister. १४ It being so done. १५ Royal dignity or royalty. १६ Fit to be enjoyed, enjoyable.

¹आखेटकस्य धर्मेण विभवाः स्युर्वशे नृणाम्।
नृप्रजाः प्रेरयत्येको हन्त्यन्योऽत्र मृगानिव ॥ १२९ ॥
तथा च। ²यो न पूजयते गर्वादुत्तमाधममध्यमान्।
नृपासन्नान्स मान्योऽपि भ्रश्यते दन्तिलो यथा ॥ १३० ॥
संजीवक आह। कथमेतत्। सोऽब्रवीत्।

॥ कथा ३ ॥

अस्त्यत्र ³धरातले ⁴वर्धमानं नाम नगरम्। तत्र दन्तिलो नाम ⁵नानाभाण्डपतिः ⁶सकलपुरनायकः प्रतिवसति स्म। तेन ⁷पुरकार्यं नृपकार्यं च कुर्वता ⁸तुष्टिं नीतास्तत्पुरवासिनो लोका नृपतिश्च। किं बहुना। न कोऽपि तादृक्चतुरो दृष्टो नापि श्रुतो वेति। अथवा ⁹सत्यमेतदुक्तम्।

¹⁰नरपतिहितकर्ता द्वेष्यतां याति लोके
जनपदहितकर्ता त्यज्यते पार्थिवेन्द्रैः।
इति महति विरोधे वर्तमाने समाने
नृपतिजनपदानां दुर्लभः कार्यकर्ता ॥ १३१ ॥

---

१ Riches will be obtained by men by following the duty of hunting or chase in which one man raises the game and another kills it : in the same way, one will direct the actions of the subjects and another will punish them (if found to go astray). नृप्रजा: human subjects. क. २ Even a respectable person, who, through pride does not honour the best, middling and low persons near the king, falls off from royal favour, as did Dantila in the following story. ३ On the surface of the earth. ४ Burdwan of the modern times. ५ Rich in the merchandize of various kinds. ६ The leader of the whole town. ७ Duties towards the town or pertaining to the towns-people. ८ Were pleased or satisfied. ९ It is truly said. १० He, who does the good of the king (नरपति), comes to be hated by the people while he, who looks to the interest of the subjects, is abandoned by kings ; thus there being great opposition equal (on both sides), one, who does the duties of the king and the subjects (to the satisfaction of both) is, therefore, rare. पार्थिवेन्द्र lit. a king of kings.

अथैवं [1]गच्छति काले दन्तिलस्य कदाचिद्विवाहः संप्रवृत्तः[2] । तत्र[3] तेन सर्वे तत्पुरवासिनो राजसंनिधिलोकाश्च[4] संमानपुरःसरमामन्त्र्य[5] वस्त्रादिभिः सत्कृताः[6] । ततो विवाहानन्तरं[7] राजा सान्तःपुरः[8] स्वगृहमानीयाभ्यर्चितः[9] । अथ तस्य नृपतेर्गृहसंमार्जनकर्ता[10] गोरम्भो नाम राजसेवको गृहायातोऽपि तेनानुचितस्थान उपविष्टो विज्ञाय[11] अर्धचन्द्रं दत्त्वा[12] निःसारितः । सोऽपि ततः प्रभृति निःश्वसन्नपमानान्न[13] रात्रिमपि शेते । कथं मया तस्य भाण्डपते राजप्रसादहानिः[14] कर्तव्येति चिन्तयन्नास्ते । किमनेन वृथा शरीरशोषणेन[15] । न किंचिन्मया तस्यापकर्तुं शक्यमिति । अथवा साध्विदमुच्यते ।

[16]यो ह्यपकर्तुमशक्तः कुप्यति किमसौ नरोऽत्र निर्लज्जः ।
उत्पतितोऽपि हि चणकः शक्तः किं भ्राष्ट्रकं भङ्क्तुम् ॥ १३२ ॥

अथ कदाचित्प्रत्यूषे[17] योगनिद्रां[18] गतस्य राज्ञः शय्यान्ते[19] मार्जनं कुर्वन्निदमाह । अहो दन्तिलस्य महद्धृष्टत्वं[20] यद्राजमहिषीमालिङ्गति[21] । तच्छ्रुत्वा राजा ससंभ्रमम्[22] उत्थाय तमुवाच । भो गोरम्भ सत्यमेतद्यद्देवी दन्तिलेना-

१ Thus as time rolled on, in course of time. २ Took place, happened ३ तस्मिन in it, *viz.*, the marriage. ४ The people near or about the king. ५ Being invited. ६ Were treated with hospitality or respect. ७ After the marriage ceremony was over. विवाहादनन्तरं. पं. त. ८ Accompanied with the inmates of the harem, together with his queens. ९ Worshipped or honoured. १० He who did the menial work of cow-dunging &c. ११ Having known or found out that he sat in a place where he did not deserve to sit, *i. e.*, in a place high for his position. १२ The expression अर्धचन्द्र दा means to seize a person by the neck and turn him out. १३ Breathing (revenge) through the indignity offered to him. १४ The forfeiture or loss of the king's favour. १५ By the drying up or withering of the bodily frame (through anxiety). १६ Why should that shameless person, who is unable to retaliate a wrong, get angry ? For, is a gram, though it flies up, able to break the frying pan ? (in which it is fried). १७ In the early morning. १८ While the king was in a state of half contemplation and half sleep. १९ Near the bed-stead or couch. २० Boldness; audacity. २१ The crowned queen. २२ With great haste, hastily. संभ्रमेण सहितं यथा तथा.

लिङ्गितेति । गोरम्भः प्राह । देव रात्रिजागरेण[1] द्यूतासक्तस्य[2] मे बलान्निद्रा[3] समायाता । तन्न वेद्मि किं मयाभिहितम् । राजा सेर्ष्यं[4] स्वगतम्[5] । एष[6] तावदस्मद्गृहेऽप्रतिहतगतिस्[7]तथा दन्तिलोऽपि । तत्कदाचिदनेन देवी समालिङ्ग्यमाना दृष्टा भविष्यति । तेनेदमभिहितम् । उक्तं च ।

> यद्वाञ्छति[9] दिवा मर्त्यो वीक्षते वा करोति वा ।
> तत्स्वप्नेऽपि तदभ्यासाद्ब्रूते वाथ करोति वा ॥ १३३ ॥

तथा च । शुभं[10] वा यदि वा पापं यन्नृणां हृदि संस्थितम् ।

> सुगूढमपि तज्ज्ञेयं स्वप्नवाक्यात्तथा मदात् ॥ १३४ ॥

अथवा स्त्रीणां[11] विषये कोऽत्र संदेहः[12] ।

> जल्पन्ति[13] सार्धमन्येन पश्यन्त्यन्यं सविभ्रमाः ।
> हृद्गतं चिन्तयन्त्यन्यं प्रियः को नाम योषिताम् ॥ १३५ ॥

१ On account of wakefulness at night. २ Addicted to gambling. ३ Sleep came on me forcibly; sleep forced itself upon me. ४ With jealousy ईर्ष्यया सहितं यथा तथा. अव्य. ५ Aside, to himself. This is one of the stage directions in dramas, when a person says anything " aside " or soliloquizes, this expression is used. ६ As to this man, *viz.*, Gorambha. ७ Has uninterrupted access. अप्रतिहता गतिर्यस्य. ब ८ Cf. 5 in p. 40. ९ That, which a man wishes for, sees or does during day time, he speaks of or does in a dream by reason of its being constantly in the mind. १० That which is uppermost in the minds of people whether good or evil, though well-guarded, can be known by others by their raving about it in a dream and also through intoxication. ११ As regards women; with respect to women. १२ Doubt. १३ They (women) speak with one person and look amorously at another and think of a third who is the object of their hearts; who indeed is beloved by women ? हृद्गतं-हृदि गतं. स. त.

एकेन स्मितपाटलाधररुचो जल्पन्त्यनल्पाक्षरं
वीक्षन्तेऽन्यमितः स्फुटत्कुमुदिनीफुल्लोल्लसल्लोचनाः ।
दूरोदारचरित्रचित्रविभवं ध्यायन्ति चान्यं धिया
केनेत्थं परमार्थतोऽर्थवदिव प्रेमास्ति वामभ्रुवाम् ॥ १३६ ॥

तथा च । नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः ।
नान्तकः सर्वभूतानां न पुंसां वामलोचना ॥ १३७ ॥
रहो नास्ति क्षणो नास्ति नास्ति प्रार्थयिता नरः ।
तेन नारद नारीणां सतीत्वमुपजायते ॥ १३८ ॥
यो मोहान्मन्यते मूढो रक्तेयं मम कामिनी ।
स तस्या वशगो नित्यं भवेत्क्रीडाशकुन्तवत् ॥ १३९ ॥
तासां वाक्यानि कृत्यानि स्वल्पानि सुगुरूण्यपि ।
करोति यः कृतैर्लोके लघुत्वं याति सर्वतः ॥ १४० ॥

१ They (women) with the lustre of their lower-lips rendered reddish by smiles, talk much with one person, look at quite a different one with eyes shining like full-blown lotuses, and think inwardly of a third whose conduct is far from being noble, but who possesses manifold riches; in this way for whom do women (वामभ्रुवः) entertain love in the real sense of the term? स्मित---च --स्मितेन पाटला अधररुक् यासां. ब. स्मित-पाटल may also mean a *blown* पाटल *flower*. अनल्पाक्षर-अनल्पान्य-क्षराणि यस्मिन् यथा तथा. अन्य. इतः--अन्यम् some one other than this one. स्फुट......ना --स्फुटन्त्यः कुमुदिन्यः इव फुल्लानि उल्लसन्ति च लोचनानि यासां ताः. ब. दूरो...त्र--दूरं उदारचरित्रं यस्य सः दूरोदारचरित्रः. चित्राः विभवाः यस्य सः. ब. परमार्थतः significant in reality. वामभ्रू--वामे भ्रुवौ यस्याः सा. वामभ्रूः a woman with beautiful eyebrows. २ Fire is not satisfied with any quantity of fuel, the great ocean with any number of rivers falling into it, the god of death even with all creatures, and women with any number of men. Here the four Genetives are used for the instrumental वामलोचना--here वाम means beautiful--as in वामभ्रूः. ३ Oh Nârada, there is chastity in women only when there is no lonely place, fitting opportunity and a man to make love to them (and not otherwise). ४ That foolish man who thinks or believes through ignorance that his wife is attached to him, will always be under her thumb like a bird kept for sport. ५ He, who does their (women's) biddings and business whether trifling or great, demeans himself entirely in the opinion of the public by those very actions. कृतैः=कृत्यैः.

स्त्रियं च यः प्रार्थयते संनिकर्षं च गच्छति ।
ईषच्च कुरुते सेवां तमेवेच्छन्ति योषितः ॥ १४१ ॥
अनर्थित्वान्मनुष्याणां भयात्परिजनस्य च ।
मर्यादायाममर्यादाः स्त्रियस्तिष्ठन्ति सर्वदा ॥ १४२ ॥
नासां कश्चिदगम्योस्ति नासां च वयसि स्थितिः ।
विरूपं रूपवन्तं वा पुमानित्येव भुञ्जते ॥ १४३ ॥
रक्तोभिजायते भोग्यो नारीणां शाटको यथा ।
घृष्यते यो दशालम्बी नितम्बे विनिवेशितः ॥ १४४ ॥
अलक्तको यथा रक्तो निष्पीड्य पुरुषस्तथा ।
अबलाभिर्बलाद्रक्तः पादमूले निपात्यते ॥ १४५ ॥

एवं स राजा बहुविधं विलप्य तत्प्रभृति दन्तिलस्य प्रसादपराङ्मुखः संजातः । किं बहुना । तस्य राजद्वारे प्रवेशो निवारितः । अथ दन्तिलः प्रसादपराङ्मुखं राजानमवलोक्य चिन्तयामास ।

---

१ Women wish only for that man, who sues a woman, goes near her and does even some trifling service for them. २ Ill-behaved women (lit. those who have transgressed the proper limits) always keep within proper bounds only for want of suing on the part of men and the fear of their attendants. अनर्थित्वात् न अर्थित्वं. न. त. ३ There is no one who is unfit for their love, they have no restriction of age; they enjoy a man whether ugly or handsome only because he is a man. Here understand ताः as the subject of भुञ्जते. ४ A man who is attached (to a woman) becomes fit to be enjoyed by women as a red piece of cloth which is rubbed by being worn on the buttocks and hangs down with the skirt. रक्त (1) red (2) attached. दशालंबी=दशाया आलंबते इति. उप. ५ As the red lac (the red resin of certain trees) is squeezed and then thrown down, so is a man who is attached deprived of his substance by women and made to fall prostrate at their feet. निपात्यते Pre. Pass. of the caus. of पत् with नि. ६ In various ways, variedly. ७ Having wept or lamented. ८ Thenceforward. It is equal to ततः प्रभृति. ९ Averse to showing favour. १० Prohibited. P. P. of the caus. of वृ with नि.

कोऽर्थान्प्राप्य न गर्वितो विषयिणः कस्यापदोऽस्तंगताः
स्त्रीभिः कस्य न खण्डितं भुवि मनः को नाम राज्ञां प्रियः ।
कः कालस्य न गोचरान्तरगतः कोऽर्थी गतो गौरवं
को वा दुर्जनवागुरासु पतितः क्षेमेण यातः पुमान् ॥ १४६ ॥
काके शौचं द्यूतकारे च सत्यं
सर्पे क्षान्तिः स्त्रीषु कामोपशान्तिः ।
क्लीबे धैर्यं मद्यपे तत्त्वचिन्ता
राजा मित्रं केन दृष्टं श्रुतं वा ॥ १४७ ॥

अपरं मयास्य भूपतेरथवान्यस्यापि राजसंबन्धिनः स्वप्नेऽपि नानिष्टं कृतम् । तत्किमेतत् । एवं तं दन्तिलं राजद्वारे विष्कम्भितं विलोक्य संमार्जनकर्ता गोरम्भो विहस्य द्वारपालानिदमूचे । भो भो द्वारपाला राजप्रसादाधिष्ठितोऽयं दन्तिलः स्वयं निग्रहानुग्रहकर्ता च । तदनेन निवारितेन यथाहं तथा यूयमप्यर्धचन्द्रभाजिनो भविष्यथ । तच्छ्रुत्वा दन्तिलश्चिन्तयामास । नूनमिदमेतस्य गोरम्भस्य चेष्टितम् । अथवा साध्विदमुच्यते ।

---

१ Who has not become proud by getting wealth, what sensualist has his miseries ended, whose mind is not disappointed on this earth by women, what man (I should like to know) is a favourite with kings, who has not fallen into the jaws of death, what supplicant is honoured, or what man, who is caught in the nets spread for him by the wicked, has come out safe ? अरतगत—et. गोचर—reach. २ Who has ever seen or heard of purity in the crow, truthfulness in a gambler, forbearance in a serpent, the gratification of the carnal desire in women, courage in an impotent man, the thought or consideration of reality in a drunkard, and friendship in a king ? (lit. the king as a friend). ३ Of one related to or connected with the king. ४ Obstructed. P. P. of स्कंभ् with वि 1 A. 5, 9, P. ५ The door-keepers. ६ Who has obtained royal favour. ७ He who awards punishment and shows favour. ८ At the hands of him who is prohibited. ९ The sharers of अर्धचंद्र or अर्धचंद्रदान (being seized by the neck and turned out). १० Mischief, trick.

[1]अकुलीनोपि मूर्खोपि भूपालं योत्र सेवते।
अपि संमानहीनोपि स सर्वत्रापि पूज्यते॥ १४८॥
[2]अपि कापुरुषो भीरुः स्याच्चेन्नृपनिषेवकः।
यदाप्नोति फलं लोकात्तस्यांशमपि नो गुणी॥ १४९॥

एवं स बहुविधं विलप्य विलक्षानन[3] उद्वेगाद्गतप्रभावः[4][5] स्वगृहं गत्वा निशामुखे[6] गोरम्भमाहूय वस्त्रयुगलेन[7] संमान्येदमुवाच[8]। भद्र[9] मया तदा त्वमनुचितस्थाने राजासन उपविष्टो भर्त्सयित्वापमानितो[10] न रोषात्त्वं[11] निःसारितः[12]। सोपि स्वर्गराज्योपमं[13] तद्वस्त्रयुगलमासाद्य परं परितोषं गत्वा तमुवाच। भोः श्रेष्ठिन्क्षान्तं[14] मया ते तत्। अस्य कृतसंमानस्य[15] पश्य मे बुद्धिप्रभावं राजप्रसादं च। एवमुक्त्वा सपरितोषं निष्क्रान्तः। साधु चेदमुच्यते।

[16]स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिम्।
अहो सुसदृशी चेष्टा तुलायष्टेः खलस्य च॥ १५०॥

अथ गोरम्भस्तत्रैव गत्वा योगनिद्रां गतस्य[17] राज्ञः संमार्जनक्रियां कुर्वन्निदमाह। अहो अविवेको[18]स्मद्भूपतेर्यत्पुरीषोत्सर्गं[19] कुर्वञ्चिर्भटी-[20]भक्षणं करोति। तच्छ्रुत्वा राजा सविस्मयं तमुवाच। रे रे गोरम्भ किमप्रस्तुतं[21] लपसि। गृहकर्मकरत्वात्[22] त्वां न व्यापादयामि। किं त्वया कदाप्यहमेवंविधं[23] कर्म समाचरन्दृष्टः। सोब्रवीत्। देव द्यूतासक्त्या[24]

---

१ Even that man who is low-born, foolish and destitute of honour, is respected every where, when he serves the king. २ A worthy or meritorious person does not get even a fraction of that fruit, which even a mean coward does, provided he is the servant of a king. ३ With. abashed looks विलक्षं आननं यस्य सः. ब. ४ Through agitation or perturbation. ५ Who had lost power. ६ In the evening (lit. at the beginning of night). ७ A pair of clothes. ८ Having honoured or worshipped. ९ Good friend, good sir. १० Having been reproved. ११ Through anger. १२ Turned out. १३ Resembling a heavenly kingdom स्वर्गराज्यस्य उपमा यस्य. ब. १४ I have pardoned you (that fault). १५ Who has been honoured कृतः संमानः यस्य. ब. १६ Very similar is the action of a wicked man and also of the beam of a balance, *viz.*, they both rise up or go down even with a little (weight or honour). १७ This is a Genetive absolute. १८ Thoughtlessness or inconsiderateness. १९ While voiding the excrements. २० Cucumber. २१ Why do you talk so irrelevantly ? २२ On account of your doing my household duties. २३ Doing such an (absurd) action. २४ Attachment; addiction.

रात्रिजागरणेन संमार्जनं कुर्वाणस्य मम बलान्निद्रा समायाता । तयाविष्टेन किंचिज्जल्पितम् । तन्न वेद्मि । तत्प्रसादं करोतु स्वामी मे परवशस्येति । एवं राजा श्रुत्वा चिन्तितवान्मयाजन्मे पुरीषोत्सर्गं कुर्वता कदापि चिर्भटिका न भक्षिता । तद्यथायं व्यतिकरोऽसंभाव्यो ममानेन व्याहृतस्तथा दन्तिलस्यापीति निश्चयः । तन्मया न युक्तं कृतं यत्स वराकोऽपमानितः । न तादृक्पुरुषाणामेवंविधं चेष्टितं संभाव्यते । तस्याप्रसादेन राजकृत्यानि सर्वाण्यपि शिथिलतां व्रजन्ति । एवमनेकधा विमृश्य दन्तिलमाहूय निजांगवस्त्राभरणादिभिः संयोज्य स्वाधिकारे नियोजयामास ।

अतोऽहं ब्रवीमि यो न पूजयते गर्वादिति ।

संजीवक आह । भद्र एवमेवैतत् । यद्भवताभिहितं तदेव मया कर्तव्यमिति । एवमभिहिते दमनकस्तमादाय पिंगलकसकाशमगमत् । आह च । देव एष मया स संजीवक आनीतः । देवोऽधुना प्रमाणम् । संजीवकोऽपि तं सादरं प्रणम्याग्रतः सविनयं स्थितः । पिंगलकोऽपि तस्य पीनायतककुद्मतो नखकुलिशालंकृतं दक्षिणपाणिमुपरि दत्त्वा मानपुरःसरमुवाच । अपि भवतः शिवम् । कुतस्त्वमस्मिन्वने विजने समायातोऽसि । तेनाप्यात्मवृत्तान्तः कथितः । यथा वर्धमानेन सह वियोगः संजातस्तथा

---

१ Overtaken by it (sleep). २ Being in the power of another; here of course under the influence of sleep. ३ Since birth आजन्म=जन्मनः प्रभृति. ४ Affair, occurrence. ५ Is spoken of. ६ Poor fellow. ७ Are carelessly done or mismanaged. ८ In various ways, in more ways than one. ९ Having considered. (abs. of मृश् 6 P. with वि). १० With clothes and others taken off his own body. ११ Therefore I say &c. १२ Respectfully, आदरेण [illegible]. १३ Of him whose hump was big and large. [illegible] १४ Adorned with the thunderbolt-like nails, [illegible] कुलिश: [illegible] अलंकृत. [illegible] १५ Having [illegible] १६ Is it well with your honour? Is your [illegible] १७ [illegible] manless, uninhabited, [illegible] [illegible] As how he [illegible]

सर्वं निवेदितम् । एतच्छ्रुत्वा पिंगलकः सादरतरं तमुवाच । वयस्य न भेतव्यम् । मद्भुजपञ्जरपरिरक्षितेन यथेच्छं त्वयाधुना वर्तितव्यमन्यच्च नित्यं मत्समीपवर्तिना भाव्यं यतः कारणाद्बहूपायं रौद्रसत्वनिषेवितं वनं गुरूणामपि सत्वानामसेव्यं कुतः शष्पभोजिनाम् । एवमुक्त्वा सकलमृगपरिवृतो यमुनाकच्छमवतीर्योदकग्रहणं कृत्वा स्वेच्छया तदेव वनं प्रविष्टः । ततश्च करटकदमनकनिक्षिप्तराज्यभारः संजीवकेन सह सुभाषितगोष्ठीमनुभवन्नास्ते । अथवा साध्विदमुच्यते ।

यदृच्छयाप्युपनतं सकृत्सज्जनसंगतम् ।
भवत्यजरमत्यन्तं नाभ्यासक्रममीक्षते ॥ १५१ ॥

संजीवकेनाप्यनेकशास्त्रावगाहनादुत्पन्नबुद्धिप्रागल्भ्येन स्वल्पैरेवाहोभिर्मूढमतिः पिंगलको धीमांस्तथा कृतो यथारण्यधर्माद्वियोज्य ग्राम्यधर्मे नियोजितः । शेषः सर्वोपि मृगजनो दूरीभूतस्तिष्ठति । करटकदमनकावपि प्रवेशं न लभेते । अन्यच्च सिंहपराक्रमाभावात्सर्वोपि मृगजनः क्षुधाविष्टः कांदिशीकः संवृत्तः । उक्तं च ।

---

१ More respectfully. २ Protected by the cage of my arms. भुजावेव पंजरः क. ३ Should be always near me. ४ Because, for. ५ Resorted to by ferocious animals. ६ Unfit to be inhabited. ७ Whence then for &c. ? ८ Having entrusted the responsibility of Government to Karataka and Damanaka. करटकदमनकयोः निक्षिप्तः राज्यभारः येन. ब. ९ Conversation on excellent subjects. १० Union with good men when once brought [illegible] *accidentally*, becomes everlasting and great, and does not require any repetition. सज्जनसंगतम्—सज्जनैः संगतम् तृ. ब. [illegible] अतः [illegible]. ब. ११ By plunging into vairous sciences, by deeply studying the various sciences. १२ By the boldness of talent. १३ Of dull-intellect, a blockhead. १४ Talented, learned. १५ In such a way that he. १६ Being drawn away from the occupation or duties of wild animals. १७ Towards the duties of villagers. १८ Animals ; beasts. १९ Could get no access. २० By reason of the [illegible] of the lion. २१ Overtaken by hunger. २२ Running away, fugitive.

फलहीनं नृपं भृत्याः कुलीनमपि चोन्नतम् ।
संत्यज्यान्यत्र गच्छन्ति शुष्कं वृक्षमिवाण्डजाः ॥ १५२ ॥

तथा च । अपि संमानसंयुक्ताः कुलीना भक्तितत्पराः ।
वृत्तिभंगान्महीपालं त्यक्त्वा यान्ति सुसेवकाः ॥ १५३ ॥

अन्यच्च । कालातिक्रमणं वृत्तेर्यो न कुर्वीत भूपतिः ।
कदाचित्तं न मुञ्चन्ति भर्त्सिता अपि सेवकाः ॥ १५४ ॥

तथा न केवलं सेवका एवेत्थं भवन्त्यासंसारं समस्तमेतज्जगदपि तावद्रक्षणार्थं सामादिभिरुपायैस्तिष्ठति । तद्यथा ।

देशानामुपरि क्ष्मापा आतुराणां चिकित्सकाः ।
वणिजो ग्राहकाणां च मूर्खाणामपि पण्डिताः ॥ १५५ ॥

१ Having deserted a king from whom no fruit is obtained or no benefit is secured, even though he be nobly-born and high-minded, servants go elsewhere, just as birds (अंडजाः) do a dried-up tree. फलहीन may also be taken with वृक्ष in the sense of having no fruits on it. अंडज lit. the egg-born–the birds are so-called because they come out of the eggs after they have been hatched. २ Good servants though treated with respect and devoted, go away by abandoning a king through the stoppage of the means of livelihood, that is, when their allowance is not paid betimes. भक्तितत्पर–भक्त्यां तत्पराः. स. त. ३ Servants though scolded never desert that king who does not make any delay in paying them their wages. ४ As far as the world goes. ५ By means of remedies such as सामन् &c. They are :—1. सामन् (*n.*) peace, negotiation; 2. दानं (*n.*) offering of bribes; 3. भेद् (*m.*) sowing dissensions among the enemies and 4. दण्ड: punishment, force. ६ By means of snares made ready with *sáma* and others, kings (क्ष्मापाः) watch over kingdoms, physicians over sick persons, traders over customers, wise men over fools, thieves over the careless, beggars over householders, harlots over lovers and artisans over all people, night and day, and enjoy them (the above mentioned) according to their power, as aquatic animals do aquatic ones. सामादिसज्जितैः–सामादिभिः सज्जितैः. तृ. त. कुलज–कुलात् जातः जलजः. पं. त.

प्रमादिनां तथा चौरा भिक्षुका गृहमेधिनाम्।
गणिकाः कामुकानां च सर्वलोकस्य शिल्पिनः॥ १५६॥
सामादिसज्जितैः पाशैः प्रतीक्षन्ते दिवानिशम्।
भुञ्जते च यथाशक्ति जलजा जलजा यथा॥ १५७॥

अथवा साध्विदमुच्यते।

सर्पाणां च खलानां च परद्रव्यापहारिणाम्।
अभिप्राया न सिध्यन्ति तेनेदं वर्तते जगत्॥ १५८॥
अत्तुं वाञ्छति शाम्भवो गणपतेराखुं क्षुधार्तः फणी
तं च क्रौञ्चरिपोः शिखी गिरिसुतासिंहोपि नागाशनम्।
इत्थं यत्र परिग्रहस्य घटना शम्भोरपि स्याद्गृहे
तत्रान्यस्य कथं न भावि जगतो यस्मात्स्वरूपं हि तत्॥१५९॥

ततः क्षुत्क्षामकण्ठौ परस्परं करटकदमनकौ मन्त्रयेते। तत्र दमनको ब्रूते। भद्र आवां तावदप्रधानतां गतौ। एष पिङ्गलकः संजीवकानुरक्तः स्वव्यापारपराङ्मुखः स्थितः। सर्वोपि परिजनो गतः। तत्किं क्रियते।

करटक आह। यद्यपि त्वदीयवचनं न करोति तथापि स्वामी स्वदोषनाशाय वाच्यः। उक्तं च।

अशृण्वन्नपि बोद्धव्यो मन्त्रिभिः पृथिवीपतिः।
यथा स्वदोषनाशाय विदुरेणाम्बिकासुतः॥ १६०॥

---

१ The objects in view of snakes, wicked men and of those who deprive others of their wealth, do not succeed and, therefore, this world exists. परद्रव्यं अपहरंतीति-परद्रव्यापहारिणः. उप. २ The hungry snake of S'iva (S'ambhu) wishes to devour the mouse of Ganapati; the peacock of the enemy of *Krauncha* (Kârtikeya) on his part, wishes to devour him (the snake); the lion of *the daughter of mountain* (गिरिजा) also wishes to devour him (snake); when such is the occurrence among the members of the family even of S'ambhu, how will not the same happen in the house of another (ordinary mortal)? For such indeed is the nature of the world. शाम्भव adj. from शंभु. After नागाशनम् understand वाञ्छति. परिग्रह train, retinue. ३ Have been reduced to the state of non-ministers. ४ Does not listen to the advice of.. ५ To prevent your own future blame; in order that you may not be blamed afterwards for being negligent in your duties. ६ Even though a king may not listen, he should be properly counselled by the ministers, as the son of Ambiká, *viz.*, (धृतराष्ट्र) was advised by Vidura that he might not blame him (Vidura) afterwards. बोद्धव्य = बोधितव्य caus.

तथा च । मैदोन्मत्तस्य भूपस्य कुञ्जरस्य च गच्छतः ।
उन्मार्गं वाच्यतां यान्ति महामात्राः समीपगाः ॥ १६१ ॥

तस्यैव शष्पभोजी स्वामिनः सकाशमानीतः । तत्स्वहस्तेनाङ्गाराः कर्षिताः । दमनक आह । सत्यमेतत् । ममायं दोषो न स्वामिनः । उक्तं च ।

जैम्बुको हुडुयुद्धेन वयं चाषाढभूतिना ।
नापिती परकार्येण त्रयो दोषाः स्वयंकृताः ॥ १६२ ॥

करटक आह । कथमेतत् । सोऽब्रवीत् ।

॥ कथा ४ ॥

अस्ति कस्मिंश्चिद्विविक्तप्रदेशे मठायतनम् । तत्र देवशर्मा नाम परिव्राजकः प्रतिवसति स्म । तस्यानेकसाधुजनदत्तसूक्ष्मवस्त्रविक्रयवशात्कालेन महती वित्तमात्रा संजाता । ततः स न कस्यचिद्विश्वसिति । नक्तंदिनं कक्षान्तरात्तां मात्रां न मुञ्चति । अथवा साधु चेदमुच्यते ।

अर्थानामर्जने दुःखमर्जितानां च रक्षणे ।
आये दुःखं व्यये दुःखं धिगर्थाः कष्टसंश्रयाः ॥ १६३ ॥

१ When an intoxicated king and a wild elephant go astray, the ministers or drivers that are near, are blamed. महामात्राः (1) ministers. (2) elephant-drivers. २ You have drawn burning charcoal over yourself with your own hands, that is, you have brought destruction upon your own head. ३ A jackal suffered by the fight of two rams, we at the hands of Ashâdhabhûti, and the female barber for another's business—all the three faults were committed by ourselves, viz.,—by the very persons that suffered for them. ४ Lonely, solitary. ५ A monastery. ६ A recluse. ७ In consequence of the sale of fine clothes given him by various good persons or sages. ८ In course of time. ९ A large measure of property, a large amount of money. १० The arm-pit. ११ There is trouble in acquiring wealth and in protecting that which is obtained; thus there is trouble in its acquisition and expenditure. Fie on wealth which is the abode of all miseries !

अथाषाढभूतिर्नाम परवित्तापहारकस्तामर्थमात्रां तस्य कक्षान्तरगतां लक्षयित्वा व्यचिन्तयत् । कथं मयास्येयमर्थमात्रा हर्तव्येति । तदत्र मठे तावद्दृढशिलासंचयवशाद्भित्तिभेदोपि नास्त्युच्चैस्तरत्वाच्च द्वारेण प्रवेशो नास्ति तदर्थं मायावचनैर्विश्वास्य च्छात्रतां व्रजामि येन स विश्वस्तः कदाचिद्विश्वासमेति । उक्तं च ।

नाविदग्धः प्रियं ब्रूयात्स्फुटवक्ता न वञ्चकः ।
निःस्पृहो नाधिकारी स्यान्नाकामी मण्डनप्रियः ॥ १६४ ॥

एवं निश्चित्य तस्यान्तिकमुपगम्यों नमःशिवायेति प्रोच्चार्य साष्टाङ्गं प्रणम्य सप्रश्रयमुवाच । भगवन् । असारः संसारोयं गिरिनदीवेगोपमं यौवनं तृणाग्निसमं जीवितं शरदभ्रच्छायासदृशा भोगाः स्वप्नसदृशो मित्र-पुत्रकलत्रभृत्यवर्गसंयोगः । एवं मया सम्यक्परिज्ञातम् । तत्किं कुर्वतो मे संसारसमुद्रोत्तरणं भविष्यति । तच्छ्रुत्वा स सादरमाह । वत्स धन्योसि यत्प्रथमे वयस्येवं विरक्तिभावः । उक्तं च ।

---

१ One who deprived people of their wealth. २ By reason of a collection of hard stones. ३ Breach of the wall. ४ On account of its being very high. ५ Deceptive speech. ६ Having caused him to confide in me. ७ Shall be (his) pupil. ८ Places confidence, being inspired with confidence. ९ One who is not clever will not speak what is liked by one; he who is out-spoken cannot be deceitful; he who is free from desire, or indifferent will not be an officer and he who has no love-feeling cannot have any liking for ornaments. अकामी-न कामी. न. त. १० A bow to S'iva ! Here the final म of उपगम्य is dropped before ओम्. ११ By falling prostrate (lit. on the eight limbs) साष्टांगप्रणाम is a very humble mode of obeisance. १२ This world is unreal or unsubstantial. १३ As rapid in its motion as a river running down a hill. १४ Like the fire made by kindling grass. १५ Like the shadow of a cloud in the S'arat season. १६ Collection, multitude. १७ Union. १८ Going beyond or crossing the sea in the form of this worldly existence. १९ The absence of all worldly desires. Here विरक्ति alone would have expressed the intended sense and so भाव is superfluous.

पूर्वे[१] वयसि यः शान्तः स शान्त इति मे मतिः ।
धातुषु क्षीयमाणेषु शमः कस्य न जायते ॥ १६५ ॥
आदौ[२] चित्ते ततः काये सतां संपद्यते जरा ।
असतां तु पुनः काये नैव चित्ते कदाचन ॥ १६६ ॥

यच्च मां संसारसागरोत्तरणोपायं पृच्छसि तच्छ्रूयताम् ।

शूद्रो[३] वा यदि वान्योपि चण्डालोपि जटाधरः ।
दीक्षितः शिवमन्त्रेण सभस्माङ्गी शिवो भवेत् ॥ १६७ ॥
षडक्षरेण[४] मन्त्रेण पुष्पमेकमपि स्वयम् ।
लिङ्गस्य मूर्ध्नि यो दद्यान्न स भूयोभिजायते ॥ १६८ ॥

तच्छ्रुत्वाषाढभूतिः पादौ[५] गृहीत्वा सप्रश्रयमिदमाह । भगवन्दीक्षया[६] मेऽनुग्रहं कुरु । ततो देवशर्माह । वत्स अनुग्रहं ते करिष्यामि परंतु रात्रौ त्वया मठमध्ये न प्रवेष्टव्यं यत्कारणं निःसङ्गता[७] यतीनां युज्यते तव ममा च । उक्तं च ।

१ It is my opinion that he, whose passions are subdued in the first stage of life, is really शांत (free from passions); who does not become शांत when the humours of the body are wasted or dried up. क्षीयमाण is here put for क्षीण. २ There is old age first in the mind and then in the body of the good ; but as regards the evil-minded, there is old age in the body and never in the mind. ३ Whether a person be a Sûdra by caste or any other person or even a low-caste, when he wears matted hair or becomes an ascetic, is consecrated with the mantra of S'iva and smears his body with ashes, he becomes S'iva himself. ४ He, who will place on the head of the *linga*, even one flower with his own hand by repeating the *mantra* of *six syllables* (ओं नमः शिवाय), will never be born again, *i. e.*, will get absolution. ५ Having clasped his feet by way of adoration. ६ By consecration or initiation. ७ Absence of attachment to the worldly objects.

[1] दुर्मन्त्रान्नृपतिर्विनश्यति यतिः सङ्गात्सुतो लालना-
द्विप्रोनध्ययनात्कुलं कुतनयात्स्नेहः प्रवासाश्रयात् ।
मैत्री चाप्रणयात्समृद्धिरनयाच्छीलं खलोपासनात्
स्त्री गर्वादनवेक्षणादपि कृषिस्त्यागात्प्रमादाद्धनम् ॥ १६९ ॥

तत्त्वया व्रतग्रहणानन्तरं[2] मठद्वारे तृणकुटीरके[3] शयनीयम् । स चाह । भगवन्भवदादेशः प्रमाणम् । परत्र[4] हि तेन प्रयोजनम् । अथ कृतशयनसमयं[5] देवशर्मानुग्रहं कृत्वा शास्त्रोक्त[6]विधिना शिष्यतामनयत्[7] । सोपि हस्तपादावमर्दनादिपरिचर्यया[8] तं परितोषमनयत् । पुनस्तथापि मुनिः कक्षान्तरान्मात्रां न मुञ्चति । अथैवं गच्छति काल[9] आषाढभूतिश्चिन्तयामास । अहो न कथंचिदेव[10] मे विश्वासमेति । तत्किं दिवापि शस्त्रेण मारयामि[11] किंवा विष प्रयच्छामि किंवा पशुमिव व्यापादयामीति । एवं चिन्तयतस्तस्य[12] देवशर्मणोपि शिष्यपुत्रः कश्चिद्ग्रामान्निमन्त्रणाय[13] समायातः । आह च । भगवन्पवित्रारोपण[14]कृते मम गृहमागम्यतामिति ।

---

१ A king is ruined by evil counsel, an ascetic by attachment to worldly objects, a son by over-indulgence, a Brâhmana by want of the study of the scriptures, a family by a wicked son, affection by having recourse to travelling, frendship by want of real affection, prosperity by iniquity, good disposition by serving the wicked, a woman by pride, husbandry by want of superintendence and wealth by charity and carelessness. The reading for the last two lines is different in Bhartrihari from which the verse is quoted. It runs thus ह्रीर्मद्यादनवेक्षणादपि कृषिः स्नेहः प्रवासाश्रयात् । मैत्री चाप्रणयात्समृद्धिरनयात्त्यागात्प्रमादाद्धनम्. The only difference is of स्त्री गर्वात् for ह्रीर्मद्यात् for all the rest are found in the verse though in a different order. २ After taking the vow. ३ A hut. ४ There is use of it in the world to come or the next world (परत्र) ५ Who had agreed to the condition of sleeping in the hut. This is an adjective of तं understood. ६ According to the ceremony prescribed in the S'astras. ७ Made him (his) disciple. ८ By means of service chiefly consisting in shampooing the hands and feet. हस्तपादावमर्दनं आदिर्यस्यां सा. ब. ९ As time rolled on, in course of time. १० By any means whatever. ११ Caus. of मृ to die, to kill. १२ While he was so thinking (Gen. absolute). १३ For giving him invitation. १४ Putting on of the पवित्र, a ring of Darbha grass. It is a ceremony at the performance of which the members of a sect meet together and put on the rings of *darbha* or Pavitras.

तच्छ्रुत्वा देवशर्माषाढभूतिना सह हृष्टमनाः[1] प्रस्थितः । अथैवं गच्छतोरुभ[2] काचिन्नदी समायाता । तां दृष्ट्वा मात्रां कक्षान्तरादवतार्य[3] कन्थामध्ये[4] सुगुप्तां[5] निधाय स्नात्वा देवार्चनं विधाय तदनन्तरमाषाढभूतिमिदमाह । भो आषाढभूते यावदहं पुरीषोत्सर्गं विधायागच्छामि तावदेषा कन्था योगेश्वरस्य[6] सावधानेन रक्षणीया । इत्युक्त्वा गतः । आषाढभूतिरपि तस्मिन्नदर्शनीभूते[7] मात्रामादाय सत्वरं प्रस्थितः । देवशर्मापि छात्रगुणानुरञ्जितमनाः[8] सुविश्वस्तो यावदुपविष्टस्तिष्ठति[9] तावत्सुवर्णरेखामदेहयूथमध्ये हुडुयुद्धमपश्यत् । अथ रोषवशाद्[10] हुडुयुगलस्य दूरमपसरणं कृत्वा भूयोपि समुपेत्य[11] ललाटपट्टाभ्यां प्रहरतो भूरि रुधिरं पतति । तच्च जम्बुको जिह्वालौल्याद्[12] रङ्गभूमिं[13] प्रविश्यास्वादयति । देवशर्मापि विलोक्याचिन्तयत् । अहो मन्दमतिरयं जम्बुकः । यदि कथमप्यनयोः संघट्टे[14] पतिष्यति तन्नूनं मृत्युमेष्यतीति तर्कयामि । अत्रान्तरे तथैव रक्तास्वादनलौल्यान्[15] मध्ये प्रविशंस्तयोः शिरःसंपाते[16] पतितो मृतश्च शृगालः । देवशर्मापि तं शोचमानो मात्रामुद्दिश्य[17] शनैः शनैः प्रस्थितो यावदाषाढभूतिं न पश्यति ततश्चौत्सुक्येन[18] शौचं विधाय[19] यावत्कन्थामालोकयति[20] तावन्मात्रां न पश्यति । ततश्च हा हा मुषितोस्मीति[21] जल्पन्पृथिवीतले निपपात । ततः क्षणाच्चेतनां लब्ध्वा[22] भूयोपि समुत्थाय फूत्कर्तुमारब्धः[23] । भो आषाढभूते क्व मां वञ्चयित्वा गतोसि । तद्देहि मे प्रतिवचनम्[24] । एवं बहु विलप्य तस्य पदपद्धतिमन्वे-

---

१ Glad at heart. २ While they (two) were thus going. ३ Having taken down. ४ A patched garment worn by Yogins. ५ Well-guarded. ६ Of the lord of Yogins, S'iva. ७ When he had disappeared. ८ Whose mind was attached to his pupil by reason of his virtues. छात्रगुणेषु अनुरञ्जितं मनः यस्य सः. ब. ९ Remained sitting, was yet sitting. १० Through anger. ११ While the pair of rams having withdrawn to a long distance, again came together and were striking one another. १२ Through the greed of the tongue. १३ Stage. १४ Collision. १५ Through the greed of tasting the blood. १६ Collision, striking together. १७ Towards, in the direction of. १८ With anxiety. १९ Having cleansed his body &c. २० Searched his कन्था for the मात्रा put into it. २१ I am robbed. २२ Having regained consciousness. २३ To scream or cry aloud. २४ Reply. २५ The trace of his foot-steps (tracing) his footprints.

पथञ्शनैः शनैः[1] प्रस्थितः। एवं स गच्छन्संध्यासमये[2] कंचिद्ग्राममाससाद।
अथ तस्माद्ग्रामात्कश्चित्कौलिकः[3] सभार्यो[4] मद्यपानकृते[5] समीपवर्तिनि[6] नगरं
प्रस्थितः। देवशर्मापि तमालोक्य प्रोवाच। भो भद्र वयं सूर्योढा[7] अतिथयस्तवा
न्तिकं प्राप्ताः। न कमप्यत्र ग्रामे जानीमः। तद्गृह्यतामतिथिधर्मः[8]। उक्तं च।

संप्राप्तो योऽतिथिः सायं सूर्योढो गृहमेधिनाम्।
पूजया तस्य देवत्वं लभन्ते गृहमेधिनः॥ १७०॥

तथा च। तृणानि[10] भूमिरुदकं वाक्चतुर्थी च सूनृता।
सतामेतानि हर्म्येषु नोच्छिद्यन्ते कदाचन॥ १७१॥
स्वागतेनाग्नयस्तृप्ता[11] आसनेन शतक्रतुः।
पादशौचेन गोविन्दो अर्घ्याच्छम्भुस्तथातिथेः॥ १७२॥

कौलिकोपि तच्छ्रुत्वा भार्यामाह। प्रिये गच्छ त्वमतिथिमादाय गृहं
प्रति। पादशौचभोजनशयनादिभिः सत्कृत्य[12] त्वं तत्रैव तिष्ठ। अहं त
त्कृते प्रभूतमासवमानेष्ये[13]। एवमुक्त्वा प्रस्थितः। सापि भार्या पुंश्चली[14]
तमादाय प्रहसितवदना[15] देवदत्तं[16] ध्यायन्ती[17] गृहं प्रतस्थे। अथवा सा
चेदमुच्यते।

१ Slowly and slowly. २ Evening, the time of evening. ३ A weaver. ४ Accompanied with his wife भार्यया सहित सहपूर्वपद. ब. ५ For the sake of. ६ Being near. ७ Evening guests. सूर्योढ=सूर्य+ऊढ brought by or along with the sun तृ. त. ८ Let the duties towards a guest be done (lit. accepted) by you. ९ House-holders obtain godhood by the worship of that guest who comes in the evening to their houses. Here सायं is redundant as सूर्योढः expresses the idea of evening. १० Grass (for sitting upon), ground, water and fourthly agreeable speech—these are never refused (lit cut off) in the houses of the good. Another reading for सतामेतानि हर्म्येषु is एतान्यपि सतां गेहे which means the same. ११ Fire is satisfied by the hospitality shown to a guest, Indra, by the seat given to him, Govinda, by cleaning his feet, S'ambhu, by the arghya (offering given to guests and consisting of various ingredients). १२ सत्कृत्य abs. of कृ 8 U with सत्. Here सत् has the force of a preposition. १३ Spirituous liquor. १४ An unchaste woman. १५ With cheerful looks. प्रहसितं वदनं यस्याः सा. ब. १६ देवदत्त is here used for the guest देवशर्मा—as it generally does for any name whatever. १७ Thinking of or contemplating.

ऽग्रम

दुर्दिवसेऽसितपक्षे दुःसंचारासु नगरवीथीषु ।
पत्यौ विदेशयाते परं सुखं जघनचपलायाः ॥ १७३ ॥[1]

तथा च । पर्यङ्केष्वास्तरणं पतिमनुकूलं मनोहरं शयनम् ।
तृणमिव लघु मन्यन्ते कामिन्यश्चौर्यरतलुब्धाः ॥ १७४ ॥[2]

तथा च । [3]केलिः प्रदहति मज्जां शृङ्गारोऽस्थीनि चाटवः कटवः ।
बन्धक्याः परितोषो न स्यादनभीष्टदंपत्योः ॥ १७५ ॥

[4]कुलपतनं जनगर्हां बन्धनमपि जीवितव्यसंदेहम् ।
अंगीकरोति तत्क्षणमबला परपुरुषसंरक्ता ॥ १७६ ॥

अथ सा गृहं गत्वा देवशर्मणे गतास्तरणां[5] भग्नां खट्वां[6] समर्प्येदमाह[7] । भो भगवन्[8] यावदहं ग्रामादागतां स्वसखीं संभाव्य[9] द्रुतमागच्छामि[10] ताव-

[1] When the day is cloudy, when there is the dark fortnight, when the streets of a town are impassable by darkness, and when the husband is gone abroad (to a foreign country) great is the delight felt by a libidinous woman. The reading for असितपक्षे is घनतिमिरे when there is pitchy darkness; and for पत्यौ विदेशयाते-पत्युर्विदेशगमने—during the sojourn of the husband abroad. वीथी a row of streets. विदेशं याते = विदेशयाते [2] Those women, who are addicted to illicit sexual intercourse, regard the beds (spread on bedsteads) the loving husband and the beautiful couch, as worthless as grass. अनुकूल lit. favourable and hence, fond, loving. चौर्यरतलुब्धाः. ष. त. [3] The love-sport (of the husband) burns the marrow of an adultress, his passion her bones, and his loving address is unpleasant to her; no happiness is enjoyed by those husband and wife who are not liked by each other. बन्धकी. पुंश्चली. जघनचपला are all used in the same sense in these verses. अनभीष्टौ च दम्पती च = अनभीष्टदम्पती तयोः. [4] A woman attached to a man other than her husband, most readily (the very moment of her attachment) prefers (accepts) the falling off from her family, the censure of the people, confinement, and even danger to life (to any thing else). कुलपतनं. ष. त. अबला lit. one having no strength and hence, a female. संरक्ता P. P. of रंज् with सम्. [5] Without a bed, that which has no bed on. गतास्तरणा—गतम् आस्तरणं यस्याः सा. ब. [6] An inferior kind of bed-stead. [7] Having offered, having given. (abs. of अर्प् with सम्. caus. of ऋ). [8] This is a term used in addressing revered personages. [9] Having honoured (abs. of the caus. of भू 1 P. with सम्). [10] Quickly.

मद्भूहेप्रयत्नेन भाव्यम् । एवमभिधाय शृंगारविधिं विधाय यावद्देव-कुलमुद्दिश्य व्रजति तावत्संमुखं मदविह्वलांगो मुक्तकेशः पदेपदे स्खलन्गृहीतमद्यभाण्डस्तस्याः पतिः समायातः । तं च दृष्ट्वा सा द्रुततरं व्याघुट्य स्वगृहं प्रविश्य मुक्तशृंगारा यथा पूर्वमभवत् । कौलिकोऽपि तां कृतापूर्वशृङ्गारां पलायमानां विलोक्य प्रागेव कर्णपरंपरया तस्या अपवादश्रवणात्क्षुभितहृदयः स्वाकारं निगूहमानः सदैवास्ते । ततश्च तथाविधं चेष्टितमवलोक्य दृष्टप्रत्ययः क्रोधवशंगो गृहं प्रविश्य तामाह । पुंश्चलि क प्रस्थितासि । सा प्रोवाच । अहं त्वत्सकाशादागता न कुत्रचिन्निर्गता । तत्किं मद्यवशादप्रस्तुतं वदसि । अथवा साधु चेदमुच्यते ।

[19] वैकल्यं धरणीपातमयथोचितजल्पनम् ।
सन्निपातस्य चिह्नानि मद्यं सर्वाणि दर्शयेत् ॥ १७७ ॥
[20] करस्पन्दोऽम्बरत्यागस्तेजोहानिः सरागता ।
वारुणीसङ्गजावस्था भानुनाप्यनुभूयते ॥ १७८ ॥

१ Careful, cautious. २ The ceremony of decorati[ng a] person with ornaments &c.; decoration. ३ Before, in front. ४ With limbs powerless through intoxication. ५ With the hair let loose or in disorder. ६ Stumbling or tripping at each step. ७ Carrying a vessel filled with wine, गृहीतं मद्यभाण्डं येन. ब. ८ Having returned or fled back. (abs. of घुट् 1 A. with व्या). ९ She who had put off her decorations. १० As before. ११ Extraordinary, such as was not seen by him before. १२ Already, before this time. १३ From ear to ear, by rumour or hearsay. १४ Indignant at heart by hearing evil reports about her. १५ Cf. 2, P. 40. १६ One who has seen an evidence and thus obtained conviction of the rumours heard before. १७ Gone into the power of anger, that is beside himself with anger. १८ Through the influence of wine. १९ Liquor displays all the signs of सन्निपात (the morbid state of the three humours of the body producing dangerous illness and fever) viz, agitation of mind, falling down on the ground and talking unbecoming or irrelevant language. अयथोचितजल्पनं. क. २० The sun has his rays throbbing or quivering, he quits the sky, loses his lustre, assumes redness, and so he experiences a condition produced from contact with वारुणी the western quarter (so called because it is the region of वरुण). When वारुणी means wine the words कर, अम्बर, तेजस् and सरागता mean hand, garment, energy or spirit and fury or violence. वारुणीसंगजा-वारुण्याः संगात् जाता qualifying अवस्था.

सोऽपि तच्छ्रुत्वा प्रतिकूलवचनं वेषविपर्ययं चावलोक्य तामाह प
श्चालि चिरकालान्मया श्रुतस्तवापवादः । तदद्य स्वयं संजातप्रत्ययस्तव
यथोचितं निग्रहं करोमीत्यभिधाय लगुडप्रहारैस्तां जर्जरीकृतदेहां
विधाय स्थूणया सह दृढबन्धनेन बद्ध्वा सोऽपि मदाविह्वलो
निद्रावशमगमत् । अत्रान्तरे तस्याः सखी नापिती कौलिकं
निद्रावशंगतं विज्ञाय तां गत्वेदमाह । सखि स देवदत्तस्तस्मिन्स्थाने त्वां
प्रतीक्षते तच्छीघ्रं गम्यतामिति । सा चाह । पश्य मेऽवस्थाम् । तत्कथं
गच्छामि । ब्रूहि गत्वा तं कामिनं यदत्रावसरे न त्वया सह संगमः । सा
प्राह । सखि मा मैवं वद । नायं कुलटाधर्मः । उक्तं च ।

विषमस्थस्वादुफलग्रहणव्यवसायनिश्चयो येषाम् ।
उष्ट्राणामिव तेषां मन्येऽहं शंसितं जन्म ॥ १७९ ॥

तथा च । संदिग्धे परलोके जनापवादे च जगति बहुचित्रे ।
स्वाधीने पररमणे धन्यास्तारुण्यफलभाजः ॥ १८० ॥

अन्यच्च । यदि भवति दैवयोगात्पुमान्विरूपोऽपि बन्धकी रहसि ।
न तु कृच्छ्रादपि भद्रं निजकान्तं सा भजत्येव ॥ १८१ ॥

१ The change of dress. २ Cf. 16, P. 63. ३ Chastisement, punishment. ४ With the strokes of a stick or cudgel. ५ Whose body was disabled (by beating). ६ The post or pillar of a house. ७ A female barber. ८ Under the influence of sleep. ९ अत्रावसरे=अस्मिन्नवसरे. This use of अत्र for अस्मिन् and तत्र for तस्मिन् is very frequent in the Panchatantras. १० An adulterous or unchaste woman. ११ I think that the birth of those, whose determination is to make efforts to seize or pluck sweet fruits lying in difficult places, is praiseworthy like that of camels whose &c. The love of camels for thorny shrubs is well-known. १२ The attainment of the next world being doubtful, the public censure being so varied in this world and *the husband of another* (paramour) being devoted, blessed are those who enjoy the fruit of youthfulness. स्वाधीन lit. within one's power. १३ Even if unfortunately a man be ugly, an adulteress enjoys him in private and not her own husband though handsome, even at great risk or chance of incurring a trouble. भद्र lovely, beautiful.

साब्रवीत् । यद्येवं तर्हि कथं दृढबन्धनेन[१] बद्धा सती तत्र गच्छामि सन्निहितश्चायं पापात्मा[२] मत्पतिः । नापित्याह । सखि मदविह्वलोयं[३] सूर्य-करस्पृष्टः[४] प्रबोधं यास्यति । तदहं त्वामुन्मोचयामि[५] । मामात्मस्थाने[६] बध्द्वा द्रुततरं देवदत्तं संभाष्यागच्छ । साब्रवीत् । एवमस्त्विति । तदनु[७] सा नापिती तां स्वसखीं बन्धनाद्विमोच्य तस्याः स्थाने यथापूर्वमात्मानं बध्द्वा तां देवदत्तसकाशे संकेतस्थानं[८] प्रेषितवती[९] । तथानुष्ठिते कौलिकः कस्मिंश्चित्क्षणे[१०] समुत्थाय किंचिद्गतकोपो[११] विमदस्तामाह[१२] । हे परुषवादिनि यद्[१३]द्यप्रभृति गृहान्निष्क्रमणं[१४] न करोषि न च परुषं वदसि ततस्त्वामुन्मोचयामि । नापित्यपि स्वरभेदभयाद्[१५]यावन्न किंचिदूचे तावत्सोपि भूयो भूय[१६] इदमेवाह । अथ सा यावत्प्रत्युत्तरं न प्रयच्छति तावत्तेन कुपितेन तीक्ष्ण[१७]शस्त्रमादाय तस्या नासिकाच्छेदो[१८]ऽकारि[१९] । आह च । [२०]रे पुंश्चलि तिष्ठेदानीं न त्वां भूयस्तोषयिष्यामीति विलप्य पुनरपि निद्रावशमगमत् । देवशर्मापि वित्तनाशात्[२१]क्षुत्क्षामकण्ठो नष्टनिद्र[२२]स्तत्सर्वं स्त्रीचरित्र[२३]मपश्यत् । सापि कौलिकभार्या स्वेच्छया[२४] देवदत्तेन सह सुरतसुखमनुभूय[२५] कस्मिंश्चित्क्षणे स्वगृहमागत्य नापितीमिदमाह । अपि शिवं भवत्याः । नायं पापात्मा मम गताया[२६] उत्थितः । नापित्याह । शिवं नासिकया विना शेषस्य शरीरस्य । तद्द्रुतं मां मोचय यावन्नायं पश्यति येन स्वगृहं गच्छामीति । तथानुष्ठिते भूयोपि कौलिक उत्थाय तामाह । पुंश्चलि किमद्यापि न वदसि । किं भूयोप्यतो दुष्टतरं[२७] कर्णच्छेदा[२८]दिनिग्रहं करोमि । अथ सा सकोपं साधि-

---

१ Tied with strong ropes. २ Wicked, evil minded ३ Helpless through intoxication. ४ Will awake when touched by the rays of the sun. ५ Free or set at liberty, the caus. for the primitive उन्मुञ्चामि. ६ Having tied me (to the post) in your place. ७ Thereafter, after that. ८ To the place of appointment. ९ Sent. P. P. Act. of इष् 1 U. with प्र. १० In a certain moment. ११ Whose anger was a little pacified. १२ Free from intoxication विगतः मदः यस्य. ब. १३ यत्=यदि If. १४ Going out, issuing out. १५ Through the fear of betraying herself by her voice (being found to be different from that of the कौलिक's wife). १६ Again and again. १७ Sharp, edged. १८ The cutting of the nose. १९ Passive Aorist of कृ. २० Oh, a term of address to persons of both sexes. २१ Here वित्तनाश is not the cause of क्षुत्क्षामकण्ठ as one would expect The two are to be taken separately. २२ Who had lost repose. २३ The conduct of a woman. २४ At her pleasure, as she liked. २५ Having enjoyed the pleasure of sexual intercourse. २६ After I went away. २७ More cruel than this २८ The punishment of cutting the ears &c.

क्षेपमिदमाह । धिङ्मूढ को मां महासतीं[2] धर्षयितुं[3] व्यङ्गयितुं[4] वा समर्थः ।

तत: शृण्वन्तु सर्वे लोकपालाः[5] ।

[6]आदित्यचन्द्रावनिलोनलश्च
द्यौर्भूमिरापो हृदयं यमश्च ।
अहश्च रात्रिश्च उभे च संध्ये
धर्मो हि जानाति नरस्य वृत्तम् ॥ १८२ ॥

तद्यदि मम सतीत्वमस्ति[7] मनसापि परपुरुषो नाभिलषितस्ततो[8] देवा भूयोपि मे नासिकां तादृग्रूपामक्षतां[9][10] कुर्वन्तु । अथवा यदि मम चित्ते परपुरुषस्य भ्रान्तिरपि[11] भवति ततो मां भस्मसान्नयन्तु[12] । एवमुक्त्वा भूयोपि तमाह । भो दुरात्मन्पश्य मे सतीत्वप्रभावेण तादृगेव नासिका संवृत्ता । अथासावुल्मुकमादाय[13] यावत्पश्यति तावत्तद्रूपां नासिकां च भूतले रक्तप्रवाहं[14] च महान्तमपश्यत् । अथ स विस्मितमनास्तां[15] बन्धनाद्विमुच्य शय्यायामारोप्य च चाटुशतैः[16] पर्यतोषयत् । देवशर्मापि तं सर्वं वृत्तान्तमालोक्य विस्मितमना इदमाह ।

शम्बरस्य[17] च या माया या माया नमुचेरपि ।
बलेः कुम्भीनसेश्चैव सर्वास्ता योषितो विदुः ॥ १८३ ॥

---

१ Reproachfully. २ A very virtuous lady. ३ To insult or injure. ४ To maim or mutilate. It is a Denom. from व्यंग. ५ The regents of the quarters ६ The sun, the moon, wind, fire, the sky, the earth, water, the heart, Yama (the god of death), the day, the night and the two twilights and even religion, know the conduct of man. Here the verb agrees with the nearest subject, viz., धर्मः. For धर्मो हि another reading, is धर्मोपि. ७ Chastity. ८ Desired or wished for. P. P. of लष् 1 P. with अभि ९ Of the same form as before. तादृक् रूपं यस्याः सा. ब. १० Unhurt or unwounded. P. P. of क्षण् 8 U. ११ A delusion, or a glimmering idea. १२ Reduce me to ashes. सात् is a तद्धित affix denoting complete change into that which is indicated by the base. १३ A fire-brand. १४ A stream of blood. १५ Whose mind was struck with wonder. १६ With hundreds of sweet words. १७ Women know all those tricks which were known by S'ambara, Namu[illegible] Bali and Kumbhinasi—these were demons well-ver[illegible] deceitful arts. विदुः optional form for विदन्ति from विद् 2 P. to know.

हसन्तं प्रहसन्त्येता रुदन्तं प्ररुदन्त्यपि ।
अप्रियं प्रियवाक्यैश्च गृह्णन्ति कालयोगतः ॥ १८४ ॥
उशना वेद यच्छास्त्रं यच्च वेद बृहस्पतिः ।
स्त्रीबुद्ध्या न विशेष्येत तस्माद्रक्ष्याः कथं हि ताः ॥ १८५ ॥
अनृतं सत्यमित्याहुः सत्यं चापि तथानृतम् ।
इति यास्ताः कथं धीरैः संरक्ष्याः पुरुषैरिह ॥ १८६ ॥

अन्यत्राप्युक्तम् । नातिप्रसङ्गः प्रमदासु कार्यो
नेच्छेद्बलं स्त्रीषु विवर्धमानम् ।
अतिप्रसक्तैः पुरुषैर्यतस्ताः
क्रीडन्ति काकैरिव लूनपक्षैः ॥ १८७ ॥
सुमुखेन वदन्ति वल्गुना प्रहरन्त्येव शितेन चेतसा ।
मधु तिष्ठति वाचि योषितां हृदये हालहलं महद्विषम् ॥ १८८ ॥
अत एव निपीयतेऽधरो हृदयं मुष्टिभिरेव ताड्यते ।
पुरुषैः सुखलेशवञ्चितैर्मधुलुब्धैः कमलं यथालिभिः ॥ १८९ ॥

---

१ These (women) smile with him who smiles, cry with him who cries, and captivate or win over him who is unfavourable by pleasing words according as occasions arise (प्रहस् and प्ररुद् are used to show that they do more than others). २ That science which उशनस् (the preceptor of the demons) knew and that which बृहस्पति knew cannot be distinguished from the talent (बुद्ध्याः) of a woman, *i.e.*, it cannot be more than that known by women how are they to be protected ? विशेष्येत Pot. 3rd P. Sing Pass. of शिष् 1 P. with वि. ३ How should those (women), who say what is false as true, and also what is true as false, be protected by wise men in this world ? ४ It is so said elsewhere also, ५ There should not be excessive attachment to women, one should not wish them to increase in strength since they sport with those who are fondly attached to them as if with crows whose wings are clipped ६ They (women) speak sweetly with their beautiful mouths and strike with their sharp or hard hearts ; there is honey in the speech, while there is the terribly deadly poison in the hearts (of women). ७ It is for this reason that the lower lip is drunk in (kissed), and the heart is beaten with the fists by men deceived by a particle of happiness or pleasure, as a lotus is by bees attracted by the honey therein.

कार्कश्यं स्तनयोर्दृशोस्तरलतालीकं मुखे दृश्यते
कौटिल्यं कचसंचये प्रवचने मान्द्यं त्रिके स्थूलता ।
भीरुत्वं हृदये सदैव कथितं मायाप्रयोगः प्रिये
यासां दोषगणो गुणा मृगदृशां ताः किं नराणां प्रियाः ॥१९०॥

अपि च । आवर्तः संशयानामविनयभवनं पत्तनं साहसानां
दोषाणां सन्निधानं कपटशतमयं क्षेत्रमप्रत्ययानाम् ।
दुर्ग्राह्यं यन्महद्भिर्नरवरवृषभैः सर्वमायाकरण्डं
स्त्रीयन्त्रं केन लोके विषममृतमयं धर्मनाशाय सृष्टम् ॥१९१॥

एता हसन्ति च रुदन्ति च कार्यहेतो-
र्विश्वासयन्ति च परं न च विश्वसन्ति ।
तस्मान्नरेण कुलशीलवता सदैव
नार्यः श्मशानघटिका इव वर्जनीयाः ॥ १९२ ॥

१ How should those women whose apparent good qualities are a bundle of defects be dear to men? For, there is firmness in the breasts (that is, hardness of heart), there is sparkling lustre in the eyes (fickleness or unsteadiness), elegance (falsehood) in the face, waviness (crookedness) in the hair, gravity (dulness) in the speech, fulness (clumsiness) in the hips, there is said to be bashfulness (timidity) in the heart and love (trick) towards the lover. मृगदृश्—मृगस्य दृशौ इव दृशौ यस्याः सा. ब. माया-प्रयोगः the use of tricks. २ Who has created in this world this machine in the shape of a woman full of the opposite qualities of poison and nectar for the destruction of virtue. For it is a whirlpool of doubts, an abode of immodesties, the chief seat of daring or fool-hardiness, the proximity of defects, a thing made up of hundreds of tricks, and a field of disbeliefs, and it is such that it cannot be fathomed by even the best and cleverest of men, and is a box full of all falsehoods or illusions. नरवरवृषभ here नरवर is sufficient to express the intended meaning and so वृषभ is superfluous. ३ These (women) smile and cry, to accomplish their objects, cause others to confide in them but they themselves do not do so; therefore, a person of good disposition and noble family, should always avoid women like the earthen jars in a cemetary. Another reading for कुलशीलवता सदैव is कुलशीलसमन्वितेन which is the same as कुलशीलवता.

कुर्वन्ति तावत्प्रथमं प्रियाणि
यावन्न जानन्ति नरं प्रसक्तम् ।
ज्ञात्वाथ तं मन्मथपाशबद्धं
ग्रस्तामिषं मीनमिवोद्धरन्ति ॥ ११३ ॥

किं च । समुद्रवीचीव चलस्वभावाः
संध्याभ्ररेखेव मुहूर्तरागाः ।
स्त्रियः कृतार्थाः पुरुषं निरर्थं
निष्पीडितालक्तकवत्त्यजन्ति ॥ ११४ ॥

अनृतं साहसं माया मूर्खत्वमतिलोभता ।
अशौचं निर्दयत्वं च स्त्रीणां दोषाः स्वभावजाः ॥ ११५ ॥

अन्तर्विषमया ह्येता बहिश्चैव मनोरमाः ।
गुञ्जाफलसमाकारा योषितः केन निर्मिताः ॥ ११६ ॥

एवमनेकानि सूक्तानि चिन्तयतस्तस्य परिव्राजकस्य निशा कृच्छ्रेणातिचक्राम । सा च दूतिका हस्तगतच्छिन्ननासिकाग्रा स्वगृहं गत्वा

१ First they do what pleases a man so long as they do not know that he is attached to them; but afterwards having known that he is tied up by the snares of cupid, they catch like a fish which has swallowed the bait. मन्मथपाशबद्ध—मन्मथपाशैर्बद्धं. तृ त. ग्रस्त आमिषं यन तृ. ब. २ Women, who are as fickle in disposition as the unsteady waves of the sea, and whose love lasts only a moment like the streak of red colour in the cloud of an evening, having gained their object, leave off a man, when without means, like the red lac which is squeezed and thrown away. Here राग has two senses (1) love; (2) colour. चलस्वभावाः, मुहूर्तरागाः, कृतार्थाः and निरर्थ are all ब. compounds. ३ Untruthfulness, daring, illusion, folly, excessive avarice, impurity and hard-heartedness—these are the inborn defects of women. स्वभावजाः=स्वभावात् जाताः पं. त. born with the disposition. ४ By whom are these women, who are inwardly filled with poison and outwardly pleasant to look at, and thus resemble the gunja fruits in form, created? गुंजाफलैः समाः आकाराः यासां ब. विषमया for विषमय्य-an inaccuracy. ५ Good or pithy sayings ६ With great difficulty. ७ A female messenger of love, a go-between. ८ Having the tip of the cut-nose in her hand. हस्तगतं च्छिन्ननासिकाग्रं यस्याः. ब.

चिन्तयामास । किमिदानीं कर्तव्यम् । कथमेतन्महच्छिद्रं[1] स्थगयितव्यम्[2] । अथ तस्या एवं विचिन्तयन्त्या भर्ता कार्यवशाद्[3] राजकुले[4] पर्युषितः[5] प्रत्यूषे[6] स्वगृहमभ्युपेत्य द्वारदेशस्थः[7] पौरकृत्योत्सुकतया[8] तामाह । शीघ्रमानीयतां क्षुरभाण्डं[9] येन क्षौरकर्मकरणार्थं[10] गच्छामि । सापि च्छिन्ननासिका गृहमध्यस्थितैव[11] कार्यकरणापेक्षया[12] क्षुरभाण्डात्क्षुरमेकमादाय तस्याभिमुखं[13] प्रेषयामास[14] । नापितोऽप्युत्सुकतया भाण्डं क्षुरमालोक्य[15] तदभिमुखमेव[16] तं क्षुरं प्राहिणोत्[17] । एतस्मिन्नन्तरे सा दुष्टा[18] ऊर्ध्वबाहू[19] विधाय फूत्कुर्वती गृहान्निश्चक्राम । पापेनानेन मम सदाचारवर्तिन्याः[20] पश्यत नासिकाच्छेदो विहितः । तत्परित्रायतां परित्रायताम् । अत्रान्तरे राजपुरुषा[21] अभ्युपेत्य तं नापितं लगुडप्रहारैर्जर्जरीकृत्य[22] दृढं बद्ध्वा तया च्छिन्ननासिकया सह धर्माधिकरणस्थानं[23] नीत्वा सभ्यानूचुः[24] । शृण्वन्तु भवन्तः सभासदो यदनेन[25] नापितेनापराधं विना स्त्रीरत्नमेतद्व्यङ्गितम्[26] । तदस्य[27] यद्युज्यते तत्क्रियताम् । ततस्ते सभ्या ऊचुः । रे नापित किमर्थं त्वयेयं स्त्री व्यङ्गिता । किमनया परपुरुषोऽभिलषित उतस्वित्[28] प्राणद्रोहः[29] कृतः किंवा चौर्यकर्म[30] आचरितम् । तत्कथ्यतामस्या अपराधः । अथ तं नापितं तूष्णीम्भूतं[31] दृष्ट्वा पुनः सभ्या ऊचुः । अहो

---

१ May mean either a 'hole' or metaphorically a *defect, blemish.* २ Should be concealed. Pot. P.P. of स्थग 10 P. ३ For some business. ४ In the royal palace. ५ Had dwelt. P.P. of वस् 1 P. with परि. ६ In the early morning. ७ Standing at the door. उपपद. स. ८ Through eagerness to do the *work of the citizens,* viz., of shaving. ९ The razor-case. १० For the business of shaving. ११ (While) standing in the middle of the house, *i. e.* without coming out. १२ With the object of accomplishing her design. १३ Towards him. १४ Sent, threw. १५ Having seen the razor without the case. १६ तदभिमुखं = तस्याः अभिमुख. १७ Sent; Cf. 20. १८ Wicked one. १९ Having thrown up her arms. २० Leading a virtuous course of life. २१ The king's officers, policemen. २२ Having belaboured him with the strokes of their batons. २३ To the seat of justice. २४ The judges, magistrates. २५ यत् since, because. २६ This jewel of a woman, this excellent woman. २७ Let him, therefore, be dealt with adequately to his crime. २८ Or; उतस्वित् is used to show doubt or deliberation. २९ Conspired against life. ३० Theft. ३१ Remaining silent, holding his tongue.

सत्यमेतद्राजपुरुषाणां वचः । पापात्मायम् । अनेनेयं निर्दोषा [1]वराकी दूषिता । उक्तं च ।

[2]भिन्नस्वरमुखवर्णः शंकितदृष्टिः समुत्पतिततेजाः ।
भवति हि पापं कृत्वा स्वकर्मसंत्रासितः पुरुषः ॥ १९७ ॥

तथा च । आयाति स्खलितैः पादैर्मुखवैवर्ण्यसंयुतः ।
ललाटस्वेदभाग्भूरिगद्गदं भाषते वचः ॥ १९८ ॥
[3]अधोदृष्टिर्भवेत्कृत्वा पापं प्राप्तः सभां नरः ।
तस्माद्यत्नात्परिज्ञेयश्चिह्नैरेतैर्विचक्षणैः ॥ १९९ ॥

अन्यच्च । [4]प्रसन्नवदनो हृष्टः स्पष्टवाक्यः सरोषदृक् ।
सभायां वक्ति सामर्षः सावष्टम्भो नरः शुचिः ॥ २०० ॥

तदेष [5]दुश्चरित्रलक्षणो दृश्यते । स्त्रीधर्षणाद्वध्य इति । तच्छूला-यामारोप्यतामिति [6]। अथ वध्यस्थाने तं नीयमानमवलोक्य देवशर्मा तान्धर्माधिकारिणो गत्वा प्रोवाच । भो भोः सभासदः । अन्यायेनैष

१ This innocent poor woman. वराकी is equal to Marathi बिचारी, बापडी. २ A person after committing a wicked deed becomes scarred by his own action and consequently his tone is altered. his countenance changes colour, he looks about suspiciously and loses all his lustre. भिन्नौ स्वरमुखवर्णौ यस्य. ब. Similarly शङ्कितदृष्टिः and समुत्पतिततेजाः are Bah. compounds. ३ He. (one who has done a wrong) comes (before the seat of justice) with faltering steps, his face becomes pale, his forehead is covered with perspiration and his words are very indistinctly uttered. भूरिगद्गदं= भूरिगद्गदं . यस्मिन् तत्. ब. qualifying वचः. ४ A man who comes to the seat of justice after committing a crime, looks downwards ; he should, therefore, be known by clever persons to be an offender by means of these signs. अधोदृष्टिः. ब. ५ A pure (innocent) person is cheerful-looking and jolly, speaks distinctly and looks angrily, speaks before the court with energy or spirit and is undaunted. All the adjectives in this verse are Bah. compounds. ६ Having the signs of a wicked action. दुश्चरित्रस्य लक्षणानि यस्य सः. ब. ७ So let him be impaled. ८ The place of execution.

वराको नापितो वध्यते । साधुसमाचारेयम् । तच्छ्रूयतां मे वाक्यम् ।

जम्बुको हुडुयुद्धेनेति । अथ ते सभ्या ऊचुः । भो भगवन्कथमेतत् । ततश्च देवशर्मा तेषां त्रयाणामपि वृत्तान्तं सविस्तरमकथयत् । तदाकर्ण्य सुविस्मितमनसस्ते नापितं विमोच्य मिथः प्रोचुः । अहो ।

अवध्यो ब्राह्मणो बालः स्त्री तपस्वी च रोगभाक् ।
विहिता व्यङ्गिता तेषामपराधे महत्यपि ॥ २०१ ॥

तदस्याः पुनः कर्णच्छेदः कार्यः । तथानुष्ठिते देवशर्मापि वित्तनाशसमुद्भवशोकरहितः पुनरपि स्वकीयं मठायतनमगमत् ।

अतोहं ब्रवीमि जम्बुको हुडुयुद्धेनेति ।

करटक आह । यद्व्रतोपि देवशर्मा तेनाषाढभूतिना कथं वञ्चितः ।

दमनक आह ।

सुप्रयुक्तस्य दम्भस्य ब्रह्माप्यन्तं न गच्छति ।
कौलिको विष्णुरूपेण राजकन्यां निषेवते ॥ २०२ ॥

करटक आह । भ्रातः कथमेतत् । सोब्रवीत् ।

॥ कथा ५ ॥

कस्मिंश्चिदधिष्ठाने कौलिकरथकारौ प्रतिवसतः स्म । तत्र तौ जन्मप्रभृति सहचारिणावास्ताम् । परस्परमतीव स्नेहपरौ सकलस्थानविहारिणौ सदैव कालं नयतः । अथ कदाचित्तत्राधिष्ठाने कस्मिंश्चिद्देवायतने

१ Well conducted, of a good conduct. २ At length, in detail. सविस्तर may be also taken as an adjective as विस्तरेण सह. ब. and may mean detailed. ३ Greatly astonished at heart. ब. ४ Among themselves. ५ A Bráhman, a child, a woman, an ascetic and one who is diseased–these are not to be killed; mutilation is prescribed as a punishment for them though the offence committed be very grave. ६ Cutting off of the ear in addition to that of the nose. ७ Without grief arising from the loss of his wealth. ८ Though shrewd, cautious. ९ Even Bráhman cannot go to the end of that hypocricy which is well managed; a weaver enjoyed a princess in the disguise of Vishnu. १० A carpenter. ११ Dwelt. स्म added to the forms of the present tense gives them the sense of the past. १२ Companions. सह चरति इति–सहचारिणौ. उप. १३ Intent on friendship. स्नेहः परं ययोः तौ. ब. १४ Diverting themselves in all places. १५ Then once on a time. १६ तत्राधिष्ठाने = तस्मिन्नधिष्ठाने. In that place. १७ A temple.

यात्रामहोत्सवः[१] संवृत्तः । तत्र[२] च नटनर्तकचारणसंकुले[३] नानादेशागत[४]-
जनावृते तौ सहचरौ[५] भ्राम्यन्तौ काञ्चिद्राजकन्यां करेणुकारूढां[६] सर्व-
लक्षणसनाथां[७] कञ्चुकिवर्षधरपरिवारितां[८] देवतादर्शनाय समायातां दृष्टवन्तौ।
अथासौ कौलिकस्तां दृष्ट्वा विषार्दित[९] इव दुष्टग्रहगृहीत[१०] इव कामशरैर्[११]हन्य-
मानः सहसा भूतले निपपात । अथ तं तदवस्थम्[१२]अवलोक्य रथकारस्त-
द्दुःखदुःखित[१३] आप्तपुरुषैस्[१४]तं समुत्क्षिप्य स्वगृहमानाययत् । तत्र च विविधैः
शीतोपचारैश्[१५]चिकित्सकोपदिष्टैर्[१६]मन्त्रवादिभिर्[१७]उपचार्यमाणश्[१८]चिरात्कथंचित्[१९]सचेत-
नो बभूव । ततो रथकारेण पृष्टः । भो मित्र किमेवं त्वमकस्माद्विचेतनो[२०]
जातः । तत्कथ्यतामात्मस्वरूपम्[२१] । स आह । वयस्य यद्येवं तच्छृणु मे
रहस्यं[२२] येन[२३] सर्वामात्मवेदनां ते वदामि । यदि त्वं मां सुहृदं मन्यसे ततः
काष्ठप्रदानेन[२४] प्रसादः क्रियताम् । क्षम्यतां यद्वा किंचित्प्रणयातिरेकाद्[२५]-
युक्तं तव मयानुष्ठितम् । सोपि तदाकर्ण्य बाष्पपिहितनयनः[२६] सगद्गदमु-
वाच । वयस्य तद्दुःखकारणं किं तव । तद्ब्रूहि येन प्रतीकारः[२७] क्रियते यदि
शक्यते कर्तुम् । उक्तं च यतः ।

१ A great festival in consequence of a fair (fairs are periodically held at certain shrines by the devotees). २ तस्मिन् in that (festival). ३ Crowded by dancers (नट), actors (नर्तक) and wandering bards (चारण). ४ Filled with people come from various places. This and the preceding नट &c. are adjectives of तत्र = तस्मिन् महोत्सवे. ५ Companions, friends. ६ Mounted on a female elephant. ७ Endowed with or possessed of all good signs. ८ Attended upon or surrounded by chamberlains and eunuchs. ९ Hurt by poison. १० As if smitten by an evil star. ११ The arrows of cupid. १२ In that condition, सा अवस्था. यस्य. ब. १३ Afflicted by his affliction तद्दुःखं = तस्य दुःखं. १४ By relatives. १५ Cold remedies or appliances. १६ Prescribed by physicians. १७ By persons versed in *spells* and incantations. १८ Being attended to. Pre. P. of चर् caus. with उप Pass. १९ Regained consciousness. २० Opposed to सचेतन. विचेतन विगता चेतना यस्य. ब. २१ Real state or condition. २२ Secret. २३ So that. २४ By the giving or offering of wood for the funeral pile. २५ Through the excess of love. २६ With the eyes filled (lit. covered or obstructed) with tears. २७ Remedy against, retaliation.

[1]औषधार्थसुमन्त्राणां बुद्धेश्चैव महात्मनाम् ।
असाध्यं नास्ति लोकेऽत्र यद्ब्रह्माण्डस्य मध्यगम् ॥ २०३ ॥

तदेषां चतुर्णां यदि[2] साध्यं भविष्यति तदहं साधयिष्यामि । कौलिक आह । वयस्य एतेषामन्येषामपि सहस्रशः[3] उपायानामसाध्यं[4] तन्मम दुःखम् । तस्मान्मम[5] मरणे मा कालक्षेपं कुरु । रथकार आह । भो मित्र यद्यप्यसाध्यं तथापि निवेदय येनाहमपि तदसाध्यं[6] मत्वा त्वया सह वह्नौ प्रविशामि । न क्षणमपि त्वद्वियोगं सहिष्ये । एष मे निश्चयः । कौलिक आह । वयस्य यासौ राजकन्या करेणुकारूढा तत्रोत्सवे दृष्टा तस्या दर्शनान्तरं मकरध्वजेन[7] ममेयमवस्था विहिता तन्न शक्नोमि तद्वेदनां[8] सोढुम् । रथकारोपि सस्मितमिदमाह । वयस्य[9] दिष्ट्या यद्येवं तर्हि सिद्धं नः प्रयोजनम् । तदद्यैव तया सह संगमः क्रियतामिति । कौलिक आह । वयस्य यत्र कन्यान्तःपुरे[10] वायुं मुक्त्वा[11]न्यस्य प्रवेशो नास्ति तत्र[12] रक्षापुरुषाधिष्ठिते[13] कथं मम तया सह संगमः । तत्किं मामसत्यवचनेन[14] विडम्बयसि[15] । रथकार आह । मित्र पश्य मे बुद्धिप्रभावम्[16] एवमभिधाय तत्क्षणात्कीलसंचारिणं[17] वैनतेयं[18] सबाहुयुगलं[19] चिरजार्जुनवृक्षदारुणा[20]

---

१ Whatever is in the egg of Brahma, that is, universe, is not incurable by medicines, wealth, good spells or charms and also by the talent of the magnanimous. २ If it can be accomplished by these four means. ३ Of thousands of remedies. ४ Incurable. ५ Do not make any delay (make no delay) in my death, *i. e.*, do not put off my death by talking of remedies which will be of no avail. ६ Thinking it to be incurable after I hear of it. ७ Cupid. ८ That agony. तद्वेदनां=तां वेदनां. ९ Hail, oh joy! १० In the female apartment assigned to princesses. ११ Without wind (lit leaving off wind). This use of the absolutives for prepositions is very frequent in the Panchatantras. १२ यत्र–तत्र=यस्मिन्–तस्मिन् in that—where &c. १३ Inhabited by guards (रक्षापुरुष). १४ By false or impracticable assurance. १५ Mock. १६ Power. १७ Moving on a pin or wedge. कीलके संचरतीति तम्. १८ Garuda, the son of Vinatā. वैनतेय=विनतायाः अपत्यं पुमान् a patronymic derivative. Garuda is the vehicle of Vishnu. १९ Having two arms. २० With the timber of an old अर्जुन tree. चिरजस्य अर्जुनवृक्षस्य=चिरजार्जुनवृक्षस्य. चिरजः=चिरात् जातः, पं. त.

शङ्खचक्रगदापद्मान्वितं सकिरीटकौस्तुभमघटयत्। ततस्तस्मिन्कौलिकं समारोप्य विष्णुचिह्नैश्चिह्नितं कृत्वा कीलसंचरणविज्ञानं च दर्शयित्वा प्रोवाच। वयस्य अनेन विष्णुरूपेण गत्वा कन्यान्तःपुरे निशीथे राजकन्यामेकाकिनीं सप्तभूमिकप्रासादप्रान्तगतां मुग्धस्वभावां त्वां वासुदेवं मन्यमानां स्वकीयमिथ्यावक्रोक्तिभी रञ्जयित्वा वात्स्यायनोक्तविधिना भज। कौलिकोपि तदाकर्ण्य वासुदेवरूपी रहस्तदा गत्वा तत्र तामाह। राजपुत्रि सुप्ता किंवा जागर्षि। अहं तव कृते समुद्रात्सानुरागो लक्ष्मीं विहायैवागतः। तत्क्रियतां मया सह संगम इति। सापि गरुडारूढं चतुर्भुजं सायुधं कौस्तुभोपेतमवलोक्य सविस्मया शयनादुत्थाय प्रोवाच। भगवन् अहं मानुषी कीटिकाशुचिर्भगवांस्त्रैलोक्यपावनो वन्दनीयश्च। तत्कथमेतद्युज्यते। कौलिक आह। सुभगे सत्यमभिहितं भवत्या परं किंतु राधा नाम मे भार्या गोपकुलप्रसूता प्रथममासीत्। सा त्वमत्रावतीर्णा। तेनाहमायातः। इत्युक्ता सा प्राह। भगवन्यद्येवं तन्मे तातं प्रार्थय। सोप्यविकल्प्य तुभ्यं मां प्रयच्छति। कौलिक आह। सुभगे नाहं दृष्टिपथं मानुषाणां गच्छामि किं पुनरालापकरणम्।

१ Furnished with a conch, wheel, mace and lotus—these four are the weapons which Vishnu is represented as wielding. २ Accompanied with a diadem and the jewel कौस्तुभ hanging down his neck. सकिरीटकौस्तुभं किरीटकौस्तुभाभ्यां सहितं. ब. ३ Constructed. ४ In that artificial eagle—कृत्रिमगरुडे. ५ Marked with the signs of Vishnu तृ.त. ६ Having taught him the skill of putting the machine in motion. ७ At midnight. ८ Living on the top of the palace seven stories high. सप्तभूमिकप्रासाद. क. ९ Of an artless disposition. ब. १० By false and equivocal terms or expressions. ११ According to the mode prescribed by *Vàtsyáyana*, an author on कामशास्त्र. १२ In the disguise of Vásudeva. १३ Full of love. १४ चतुर्भुज = चत्वारो भुजा यस्य तं. ब. १५ With weapons. १६ A worm; a term used contemptuously for a human being. १७ Purifying the three worlds. १८ एतद्, *viz.*, the fact that I should have intercourse with you. १९ Oh fortunate or beautiful one. २० Born in the family of cowherds. २१ That same (you) have come down or descended to the world of mortals as the daughter of a king. २२ Having assigned me to you. २३ To the range of sight. २४ Much less do I talk with them (mortals). For this use of किंपुनः in the double sense of "how much more or how much less." See Guide to S. C.

स्वं गान्धर्वेण[1] विवाहेनात्मानं प्रयच्छ नो चेच्छापं[2] दत्त्वा सान्वयं[3] ते पितरं भस्मसात्करिष्यामीति । एवमभिधाय गरुडादवतीर्य सव्ये पाणौ[4] कृत्वा तां सभयां सलज्जां वेपमानां शय्यायामनयत्ततश्च रात्रिशेषं[5] यावद्वात्स्यायनोक्तविधिना निषेव्य[6] प्रत्यूषेऽलक्षितो जगाम । एवं तां तस्य नित्यं सेवमानस्य कालो याति[7] । अथ कदाचित्[8] कञ्चुकिनस्तस्या अधरोष्ठप्रवालखण्डनं[9] दृष्ट्वा मिथः प्रोचुः । अहो पश्यतास्या राजकन्यायाः पुरुषोपभुक्ताया इव शरीरावयवाः संभाव्यन्ते[10] । तत्कथमयं सुरक्षितेऽप्यस्मिन्गृह एवंविधो व्यवहारः[11] । तद्राज्ञे निवेदयामः[12] । एवं निश्चित्य सर्वे समेत्य[13] राजानं प्रोचुः । देव वयं न विद्मः परं सुरक्षितेऽपि कन्यान्तःपुरे कश्चित्प्रविशति तद्देवः प्रमाणमिति । तच्छ्रुत्वा राजातीव व्याकुलितचित्तो[14] देवीं रहःस्थां[15] प्रोवाच । देवि ज्ञायतां किमेते कञ्चुकिनो वदन्ति । तस्य कृतान्तः कुपितो[16] येनैतदेवं क्रियते । देव्यपि तदाकर्ण्य व्याकुलीभूता सत्वरं गत्वा तां खण्डिताधरां[17] नखविकर्तितशरीरावयवामपश्यत्[18] । आह च । ओः[19] पापे[20] कुलकलङ्किनि[21] किमेवं शीलखण्डनं[22] कृतम् ।

---

१ According to the form of marriage called Gándharva, in which the only condition necessary is the mutual consent of the bride-groom and the bride. २ If not, otherwise. ३ Together with the family, family and all. ४ Having taken hold of her with the right hand. ५ During the remaining portion of the night. ६ Understand here तां as the object of निषेव्य having enjoyed. ७ Some time passed while he was thus enjoying her. ८ Then once on a time. ९ Having seen a sign of biting on her coral-like lower lip अधरोष्ठ एव प्रवाल. क. १० The limbs of the body of this princess appear as if she were being enjoyed by a man. ११ Affair. १२ So let us inform the king of this. निविद् governs the dative of the person to whom something is told. The present indicative is often used for the Imperative mood. So निवेदयामः=निवेदयाम. १३ Having come together. १४ Greatly distressed at heart. १५ When she was in private. १६ The god of death is angry with him, by whom this is done, that is, he who has spoiled the virginity of the princess deserves no less a punishment than death. १७ Whose lower lip was bitten. १८ Whose limbs were scratched with nails. नखैर्विकर्तिताः शरीरावयवाः यस्याः ताम्. ब. १९ ओः an interjection implying anger or displeasure. २० Oh sinful one. २१ A disgrace to, or stain on the family. २२ The destruction of virtue.

कोयं कृतान्तावलोकितस्त्वत्सकाशमभ्येति । तत्कथ्यतामेवंगतेपि सत्यम् । तच्छ्रुत्वा सापि त्रपाधोमुखी सकलं विष्णुरूपकौलिकवृत्तान्तं निवेदयामास । सापि तच्छ्रुत्वा प्रहसितवदना पुलकाङ्कितसर्वाङ्गी सत्वरं गत्वा राजानमूचे । देव दिष्ट्या वर्धसे । नित्यमेव निशीथे भगवान्नारायणः कन्यकापार्श्वेभ्येति । तेन गान्धर्वविवाहेन सा विवाहिता । तदद्य त्वया मया च रात्रौ वातायनगताभ्यां निशीथे द्रष्टव्यो यतो न स मानुषैः सहालापं करोति । तच्छ्रुत्वा हर्षितस्य राज्ञस्तद्दिनं वर्षशतप्रायमिव कथंचिज्जगाम । ततस्तु रात्रौ निभृतो भूत्वा राज्ञीसहितो राजा वातायनस्थो गगनासक्तदृष्टिर्यावत्तिष्ठति तावद्गरुडारूढं तं शंखचक्रगदापद्महस्तं यथोक्तचिह्नाङ्कितं व्योम्नोवतरन्तमपश्यत् । ततः सुधापूरप्लावितमिवात्मानं मन्यमानस्तामुवाच । प्रिये नास्त्यन्यो धन्यतरो मत्तस्त्वत्तश्च यत्प्रसूतिं नारायणो भजते । तत्सिद्धाः सर्वेस्माकं मनोरथाः । अधुना जामातृप्रभावेण सर्वा वसुमती वशे भविष्यति । एवं निश्चित्य सर्वैः सीमाधिपैः सह मर्यादाव्यतिक्रम-

---

१ Looked at, or marked as a victim by death. २ Though such is the state of things; when your crime is so evident. ३ Who had hung down her head through shame. त्रपया अधः मुखं यस्याः सा. ब. ४ The account of the weaver disguised as Vishnu. ५ With a smiling countenance. ६ Whose whole body was covered with horripilation. पुलकैः अंकितं सर्वं अंगं यस्याः सा. ब. ७ You are happy; this expression is equal to the English :—I congratulate you (on &c.). ८ पार्श्वेभ्येति = पार्श्वमभ्येति comes near. ९ विवाहिता = व्यूढा. १० Seated in the window. ११ As if equal in length, to a hundred years, that is, very long. १२ With great difficulty, any how. १३ being concealed, that is, concealing himself. १४ Standing at the window. वातायने तिष्ठतीति. १५ With the eyes directed towards the sky. १६ Having in his hands शंख &c. १७ Furnished with the signs mentioned before. १८ From the sky. १९ As if deluged with the flood of nectar. २० More blessed. २१ Since Nârâyana enjoys our offspring. २२ The earth. २३ Will come in my power. २४ Border-kings. २५ The encroachment on the boundaries.

मकरोत्। ते च तं मर्यादाव्यतिक्रमेण वर्तमानमालोक्य सर्वे समेत्य तेन सह विग्रहं चक्रुः। अत्रान्तरे स राजा देवीमुखेन तां दुहितरमुवाच। पुत्रि त्वयि दुहितरि स्थितायां किमेवं युज्यते यत्सर्वे पार्थिवा मया सह विग्रहं कुर्वन्ति। तत्संबोध्योद्य भर्ता त्वया यथा स मम शत्रून्व्यापादयति। अथ तया स कौलिको रात्रौ सविनयमभिहितः। भगवन् त्वयि जामातरि स्थिते मम तातो यच्छत्रुभिः परिभूयते तन्न युक्तम्। तत्प्रसादं कृत्वा सर्वांस्तान्व्यापादय। कौलिक आह। सुभगे कियन्मात्रास्त्वेते तव पितुः शत्रवः। तद्विश्वस्ता भव क्षणेनापि सुदर्शनचक्रेण सर्वांस्तिलशः खण्डयिष्यामि। अथ गच्छता कालेन समस्तदेशः शत्रुभिर्व्याप्तः। अस्य केवलं स राजा प्राकारशेषः कृतः। तथापि वासुदेवरूपधरं कौलिकमजानन्राजा नित्यमेव विशेषतः कर्पूरागुरुकस्तूरिकादिपरिमलविशेषान्नानाप्रकारवस्त्रभक्ष्यपेयांश्च प्रेषयन्दुहितृमुखेन तमूचे। भगवन्प्रभाते नूनं स्थानभङ्गो भविष्यति यतो यवसेन्धनक्षयः संजातस्तथा सर्वोपि जनः

---

१ Living. २ Having joined together. ३ Declared war with him. ४ Through the mouth of, through the queen. ५ You being our daughter. ६ What, is it proper that &c. ७ You should request your husband so that &c. ८ Is despised, defeated. ९ How great a measure, of what account, are they? कियन्मात्राः = कियन्ती मात्रा येषां ते. ब. १० With the disc called सुदर्शन. ११ Shall cut them to pieces as small as (तिल) sesame, that is, shall cut them into small pieces. १२ Occupied. १३ The king had only the fortress out of the kingdom left to him. अस्य viz. देशस्य. प्राकारशेषः = प्राकार एव शेषः यस्य. ब. १४ Not knowing that it was the कौलिक who appeared in the disguise of Vásudeva. १५ Fragrant things such as camphor, aloe, musk and others. कर्पूरागुरुकस्तूरिकाः आदयः येषु तान् (परिमल विशेषान्) ब. १६ Consisting also of various sorts of garments, eatables and drinkables. This is also ब. and an adjective of कर्पूरा... विशेषान्. नानाप्रकाराणि वस्त्रभक्ष्यपेयानि च येषु तान्. १७ प्रेषयन् (sending,) having for its object कर्पूरा...विशेषान्; and विशेषतः especially, as special gifts on the present occasion. १८ Indeed or certainly in the morning. १९ We shall lose our place (fortress). २० The supply of fodder and fuel is over or has fallen short.

प्रहारैर्जर्जरितदेहः[1] संवृत्तो योद्धुमक्षमः[2] प्रचुरो[3] मृतश्च । तदेवं ज्ञात्वात्र[4]काले यदुचितं भवति[5] तद्विधेयमिति । तच्छ्रुत्वा कौलिकोऽप्यचिन्तयद्यत्स्थानभङ्गे जाते ममानया सह वियोगो भविष्यति तस्माद्गरुडमारुह्य सायुधमात्मानमाकाशे[6] दर्शयामि । कदाचिन्मां वासुदेवं मन्यमानास्ते साशङ्का[7] राज्ञो[8] योद्धृभिर्हन्यन्ते । उक्तं च ।

[9]निर्विषेणापि सर्पेण कर्तव्या महती फणा ।
विषं भवतु मा भूद्वा फटाटोपो भयंकरः ॥ २०४ ॥

अथवा मम स्थानार्थं[10] उद्यतस्य मृत्युर्भवति तथापि[11] सुन्दरतरम्[12] । उक्तं च ।

[13]गवामर्थे ब्राह्मणार्थे स्वाम्यर्थे स्त्रीकृतेऽथवा ।
स्थानार्थे यस्त्यजेत्प्राणांस्तस्य लोकाः सनातनाः ॥ २०५ ॥

एवं निश्चित्य प्रत्यूषे दन्तधावनं[14] विधाय तामूचे । सुभगे समस्तैः[15] शत्रुभिर्हतैरन्नं पानं चास्वादयिष्यामि । किं बहुना । त्वयापि सह संगमं ततः करिष्यामि । परं वाच्यस्त्वया[16] निजपिता यत्त्वया प्रभाते सर्वसैन्येन

१ Exhausted in body by the wounds (received in defending the fort). २ Unable. ३ And many are killed or have fallen. ४ अत्रकाले =अस्मिन्काले. ५ Let that which is suitable to the occasion be done. ६ Let me show myself armed in the sky. The present Ind. used for the Imperative. ७ Full of fear (thinking me to be Vásudeva himself). ८ The king's soldiers. ९ Even that snake who has no poison should spread out his hood fully, there may or may not be poison, but the very spreading of the hood is terrible to look at. The verse as seen elsewhere is—निर्विषेणापि कर्तव्या सर्पेण महती फटा । विषं भवतु वा मास्तु फटाटोपो भयंकरः ॥ In the verse in the book the two words फणा and फटा are, therefore, synonymous. १० Ready for or intent on saving the place of the king. ११ अथवा तथापि=यदि तथा. If—then. १२ More pleasant, much better, (than, of course, the destruction of the enemies by the king's soldiers) १३ The good or happy world is the eternal place of residence of him who will sacrifice his life for the sake of cows, Bráhmans, the master, a woman, and a place of residence. १४ Washing the teeth. १५ When all the enemies are killed. This may be considered as an instance of the Instrumental absolute in Sanskrit, and may be rendered by समस्तेषु शत्रुषु हतेषु. १६ Should be told or informed. Pot. Passive P. of वच् 2 P.

सह नगरान्निष्क्रम्य योद्धव्य[1]महं चाकाशस्थ[2]स्तान्निस्तेजसः[3] करिष्यामि प-श्चात्सुखेन[4] भवता हन्तव्याः । यदि पुनरहं तान्स्वयमेव सूदयामि[5] तत्तेषां पापात्मनां[6] वैकुण्ठीया गतिः[7] स्यात् । तस्मात्ते तथा कर्तव्या[8] यथा पला-यन्तो[9] हन्यमानाः स्वर्गं न गच्छन्ति । सापि तदाकर्ण्य पितुः समीपं गत्वा सर्वं वृत्तान्तं न्यवेदयत् । राजापि तस्या वाक्यं श्रद्दधानः प्रत्यूषे समु-त्थाय सुसंनद्धसैन्यो[10] युद्धार्थं निर्जगाम । कौलिकोपि मरणकृत[11]निश्चयश्चा-पपाणि[12]र्गगनगति[13]र्गरुडारूढो युद्धाय प्रस्थितः । अत्रान्तरे भगवता नाराय-णेनातीतानागतवर्तमान[14]वेदिना स्मृतमात्रो[15] वैनतेयः संप्राप्तो[16] विहस्य प्रोक्तः । भो गरुत्मन् जानासि त्वं यन्मम रूपेण कौलिको दारुमयगरुडे समारूढो राजकन्यां कामयते । सोब्रवीत् । देव सर्वं ज्ञायते तच्चेष्टितं[17] । तत्किं कुर्मः सांप्रतम्[18] । श्रीभगवानाह । अद्य कौलिको मरणे कृतनिश्चयो विहि-तनियमो[19] युद्धार्थं विनिर्गतः । स नूनं प्रधानक्षत्रिय[20]शराहतो निधन[21]मेष्य-ति । तस्मिन्हते[22] सर्वो जनो वदिष्यति यत्प्रभूतक्षत्रियैर्मिलित्वा[23] वासुदेवो गरुडश्च निपातितः । ततः परं लोक आवयोः पूजां न करिष्यति । तत-स्त्वं द्रुततरं तत्र दारुमयगरुडे संक्रमणं कुरु[24] । अहमपि कौलिकशरीर

---

१ should fight. २ Remaining in the sky. ३ Destitute of energy. निर्गतं तेजः येषां ते. ब. ४ With ease, easily. ५ Kill or destroy. ६ Evil-minded or wicked. ७ Will go to, or obtain Paradise or the world of Vishnu for being killed, while fighting with the enemy. ८ They should be so dealt with or treated. ९ Being killed while running from the battle-field. पलायन्तः=पलायमानाः Pre: P. of पलाय् (परा+इ) to run—here used in the Parasmaipada. १० With his army well-armed or equipped. सुष्ठु सन्नद्धं सैन्यं यस्य ब. ११ Determined to die in battle. स. त. १२ Bow in hand—चापं पाणौ यस्य. १३ Moving in the sky. गगने गतिर्यस्य. ब. १४ Knowing the past, the future (अनागत) and the present. This is an उपपद Comp. (अतीतं च अनागतं च वर्तमानं च) अतीतानागतवर्तमानानि वेत्तीति. १५ Being only remembered, as soon as he was remembered. १६ Arrived. P.P. of आप् with सम् and प्र. १७ His tricks or movements. १८ Now, for the present. १९ One who has taken upon himself a vow. विहितः नियमः येन. ब. २० Being struck with an arrow by a powerful warrior—प्रधान chief, and hence, powerful, brave. २१ Death. २२ He being killed, when he is killed. २३ Having come together, conjointly. २४ Make an entrance into, or enter into.

आवेशं[1] करिष्यामि येन स शत्रून्व्यापादयति। ततश्च शत्रुवधादावयोर्माहात्म्यवृद्धिः[2] स्यात्। अथ तथेति प्रतिपन्ने[3] श्रीभगवान्नारायणस्तच्छरीरे संक्रमणमकरोत्। ततो भगवन्माहात्म्येन[4] गगनस्थः स कौलिकः शङ्खचक्रगदाचापचिह्नितः क्षणादेव[5] लीलयैव[6] सर्वानपि प्रधानक्षत्रियान्निस्तेजसश्चकार। ततस्तेन राज्ञा स्वसैन्यपरिवृतेन जिता निहताश्च ते सर्वेऽपि[7] शत्रवः। जातश्च लोकमध्ये[8] प्रवादो यथानेन विष्णुजामातृप्रभावेण[9] सर्वे शत्रवो निहता इति। कौलिकोऽपि तान्हतान्दृष्ट्वा प्रमुदितमना[10] गगनादवतीर्णः[11] [12]सन्यावद्राजामात्यपौरलोकास्तं नगरवास्तव्यं कौलिकं पश्यन्ति ततः पृष्टः किमेतदिति। ततः सोऽपि मूलादारभ्य[13] सर्वं प्राग्वृत्तान्तं[14] न्यवेदयत्। ततश्च [15]कौलिकसाहसानुरञ्जितमनसा शत्रुवधादवाप्ततेजसा राज्ञा सा राजकन्या सकलजनप्रत्यक्षं[16] विवाहविधिना तस्मै समर्पिता देशश्च प्रदत्तः[17]। कौलिकोऽपि तया सार्धं पञ्चप्रकारं जीवलोकसारं[18] विषयसुखमनुभवन्[19] कालं निनाय।

अतस्तूच्यते[20] सुप्रयुक्तस्य दम्भस्येति।

---

१ Entrance. २ Our greatness or importance will be heightened. ३ That being agreed to (by Garuda). ४ By the greatness of the god. भगवतः महात्म्येन. ष. त. ५ In a moment. ६ With ease, easily. Cf. सुखेन. ७ All the enemies *without a single exception* (अपि) were defeated and slain. ८ There was a talk among people, it was openly talked. ९ By the power of his son-in-law, Vishnu. विष्णुरेव जामाता. क. १० Delighted at heart. ११ Descended. Here the sentence ought to end. १२ When the king, the ministers and citizens saw that he was a weaver living in the town. नगरवास्तव्यं=नगरे वास्तव्यं यस्य तम् ब. १३ From the beginning. १४ Previous account. १५ The king whose mind was diverted by the adventurous disposition of the weaver, and who had obtained new vigour by the destruction of the enemies. १६ In the presence of all people. १७ And a country was assigned to him for his sustenance. १८ The essence of this wordly existence. १९ The happiness derived from sensual enjoyments. २० Therefore it is said &c.

करटक आह । अथैवंविधे व्यतिकरे किं कार्यमावाभ्याम् । दमनक आह । एवंविधेऽपि समये मम बुद्धिस्फुरणं भविष्यति येन प्रभोः संजीवकं विश्लेषयिष्यामि । उक्तं च ।

एकं हन्यान्न वा हन्यादिषुर्मुक्तो धनुष्मता ।
बुद्धिर्बुद्धिमतोत्सृष्टा हन्ति राष्ट्रं सराजकम् ॥ २०६ ॥

करटक आह । यद्यपि त्वं बुद्धिमांस्तथापि त्वं पिङ्गलकात्तं वियोजयितुमसमर्थ एव । दमनक आह । भ्रातः असमर्थोऽपि समर्थ एव । उक्तं च ।

उपायेन हि यत्कुर्यात्तन्न शक्यं पराक्रमैः ।
काक्या कनकसूत्रेण कृष्णसर्पो निपातितः ॥ २०७ ॥

करटक आह । कथमेतत् । सोऽब्रवीत् ।

॥ कथा ६ ॥

कस्मिंश्चित्प्रदेशे महातरौ वायसदंपती प्रतिवसतः स्म । अथ तयोः प्रसवकाले वृक्षविवरान्निष्क्रम्य कृष्णसर्पः सदैव तदपत्यानि भक्षयति । ततस्तौ निर्वेदादन्यवृक्षमूलनिवासिनं प्रियसुहृदं शृगालं गत्वोचतुः । भद्र किमेवंविधे संजाते आवयोः कर्तव्यं भवति । एष तावद्दुष्टात्मा कृष्णसर्पो विवरान्निर्गत्यावयोर्बालकान्भक्षयत्येव । तत्कथ्यतां तद्रक्षार्थं कश्चिदुपायः ।

१ Such being the state of things. २ The flashing forth of the intellect. ३ Separate, alienate. 2nd Fut. of caus. of श्लिष् 4 P. with वि. ४ The arrow discharged by an archer may or may not hit a man, but the talent used (lit. hit forth) by a talented man, will hit even a kingdom together with the king. ५ The skill or proficiency of talent. ६ The same as विश्लेषयितुं 3 above ७ That which one can accomplish by remedies, is not possible to do (कर्तुम्) by valour; a female crow destroyed a black serpent by means of a gold cord or string (used as an ornament). Another reading for उपायेन हि यत्कुर्यात् is उपायेन हि यच्छक्यम् ८ A crow. ९ At the time of delivery or bringing forth young ones. १० A hollow. ११ Their young ones. तयोः अपत्यानि Here तयोः stands for the masculine and feminine It is an एकशेषद्वंद्व. १२ Through sorrow or dejection of spirits. १३ Residing at the root of another tree १४ Dear friend. १५ Such being the case; when we are thus circumstanced. १६ For their protection, for saving them. तेषां रक्षार्थम्. ष. त.

यस्य क्षेत्रं नदीतीरे भार्या च परसंगता।
सत्पे च गृहे वासः कथं स्यात्तस्य निर्वृतिः॥ २०८॥

अन्यच्चास्माकमपि तत्रस्थानां प्रतिदिनं प्राणसंशयः। तत् शोकः। नात्र विषये विषादः कार्यः। नूनं स लुब्धो नोपायमन्तरेण वध्यः स्यात्।

उपायेन जयो यादृग्रिपोस्तादृङ्न हेतिभिः।
उपायज्ञोऽल्पकायोऽपि न शूरैः परिभूयते॥ २०९॥

तथा च। भक्षयित्वा बहून्मत्स्यानुत्तमाधममध्यमान्।
अतिलौल्याद्बकः कश्चिन्मृतः कर्कटकग्रहात्॥ २१०॥

तावूचतुः। कथमेतत्। सोऽब्रवीत्।

॥ कथा ७ ॥

अस्ति कस्मिंश्चित्प्रदेशे नानाजलचरसनाथं सरः। तत्र च कृताश्रयो बक एको वृद्धभावमुपागतो मत्स्यान्व्यापादयितुमसमर्थः। ततश्च क्षुत्क्षाम-

---

१ How can he, whose abode is situated on the banks of a river, whose wife is attached to another (paramour), and who lives in a house inhabited by snakes, have happiness or ease? परगता न त = While living there = danger to life. संशय meaning doubt, fear &c is of frequent occurrence in Sanskrit. ४ Sorrow, grief. ५ In this case. अत्र = अस्मिन्. Without a remedy. अन्तरेण and अन्तरा govern the accusative. See Guide. ६ That much victory, which is obtained against an enemy by making use of a remedy is not obtained by means of swords (हेतिभिः), one who knows a remedy is not defeated by brave persons though he be small in body or bulk. Here यादृक् ought to have been followed by its usual correlative तादृक्; or in place of यादृक् one would expect यावान् to correspond with तावान्. उपाय जानातीति उपायज्ञः. उप.; अल्पकाय.. ब.७ Having devoured various sorts of fishes, *viz.*, the best, the lowest and the middling, a crane perished through excess of greed, being seized by a crab or by reason of the seizure (ग्रह) by a crab. ८ Full of various water-animals. नानाजलचरैः सनाथं तृ. त. ९ Residing, dwelling. कृतः आश्रयः येन. ब. १० Reduced to the state of old age, become old.

कण्ठः सरस्तीर उपविष्टो मुक्ताफलसदृशैरश्रुप्रवाहैर्धरातलमभिषिञ्चन्रुरोद । एकः कुलीरको नानाजलचरैरसमेतः समेत्य तस्य दुःखेन दुःखितः सादरमिदमूचे । माम किमद्य त्वयाहारवृत्तिर्नानुष्ठीयते । केवलमश्रुपूर्णनेत्राभ्यां सनिःश्वासेन स्थीयते । स आह । वत्स सत्यमुपलक्षितं भवता । मया हि मत्स्यादनं प्रति परमवैराग्यतया सांप्रतं प्रायोपवेशनं कृतं तेनाहं समीपगतानपि मत्स्यान्न भक्षयामि । कुलीरकस्तच्छ्रुत्वा प्राह । किं तद्वैराग्यकारणम् । स प्राह । वत्स अहमस्मिन्सरसि जातो वृद्धिं गतश्च । तन्मयैतच्छ्रुतं यद्द्वादशवार्षिक्यनावृष्टिः संपद्यते लग्ना । कुलीरक आह । कस्मात्तच्छ्रुतम् । बक आह । दैवज्ञमुखात् । यतः शनैश्चरो रोहिणीशकटं भित्त्वा भौमं शुक्रं च प्रयास्यति । उक्तं च वराहमिहिरेण ।

यदि रोहिण्याः शकटं भिनत्ति रविनन्दनो गगनवीथ्याम् ।
द्वादश वर्षाणि तदा न हि वर्षति वासवो भूमौ ॥ २११ ॥

१ Wetting the ground with tears falling down in drops resembling pearls. २ A crab. ३ Accompanied with various aquatic animals. ४ Having come together. Here सम् seems to have no propriety of meaning as समेतः expresses the sense of it. ५ Grieved at his grief, sympathizing with him in his grief. ६ A term of address meaning uncle. ७ The action of taking food, eating &c. ८ Remain sighing. निःश्वासेन सहितेन. ब. ९ Marked ; observed. १० Great absence of desire as regards the devouring of fish. परमवैराग्यता abstract noun from परमविराग. परमः विरागः यस्य. ब. ११ Abstaining from food and awaiting the approach of death. १२ For that reason. १३ Born and brought up. १४ Lasting for a period of 12 years; an adjective from द्वादशवर्ष by the Taddhita affix इक. १५ Absence of rain; drought. १६ Is close (लग्ना) at hand, is closely impending. १७ From an astrologer or fortune-teller. १८ The planet शनि—Saturn. १९ The constellation Rohini in the form of a cart. २० The planets Mars (मंगल) and Venus. २१ A very famous Indian astronomer, who flourished in the 6th century A. D. २२ If the *son of Ravi* (Saturn) crosses the cart of Rohini in his passage through the sky, Indra does not send down rain on the earth for twelve years. (भिनत्ति lit. breaks through).

तथा च । प्राजापत्ये शकटे भिन्ने कृत्वेव पातकं वसुधा ।
भस्मास्थिशकलकीर्णा कापालमिव व्रतं धत्ते ॥ २१२ ॥
तथा च । रोहिणीशकटमर्कनन्दनश्चेद्भिनत्ति रुधिरोऽथवा शशी ।
किं वदामि तदनिष्टसागरे संक्षयं जगदशेषमुपैति ॥२१३॥

तदेतत्सरः स्वल्पतोयं वर्तते। शीघ्रं शोषं यास्यति । अस्मिञ्शुष्के यैः सहाहं वृद्धिं गतः सदैव क्रीडितश्चैते सर्वे तोयाभावान्नाशं यास्यन्ति। तत्तेषां वियोगं द्रष्टुमहमसमर्थः । तेनैतत्प्रायोपवेशनं कृतम् । सांप्रतं सर्वेषां स्वल्पजलाशयानां जलचरा गुरुजलाशयेषु स्वस्वजनैर्नीयन्ते केचिच्च मकरगोधाशिशुमारजलहस्तिप्रभृतयः स्वयमेव गच्छन्ति। अत्र पुनः सरसि ये जलचरास्ते निश्चिन्ताः सन्ति तेनाहं विशेषाद्रोदिमि यद्बीजशेषमात्रमप्यत्र नोद्धरिष्यति। ततः स तदाकर्ण्यान्येषामपि जलचराणां तत्तस्य

१ When the cart of Prajápati (the cart of Rohiní, of which Prajápati is the deity) is passed through (भिन्ने), the Earth being covered with ashes and pieces of bones, as if it has committed some sin, assumes the vow of a skull-bearer (a devotee of S'iva). The earth is here compared to a कापालिक by reason of its being strewed with the ashes and bones of the persons who have died in consequence of the drought A कापालिक is one who covers his body with ashes and carries in his hand a human skull to carry alms in as an atonement for his sin. २ If either the son of the sun (अर्क) that is, Saturn, Mars or the Moon passes through the cart of Rohiní, what should I say with respect to the evils that arise therefrom ? The whole earth goes to destruction or is destroyed. तदनिष्टसागरे=तस्यानिष्टस्य सागरे. With regard to the numberless evils that arise. Here तत refers to the fact of the Saturn passing through &c. अशेषं=नास्ति शेषं यस्य. ३. Entire, whole. ३ Is a Bah. Comp. ४ Will be dried up. ५ When it is dried up. ६ Played, sported. P. P. of क्रीड् used actively. ७ Through the absence or want of water. ८ The water-animals living in small ponds or reservoirs of water. स्वल्पाश्च ते जलाशयाश्च. त. ९ By their respective relatives. १० A large water-lizard. ११ The Gangetic porpoise. १२ Water-elephant. १३ अत्र सरसि = in this lake. १४ Free from anxiety or care. १५ For that reason viz., that expressed by यत following. १६ For not even a seed of them will remain here or will be left here. उद्धरिष्यति should be taken in the passive sense = उद्धरिष्यते. बीजशेष-बीजमेव शेषः. क.

वचनं निवेदयामास । अथ ते सर्वे भयत्रस्तमनसो मत्स्यकच्छपप्रभृतयस्त-मभ्युपेत्य पप्रच्छुः । माम अस्ति कश्चिदुपायो येनास्माकं रक्षा भवति । बक आह । अस्त्यस्य जलाशयस्य नातिदूरे प्रभूतजलसनाथं सरः पद्मिनीखण्डमण्डितं यच्चतुर्विंशत्यपि वर्षाणामवृष्ट्या न शोषमेति । तद्यदि मम पृष्ठं कश्चिदारोहति तदहं तं तत्र नयामि । अथ ते तत्र विश्वासमापन्नास्तात मातुल भ्रातरिति ब्रुवाणा अहं पूर्वमहं पूर्वमिति समन्तात्परितस्थुः । सोपि दुष्टाशयः क्रमेण तान्पृष्ठमारोप्य जलाशयस्य नातिदूरे शिलां समासाद्य तस्यामाक्षिप्य स्वेच्छया भक्षयित्वा भूयोपि जलाशयं समासाद्य जलचराणां मिथ्यावार्तासंदेशकैर्मनांसि रञ्जयन्नित्यमेवाहारवृत्तिमकरोत् । अन्यस्मिन्दिने स कुलीरकेणोक्तः । माम मया सह ते प्रथमः स्नेहसंभाषः संजातः । तत्किं मां परित्यज्यान्यान्नयसि । तस्मादद्य मे प्राणत्राणं कुरु । तदाकर्ण्य सोपि दुष्टाशयश्चिन्तितवान् । निर्विण्णोहं मत्स्यमांसादनेन । तदद्यैनं कुलीरकं व्यञ्जनस्थाने करोमि । इति विचिन्त्य तं पृष्ठे समारोप्य तां वध्यशिलामुद्दिश्य प्रस्थितः । कुलीरको दूरादेवास्थिपर्वतं शिलाश्रयमवलोक्य मत्स्यास्थीनि परिज्ञाय तमपृच्छत् । माम कियद्दूरे स जलाशयः । मदीयभारेणातिश्रान्तस्त्वं तत्कथय । सोपि मन्दधीर्जलचरोयमिति मत्वा स्थले न प्रभवतीति सस्मितमिदमाह । कुलीरक

---

१ The fish, tortoise and others. मत्स्यकच्छपौ प्रभृती येषां ते. ब. २ Not far from this lake. ३ Adorned with a multitude of lotus-plants ४ Absence of rain, drought. ५ तत्र=तस्मिन &c. Those who put confidence in him; in whom was engendered confidence about him. ६ Stood around him saying I first, I first, that is, take me first, take me first. ७ Of evil or wicked intention. दुष्टः आशयः यस्य. ८ Having reached. ९ Having dashed. १० By giving them (जलचर) false account of things. ११ Like the usual one. १२ One day (it does not mean exactly the next day). १३ Friendly discourse. १४ The saving of life. प्राणत्राणं कुरु save my life. १५ I am disgusted with eating the flesh of fishes. १६ Use (him) as condiment or sauce. १७ The stone of execution, that is, the stone on which he dashed his prey before eating it. वध्य has no force of the passive here. १८ Towards. १९ A heap of bones. २० Lying on the stone. शिला आश्रयः यस्य तं (अस्थिपर्वतं). ब. २१ How far, how remote. २२ Greatly fatigued. २३ Dull-headed, of dull intellect मन्दा धीर्यस्य. ब. २४ Has no power on land; is powerless on land. Here understand मत्वा after प्रभवतीति.

कुतोन्यो जलाशयः। मम प्राणयात्रेयम्[१]। तस्मात्स्मर्यतामात्मनोभीष्टदेवता[२]। त्वामप्यस्यां शिलायां निक्षिप्य भक्षयिष्यामि। इत्युक्तवति तस्मिन्स्ववदनदंशद्वयेन[३] मृणालनालधवलायां[४] मृदुग्रीवायां गृहीतो मृतश्च[५]। अथ स तां बकग्रीवां समादाय शनैः शनैस्तज्जलाशयमाससाद[६]। ततः सर्वैरेव जलचरैः पृष्टः। भोः कुलीरक किंनिमित्तस्त्वं[७] पर्यावृत्यायातः[८]। कुशलकारणं[९] तिष्ठति। स मातुलोपि नायातः। तत्किं[१०] चिरयसि। वयं सर्वे सोत्सुकाः कृतक्षणास्तिष्ठामः[११]। एवं तैरभिहिते कुलीरकोपि विहस्योवाच। मूर्खाः सर्वे जलचरास्तेन मिथ्यावादिना[१२] वञ्चयित्वा नातिदूरे शिलातले प्रक्षिप्य भक्षिताः। तन्मयायुःशेषतया[१३] तस्य विश्वासघातकस्याभिप्रायं ज्ञात्वा ग्रीवेयमानीता। तदलं[१४] संभ्रमेण। अधुना सर्वजलचराणां क्षेमं[१५] भविष्यति।

अतोहं ब्रवीमि भक्षयित्वा बहून्मत्स्यानिति।

१ Subsistence, maintenance. २ Let your desired or tutelary deity be remembered; make yourself ready for death by offering your last prayers to your deity. ३ With two teeth of his mouth. स्व here refers to the कुलीरक. ४ As white as the stalk of a lotus. मृणालनाल इव धवला. क. ५ Was seized and perished. Here there is a violation of the rule of Syntax, viz., the subject of the Loc. absolute (construction) cannot be the subject of the principal sentence. ६ Reached; approached that pond. Here तज्जलाशयं cannot be a Genitive Tatpurusha, but it is a कर्मधारय. तं जलाशयम्. ७ With what object in view, for what purpose? किं निमित्तं यस्य सः — किंनिमित्तः. ८ Come back, returned. ९ Is there any cause in your return that concerns our welfare? Here किम् is to be understood after तिष्ठति. १० Why do you then delay telling us what motive has induced you to come back? ११ We are all very anxious and waiting impatiently for the right moment. सोत्सुकाः and कृतक्षणाः. ब. १२ Liar. १३ As I am yet destined to live by reason of the remainder of my life. १४ Then enough of haste or rashness. अलं (enough) governs generally the Instrumental and sometimes the absolutive or Infinitive of purpose, *e. g.* अलमन्यथा गृहीत्वा &c. १५ Safety, welfare.

वायस आह । भद्र तत्कथय कथं स दुष्टसर्पो वधमुपैष्यति । शृगाल आह । गच्छतु भवान्कचिन्नगरं राजाधिष्ठानम् । तत्र कस्यापि धनिनो राजामात्यादेः प्रमादिनः कनकसूत्रं हारं वा गृहीत्वा तत्कोटरे प्रक्षिप येन सर्पस्तद्ग्रहणेन वध्यते । अथ तत्क्षणात्काकः काकी च तदाकर्ण्यात्मेच्छयोत्पतितौ । ततश्च काकी किंचित्सरः प्राप्य यावत्पश्यति तावत्तन्मध्ये कस्यचिद्राज्ञोऽन्तःपुरं जलासन्नं न्यस्तकनकसूत्रं मुक्तमुक्ताहारवस्त्राभरणं जलक्रीडां कुरुते । अथ सा वायसी कनकसूत्रमेकमादाय स्वगृहाभिमुखं प्रतस्थे । ततश्च कञ्चुकिनो वर्षधराश्च तन्नीयमानमुपलक्ष्य गृहीतलगुडाः सत्वरमनुययुः । काक्यपि सर्पकोटरे तत्कनकसूत्रं प्रक्षिप्य सुदूरमवस्थिता । अथ यावद्राजपुरुषास्तं वृक्षमारुह्य तत्कोटरमवलोकयन्ति तावत्कृष्णसर्पः प्रसारितभोगस्तिष्ठति । ततस्तं लगुडप्रहारेण हत्वा कनकसूत्रमादाय यथाभिलषितं स्थानं गताः । वायसदंपती अपि ततः परं सुखेन वसतः । अतोऽहं ब्रवीम्युपायेन हि यत्कुर्यादिति ।

तन्न किंचिदिह बुद्धिमतामसाध्यमस्ति । उक्तं च ।

यस्य बुद्धिर्बलं तस्य निर्बुद्धेस्तु कुतो बलम् ।
वने सिंहो मदोन्मत्तः शशकेन निपातितः ॥ २१४ ॥

करटक आह । कथमेतत् । स आह ।

---

१ Go to or near; meet with. २ The place of residence of a sovereign or his capital. ३ Of a king, minister &c. who may be careless. राजामात्यादेः – राजामात्यौ आदौ यस्य. ब. ४ A string or garland of gold. ५ Wreath, garland. ६ तस्य कोटरे in his hole. ७ For having taken it away. ८ Of their own will, of their own accord. ९ Flew up. १० As soon as; no sooner than. ११ The ladies of the female apartments collectively. १२ Near the water जलस्य आसन्नम्. ष. त. १३ Who had put off or laid aside their gold strings. १४ Who had taken off their persons, their pearl-necklaces, clothing and decorations. This and the preceding are both Bah. compounds. १५ Towards her own residence स्वगृहस्याभिमुखं यथा तथा. अव्य. १६ The eunuch attendants on the harem. १७ Who had taken cudgels in their hands. गृहीताः लगुडाः यैस्ते. ब. १८ It may either mean तस्य कोटरे=सर्पस्य कोटरे or तत् कोटरं may mean–that hollow, तत् being a demonstrative pronoun. १९ Who had spread out his hood. प्रसारितः भोगः येन. ब. २० To the place desired (by them). २१ He who has talent, has power; whence can one, void of talent, have power? A lion intoxicated with pride in a forest was destroyed by a hare. यस्य बुद्धिर्बलं तस्य; Cf. the English "*knowledge is power*."

॥ कथा ८ ॥

कस्मिंश्चिद्वने भासुरको नाम सिंहः प्रतिवसति स्म । अथासौ वीर्याति-रेकान्नित्यमेवानेकान्मृगशशकादीन्व्यापादयन्नोपरराम । अथान्येद्यु-स्तद्वनजाः सर्वे सारङ्गवराहमहिषशशकादयो मिलित्वा तमभ्युपेत्य प्रोचुः । स्वामिन् किमनेन सकलमृगवधेन नित्यमेव यतस्तवैकेनापि मृगेण तृप्तिर्भ-वति । तत्क्रियतामस्माभिः सह समयधर्मः । अद्यप्रभृति तवात्रोपविष्टस्य जातिक्रमेण प्रतिदिनमेको मृगो भक्षार्थं समेष्यति । एवं कृते तव तावत्प्रा-णयात्रा क्लेशं[12] विनापि भविष्यत्यस्माकं[13] च पुनः सर्वोच्छेदनं[14] न स्यात् । तदेष राजधर्मोऽनुष्ठीयताम् । उक्तं च ।

[15] शनैः शनैश्च यो राज्यमुपभुङ्क्ते यथाबलम् ।
रसायनमिव प्राज्ञः स पुष्टिं परमां व्रजेत् ॥ २१५ ॥
[16] विधिना मन्त्रयुक्तेन रूक्षापि मथितापि च ।
प्रयच्छति फलं भूमिररणीव हुताशनम् ॥ २१६ ॥

---

१ Through the excess of strength. २ Deer, hare and others. मृगशशकाः आदौ येषां तान् (प्राणिनः). व ३ Did not cease killing, *i. e.*, went on killing, continuously killed. ४ Born *in his* (lion's) *forest* or *in that forest*. In the first case तद्वन is a ष. त., while in the other it is a क. ५ Deer, boar, buffalo, hare and others. सारंगवराहमहिषशशकाः आदयः येषां ते. ब. ६ What is the good of this destruction of all beasts? ७ A contract, a bargain, a treaty. ८ While you are sitting here, that is, without your moving from your place. ९ In the order of our kinds. १० Every day. दिने दिने=प्रतिदि-नम्. अव्य. ११ First, as regards yourself. १२ Without any trouble at all. १३ But further, as regards ourselves. १४ The total destruction or extirpation of all. सर्वेषामुच्छेदनम. १५ That wise man, who gradually enjoys his kingdom according to his strength, will attain to great prosperity, as a person attains nourishment of the body by taking *a medicine that prolongs life* (रसायन=रस and आयन). १६ A piece of land though sterile, yields fruit when it is cultivated according to the proper mode (मंत्रयुक्तेन विधिना), as the *Arani* (two pieces of wood used in kindling the the sacred fire), though rough, gives fire (हुताशनं) when it is handled or churned according to the rite accompanied with the Vedic hymn.

१प्रजानां पालनं शस्यं स्वर्गकोशस्य वर्धनम् ।
पीडनं धर्मनाशाय पापायायशसे स्थितम् ॥ २१७ ॥
२गोपालेन प्रजाधेनोर्वित्तदुग्धं शनैः शनैः ।
पालनात्पोषणाद्ग्राह्यं न्याय्यां वृत्तिं समाचरेत् ॥ २१८ ॥
३अजामिव प्रजां मोहाद्यो हन्यात्पृथिवीपतिः ।
तस्यैका जायते तृप्तिर्न द्वितीया कथंचन ॥ २१९ ॥
४फलार्थी नृपतिर्लोकान्पालयेद्यत्नमास्थितः ।
दानमानादितोयेन मालाकारोऽङ्कुरानिव ॥ २२० ॥
५नृपदीपो धनस्नेहं प्रजाभ्यः संहरन्नपि ।
अन्तरस्थैर्गुणैः शुभ्रैर्लक्ष्यते नैव केनचित् ॥ २२१ ॥

१ The protection of the subjects is praiseworthy and increases *the chances of obtaining heaven* (स्वर्ग) and also the treasure; while their oppression tends to the destruction of religion, and to sin and infamy. स्वर्गकोश may be taken as a कर्मधारय as स्वर्गः एव कोशः which means treasure in the form of heavenly bliss. स्थितम् with the dative meaning leads to, results in; Cf. तां स्वल्पदृ खाय in verse 2 in प्रस्ताविका. २ A cowherd (गां प्रजाः पाति a king) in the shape of a king should take the milk (wealth) from the cows (of subjects) gradually by protecting and nourishing them (cows, subjects) and thus he should have recourse to a just or righteous path. प्रजाधेनु and वित्तदुग्ध are क. a king being compared to a cowherd. ३ That king who through folly kills his subjects like a sheep, has satisfaction only once and never for a second time. हन्यात oppress to death, kill एका तृप्ति. one gratification, *viz.*, when killed. ४ A king wishing to get fruit (revenue) from the subjects should protect them with great efforts by giving them gifts and honor, as a gardener who wishes to get fruit from the shoots of trees should tend them by giving them manure, water and prunning them with great exertions. Here a king is compared to a gardener. यत्नमास्थितः standing on efforts, making efforts. ५ A king, like a lamp, though he takes revenue from the subjects as the lamp does oil, is never observed to do so by reason of his bright intrinsic merits, as the lamp attracting oil by the wicks (गुणः) is not seen to do so as it does imperceptibly. शुभ्र white, unsullied.

यथा गौर्दुह्यते काले पाल्यते च तथा प्रजाः ।
सिच्यते चीयते चैव लता पुष्पफलप्रदा ॥ २२२ ॥
यथा बीजाङ्कुरः सूक्ष्मः प्रयत्नेनाभिरक्षितः ।
फलप्रदो भवेत्काले तद्वल्लोकः सुरक्षितः ॥ २२३ ॥
हिरण्यधान्यरत्नानि यानानि विविधानि च ।
तथान्यदपि यत्किंचित्प्रजाभ्यः स्यान्महीपतेः ॥ २२४ ॥
लोकानुग्रहकर्तारः प्रवर्धन्ते नरेश्वराः ।
लोकानां सक्षयाच्चैव क्षयं यान्ति न संशयः ॥ २२५ ॥

अथ तेषां तदाकर्ण्य भासुरक आह । अहो सत्यमभिहितं भवद्भिः परं यदि ममाप्युपविष्टस्यात्र नित्यमेव नैकः श्वापदः समागमिष्यति तन्नूनं सर्वानपि भक्षयिष्यामि । अथ ते तथैव प्रतिज्ञाय निर्वृतिभाजस्तत्रैव वने निर्भयाः पर्यटन्ति । एकश्च प्रतिदिनं क्रमेण याति । वृद्धो वा वैराग्ययुक्तो वा शोकग्रस्तो वा पुत्रकलत्रनाशभीतो वा तेषां मध्यात्तस्याहारार्थं मध्याह्न-

१ As a cow is milked and fed at the proper time, so are the subjects; a creeper which yields flowers and fruits is watered and gathered (fruits are gathered from it). The meaning is, that if the king wishes to derive revenue from the subjects, he must protect them, as a cow is fed and a creeper is watered. पुष्पं च फलं च पुष्पफलं ते प्रददाति इति. उप. २ As a seed-germ though small, when protected with efforts, yields fruit in time, so do subjects (give fruit in the shape of tribute) when well-protected. तद्वल्लोकः supply after it फलप्रदः भवेत. ३ Gold, corn and jewels and various kinds of vehicles and so also everything else is obtained by the king from the subjects. Supply स्यात or भवेत् after यत्किंचित्. ४ *The Lords of men* (kings) who show favour to the people, prosper, and there is no doubt that by the destruction of the people they (themselves) are destroyed. ५ Enjoying happiness. भाज (from भज 1 A.) has this sense, as a latter part of compounds. ६ तत्रैव = तस्मिन्नेव. ७ Free from fear. निर्गतं भयं येभ्यः ते निर्भयाः. ब. ८ Having absence of desire as regards the objects of this world. ९ Engrossed in grief. १० Afraid of the destruction of son and wife.

समय उपतिष्ठते । अथ कदाचिज्जातिक्रमा[1]च्छशकस्य वारः[2] समायातः । स समस्तमृगैः प्रेरितोऽनिच्छन्[3]नपि मन्दं मन्दं[4] गत्वा तस्य[5] वधोपायं चिन्तयन्वेलातिक्रमं[6] कृत्वा व्याकुलितहृदयो यावद्गच्छति तावन्मार्गे गच्छता कूपः संदृष्टः । यावत्कूपोपरि[7] याति तावत्कूपमध्य आत्मनः प्रतिबिम्बं[8] ददर्श । तेन हृदये चिन्तितं यद्भव्य[9] उपायोऽस्ति । अहं भासुरकं प्रकोप्य[10] स्वबुद्ध्यास्मिन्कूपे पातयिष्यामि । अथासौ दिनशेषे[11] भासुरकसमीपं प्राप्तः । सिंहोऽपि वेलातिक्रमेण क्षुत्क्षामकण्ठः[12] कोपाविष्टः सृक्किणी[13] परिलेलिहद्व्यचिन्तयत् । अहो प्रातराहाराय[14] निःसत्त्वं[15] वनं मया कर्तव्यम् । एवं चिन्तयतस्तस्य[16] शशको मन्दं मन्दं गत्वा प्रणम्य तस्याग्रे स्थितः । अथ तं प्रज्वलितात्मा[17] भासुरको भर्त्सयन्नाह[18] । रे शशकाधम[19] एकं तावत्[20]त्वं लघुः प्राप्तोऽपरं वेलातिक्रमेण तदस्मादपराधा[21]त्त्वां निपात्य प्रातः सकलान्यपि मृगकुलान्यु[22]च्छेदयिष्यामि । अथ शशकः सविनयं प्रोवाच । स्वामिन्नापराधो मम न च सत्त्वानाम् । तच्छ्रूयतां कारणम् । सिंह आह । सत्वरं निवेदय यावद्दंष्ट्रान्तर्गतो[23] न भवतीति । शशक आह । समस्तमृगैरद्य स्वामिञ्जातिक्रमेण मम लघुतरस्य प्रस्तावं[24] विज्ञाय ततोऽहं पञ्चशशकैः[25] समं प्रेषितः । ततश्चाहमागच्छन्नन्तराले[26]

१ According to the order of the kinds of animals already fixed. २ Turn; time. ३ Though unwilling, against his will. ४ Slowly and slowly ५ Of the lion सिंहस्य. ६ Having transgressed the proper time of going there, *i. e.*, having gone late. ७ As soon as he went over to the mouth of the well. ८ Reflection, image. ९ Excellent; right. १० Having exicited the anger of (abs. of the caus. of कुप 4 P. with प्र). ११ At the conclusion or end of the day. ष. त. १२ With his throat parched with hunger. क्षुधा क्षामः कण्ठः यस्य. ब. १३ Licking the corners of the mouth. It is a sign of one's being very hungry. १४ For (my) food in the morning. १५ Void of all animals (सत्त्व). निर्गतानि सत्त्वानि यस्मात्. ब. १६ While he was thus thinking. (Gen. absolute construction). १७ With the soul inflamed or burning with anger. प्रज्वलितः आत्मा यस्य सः. ब. १८ Abusing, scolding. १९ The worst of hares २० Firstly and secondly, in the first place and in the second place. २१ For this fault. The ablative shows cause or reason. २२ The tribes or families of the beasts. २३ Before you are placed between my jaws. २४ Turn, time of. २५ I was sent with four hares *i.e.*, I was the fifth of those that were sent. २६ In the middle, on the way.

महता केनचिदपरेण सिंहेन विवरान्निर्गत्याभिहितः । रे क्व प्रस्थिता यूयम् । अभीष्टदेवतां स्मरत । ततो मयाभिहितम् । वयं स्वामिनो भासुरकस्य सिंहस्य सकाश आहारार्थं समयधर्मेण गच्छामः । ततस्तेनाभिहितम् । यद्येवं तर्हि मदीयमेतद्वनं मया सह समयधर्मेण सर्वैः श्वापदैर्वर्तितव्यम् । चौररूपी स भासुरकः । अथ यदि सोऽत्र राजा ततो विश्वासस्थाने चतुरः शशकानत्र धृत्वा तमाहूय द्रुततरमागच्छ येन द्वयोर्मध्याद्यः कश्चित्पराक्रमेण राजा भविष्यति स सर्वानेतान्भक्षयिष्यतीति । अतोऽहं तेनादिष्टः स्वामिसकाशमागतः । एतद्वेलाव्यतिक्रमकारणम् । तदत्र स्वामी प्रमाणम् । तच्छ्रुत्वा भासुरक आह । भद्र यद्येवं तर्हि सत्वरं दर्शय मे तं चौरसिंहं येनाहं मृगकोपं तस्योपरि क्षिप्त्वा स्वस्थो भवामि । उक्तं च ।

भूमिर्मित्रं हिरण्यं च विग्रहस्य फलत्रयम् ।
नास्त्येकमपि यद्येषां न तं कुर्यात्कथंचन ॥ २२६ ॥
यत्र न स्यात्फलं भूरि यत्र च स्यात्पराभवः ।
न तत्र मतिमान्युद्धं समुत्पाद्य समाचरेत् ॥ २२७ ॥

शशक आह । स्वामिन्सत्यमिदम् । स्वभूमिहेतोः परिभवाच्च युध्यन्ते क्षत्रियाः । परं स दुर्गाश्रयः । दुर्गान्निष्क्रम्य वयं तेन विष्कम्भिताः ।

---

१ Mine, belonging to me. २ Of a thievish disposition or nature. ३ Having kept here four of the hares as hostages. विश्वासस्थान lit. place of confidence, object of security. ४ Ordered, commanded. ५ That pretender lion, that imposter of a lion. ६ Having thrown, or directed the anger I entertain for the beasts against him. ७ The (acquisition of) land, friends and gold, these are the three fruits of waging war (with others): when there is not even one of these to be obtained, one should not declare hostility (with others). ८ A wise man should not create a quarrel and wage war, when the fruit to be obtained from it is not considerable, and where defeat is certain. समुत्पाद्य (abs. of the caus. of पद् with समुद्). ९ Warriors, brave persons. १० One whose place of residence or shelter, is a fortress. दुर्गः आश्रयः यस्य. ब. ११ Obstructed, stopped, P. P. of स्कंभ् 1 A. 5, 9. P. with वि.

ततो दुर्गगतो दुःसाध्यो भवति रिपुः । उक्तं च ।

न गजानां सहस्रेण न च लक्षेण वाजिनाम् ।
यत्कृत्यं सिध्यति राज्ञां दुर्गेणैकेन विग्रहे ॥ २२८ ॥

शतमेकोऽपि संधत्ते प्राकारस्थो धनुर्धरः ।
तस्माद्दुर्गं प्रशंसन्ति नीतिशास्त्रविचक्षणाः ॥ २२९ ॥

पुरा गुरोः समादेशाद्धिरण्यकशिपोर्भयात् ।
शक्रेण विहितं दुर्गं प्रभावाद्विश्वकर्मणः ॥ २३० ॥

तेनापि च वरो दत्तो यस्य दुर्गं स भूपतिः ॥
विजयी स्यात्ततो भूमौ दुर्गाणि स्युः सहस्रशः ॥ २३१ ॥

दंष्ट्राविरहितो नागो मदहीनो यथा गजः ।
सर्वेषां जायते वश्यो दुर्गहीनस्तथा नृपः ॥ २३२ ॥

तच्छ्रुत्वा भासुरक आह । भद्र दुर्गस्थमपि दर्शय तं चौरसिंहं येन व्यापादयामि । उक्तं च ।

जातमात्रं न यः शत्रुं रोगं च प्रशमं नयेत् ।
महाबलोऽपि तेनैव वृद्धिं प्राप्य स हन्यते ॥ २३३ ॥

१ Gone into a fort, residing in a fort. दुर्गं गतः or दुर्गे गतः. स. or द्वि. त. २ Difficult to be subdued or killed. ३ That thing which kings can accomplish in war by means of a fort alone, cannot be accomplished by a thousand elephants and by one hundred thousand horses. ४ Even a single archer is a match for a hundred when he is in a fort, therefore, those who are proficient in politics, praise a fort very highly. शतं-शतं धनुर्धरान्. नीति...णाः. स त. ५ Formerly Indra had a fort built by the power of Vis'vakarman (the builder of Gods) at the advice of his preceptor (Brihaspati) and through the fear of Hiranya-Kasipu (a demon killed by Vishnu in his fourth incarnation, viz., that of नृसिंह). ६ He (Indra) also gave a boon to the effect that the king, who has a fort, will be victorious : therefore, there are forts on the earth by thousands. Here स्युः = संति. ७ As a cobra without fangs and an elephant without intoxication, are subdued, so is a king without a fort conquered by all. ८ He, who does not extinguish an enemy and a disease as soon as they are born or produced, will, though very powerful, be killed by that enemy or that disease, when he or it grows strong. महाबल = महद्बलं यस्य सः. ब.

तथा च । [1]उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता ।
समौ हि शिष्टैराम्नातौ वर्त्स्यन्तावामयः स च ॥ २३४ ॥
अपि च । [2]उपेक्षितः क्षीणबलोपि शत्रुः
प्रमाददोषात्पुरुषैर्मदान्धैः ।
साध्योपि भूत्वा प्रथमं ततोसा-
वसाध्यतां व्याधिरिव प्रयाति ॥ २३५ ॥
तथा च । [3]आत्मनः शक्तिमुद्वीक्ष्य मानोत्साहं च यो व्रजेत् ।
शत्रून्हन्ति स एकोपि क्षत्रियान्भार्गवो यथा ॥ २३६ ॥

शशक आह । [4]अस्त्येतत्तथापि तस्य सामर्थ्यमविदित्वा न युज्यते गन्तुम् । उक्तं च ।

[5]अविदित्वात्मनः शक्तिं परस्य च समुत्सुकः ।
गच्छन्नभिमुखो याति नाशं वह्नौ पतङ्गवत् ॥ २३७ ॥
[6]यो बलात्प्रोन्नतं याति निहन्तुं सबलोप्यरिः ।
विमदः स निवर्तेन शीर्णदन्तो गजो यथा ॥ २३८ ॥

१ A rising enemy should never be neglected by him who wishes his own welfare; for he (the enemy) and a disease when about to increase, are said to be equal by *those whose opinion carries weight* (शिष्टः) आम्नात P. P. of म्ना with आ. वर्त्स्यन्तौ Future P. of वृत् which is optionally Paras. and takes no इ. २ An enemy though weak and thus likely to be subdued in the beginning, becomes afterwards hard to overcome, like a disease, when he is neglected by men blinded with pride through the fault of carelessness or indifference. क्षीणबल. ब., प्रमाददोष-प्रमाद एव दोषः. क. मदेन अंधाः, तृ. त. ३ He who will go to battle after rightly estimating his own strength and energy produced by self-reliance, will, though alone, kill his enemies, as *Bhârgava* (the descendant of the sage भृगु and the seventh incarnation of Vishnu) destroyed the Kshatriyas. ४ This is so, that is, what you say is just so still, &c. ५ He, who without knowing his own strength and also that of the enemy, *faces him with eagerness* समुत्सुकः अभिमुखो गच्छन्), meets with destruction, as a moth does in fire. ६ That enemy, though powerful, who goes forward to kill one who is elated with strength, will come back divested of his pride like an elephant who has his tusks broken in fight.

भासुरक आह । यद्यप्येवं तथापि त्वं दर्शय तं चौरसिंहं यथा व्यापादयामि । शशक आह । यद्येवं तदागच्छतु स्वामी । एवमुक्त्वाग्रे व्यवस्थितः । ततश्च तेनागच्छता यः कूपो दृष्टोभूत्तमेव कूपमासाद्य भासुरकमाह । स्वामिन्कस्ते प्रतापं सोढुं समर्थः । त्वां दृष्ट्वा दूरतोपि चौरसिंहः प्रविष्टः स्वं दुर्गम् । तदागच्छ यथा दर्शयामीति । भासुरक आह । दर्शय मे दुर्गम् । तदनु दर्शितस्तेन कूपः । ततः सोपि मूर्खः सिंहः कूपमध्य आत्मप्रतिबिम्बं जलमध्यगतं दृष्ट्वा सिंहनादं मुमोच । ततः प्रतिशब्देन कूपमध्याद्द्विगुणतरो नादः समुत्थितः । अथ तेन तं शत्रुं मत्वात्मानं तस्योपरि प्रक्षिप्य प्राणाः परित्यक्ताः । शशकोपि हृष्टमनाः सर्वमृगानानन्द्य तैः सह प्रशस्यमानो यथासुखं तत्र वने निवसति स्म ।

अतोहं ब्रवीमि यस्य बुद्धिर्बलं तस्येति ।

तद्यदि भवान्कथयति तत्तत्रैव गत्वा तयोः स्वबुद्धिप्रभावेण मैत्रीभेदं करोमि । करटक आह । भद्र यद्येवं तर्हि गच्छ । शिवास्ते पन्थानः सन्तु । यथाभिप्रेतमनुष्ठीयताम् । अथ दमनकः संजीवकवियुक्तं पिङ्गलकमवलोक्य तत्रान्तरे प्रणम्याग्रे समुपविष्टः । पिङ्गलकोपि तमाह । भोः कस्माच्चिराद्दृश्यसे । दमनक आह । न किंचिद्देवपादानामस्माभिः प्रयोजनं तेन नागच्छामः । तथापि राजप्रयोजनविनाशमवलोक्य संदह्यमानहृदयो व्याकुलतया स्वयमेवाभ्यागतो वक्तुम् । उक्तं च ।

१ So that, in order that. २ Lord, your majesty. ३ Went forward, proceeded forward. ४ Who is able to endure your might? ५ Thereupon. ६ Fallen into water. ७ Roared (lit. uttered a lion's roar). ८ Echo, reverberation. ९ Roar twice as loud as that made by the lion. १० Arose. ११ Throwing himself upon him. १२ Having pleased or gladdened (abs. of नन्द् with आ). १३ Being extolled by them. Pre. P. ... with प्र 1 P. १४ As it pleased him, at his pleasure. ... ach of friendship. १६ Do as you like; please your- ... eparated from Sanjîvaka. तृ. त. १८ In that interval, ... ng which the bull was absent. तस्मिन्नन्तरे. १९ Your ... (lit. your majesty's feet) has no need of us. २० For that reason. २१ The destruction or ruin of the king's interest. २२ Burning (with grief) at heart. संदह्यमानं हृदयं यस्य. ब. २३ Of myself, of my own accord.

¹शुभं वा यदि वा पापं द्वेष्यं वा यदि वा प्रियम्।
अपृष्टस्तस्य तद्ब्रूयाद्यस्य नेच्छेत्पराभवम् ॥ २३९ ॥

अथ तस्य साभिप्रायं वचनमाकर्ण्य पिङ्गलक आह । किं वक्तुमना भवान् । तत्कथ्यतां यत्कथनीयमस्ति । स प्राह । देव संजीवको युष्मत्पादानामुपरि द्रोहबुद्धिरिति । विश्वासगतस्य मम विजने इदमाह । दमनक दृष्टास्य पिङ्गलकस्य सारासारता । तदहमेनं हत्वा सकलमपि मृगाधिपत्यं त्वत्साचिव्यसमन्वितं करिष्यामि । पिङ्गलकोपि तद्वज्रसारप्रहारसदृशं दारुणं तद्वचः समाकर्ण्य मोहमुपगतो न किंचिदूचे । स दमनकोपि तस्य तमाकारमालोक्य चिन्तितवान् । अयं तावत्संजीवकनिबद्धरागस्तन्नूनमनेन मन्त्रिणा राजा विनाशमवाप्स्यतीति । उक्तं च ।

ऐकं भूमिपतिः करोति सचिवं राज्ये प्रमाणं यदा
तं मोहाच्छ्रयते मदः स च मदाद्दास्येन निर्विद्यते ।
निर्विण्णस्य पदं करोति हृदये तस्य स्वतन्त्रस्पृहा
स्वातन्त्र्यान्नृपतेः स राज्यमथवा प्राणानपि च्यावयेत् ॥ २४० ॥

---

१ Even when not asked, one should say that to him whose defeat he does not wish, whether it be good or evil, or whether hateful or pleasing. तस्य ब्रूयात्=तस्मै ब्रू. Gen. for Dat. २ Full of some motive, underlying some purpose. अभिप्रायेण सह.ब. ३ Sanjivaka entertains evil designs against your majesty. द्रोहबुद्धि-द्रोहाय बुद्धिर्यस्य. ब. ४ In private, in secret. ५ Strength (सारता) and weakness (असारता) or strong and weak points. ६ The sovereignty over all the beasts. ७ Furnished or accompanied with your ministership. त्वत्सा... तं=तव साचिव्येन समन्वितं. तृ. त. The meaning is I shall be the lord of the forest, and make you my chief minister of state. ८ Resembling the strokes of adamant.तृ. त.९ Fainted, swooned. १० Form, appearance. ११ One whose attachment is fixed on Sanjivaka. संजीवके निबद्धः रागः यस्य ब. १२ With this as minister, with such a minister as this १३ When a king makes any minister as the sole authority in the kingdom, pride takes possession of him (minister) through ...tuation, and through pride he becomes disgusted with ...itude; when dissatisfied, a desire for independence ...es in his mind and through independence (with the desire of getting independence) he will deprive the king of his kingdom or even his life. हृदये पदं करोति makes a footing in the mind. स्व...हा-स्वतंत्रा स्पृहा. क. च्यावयेत् Pot. of the caus. of च्यु 1 A.

किमत्र युक्तमिति । पिङ्गलकोपि चेतनां समासाद्य कथमपि तमाह ।
दमनक संजीवकस्तावत्प्राणसमो भृत्यः स कथं ममोपरि द्रोहबुद्धिं करोति ।
दमनक आह । देव भृत्योभृत्य इत्यनैकान्तिकमेतत् । उक्तं च ।

न सोस्ति पुरुषो राज्ञां यो न कामयते श्रियम् ।
अशक्ता एव सर्वत्र नरेंद्रं पर्युपासते ॥ २४१ ॥

पिङ्गलक आह । भद्र तथापि मम तस्योपरि चित्तवृत्तिर्न विकृतिं याति ।
अथवा साध्विदमुच्यते ।

अनेकदोषदुष्टोपि कायः कस्य न वल्लभः ।
कुर्वन्नपि व्यलीकानि यः प्रियः प्रिय एव सः ॥ २४२ ॥

दमनक आह । अत एवायं दोषः । उक्तं च ।

यस्मिन्नेवाधिकं चक्षुरारोपयति पार्थिवः ।
अकुलीनः कुलीनो वा स श्रियो भाजनं नरः ॥ २४३ ॥

अपरं केन गुणविशेषेण स्वामी संजीवकं निर्गुणकमपि निकटे धारयति ।

---

१ Having recovered consciousness. २ Any how, with great difficulty. ३ As to Sanjivaka, he is a servant as dear to me as life itself. ४ The fact of his, being a servant or non-servant, is not the question at issue, is not the point under discussion. एकान्तिक adj. conclusive and so अनैकान्तिक non conclusive; proving nothing. ५ There is no man who does not desire wealth from kings; the weak alone wait upon a king everywhere. The words राज्ञां श्रियं should be construed together. ६ My feelings (चित्तवृत्तिः) towards him will undergo no change. ७ To whom is not the body though spoiled by various defects dear? He who is dear to one is ever so, though he commit faults or wrongs. अनेक...दुष्टः तु. त. ८ For this very reason it is a fault; this state of your feelings towards him is the cause of his evil intentions towards you. ९ That man, whether low-born or nobly-born, for whom the king shows special regard, becomes the receptacle of wealth or prosperity. अधिकं चक्षुरारोपयति—pays more attention. भाजनं a pot. १० For what special merit or quality? गुणानां विशेषः. ष. त. ११ Though destitute of merits or virtues— न सन्ति गुणाः यस्य स. ब. १२ Holds near, keeps near.

अथ यद्येवं चिन्तयसि महाकायोयमनेन रिपून्व्यापादयिष्यामि तदस्मान्न सिध्यति यतोयं शष्पभोजी देवपादानां शत्रवो मांसाशिनः । तद्रिपुसाधनमस्य साहाय्येन न भवति । तस्मादेनं दूषयित्वा हन्यतामिति । पिङ्गलक आह ।

"उक्तो भवति यः पूर्वं गुणवानिति संसदि ।
तस्य दोषो न वक्तव्यः प्रतिज्ञाभङ्गभीरुणा ॥ २४४ ॥

अन्यच्च । मयास्य तव वचनेनाभयप्रदानं दत्तम् । तत्कथं स्वयमेव व्यापादयामि । सर्वथा संजीवकोयं सुहृदस्माकं न तं प्रति कश्चिन्मन्युरिति । उक्तं च ।

इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम् ।
विषवृक्षोपि संवर्ध्य स्वयं छेत्तुमसांप्रतम् ॥ २४५ ॥

आदौ न वा प्रणयिनां प्रणयो विधेयो दत्तोथवा प्रतिदिनं परिपोषणीयः ।
उत्क्षिप्य यत्क्षिपति तत्प्रकरोति लज्जां भूमौ स्थितस्य पतनाद्भयमेव नास्ति ॥

---

१ If you think, "he is large-bodied, I shall kill my enemies at his hands," that too will not be accomplished through him, since he is a grass-eater, while your majesty's enemies are flesh-eaters. २ Subjugation, conquest. ३ Having accused of crime. (abs. of the caus. of दुष् 4 P.) ४ One would expect जहि here, or अयं in place of एनं. It should, therefore, be either तस्मात्स दूषयित्वा हन्यताम् or तस्मादेनं दूषयित्वा जहि. ५ One who is afraid of violating his promise, should not mention the fault of him whom he has once said to be meritorious in an assembly, *i. e.*, publicly. प्रतिज्ञा...णा. पं. त. प्रतिज्ञाभंगात् भीरुणा. ६ अस्य = अस्मै. ७ At your advice or recommendation. ८ I have no ill-feeling of any kind against him. ९ That demon has derived his glory *from this* (from me) and so he does not deserve to have his destruction from here (me); it is not proper for one to cut down even the tree of poison which one has reared with one's own hands. The construction of line 2 should be explained by saying that संवर्ध्य is the absolutive of the passive of वृध् with सम्. छेत्तुमसांप्रतम् = न छेत्तव्यः. १० In the first place no love at all should be shown to friends, but when once shown (दत्तः), it should be increased every day; that a thing should be first elevated and then thrown down, produces shame, for one who is already *on the ground* (low) has no fear of a fall. क्षिपति has for the subject कार्यकर्तृ.

[1]उपकारिषु यः साधुः साधुत्वे तस्य को गुणः ।
अपकारिषु यः साधुः स साधुः सद्भिरुच्यते ॥ २४७ ॥

[2]तद्द्रोहबुद्धेरपि मयास्य विरुद्धं नाचरणीयम् । दमनक आह । स्वामि-न्नैष धर्मो यद्द्रोहबुद्धेरपि[3] क्षम्यते । उक्तं च ।

[4]तुल्यार्थं तुल्यसामर्थ्यं मर्मज्ञं व्यवसायिनम् ।
अर्धराज्यहरं भृत्यं यो न हन्यात्स हन्यते ॥ २४८ ॥

अपरं त्वयास्य सखित्वात्सर्वोपि राजधर्मः परित्यक्तो राजधर्माभावात्स-र्वोपि परिजनो विरक्तिं गतो यतः संजीवकः शष्पभोजी भवान्मांसादस्तव प्रकृतयश्च । यत्तवावध्यव्यवसायवाह्यं कुतस्तासां मांसाशनम् । यद्रहिता-स्तास्त्वां त्यक्त्वा यास्यन्ति । ततोपि त्वं विनष्ट एव। अस्य संगत्या पुनस्ते न कदाचिदाखेटके मतिर्भविष्यति । उक्तं च ।

१ What credit is to be given to the goodness of him who is good to those who have conferred obligations on him; he is said to be really a साधु (saint) by the good, who is really so (good) towards those who have injured him. २ I shall not or cannot act against him even thuogh he conspire against my life. ३ Forgiveness is shown to one who is ill-disposed towards you. ४ He, who does not kill a servant whose wealth is equal, whose strength is equal (to his own), who knows the weak points, who is industrious and who deprives him of half his kingdom, is killed by him in his turn. तुल्यार्थ and तुल्यसामर्थ्य are ब. and मर्मज्ञ and अर्धराज्यहर. उप. ५ In conseqnence of your friendship for him. ६ By reason of your not discharging your duties as a king. ७ Flesh-eater. मांसं अत्तीति मांसादः. ८ Here construe यत् (मांसाशनं) तवा वध्यव्यवसायवाह्यं तत् तासां (प्रकृतीनां) कुतः. Whence can those subjects get flesh to eat, since it is foreign or contrary to your *determination of not killing* (अवध्यव्यवसाय) that is, since you are resolved upon not killing any beasts; how can the subjects eat flesh? ९ येन मांसाशनेन रहिताः—when they have no flesh to eat. १० In that case also. ११ Will never have any inclination for hunting or chase.

यादृशैः सेव्यते मर्त्यो यादृशांश्चैव सेवते।
कदाचिन्नात्र संदेहस्तत्तादृग्भवति पूरुषः॥ २४९॥

तथा च। [२]संतप्तायसि संस्थितस्य पयसो नामापि न ज्ञायते
मुक्ताकारतया तदेव नलिनीपत्रस्थितं राजते।
स्वातौ सागरशुक्तिसंपुटगतं तज्जायते मौक्तिकं
प्रायेणाधममध्यमोत्तमगुणः संवासतो जायते॥ २५०॥

तथा च। [३]असतां सङ्गदोषेण साधवो यान्ति विक्रियाम्।
दुर्योधनप्रसङ्गेन भीष्मो गोहरणे गतः॥ २५१॥

अत एव सन्तो नीचसङ्गं वर्जयन्ति। उक्तं च।
[४]न ह्यविज्ञातशीलस्य प्रदातव्यः परिश्रयः।
मत्कुणस्य च दोषेण हता मन्दविसर्पिणी॥ २५२॥

पिङ्गलक आह। कथमेतत्। सोऽब्रवीत्।

---

१ There is no doubt that a man becomes exactly like those by whom he is served, and those whom he serves. After यादृशैः and यादृशान् understand नरैः and नरान्. २ Even the name of the water that falls on heated iron is not known, or is not left; that very water, when it stands on the leaf of a lotus, shines with the lustre of pearls; when under the *Svàti Nakshatra* it falls into the cavities of sea-shells, it is turned into pearls; generally the quality of being low, middling and best is acquired from association. नामापि may also mean even a trace &c. In Bhartrihari's Nitis̒ataka from which this verse is taken, the reading for the third line is rather different. स्वात्यां सागरशुक्तिमध्यपतितं सन्मौक्तिकं जायते. अधम...गुणः—अधमश्च, मध्यमश्च, उत्तमश्चासौ गुणः. क. ३ As a consequence of the fault of associating with the wicked, the good undergo change of disposition, *Bhishma* went with the party sent for stealing the cows (of Viráta) by associating with Duryodhana संगदोष=क. दुर्योधनेन प्रसंगः ष. ४ No shelter should be given to him whose disposition is not known; a louse called मंदविसर्पिणी was killed for the fault of a bug. अवि...शील. ब.

॥ कथा ९ ॥

अस्ति कस्यचिन्महीपतेर्मनोरमं शयनस्थानम् । तत्र श्वेततरपटयुगलमध्यसंस्थिता मन्दविसर्पिणी यूका प्रतिवसति स्म । सा च तस्य महीपते रक्तमास्वादयन्ती सुखेन कालं नयमाना तिष्ठति । अन्येद्युश्च तत्र शयने क्वचिद्भ्राम्यन्नग्निमुखो नाम मत्कुणः समायातः । अथ तं दृष्ट्वा सा विषण्णवदना प्रोवाच । भो अग्निमुख कुतस्त्वमत्रानुचितस्थाने समायातः । तद्यावन्न कश्चिद्वेत्ति तावच्छीघ्रं गम्यतामिति । स आह । भगवति गृहागतस्यासाधोरपि नैतद्युज्यते वक्तुम् । उक्तं च ।

एह्यागच्छ समाश्वसासनमिदं कस्माच्चिराद्दृश्यसे
का वार्ता अतिदुर्बलोसि कुशलं प्रीतास्मि ते दर्शनात् ।
एवं नीचजनेपि युज्यति गृहं प्राप्ते सतां सर्वदा
धर्मोयं गृहमेधिनां निगदितः स्मार्तैर्लघुः स्वर्गदः ॥ २५३ ॥

अपरं मयानेकमानुषाणामनेकविधानि रुधिराण्यास्वादितान्याहारदोषात्कटुतिक्तकषायाम्लरसास्वादानि न च कदाचिन्मधुररक्तं समास्वादितम् ।

१ Pleasing the mind, charming. २ Whiter. Here तर has no propriety since it is not said to be whiter than any thing. ३ A louse. ४ Continued to pass her time &c. ५ In that bed तत्र=तस्मिन् ६ Before any one knows or finds you out. ७ Even to a man who is wicked. ८ Come take heart, here is a seat, why do you come after a long time, what is the news, you are very feeble, is it well with you, I am pleased at seeing you; this mode of reception is always fit to be accorded even to a low person when he goes to the house of the good; this is recorded as the duty of householders by those why are versed in traditional law, and though trifling, it secures heaven (for the doer). समाश्वस for समाश्वसिहि. The root is here used in the 1st conjugation. After कुशलं supply अस्ति किम् or अपि before it. युज्यति is used for युज्यते. स्वर्गदः—स्वर्गं ददातीति. ९ Having the taste of bitter, pungent, astringent and sour juices. कटुतिक्त...म्लरसानां आस्वादो येषां तानि (रुधिराणि). ब.

तद्यदि त्वं प्रसादं करोषि तदस्य नृपतेर्विविधव्यञ्जनान्नपानचोष्यलेह्यस्वाद्वाहारवशादस्य शरीरे यन्मिष्टं रक्तं संजातं तदास्वादनेन सौख्यं संपादयामि जिह्वाया इति । उक्तं च ।

रङ्कस्य नृपतेर्वापि जिह्वासौख्यं समं स्मृतम् ।
तन्मात्रं च स्मृतं सारं तदर्थं यतते जनः ॥ २५४ ॥
यद्येव न भवेल्लोके कर्म जिह्वाप्रतुष्टिदम् ।
तन्न भृत्यो भवेत्कश्चित्कस्यचिद्वशगोथवा ॥ २५५ ॥
यदसत्यं वदेन्मर्त्यो यद्वासेव्यं च सेवते ।
यद्गच्छति विदेशं च तत्सर्वमुदरार्थतः ॥ २५६ ॥

तन्मया गृहागतेन बुभुक्षया पीड्यमानेनापि त्वत्सकाशाद्भोजनं लभ्यम् । तन्न त्वयैकाकिन्यास्य भूपते रक्तभोजनं कर्तुं युज्यते । तच्छ्रुत्वा मन्दविसर्पिण्याह । भो मत्कुण अस्य नृपतेर्निद्रावशं गतस्याहं रक्तमास्वादयामि पुनस्त्वमग्निमुखश्चपलश्च । तद्यदि मया सह रक्तपानं करोषि तत्तिष्ठ । अभीप्सितरं रक्तमास्वादय । सोब्रवीत् । भगवति एवं करिष्यामि । यावत्त्वं नास्वादयसि प्रथमं नृपरक्तं तावन्मम देवगुरुकृतः शपथः स्याद्यदि तदास्वादयामि ।

१ If you do me favour, or show me favour. २ On account of his tasting sweet food, drink, things to be sucked and things to be licked, and full of condiments (व्यंजन) of various kinds. विविधव्यंजन is a Bahu. compound qualifying अन्न, पान &c. विविधव्यंजन...लेह्यैः स्वादु. तृ. त. and स्वादु आहार, क. ३ Sweet, savoury. ४ Obtain, get. ५ The pleasure of the tongue in the case of a beggar and also in that of a king, is said to be equal; that much alone is the essence of eating and people strive for obtaining that alone. ६ If there be no such thing in the world as gratifies the tongue, no one will be anybody's servant or under the control of any one. जिह्वायाः प्रतुष्टिः=जिह्वाप्रतुष्टिः तां ददातीति. उप. ७ That a man speaks untruth, serves him who is not fit to be served and goes to a foreign country, is all for the sake of the belly. ८ Desire to eat and hence hunger. (Desid. noun from भुज् 1 A.) ९ Meals consisting of blood. १० When under the power of sleep; when asleep. ११ You, however, are fire-mouthed or hot-mouthed and very hasty or uncontrolled (and may thus awaken the king by your sharp bite). १२ More blood than you desire to drink. अभीप्सितं रक्तं. क. १३ I swear to you by my god and preceptor that I shall not taste the king's blood before you have first done it yourself.

एवं तयोः परपस्परं वदतोः स राजा तच्छयनमासाद्य प्रसुप्तः[१] ।
अथासौ मत्कुणो जिह्वालौल्योत्कृष्टौत्सुक्याज्जाग्रतमपि[२] तं महीपतिमदशत् ।
अथवा साध्विदमुच्यते ।

स्वभावो नोपदेशेन शक्यते कर्तुमन्यथा ।
सुतप्तमपि पानीयं पुनर्गच्छति शीतताम् ॥ २५७ ॥[३]
यदि स्याच्छीतलो वह्निः शीतांशुर्दहनात्मकः ।
न स्वभावोऽत्र मर्त्यानां शक्यते कर्तुमन्यथा ॥ २५८ ॥[४]

अथासौ महीपतिः सूच्यग्रविद्ध[५] इव तच्छयनं त्यक्त्वा तत्क्षणादेवोत्थितः । अहो ज्ञायतामत्र प्रच्छादनपटे[६] मत्कुणो यूका वा नूनं तिष्ठति येनाहं दष्ट इति । अथ ये कञ्चुकिनस्तत्र स्थितास्ते सत्वरं प्रच्छादनपटं गृहीत्वा सूक्ष्मदृष्ट्या[७] वीक्षांचक्रुः[८] । अत्रान्तरे[९] स मत्कुणश्चापल्यात्खट्वान्तं[१०] प्रविष्टः । सा मन्दविसर्पिण्यपि वस्त्रसंध्यन्तर्गता[११] तैर्दृष्टा व्यापादिता च ।

अतोऽहं ब्रवीमि न ह्यविज्ञातशीलस्येति ।

एवं ज्ञात्वा त्वयैष वध्यः । नो चेत्त्वां व्यापादयिष्यति । उक्तं च

[१२]त्यक्ताश्चाभ्यन्तरा येन बाह्याश्चाभ्यन्तरीकृताः
स एव मृत्युमाप्नोति यथा राजा ककुद्द्रुमः ॥ २५९ ॥

पिङ्गलक आह । कथमेतत् । सोऽब्रवीत् ।

---

१ Through eagerness urged on by the greediness o tongue. जिह्वालौल्योत्कृष्ट. तृ. त. जिह्वालौल्योत्कृष्टं औत्सुक्यं. क. २ Even while he was awake. ३ It is not possible to change (do otherwise) one's disposition by means of advice; water though well-heated becomes cool again. ४ Even if fire be cool and the moon burning hot, still the disposition of men cannot be changed, that is, it may perhaps be possible for the fire to be &c. but not possible for the disposition to be altered. शीतांशुः–शीताः अंशवः यस्य. ब. ५ As if pricked with the point of a needle. ६ In the cloth used for covering; in the coverlet. ७ With a minute search. ८ Examined. विलोकयांचक्रुः. The root ईक्ष् is generally conjugated in the Atmanepada. ९ Meanwhile. अस्मिन्नन्तरे. १० Entered a crevice in the cot. ११ Lying concealed at the joining of two pieces of garments. १२ He who has left off intimate friends and has made friends of strangers, will surely meet with death, as did the king ककुद्द्रुम (in the following story).

॥ कथा १० ॥

अस्ति कस्मिंश्चिद्वनोद्देशे चण्डरवो नाम शृगालः । स कदाचित्क्षुधाविष्टो जिह्वालौल्यान्नगरमध्ये प्रविष्टः । अथ तं सारमेया विलोक्य सर्वतः शब्दायमानाः परिधाव्य तीक्ष्णदन्तैर्भक्षयितुमारब्धाः । सोपि तैर्भक्ष्यमाणः प्राणभयात्प्रत्यासन्नरजकगृहं प्रविष्टः । तत्र नीलीरसपरिपूर्णमहाभाण्डमासीत् । तत्र सारमेयैराक्रान्तो भाण्डमध्ये पतितः । अथ यावन्निष्क्रान्तस्तावन्नीलीवर्णः संजातः । तत्रापरे सारमेयास्तं शृगालमजानन्तो यथाभीष्टदिशं जग्मुः । चण्डरवोपि दूरतरं प्रदेशमासाद्य काननाभिमुखं प्रतस्थे । न च नीलवर्णेन कदाचिन्निजरङ्गस्त्यज्यते । उक्तं च ।

वज्रलेपस्य मूर्खस्य नारीणां कर्कटस्य च ।
एको ग्रहस्तु मीनानां नीलीमद्यपयोर्यथा ॥ २६० ॥

अथ तं हरगलगरलतमालसमप्रभमपूर्वं सत्त्वमवलोक्य सर्वे सिंहव्याघ्रद्वीपिवृकप्रभृतयोरण्यनिवासिनो भयव्याकुलितचित्ताः सम-

---

१ When he was once overtaken by hunger. २ Dogs. सारमेय = सरमायाः अपत्यं पुमान्. Saramá was the bitch of gods and सारमेय is, therefore, a patronymic from सरमा. ३ Making a noise, that is barking. ४ With their pointed teeth. ५ To tear, to devour. ६ Into the house of a washerman that was at hand. प्रत्यासन्नं च तत् रजकगृहं. क. ७ The juice of the Indigo plant. ८ Seized or caught. ९ Of the colour of indigo. नील्या वर्ण इव वर्णः यस्य सः. ब. १० Not knowing him to be a jackal. ११ Its own colour was not abandoned; it was not removed. १२ One is the grasp (or final is the grasp) of वज्रलेप, of a fool, of women, of a crab, of fishes and also of the colour indigo and of a drunkard, that is, when these have once clung fast to any thing, they do not leave it. वज्रलेप is a kind of cement prepared with diamond and other things. नीली च मद्यपश्च=नीलीमद्यपौ तयोः नीलीमद्यपयोः. १३ Resembling in colour the Tamála tree which is as dark as the poison in the neck of हर (S'iva) हरगलगरलतमाल. क. हरगलगरलं इव तमालः तेन समा प्रभा यस्य सः. तै. ब. १४ द्वीपिन् A panther.

स्मात्पलायनक्रियां कुर्वन्ति कथयन्ति च । न ज्ञायतेस्य कीदृग्विचेष्टितं पौरुषं च । तद्दूरतरं गच्छामः । उक्तं च ।

नै यस्य चेष्टितं विद्यान्न कुलं न पराक्रमम् ।
न तस्य विश्वसेत्प्राज्ञो यदीच्छेच्छ्रियमात्मनः ॥ २६१ ॥

चण्डरवोपि भयव्याकुलितान्विज्ञायेदमाह । भो भोः श्वापदाः किं यूयं मां दृष्ट्वैव संत्रस्ता व्रजथ । तन्न भेतव्यम् । अहं ब्रह्मणाद्य स्वयमेव सृष्ट्वाभिहितः । यच्छ्वापदानां कश्चिद्राजा नास्ति तत्त्वं मयाद्य सर्वश्वापदप्रभुत्वेभिषिक्तस्ततो गत्वा तान्सर्वान्परिपालयेति । ततोहमत्रागतः । तन्मम च्छत्रच्छायायां सर्वैरपि श्वापदैर्वर्तितव्यम् । अहं ककुद्रुमो नाम राजा त्रैलोक्येपि संजातः । तच्छ्रुत्वा सिंहव्याघ्रपुरःसराः श्वापदाः स्वामिन्प्रभो समादिशेति वदन्तस्तं परिवव्रुः । अथ तेन सिंहस्यामात्यपदवी प्रदत्ता व्याघ्रस्य शय्यापालकत्वं द्वीपिनस्ताम्बूलाधिकारो वृकस्य द्वारपालकत्वम् । ये चात्मीयाः शृगालास्तैः सहालापमात्रमपि न करोति । शृगालाः सर्वेपि निःसारिताः । एवं तस्य राज्यक्रियायां वर्तमानस्य सिंहादयो मृगान्व्यापाद्य तत्पुरतः प्रक्षिपन्ति । सोपि प्रभुधर्मेण सर्वेषां तान्प्रविभज्य प्रयच्छति । एवं गच्छति काले कदाचिद्दूरदेशे शब्दायमानाः शृगाला आकर्णिताः ।

---

१ Say among themselves. २ Action. ३ If a wise man wishes for prosperity he should not put faith in him whose actions, family and exploits he does not know. विश्वसेत्=विश्वस्यात्. ४ Knowing (them) to be overcome with fright. ५ Only by seeing me, only at my sight. ६ Being created. Here सृष्ट्वा has a passive force. ७ Have been crowned as the sovereign of all beasts. ८ Under the shade of my umbrella as king that is, under my protection as your king. ९ With the lion and tiger as the foremost. सिंहव्याघ्रौ पुरःसरौ येषां ते (श्वापदाः). १० Oh lord, oh liege. व. ११ Surrounded him. Perf. of वृ with परि. १२ The dignity or post of minister. १३ The office of looking after the bed. १४ The office of carrying the betel-nutbox. १५ The office of door-keeper. १६ His own caste-animals. १७ While he was thus carrying on the duties of a king. १८ As is the duty of a lord. १९ Has connection with प्रयच्छति. २० Howling. Pre. P. of शब्दाय् denom. from शब्द.

तेषां शब्दं श्रुत्वा पुलकिततनु[1]रानन्दाश्रुपूर्णनयन[2]स्तारस्वरेण[3] विरोतु[4]मारब्धः । अथ ते सिंहादयस्तं तारस्वरमाकर्ण्य शृगालोयमिति मत्वा लज्जयाधोमुखाः[5] क्षणं स्थित्वा प्रोचुः । भो वाहिता[6] अनेन वयम् । क्षुद्रशृगालोयम् । तद्वध्यतामिति । सोपि तदाकर्ण्य पलायितुमिच्छंस्तत्र[7] स्थान एव सिंहादिभिः खण्डशःकृतो[8] मृतश्च ॥

अतोहं ब्रवीमि त्यक्ताश्चाभ्यन्तरा येनेति ।

तदाकर्ण्य पिङ्गलक आह । भो दमनक कः प्रत्ययोत्र[9] विषये यतः स ममोपरि दुष्टबुद्धिः । स आह । यद[10]द्य ममाग्रे तेन निश्चयः कृतो यत्प्रभाते पिङ्गलकं वधिष्यामि[11] तदत्रैव[12] प्रत्ययः । प्रभातेवसरवेलाया[13]मारक्तनयन[14]ः स्फुरिताधरो[15] दिशोवलोकयन्ननुचितस्थानोपविष्ट[16]स्त्वां क्रूरदृष्ट्या[17]वलोकयिष्यति । तदेवं ज्ञात्वा यदुचितं तत्कर्तव्यमिति कथयित्वा संजीवकसकाशं गतः । तं प्रणम्योपविष्टः । संजीवकोपि सोद्वेगाकारं[18] मन्दगत्या समायान्तं तमुद्वीक्ष्य सादरतरमुवाच । भो मित्र स्वागतम्[19] । चिराद्दृष्टोसि । अपि[20] शिवं भवतः । तत्कथय येनादेय[21]मपि तुभ्यं गृहायाताय प्रयच्छामि । उक्तं च ।

१ With the body covered with the hair standing on end through delight, आनंदेन पुलकिता तनुर्यस्य. ब. २ With the eyes filled with the tears of joy. आनंदाश्रुभिः पूर्णे नयने यस्य. ब. ३ In a shrill or loud tone. ४ To cry, to = howl. ५ With the heads hung down (through shame). अधः मुखानि येषां. ब. ६ We have been made to carry burdens by him, that is, we have been used as menials by him. P. P. of the caus. of वह् 1 P. ७ तस्मिन्स्थाने एव on the very spot, then and there. ८ Was cut to pieces. ९ What proof or evidence is there in this case? viz., that he is &c. १० Since, because. ११ For हनिष्यामि. १२ अत्रैव प्रत्ययः herein alone lies the proof that you demand. १३ At the time when there is a *favourable opportunity* (अवसर). अवसरस्य वेलायां. ष. त. १४ With reddish eyes. आरक्ते (ईषद्रक्ते) नयने यस्य सः. ब. १५ With the lower lip throbbing. स्फुरितः अधरः यस्य. ब. १६ Seated in a place above his rank. १७ With cruel looks. १८ With a dejected appearance or look. ब. १९ Welcome. २० Are you well? २१ Even that thing which cannot be given.

[1]ते धन्यास्ते विवेकज्ञास्ते शस्या इह भूतले।
आगच्छन्ति गृहे येषां कार्यार्थं सुहृदो जनाः ॥ २६२ ॥

दमनक आह। भोः [2]कथं शिवं सेवकजनस्य।

[3]संपत्तयः परायत्ताः सदा चित्तमनिर्वृतम्।
स्वजीवितेप्यविश्वासस्तेषां ये राजसेवकाः ॥ २६३ ॥

तथा च। [4]सेवया धनमिच्छद्भिः सेवकैः पश्य यत्कृतम्।
स्वातन्त्र्यं यच्छरीरस्य मूढैस्तदपि हारितम् ॥ २६४ ॥
[5]तावज्जन्मातिदुःखाय ततो दुर्गतता सदा।
तत्रापि सेवया वृत्तिरहो दुःखपरम्परा ॥ २६५ ॥
[6]जीवन्तोपि मृताः पञ्च श्रूयन्ते किल भारते।
दरिद्रो व्याधितो मूर्खः प्रवासी नित्यसेवकः ॥ २६६ ॥
[7]नाश्नाति सेवयोत्सुक्याद्विनिद्रो न प्रबुध्यते।
न निःशङ्कं वचो ब्रूते सेवकोप्यत्र जीवति ॥ २६७ ॥

---

१ Those alone are blessed, those alone are full of discrimination, and those alone are worthy of praise in this world, to whose houses friends repair on some business. विवेकं जानन्तीति. इत ३ How can those who are servants fare well? ३ The wealth of those who are the servants of a king, is dependent on others, their mind is always uneasy and they have no confidence even about their own life (being safe). परायत्ता = परम् आयत्ता: स. त. ४ See what is done by those servants who wish to obtain wealth by service: the fools have lost even the mastery over their own bodies (because they entirely depend upon their masters) हारितम् P. P. of the caus. of हृ lit caused to be taken away. ५ Firstly (तावत्) birth itself causes great pain; then there is always misery and in that again living is to be procured by service oh! the series of calamities! दुर्गतता abstract noun from दुर्गत (miserable). दुर्गतस्य भावः. ६ These (the following five) though alive, are heard or said to be dead in the Bhárata, viz., he who is poor, he who is diseased, he who is foolish, he who is a traveller and he who is always a servant. For श्रूयन्ते किल भारते other editions read व्यासेन परिकीर्तिताः—declared by *Vyása*. ७ He who is a servant, cannot eat heartily by reason of his servitude, does not awake free from sleepiness, and does not speak anything without fear; but he only lives in this world. विनिद्र. ब.

सेवा श्ववृत्तिराख्याता यैस्तैर्मिथ्या प्रजल्पितम् ।
स्वच्छन्दं चरति श्वात्र सेवकः परशासनात् ॥ २६८ ॥
२भूशय्या ब्रह्मचर्यं च कृशत्वं लघुभोजनम् ।
सेवकस्य यतेर्यद्वद्विशेषः पापधर्मजः ॥ २६९ ॥
३शीतातपादिकष्टानि सहते यानि सेवकः ।
धनाय तानि चाल्पानि यदि धर्मान्न मुच्यते ॥ २७० ॥
४मृदुनातिसुवृत्तेन सुमृष्टेनातिहारिणा ।
मोदकेनापि किं तेन निष्पत्तिर्यस्य सेवया ॥ २७१ ॥

संजीवक आह । अथ भवान्किं वक्तुमनाः । स आह । मित्र ५स्वामिनां सचिवानां मंत्रभेदं कर्तुं न युज्यते । उक्तं च ।

६यो मन्त्रं स्वामिनो भिन्द्यात्साचिव्ये सन्नियोजितः ।
स हत्वा नृपकार्यं तत्स्वयं च नरकं व्रजेत् ॥ २७२ ॥
७येन यस्य कृतो भेदः सचिवेन महीपतेः ।
तेनाशस्त्रवधस्तस्य कृत इत्याह नारदः ॥ २७३ ॥

---

१ Those who have said that service is like the life led by a dog, have made a false statement, (because) a dog acts according to his pleasure, while a servant. acts under the orders of others श्ववृत्तिराख्याता=श्ववृत्तिरिति आख्याता. स्वच्छंदेन यथा तथा. अन्य. २ The ground used as bed, celibacy of life. thinness and scanty food – these are common both to a servant and a hermit; but the only difference between the two is the one arising from sin and virtue (sin in the case of a servant and virtue in that of a hermit). भूशय्या—भूरेव शय्या. क. यद्वत् similar. पापधर्मजः पापधर्माभ्यां जातः. ३ The miseries arising from cold, heat and others, which a servant endures, have very little power to procure wealth even if he does not swerve from virtue. ४ What is the use of that मोदक (a kind of sweetmeat) which is obtained from service, even though it be soft, very round, well cleaned and charming to look at अतिहारिन् very attractive. ५ Construe स्वामिनां मंत्रभेदं कर्तुं सचिवानां न युज्यते. It is not proper on the part of ministers, to divulge the counsels of their lords. ६ He, who being appointed to the post of minister,. will reveal the secret of his master, will destroy or ruin the king's affair which he divulges and himself will go to hell. ७ That minister. who has betrayed his master's secrets, is said to have committed his murder without any weapon–so says Nárada. अशस्त्रवधः–नशस्त्रवधः. न. त. शस्त्रवधः. तृ. त.

तथापि मया तव स्नेहपाशबद्धेन मन्त्रभेदः कार्यो यतस्त्वं मम वचनेन राजकुले विश्वस्तः प्रविष्टश्च । उक्तं च ।

विश्रम्भाद्यस्य यो मृत्युमवाप्नोति कथंचन ।
तस्य हत्या तदुत्था सा प्राहेदं वचनं मनुः ॥ २७४ ॥

तत्तवोपरि पिङ्गलकोयं दुष्टबुद्धिः कथितं चाद्यानेन मत्पुरतश्चतुष्कर्णतया यत्प्रभाते सञ्जीवकं हत्वा समस्तमृगपरिवारं चिरात्तृप्तिं नेष्यामि । ततः स मयोक्तः । स्वामिन् अयुक्तमिदं यन्मित्रद्रोहेण सञ्जीवनं क्रियते । उक्तं च ।

अपि ब्रह्मवधं कृत्वा प्रायश्चित्तेन शुध्यति ।
तदर्हेण विचीर्णेन न कथंचित्सुहृद्द्रुहः ॥ २७५ ॥

ततस्तेनाहं सामर्षेणोक्तः । भो दुष्टबुद्धे सञ्जीवकस्तावच्छष्पभोजी वयं मांसाशिनस्तदस्माकं स्वाभाविकं वैरमिति । कथं रिपुरुपेक्ष्यते । तस्मात्सामादिभिरुपायैर्हन्यते । न च हते तस्मिन्दोषः स्यात् । उक्तं च ।

दत्त्वापि कन्यकां वैरी निहन्तव्यो विपश्चिता ।
अन्योपायैरशक्यो यो हते दोषो न विद्यते ॥ २७६ ॥
कृत्याकृत्यं न मन्येत क्षत्रियो युद्धिसंयुतः ।
सुप्तो वा द्रोणपुत्रेण धृष्टद्युम्नः पुरा हतः ॥ २७७ ॥

१ Bound to you by the ties of friendship. २ His murder arises from him, by placing confidence in whom he meets with death. This statement is made by Manu. Construe यस्य विश्रंभात् यो मृत्युमवाप्नोति तस्य सा हत्या तदुत्थिता इति वचनं मनुः प्राह. तदुत्था=तस्मात् उत्था. पं. त. ३ In such a way as to be heard by four ears, that is, two persons only. ४ The retinue of the lion consisting of all the forest-animals. ५ Death or destruction. ६ Protection (रक्षणं) or it may be taken to mean feeding (भरण). ७ Even if one commit the murder of a Bráhmana, he is freed from the sin thereof by undergoing an atonement (proportionately) adequate to the crime; but not from that of killing a friend विचीर्ण P. P. of चर् 1 P. Irregularly formed. ८ Full of anger, indignant. सामर्षेण—आमर्षेण सहितेन. ब. ९ Natural; inborn. १० A wise man should kill his enemy even if he has given him (enemy) his own daughter in marriage; there is no sin in destroying him who is not likely to be won over by other remedies. ११ A talented warrior should not think of what is fit or unfit to do; for example, formerly, Dhristadyumna while asleep was killed by the *son of Drona* (अश्वत्थामन्).

तदहं तस्य निश्चयं ज्ञात्वा त्वत्सकाशमुपागतः । सांप्रतं मे नास्ति विश्वासघातकदोषः । [1]यद्युक्तं प्रतिभाति तत्कुरुष्वेति । अथ सञ्जीवकस्तद्वज्रपातदारुणं वचनं श्रुत्वा मोहमुपागतः । अथ चेतनां लब्ध्वा [2]सवैराग्यमिदमाह । भोः साध्विदमुच्यते ।

[3]दुर्जनगम्या नार्यः प्रायेणास्नेहवान्भवति राजा ।
कृपणानुसारि च धनं मेघो गिरिदुर्गवर्षी च ॥ २७८ ॥
[4]अहं हि संमतो राज्ञो य एवं मन्यते कुधीः ।
बलीवर्दः स विज्ञेयो विषाणपरिवर्जितः ॥ २७९ ॥
[5]वरं वनं वरं भैक्ष्यं वरं भारोपजीवनम् ।
वरं व्याधिर्मनुष्याणां नाधिकारेण संपदः ॥ २८० ॥

तदयुक्तं मया कृतं यदनेन सह मैत्री विहिता । उक्तं च ।

[6]ययोरेव समं वित्तं ययोरेव समं कुलम् ।
तयोर्मैत्री विवाहश्च न तु पुष्टविपुष्टयोः ॥ २८१ ॥

---

१ So that, you may now do what you think proper under the circumstances. २ Disinterestedly. वैराग्येण सहितं यथा तथा. अ. ३ Women become accessible to the wicked, the king is generally destitute of affection, wealth follows a miser and rain falls on difficult places in mountains. दुर्जनगम्य. तृ. त. कृपणानुसारि–कृपणमनुसरतीति. उप. गिरिदुर्ग–गिरीणां दुर्गेषु वर्षति सः. उप. ४ That dull headed fellow who thinks that he is a favourite of the king or is honoured by the king, should be considered to be a full-grown bull without horns. कुधीः–कुत्सिता धीः यस्य. ब. ५ It is better for men to resort to a forest, to beg for livelihood, to subsist on carrying burden or to have any disease, than to obtain wealth by holding an office (under a king). भारोपजीवनं–भारेण उपजीवनं. तृ. त. ६ Friendship and alliance by marriage are proper only between those who are equal in point of wealth as well as birth, and not between those who are strong and those who are weak. For समं कुलं there is a different reading as समं बलं which gives a better sense than कुलं.

तथा च।

मृगा मृगैः सङ्गमनुव्रजन्ति गावश्च गोभिस्तुरगास्तुरङ्गैः।
मूर्खाश्च मूर्खैः सुधियः सुधीभिः समानशीलव्यसनेषु सख्यम् ॥२८२॥

तद्यदि गत्वा तं प्रसादयामि तथापि न प्रसादं यास्यति। उक्तं च।

निमित्तमुद्दिश्य हि यः प्रकुप्यति ध्रुवं स तस्यापगमे प्रसीदति।
अकारणद्वेषपरो हि यो भवेत्कथं नरोसौ परितोषमेष्यति ॥ २८३ ॥

अहो साधु चेदमुच्यते।

भक्तानामुपकारिणां परहितव्यापारयुक्तात्मनां
सेवासंव्यवहारतत्त्वविदुषां द्रोहच्युतानामपि।
व्यापत्तिः स्खलितान्तरेषु नियता सिद्धिर्भवेद्वा न वा
तस्मादम्बुपतेरिवावनिपतेः सेवा सदा शंकिनी ॥ २८४ ॥

१ Deer associate with deer, cows with cows, horses with horses, fools with fools, wise men with wise men; there is friendship between those whose dispositions are similar and those whose misfortunes are equal. समानं शीलव्यसने येषां तेषु. ब. २ He, who gets angry from a particular cause, is surely pacified when that cause is removed; but how will he, who entertains hatred without any cause, be propitiated? अकारणात् द्वेषपरः=अकारणद्वेषपरः. द्वेषः परं यस्य सः द्वेषपरः. ब. ३ Misfortune is certain in the various failings even of those servants who are devoted, obliging and have their minds always directed towards accomplishing the good of others, who know the essence of the duties of servitude and who are free from treachery, while as regards success it may be obtained or may not be obtained therefore, the service of kings like that of the ocean, is always attended with uncertainty or danger, *i. e.*, as one is not sure to succeed in his maritime enterprise, so he is with respect to a king. परहितस्य व्यापारे युक्ताः आत्मानः येषां ते. ब.

तथा च। भावस्निग्धैरुपकृतमपि द्वेष्यतां याति किंचि-
च्छाठ्यादन्यैरपकृतमपि प्रीतये चोपयाति।
दुर्ग्राह्यत्वान्नृपतिमनसां नैकभावाश्रयाणां
सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥ २८५ ॥

तत्परिज्ञातं मया यत्प्रसादमसहमानैः समीपवर्तिभिरेष पिंगलकः प्रकोपितः। तेनायं ममादोषस्याप्येवं वदति। उक्तं च।

प्रभोः प्रसादमन्यस्य न सहन्तीह सेवकाः।
सपत्न्य इव संक्रुद्धाः सपत्न्याः स्वाकृतेरपि ॥ २८६ ॥

भवति चैवं यद्गुणवता समीपवर्तिना तद्गुणैरन्येषां प्रसादो न भवति। उक्तं च।

गुणवत्तरपात्रेण च्छाद्यन्ते गुणिनां गुणाः।
रात्रौ दीपशिखाकान्तिर्न भानावुदिते सति ॥ २८७ ॥

दमनक आह। भो मित्र यद्येवं तन्नास्ति ते भयम्। प्रकोपितोपि स दुर्जनैस्तव वचनेन प्रसादं यास्यति। सञ्जीवक आह। भो न युक्तमुक्तं भवता। लघूनामपि दुर्जनानां मध्ये वस्तुं न शक्यते। उपायान्तरं विधाय ते नूनं घ्नन्ति। उक्तं च।

---

१ Even the obligations conferred by those who are heartily attached, are looked upon as hateful; while the little injury that is done by others deceitfully, becomes pleasing; on account of the unfathomable depth of the minds of kings which are filled with various feelings, the duty of servitude is very hard and impracticable even to saints. भावस्निग्धः ... नृ त. दुर्ग्राह्यत्व the quality of fathoming with difficulty. नैक...णा adj. of मनस्. न एकभावानां आश्रयाणाम्. ब. २ The favour shown (to me) ३ Although I am free from blame. अदोषः—नास्ति दोषः यस्य सः. ब ४ Servants of kings cannot bear to see favour shown to any other person, as fellow-wives get angry with one of their own, though of a very charming form. स्वाकृतेः शोभना आकृतिः यस्याः सा स्वाकृतिः तस्याः. ब. ५ When a qualified person is near. ६ The virtues of the virtuous are thrown into the shade by one superior to them in virtue; the flame of a lamp has lustre at night and not after the sun has risen. गुणवत्तरपात्र means one who is a receptacle of better qualities. ७ Will be pacified. ८ A remedy other than strength. अन्य उपायः. क.

बहवः पण्डिताः क्षुद्राः सर्वे मायोपजीविनः ।
कुर्युः कृत्यमकृत्यं वा उष्ट्रे काकादयो यथा ॥ २८८ ॥

दमनक आह । कथमेतत् । सोऽब्रवीत् ।

॥ कथा ११ ॥

अस्ति कस्मिंश्चिद्वनोद्देशे मदोत्कटो नाम सिंहः प्रतिवसति स्म । तस्य चानुचरा अन्ये द्वीपिवायसगोमायवः सन्ति । अथ कदाचित्तैरितस्ततो भ्रमद्भिः सार्थाद्भ्रष्टः कथनको नामोष्ट्रो दृष्टः । अथ सिंह आह । अहो अपूर्वमिदं सत्त्वम् । तज्ज्ञायतां किमेतदारण्यकं ग्राम्यं वेति । तच्छ्रुत्वा वायस आह । भोः स्वामिन्ग्राम्योयमुष्ट्रनामा जीवविशेषस्तव भोज्यः । तन्व्यापाद्यताम् सिंह आह । नाहं गृहमागतं हन्मि । उक्तं च ।

गृहे शत्रुमपि प्राप्तं विश्वस्तमकुतोभयम् ।
यो हन्यात्तस्य पापं स्याच्छतब्राह्मणघातजम् ॥ २८९ ॥

तदभयप्रदानं दत्वा मत्सकाशमानीयतां येनास्यागमकारणं पृच्छामि । अथासौ सर्वैरपि विश्वास्याभयप्रदानं दत्त्वा मदोत्कटसकाशमानीतः प्रणम्योपविष्टश्च । ततस्तस्य पृच्छतस्तेनात्मवृत्तान्तः सार्थभ्रंशसमुद्भवो निवे-

१ Many are the insignificant wise people, all living by trick or deceit, and they will do anything whether fit to do or unfit, just as the crow and others acted towards the camel (in the following story). मायोपजीविन —मायया उपजीवन्ति इति उप. २ अस्ति &c. प्रतिवसति स्म. Here अस्ति is superfluous as a verb showing existence. It, therefore, should be taken to mean something like 'there', 'they say that' &c in English. ३ A jackal ४ Fallen away from the herd. ५ Whether it is a wild animal or a domestic one. ६ A particular kind of creature or animal. ७ Fit to be devoured by you; a prey for you. ८ He, who kills even his enemy who is come to his house, who has confided in him and who is therefore, free from fear, will be guilty of sin amounting to that arising from the murder of a hundred Bráhmans अकुतोभयम्=नास्ति कुतोपि भयं यस्य. ब. शतब्राह्मणानां घाताज्जातम्. पं. त. ९ Being given a promise of safety. १० Being made to confide. ११ Him who was asking. १२ Proceeding from the separation from the herd, that is, about his being separated &c.

भूतः । ततः सिंहेनोक्तम् । भोः क्रथनक मा त्वं ग्रामं गत्वा भूयोपि भारोद्वहनकष्टभागी[1] भूयाः । तदत्रारण्ये निर्विशङ्को[2] मरकतसदृशानि[3] शष्पाग्राणि[4] भक्षयन्मया सह सदैव वस । सोपि तथेत्युक्त्वा तेषां मध्ये विचरन्न कुतोपि भयमिति[5] सुखेनास्ते । तथान्यदा मदोत्कटस्य महागजेनारण्यचारिणा[6] सह युद्धमभवत् । ततस्तस्य दन्तमुसलप्रहारैर्[7]व्यथा संजाता । व्यथितः कथमपि[8] प्राणैर्न वियुक्तः । अथ शरीरासामर्थ्यान्न[9] कुत्रचित्पदमपि चलितुं शक्नोति । ते सर्वे काकादयोप्यप्रभुत्वेन[10] क्षुधाविष्टाः परं दुःखं भेजुः । अथ तान्सिंहः प्राह । भो अन्विष्यतां कुत्रचित्किंचित्सत्त्वं येनाहमेतामपि[11] दशां प्राप्तस्तद्धत्वा युष्मद्भोजनं संपादयामि । अथ ते चत्वारोपि भ्रमितुमारब्धा यावन्न किंचित्सत्त्वं पश्यन्ति तावद्वायसशृगालौ परस्परं मन्त्रयतः । शृगाल आह । भो वायस किं प्रभूतभ्रान्तेन[12] । अयमस्माकं प्रभोः क्रथनको विश्वस्तस्[13]तिष्ठति । तदेनं हत्वा प्राणयात्रां कुर्मः । वायस आह । युक्तमुक्तं भवता परं स्वामिना तस्याभयप्रदानं दत्तमास्ते न वध्योयमिति । शृगाल आह । भो वायस अहं स्वामिनं विज्ञाप्य तथा[14] करिष्ये यथा स्वामी वधं करिष्यति । तत्तिष्ठन्तु भवन्तोत्रैव यावदहं गृहं गत्वा प्रभोराज्ञां गृहीत्वा चागच्छामि । एवमभिधाय सत्वरं सिंहमुपस्थितः । अथ सिंहमासाद्येदमाह । स्वामिन्समस्तं वनं भ्रान्त्वा वयमागताः । न किंचित्सत्त्वमासादितम् । तत्किं कुर्मो वयम् । सांप्रतं वयं बुभुक्षया पदमपि चलितुं न शक्नुमः । देवोपि पथ्याशी[15] वर्तते । तद्यदि देवादेशो भवति तत्क्रथनकपिशितेनाद्य[16] पथ्यक्रिया क्रियते । अथ सिंहस्तस्य तद्दारुणं वचनमाकर्ण्य सकोपमिदमाह । धिक्पापाधम यद्येवं भूयोपि वदसि ततस्त्वां तत्क्षणेन वधिष्यामि यतो मया तस्याभयं दत्तम् । तत्कथं व्यापादयामि । उक्तं च ।

१ Enduring the hardship of carrying loads. भारोद्वहनकष्टं भजते इति भारोद्वहनकष्टभागिन्. २ Free from fear or danger. ३ Resembling emerald, as green as emerald &c. ४ The sprouts of grass. ५ Thinking he had no fear of any body. ६ Living in the forest. ७ With the strokes of his pestle-like tusks. दन्त एव मुसलं. क. ८ With great difficulty. ९ Through the inability of the body. १० For want of chief power. ११ Though reduced to this state. १२ What is the use of wandering too much? १३ Trusted, confidential. १४ Shall act in such a way that &c. १५ One who requires wholesome food. पथ्यमश्नातीति. १६ Flesh.

न गोप्रदानं न महीप्रदानं
न चान्नदानं हि तथा प्रधानम्।
यथा वदन्तीह बुधाः प्रधानं
सर्वप्रदानेष्वभयप्रदानम्॥ २९०॥

तच्छ्रुत्वा शृगाल आह। स्वामिन्यद्यभयप्रदानं दत्त्वा वधः क्रियते तदेष दोषो भवति। पुनर्यदि देवपादानां भक्त्या स आत्मनो जीवितव्यं प्रयच्छति तन्न दोषः। ततो यदि स स्वयमात्मानं वधार्थे नियोजयति तद्वध्योऽन्यथास्माकं मध्यादेकतमो वध्य इति यतो देवपादाः पथ्याशिनः क्षुन्निरोधादन्त्यां दशां यास्यन्ति। तत्किमेतैः प्राणैरस्माकं ये स्वाम्यर्थे न यास्यन्ति। अपरं पश्चादप्यस्माभिर्वह्निप्रवेशः कार्यो यदि स्वामिपादानां किंचिदनिष्टं भविष्यति। उक्तं च।

यस्मिन्कुले यः पुरुषः प्रधानः
स सर्वयत्नैः परिरक्षणीयः।
तस्मिन्विनष्टे स्वकुलं विनष्टं
न नाभिभङ्गे ह्यरका वहन्ति॥ २९१॥

तदाकर्ण्य मदोत्कट आह। यद्येवं तत्कुरुष्व यद्रोचते। तच्छ्रुत्वा स त्वरं गत्वा तानाह। भोः स्वामिनो महत्यवस्था वर्तते तत्किं पर्यटितेन-तेन विना कोऽत्रास्मान्रक्षयिष्यति। तद्गत्वा तस्य क्षुद्रोगात्परलोकं प्रस्थितस्यात्मशरीरदानं कुर्मो येन स्वामिप्रसादस्यानृणतां गच्छामः। उक्तं च।

---

१ The wise do not attach so much importance to the giving away of a cow, land, food and charity in general as they do to the promise of safety considering it as the chief of all gifts. २ By reason of his devotion to your majesty. ३ Offers himself up as a victim. ४ Through the non-gratification of hunger, by checking hunger. ५ The last extremity. ६ What is the use of these our lives if they are not given up for our lord? ७ Entering the fire by way of suicide. ८ Any mishap—death. ९ That man, who is the chief of a family, should be saved with all efforts; if he perish, his whole family perishes, for when the nave of a wheel is broken, the spokes do not move. १० Our lord is in a serious condition, his condition is very precarious (महती lit. great, serious). ११ Who is about to depart to the next world through hunger. १२ Freedom from debt.

आपदं प्राप्नुयात्स्वामी यस्य भृत्यस्य जीवतः।
प्राणेषु विद्यमानेषु स भृत्यो नरकं व्रजेत्॥ २९२॥

इति श्रुत्वा ते सर्वे बाष्पपूरितदृशो मदोत्कटं प्रणम्योपविष्टाः। तान्दृष्ट्वा मदोत्कट आह। भोः प्राप्तं दृष्टं वा किंचित्सत्त्वम्। अथ तेषां मध्यात्काकः प्रोवाच। स्वामिन्वयं तावत्सर्वत्र पर्यटिताः परं न किंचित्सत्त्वमासादितं दृष्टं वा। तदद्य मां भक्षयित्वा प्राणान्धारयतु स्वामी येन देवस्याप्यायना भवति मम पुनः स्वर्गप्राप्तिरिति। उक्तं च।

स्वाम्यर्थे यस्त्यजेत्प्राणान्भृत्यो भक्तिसमन्वितः।
स परं पदमाप्नोति जरामरणवर्जितम्॥ २९३॥

तच्छ्रुत्वा शृगाल आह। भोः स्वल्पकायो भवान्। भवद्भक्षणात्स्वामिनस्तावत्प्राणयात्रा न भवत्यपरो दोषश्च तावत्समुत्पद्यते। उक्तं च।

काकमांसं शुनोच्छिष्टं स्वल्पं तदपि दुर्बलम्।
भक्षितेनापि किं तेन तृप्तिर्येन न जायते॥ २९४॥

तद्दर्शिता स्वामिभक्तिर्भवता गतं चानृण्यं भर्तृपिण्डस्य प्राप्तश्चोभयलोके साधुवादः। तदपसराग्रतः। अहं स्वामिनं विज्ञापयामि। तथानुष्ठिते शृगालः सादरं प्रणम्योपविष्टः। स्वामिन्मां भक्षयित्वाद्य प्राणयात्रां विधाय ममोभयलोकप्राप्तिं कुरु। उक्तं च।

स्वाम्यायत्ताः सदा प्राणा भृत्यानामर्जिता धनैः।
यतस्ततो न दोषोऽस्ति तेषां ग्रहणसंभवः॥ २९५॥

१ That servant will go to hell who being alive, the master will meet with calamities. २ With eyes filled with tears. ३ Support. ४ Satisfaction. ५ That servant, who being full of devotion, gives up his life for the sake of his master, obtains a very high position free from old age and death. परं=परमं-जरामरणाभ्यां वर्जितं. तृ. त. ६ The flesh of a crow as also the remains of a dog's food are small and those again of little strength; what is the use even if one eat them since no satisfaction is produced from them. ७ You have thus paid the debt which you owed to your master for support &c. ८ Praises, commendation. ९ Thus give me both the worlds (this and the next). १० The lives of servants which are, as it were, earned with the master's wealth, are solely at the master's service, and so there is no blame attached to one if they (lives) are taken. ग्रहणसंभवः—ग्रहणात् संभवः यस्य. पं. ब.

अथ तच्छ्रुत्वा द्वीप्याह । भोः साधूक्तं भवता पुनर्भवानपि स्वल्पकायः स्वजातिश्च नखायुधत्वाद्[1]भक्ष्य एव । उक्तं च ।

नाभक्ष्यं[2] भक्षयेत्प्राज्ञः प्राणैः कण्ठगतैरपि ।
विशेषात्तदपि स्तोकं लोकद्वयविनाशकम् ॥ २९६ ॥

तद्दर्शितं त्वयात्मनः कौलीन्यम् । अथवा साधु चेदमुच्यते ।

एतदर्थं[3] कुलीनानां नृपाः कुर्वन्ति संग्रहम् ।
आदिमध्यावसानेषु न ते गच्छन्ति विक्रियाम् ॥ २९७ ॥

तदपसरायतो येनाहं स्वामिनं विज्ञापयामि । तथानुष्ठिते द्वीपी प्रणम्य मदोत्कटमाह । स्वामिन्क्रियतामद्य मम प्राणैः प्राणयात्रा दीयतामक्षयो[4]वासः स्वर्गे मम विस्तार्यतां क्षितितले प्रभूतं यशः । इति तन्नात्र विस्मयः कार्यः । उक्तं च ।

मृतानां[5] स्वामिनः कार्ये भृत्यानामनुवर्तिनाम् ।
भवेत्स्वर्गेऽक्षयो वासः कीर्तिश्च धरणीतले ॥ २९८ ॥

तच्छ्रुत्वा क्रथनकश्चिन्तयामास । एतैस्तावत्सर्वैरपि शोभावाक्यान्यु[6]क्तानि न चैकोऽपि स्वामिना विनाशितः । तदहमपि प्राप्तकालं[7] वक्ष्यामि चित्रकं[8] येन मद्वचनमेते त्रयोऽपि समर्थयन्ति[9] । इति निश्चित्य प्रोवाच । भोः सत्यमुक्तं भवता परं भवानपि नखायुधः । तत्कथं भवन्तं स्वामी भक्षयति । उक्तं च ।

मनसापि[10] स्वजात्यानां योऽनिष्टानि प्रचिन्तयेत्
भवन्ति तस्य तान्येव इह लोके परत्र च ॥ २९९ ॥

---

१ By reason of your being furnished with nails for weapons. नखमेवायुधं यस्य स तस्य भावः. ब. नखायुधत्वं. २ A wise man should not eat what is unfit to eat even if he be at the point of death; even if that be little, it particularly destroys both the worlds, that is, one's happiness here as well as in heaven. ३ It is for this reason that the kings keep around them noble persons, for they do not change at the beginning, in the middle and end, that is, they always remain what they are आदि...षु द्व. ४ Eternal, everlasting. ५ Those servants, who die for the sake of their masters and who are obedient, will live for ever in heaven and their fame will remain on earth. ६ Speeches of beauty, *i. e.*, beautiful or complimentary words. ७ What befits the occasion. प्राप्तः कालः यस्य तत्. ब. ८ A tiger or leopard. ९ To consider, to believe. १० Those very evils which a man thinks of doing to his castemen, befall him both in this as well as the next world.

तदपसरायतो येनाहं स्वामिनं विज्ञापयामि । तथानुष्ठिते कथनकोग्रे स्थित्वा प्रणम्योवाच । स्वामिन् एतेभक्ष्यास्तव तन्मम प्राणैः प्राणयात्रा विधीयतां येन ममोभयलोकप्राप्तिर्भवति । उक्तं च ।

[१]न यज्वानोपि गच्छन्ति तां गतिं नैव योगिनः ।
यां यान्ति प्रोज्झितप्राणाः स्वाम्यर्थे सेवकोत्तमाः ॥३०० ॥

एवमभिहिते ताभ्यां शृगालचित्रकाभ्यां विदारितोभयकुक्षिः[२] कथनकः प्राणानत्याक्षीत् । ततश्च तैः क्षुद्रपण्डितैः सर्वैर्भक्षितः ।

अतोहं ब्रवीमि बहवः पण्डिताः क्षुद्रा इति ।

तद्भद्र क्षुद्रपरिवारोयं राजा मया संपरिकलितः[३] । उक्तं च ।

[४]अशुद्धप्रकृतौ राज्ञि जनता नानुरज्यते ।
यथा गृध्रसमासन्नः कलहंसः समाचरेत् ॥ ३०१ ॥

तथा च । [५]गृध्राकारोपि सेव्यः स्याद्धंसाकारैः सभासदैः ।
हंसाकारोपि संत्याज्यो गृध्राकारैः स तैर्नृपः ॥ ३०२ ॥

तन्नूनं ममोपरि केनचिद्दुर्जनेनायं प्रकोपितः । तेनैवं वदति । अथवा भवत्येतत् । उक्तं च ।

[६]कर्णविषेण च भग्नः किं किं न करोति बालिशो लोकः ।
क्षपणकतामपि धत्ते पिबति सुरां नरकपालेन ॥ ३०३ ॥

अथवा साध्विदमुच्यते ।

---

१ Neither sacrificers nor ascetics attain to that dignity, which excellent servants do (attain) by sacrificing their lives for the sake of their masters. प्रोज्झितप्राणाः. ब. २ Having both the sides torn open. विदारिते उभयकक्षा यस्य. ब. ३ Known or found out. ४ The subjects or people do not become attached to a king whose ministers are dishonest or foul; and he will act like a gander overtaken by a vulture. अशुद्धप्रकृतौ-अशुद्धाप्रकृतिर्यस्य स. ब. ५ Even though a king be of the nature of vultures, he is fit to be served when he has councillors of the nature of swans; while when he is of the nature of swans, he should be abandoned by reason of his having councillors of the nature of vultures. गृध्राकारः-गृध्रस्येव आकारः यस्य स. ब. ६ When spoiled by the poison of the ear what thing will a foolish person not do? He will accept asceticism and drink wine in a pot of the skull of human beings.

पादाहतोपि दृढदण्डसमाहतोपि
यं दंष्ट्रया स्पृशति तं किल हन्ति सर्पः ।
कोप्येष एव पिशुनोग्रमनुष्यधर्मः
कर्णे परं स्पृशति हन्ति परं समूलम् ॥ ३०४ ॥

तथा च । अहो खलभुजङ्गस्य विपरीतवधक्रमः ।
कर्णे लगति चान्यस्य प्राणैरन्यो वियुज्यते ॥ ३०५ ॥

तदेवं गतेपि किं कर्तव्यमिति । अहं त्वां सुहृद्भावात्पृच्छामि । दमनक आह । तद्देशान्तरगमनं युज्यते नैवंविधस्य कुस्वामिनः सेवां विधातुम् । उक्तं च ।

गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ।
उत्पथप्रतिपन्नस्य परित्यागो विधीयते ॥ ३०६ ॥

संजीवक आह । अस्त्येतत्परं स्वामिनि कुपिते गन्तुं न शक्यते न चान्यत्र गतानामपि निर्वृतिर्भवति । उक्तं च ।

महतां योपराध्येत दूरस्थोस्मीति नाश्वसेत् ।
दीर्घौ बुद्धिमतो बाहू स ताभ्यां हन्ति हिंसितः ॥ ३०७ ॥

---

१ It is a fact that a snake, even though struck with the foot and beaten with a strong stick, kills him alone whom he *touches with his teeth* (bites); while very strange (indescribable) is this action of a terrible slanderer in the shape of a human being, because he touches the ear of one man and kills another entirely, *i.e.*, he whispers something in the ears of one person and destroys another. पादहत and दृढ....हत are both तृ. त. पिशुनः एव उग्र मनुष्यः पिशुनोग्रमनुष्य. क. तस्य धर्मः– ष. त. २ Very strange or extraordinary is the mode of killing of a serpent in the shape of a wicked person; because he whispers something in the ear of one man, while another dies. खलभुजंग–खलभुजंग इव. क. For विपरीत other editions read विचित्र. ३ Through friendship, as a friend. ४ A bad master. ५ Abandonment is ordained even of a preceptor who is elate with pride, does not know what is fit or unfit to do and goes astray. ६ He who offends the great should not take comfort in the fact that he is far away from them; for the arms of a talented person are long and he strikes with them when injured.

तद्युद्धं मुक्त्वा मे नास्त्यन्यच्छ्रेयस्करम्। उक्तं च।

न तान्सुतीर्थैस्तपसा च लोका-
न्स्वर्गैषिणो दानशतैः सुवित्तैः।
क्षणेन यान्यान्ति रणेषु धीराः
प्राणान्समुज्झन्ति हि ये सुशीलाः॥ ३०८॥

मृतैः संप्राप्यते स्वर्गो जीवद्भिः कीर्तिरुत्तमा।
तदुभावपि शूराणां गुणावेतौ न दुर्लभौ॥ ३०९॥

तथा च। होमार्थैर्विविधप्रदानविधिना सद्विप्रवृन्दार्चने-
र्यज्ञैर्भूरिसुदक्षिणैः सुविहितैः संप्राप्यते यत्फलम्।
सत्तीर्थाश्रमवासहोमनियमैश्चान्द्रायणाद्यैः कृतैः
पुम्भिस्तत्फलमाहवे विनिहतैः संप्राप्यते तत्क्षणात्॥ ३१०॥

तदाकर्ण्य दमनकश्चिन्तयामास। तद्युद्धाय कृतनिश्चयोऽयं दृश्यते दुरात्मा। तद्यदि कदाचित्तीक्ष्णशृङ्गाभ्यां स्वामिनं प्रहरिष्यति तन्महाननर्थः संपत्स्यते। तदेनं भूयोपि स्वबुद्ध्या प्रबोध्य तथा करोमि यथा देशान्तरगमनं करोति। आह च। भो मित्र सम्यगभिहितं भवता परं किन्तु कः स्वामिभृत्ययोः संग्रामः। उक्तं च।

---

१ Without. २ Beneficial. ३ Those worlds which, those bold persons who lose their lives in battle obtain in a moment, are not obtained by those desirous of going to heaven even by means of good holy places, penance, by hundreds of charitable acts and by wealth. ४ By dying heaven is obtained and by living excellent fame is secured, so both these advantages (गुणौ) are not difficult to be obtained by the brave, that is, they can easily obtain them. ५ Those persons, who are killed in battle, immediately obtain that fruit which is obtained by oblations to fire accompanied with various kinds of presents, by worshipping multitudes of good Bráhma*n*s, by sacrifices in which much wealth is bestowed as Dakshi*n*a and also by residence in a holy place, oblations to fire, vows and Chándráya*n*a vow. ६ Having advised him, having awakened him to the reality of his position. ७ What battle is there between a lord and his servant, that is, the fight would be unequal.

बलवन्तं रिपुं दृष्ट्वा किलात्मानं प्रगोपयेत् ।
बलवद्भिश्च कर्तव्या शरच्चन्द्रप्रकाशता ॥ ३११ ॥

अन्यच्च । शत्रोर्बलमविज्ञाय वैरमारभते तु यः ।
स पराभवमाप्नोति समुद्रष्टिट्टिभादिव ॥ ३१२ ॥

संजीवक आह । कथमेतत् । सोऽब्रवीत् ।

॥ कथा १२ ॥

कस्मिंश्चित्समुद्रैकदेशे टिट्टिभदंपती वसतः । ततो गच्छति काले ऋतुसमयमासाद्य टिट्टिभी गर्भमाधत्त । आसन्नप्रसवा सती टिट्टिभमूचे । भोः कान्त मम प्रसवसमयो वर्तते तद्विचिन्त्यतां किमपि निरुपद्रवं स्थानं येन तत्राहमण्डकमोक्षणं करोमि । टिट्टिभ आह । भद्रे रम्योयं समुद्रप्रदेशः तदत्रैव प्रसवः कार्यः । सा प्राह । अत्र पूर्णिमादिने समुद्रवेला चटति । सा मत्तगजेन्द्रानप्याकर्षति । तद्दूरमन्यत्र किंचित्स्थानमन्विष्यताम् । तच्छ्रुत्वा विहस्य टिट्टिभ आह । भद्रे न युक्तमुक्तं भवत्या । का मात्रा समुद्रस्य यो मम दूषयिष्यति प्रसूतिम् । तद्विश्रब्धात्रैव गर्भं मुञ्च । उक्तं च ।

यः पराभवसंप्राप्तः स्वस्थानं संत्यजेन्नरः ।
तेन चेत्पुत्रिणी माता तद्वन्ध्या केन कथ्यते ॥ ३१३ ॥

१ Having seen a powerful enemy, one should protect himself or hide himself from him ; while those who are powerful should assume the brilliancy of the moon in the *S'arat season* (the bright light of the moon in आश्विन and कार्तिक is well known) शरच्चन्द्रप्रकाशता—शरच्चन्द्रप्रकाशस्य भावः. २ He, who commences hostilities without ascertaining the strength of the enemy meets with a defeat as the sea, *sustained a defeat* at the hands of a टिट्टिभ (a lapwing). ३ In one part of the sea. ४ A couple, a pair. This word is made up of जाया and पति. ५ The time favourable for conception. ६ Had conception, conceived. ७ Near her delivery, about to be confined. आसन्नः प्रसवः यस्याः सा. ब. ८ The laying of eggs. ९ The tide of the sea comes up or reaches. १० Hurt, injure. ११ Free from fear, confident. १२ If a mother is to be called पुत्रिणी (a woman having a Son) by having that son, who being defeated abandons his own place, for what son should she be called barren ? that is, she is barren whose son &c.

तच्छ्रुत्वा समुद्रश्चिन्तयामास । अहो गर्वः पक्षिकीटस्यास्य[1] । अथवा साध्विदमुच्यते ।

उत्क्षिप्य टिट्टिभः पादावास्ते भङ्गभयाद्दिवः ।
स्वचित्तकल्पितो गर्वः कस्य नात्रापि विद्यते[2] ॥ ३१४ ॥

तन्मयास्य प्रमाणं कुतूहलादपि[3] द्रष्टव्यम् । किं ममैषोऽण्डापहारे कृते करिष्यति । इति चिन्तयित्वा स्थितः । अथ प्रसवानन्तरं प्राणयात्रार्थं गतायाष्टिट्टिभ्याः समुद्रो वेलाव्याजेनाण्डान्यपजहार[4] । अथायाता सा टिट्टिभी प्रसवस्थानं शून्यमवलोक्य प्रलपन्ती टिट्टिभमूचे । भो मूर्ख कथितमासीन्मया ते यत्समुद्रवेलयाण्डानां विनाशो भविष्यति तद्दूरतरं व्रजावः परं मूढतयाहंकारमाश्रित्य[5] मम वचनं न करोषि । अथवा साध्विदमुच्यते ।

सुहृदां हितकामानां[6] न करोतीह यो वचः ।
स कूर्म इव दुर्बुद्धिः काष्ठाद्भ्रष्टो विनश्यति ॥ ३१५ ॥

टिट्टिभ आह । कथमेतत् । साब्रवीत् ।

॥ कथा १३ ॥

अस्ति कस्मिंश्चिज्जलाशये कम्बुग्रीवो नाम कच्छपः । तस्य संकटविकटनाम्नी मित्रे हंसजातीये[7] परमस्नेहमाश्रिते । तौ च हंसौ सरस्तीरमासाद्य तेन सहानेकदेवर्षिमहर्षीणां कथाः कृत्वास्तमनवेलायां स्वनीडसंश्रयं[8] कुरुतः ।

---

1 Oh! how great is the pride of this miserable bird! The word कीट at the end of compounds has the sense of contempt. पक्षी एव कीटः, क. 2 The *tittibha* bird lies down with its legs upwards (throwing its legs up) through the fear of the breaking of the sky (to support it): who has no pride conceived in his own mind? This verse is found written as under.—स्वचित्तकल्पितो गर्वः कस्य नाम न विद्यते । उत्क्षिप्य टिट्टिभः पादौ शेते भङ्गभयाद्दिवः ॥ स्वचित्तकल्पित स. त. 3 Let me then see the truth of this out of curiosity at least (if for nothing else). 4 Under the pretext of tide. 5 Having recourse to pride or egotism. 6 He, who does not listen to the advice of friends who are desirous of doing him good, perishes like the foolish tortoise falling down from a piece of wood. हितकामानां. ब. 7 Of the swan-kind. 8 Resorted to or went to their nests for shelter (during night).

अथ गच्छति कालेनावृष्टिवशात्सरः शनैः शनैः शोषमगमत् । ततस्तद्दुःखदुःखितौ तावूचतुः । भो मित्र जम्बालशेषमेतत्सरः संजातं तत्कथं भवान्भविष्यतीति व्याकुलत्वं नो हृदि वर्तते। तच्छ्रुत्वा कम्बुग्रीव आह । भोः सांप्रतं नास्त्यस्माकं जीवितव्यं जलाभावात् । तथाप्युपायश्चिन्त्यतामिति । उक्तं च ।

त्याज्यं न धैर्यं विधुरेपि काले
धैर्यात्कदाचिद्गतिमाप्नुयात्सः ।
यथा समुद्रेपि च पोतभङ्गे
सांयात्रिको वाञ्छति तर्तुमेव ॥ ३१६ ॥

अपरं च । मित्रार्थे बान्धवार्थे च बुद्धिमान्यतते सदा ।
जातास्वापत्सु यत्नेन जगादेदं वचो मनुः ॥ ३१७ ॥

तदानीयतां काचिद्दृढरज्जुर्लघु काष्ठं वाऽन्विष्यतां च प्रभूतजलसनाथं सरो येन मया मध्यप्रदेशे दन्तैर्गृहीते सति युवां कोटिभागयोस्तत्काष्ठं मया सहितं संगृह्य तत्सरो नयथः । तावूचतुः । भो मित्र एवं करिष्यावः परं भवता मौनव्रतेन भाव्यं नो चेत्तव काष्ठात्पातो भविष्यति । तथानुष्ठिते गच्छता कम्बुग्रीवेणाधोभागव्यवस्थितं किंचित्पुरमालोकितम् । तत्र

१ Grieved at his grief. तस्य (कच्छपस्य) दुःखेन दुःखितौ. २ Having only the mud remaining जम्बाल एव शेषः यस्य. ब. ३ How will it fare with you? What will be your state? ४ Anxiety, perplexity. ५ It is not possible for us to live. ६ Even though the times be adverse, one should not give up courage; perhaps through courage one (सः) may obtain success (गति); just as in the sea when a boat is broken, a voyaging merchant wishes only to cross in safety. तर्तुम् = तरितुं or तरीतुं तृ being a *Set* root. ७ A talented man always strives with efforts for the sake of a friend or relative when calamities befall, so says Manu. ८ Full of plentiful water. ९ The middle portion (of the stick) being seized with the teeth. १० At the two ends. ११ The Present is used for the Future. नयथः = नेष्यथः. १२ One who has taken upon himself the vow of silence. मौनं व्रतं यस्य. ब. १३ By Kambugriva who was going or rather being carried by the two swans १४ Situated, lying.

ये पौरजनैस्तथा नीयमानं विलोक्य सविस्मयमिदमूचुः। अहो चक्राकारं किमपि पक्षिभ्यां नीयते। पश्यत पश्यत। अथ तेषां कोलाहलमाकर्ण्य कम्बुग्रीव आह। भोः किमेष कोलाहल इति वक्तुमना अर्धोक्ते पतितः पौरैः खण्डशः कृतश्च। अतोऽहं ब्रवीमि सुहृदां हितकामानामिति।

तथा च। अनागतविधाता च प्रत्युत्पन्नमतिस्तथा।
द्वावेतौ सुखमेधेते यद्भविष्यो विनश्यति॥ ३१८॥

टिट्टिभ आह। कथमेतत्। साब्रवीत्।

॥ कथा १४ ॥

कस्मिंश्चिज्जलाशयेऽनागतविधाता प्रत्युत्पन्नमतिर्यद्भविष्यश्चेति त्रयो मत्स्याः सन्ति। अथ कदाचित्तं जलाशयं दृष्ट्वागच्छद्भिर्मत्स्यजीविभिरुक्तं यदहो बहुमत्स्योऽयं ह्रदः कदाचिदपि नास्माभिरन्वेषितः। तदद्याहारवृत्तिः संजाता संध्यासमयश्च संवृत्तस्ततः प्रभातेऽत्रागन्तव्यमिति निश्चयः। अतस्तेषां तत्कुलिशपातोपमं वचः समाकर्ण्यानागतविधाता सर्वान्मत्स्यानाहूयेदमूचे। अहो श्रुतं भवद्भिर्यन्मत्स्यजीविभिरभिहितम्। तद्रात्रावपि किंचिद्गम्यतां समीपवर्ति सरः। उक्तं च।

अशक्तैर्बलिनः शत्रोः कर्तव्यं प्रपलायनम्।
संश्रितव्योऽथवा दुर्गो नान्या तेषां गतिर्भवेत्॥ ३१९॥

तन्नूनं प्रभातसमये मत्स्यजीविनोऽत्र समागम्य मत्स्यसंक्षयं करिष्यन्ति। एतन्मम मनसि वर्तते। तन्न युक्तं सांप्रतं क्षणमप्यत्रावस्थातुम्। उक्तं च।

---

1 Having the form of a wheel, something like a wheel. 2 Noise, uproar. 3 Wished or began to say. 4 Desirous of saying. The words मनस् or काम are affixed to the infinitives of verbs after dropping the nasal in the sense of "*desirous of*" &c. 5 Being half uttered. 6 अनागतविधाता (he who provides for what is not come, that is, provident) and प्रत्युत्पन्नमति (he who is ready-witted)—these two happily prosper, while यद्भविष्य (he who says what is to happen will happen, that is, a fatalist) perishes. अनागतविधाता=अनागतस्य विधाता. ष. त. प्रत्युत्पन्नमतिः—प्रत्युत्पन्ना मतिर्यस्य. ब. 7 Fishermen. 8 Containing or full of many fishes. ब. 9 A pond, a lake. 10 The means of our subsistence. ष. त. 11 Resembling the fall or stroke of adamant. कुलिशपातेन उपमा यस्य तत्. ब. 12 Even this very night. 13 Those, who are weak, should run away from a powerful enemy or should take shelter in a fort; they have no other alternative. संश्रितव्यः=संश्रयितव्य.

[1]विद्यमाना गतिर्येषामन्यत्रापि सुखावहा।
ते न पश्यन्ति विद्वांसो देशभङ्गं कुलक्षयम्॥ ३२०॥

तदाकर्ण्य प्रत्युत्पन्नमतिः प्राह। अहो सत्यमभिहितं भवता। ममाप्य[2]भीष्टमेतत्। तदन्यत्र गम्यतामिति। उक्तं च।

[3]परदेशभयाद्भीता बहुमाया नपुंसकाः।
स्वदेशे निधनं यान्ति काकाः कापुरुषा मृगाः॥ ३२१॥

[4]यस्यास्ति सर्वत्र गतिः स कस्मात्स्वदेशरागेण हि याति नाशम्।
तातस्य कूपोऽयमिति ब्रुवाणाः क्षारं जलं कापुरुषाः पिबन्ति॥ ३२२॥

अथ तत्समाकर्ण्य [5]प्रोच्चैर्विहस्य यद्भविष्यः प्रोवाच। अहो न भवद्भ्यां मन्त्रितं सम्यगेतदिति यतः किं [6]वाङ्मात्रेणापि तेषां [7]पितृपैतामहिकमेतत्सरस्त्यक्तुं युज्यते। तद्यद्या[8]युःक्षयोऽस्ति तदन्यत्र गतानामपि मृत्युर्भवि[9]ष्यत्येव। उक्तं च।

[10]अरक्षितं तिष्ठति दैवरक्षितं सुरक्षितं दैवहतं विनश्यति।
जीवत्यनाथोऽपि वने विसर्जितः कृतप्रयत्नोऽपि गृहे विनश्यति॥ ३२३॥

---

१ Those wise men, who have a safe resort elsewhere, do not see the destruction of their country or family (by remaining where they are). सुखावहा—सुखमावहतीति. उप. २ Desirable, desired. ३ Those, who are very foolish and impotent, and also crows, mean persons and deer, being afraid of the difficulties of a foreign country, die in their own. ४ Why should he, who has access everywhere, bring down destruction upon himself through love for his own country; (for) it is the mean who drink salt water saying that the well (from which they drink) belongs to their father or is ancestral. ५ Very loudly. प्र+उच्चैः. ६ Simply by hearing what they said. ७ Belonging to the father and grandfather, that is, ancestral, hereditary. ८ If our lives are at an end. ९ Will certainly happen. एव has here the force of *surely, as a matter of course.* १० That which is unprotected stands protected by fate and that which is well-guarded, is destroyed when struck by fate; a person, though deserted in a forest without any help, lives, while one for whom great efforts are made does not live even at home. कृतप्रयत्नः—कृताः प्रयत्नाः यस्मै. ब.

तदहं न यास्यामि । भवद्भ्यां च यत्प्रतिभाति तत्कार्यम् । अथ तस्य न निश्चयं ज्ञात्वानागतविधाता प्रत्युत्पन्नमतिश्च निष्क्रान्तौ सह परिजनेन । अथ प्रभाते तैर्मत्स्यजीविभिर्जालैस्तज्जलाशयमालोड्य यद्भविष्येण सह जलाशयो निर्मत्स्यतां नीतः । अतोऽहं ब्रवीम्यनागतविधाता चेति । तच्छ्रुत्वा टिट्टिभ आह । भद्रे किं मां यद्भविष्यसदृशं संभावयिष्यसि । तत्पश्य मे बुद्धिप्रभावं यावदेनं दुष्टसमुद्रं शोषयामि । टिट्टिभ्याह । अहो केस्ते समुद्रेण सह विग्रहः । तन्न युक्तमस्योपरि कोपं कर्तुम् । उक्तं च यतः ।

पुंसामसमर्थानामुपद्रवायात्मनो भवेत्कोपः ।
पिठरं क्वथदतिमात्रं निजपार्श्वानेव दहतितराम् ॥ ३२४ ॥

तथा च । अविदित्वात्मनः शक्तिं परस्य च समुत्सुकः ।
गच्छन्नभिमुखो नाशं याति वह्नौ पतङ्गवत् ॥ ३२५ ॥

टिट्टिभ आह । प्रिये मा मैवं वद । येषामुत्साहशक्तिर्भवति ते स्वल्पा अपि गुरूनपि विक्रमन्ते । उक्तं च ।

विशेषात्परिपूर्णस्य याति शत्रोरमर्षणः ।
आभिमुख्यं शशाङ्कस्य यथाद्यापि विधुंतुदः ॥ ३२६ ॥

तथा च । प्रमाणादधिकस्यापि गण्डश्याममदच्युतेः ।
पदं मूर्ध्नि समाधत्ते केसरी मत्तदन्तिनः ॥ ३२७ ॥

---

१ What appears (proper). २ त जलाशयं. कर्म. ३ Having churned or stirred (abs. of the caus. of लुड् 1 P. with आ). ४ Rendered fish-less, not a fish was left. ५ How can you wage war with the sea? that is there is great disparity between you and the sea. ६ The anger of those people who are weak, becomes injurious to their own selves; a pot when it boils excessively burns its own sides all the more (and nothing else). ७ This has been already translated. See verse 237. ८ The strength of energy. ९ Conquer, overcome. १० A passionate man faces an enemy especially when he is full (prepared at all points), just as the demon Rāhu (विधुंतुद) attacks the full-moon even now. विधुं तुदतीति. उप. He who troubles विधु the moon शशांक:—शशः अंकः यस्य. व. ११ The lion places his foot on the head of an intoxicated elephant from the temples of which brown juice is dropping down, and which is larger in size. गण्डश्याममदच्युतेः ought to have been गण्डच्युतश्याममदः.—It is an irregular Bahu. Comp.

तथा च । [1]बालस्यापि रवेः पादाः पतन्त्युपरि भूभृताम् ।
तेजसा सह जातानां वयः कुत्रोपयुज्यते ॥ ३२८ ॥

तदनया चञ्च्वास्य सकलं तोयं शुष्कस्थलतां[2] नयामि । टिट्टिभ्याह । भोः कान्त यत्र जाह्नवी नवनदीशतानि[3] गृहीत्वा नित्यमेव प्रविशति तथा सिन्धुश्च तत्कथं त्वमष्टादशनदीशतैः[4] पूर्यमाणं तं विप्रुड्वाहिन्या[5] चञ्च्वा शोषयिष्यसि । तत्किमश्रद्धेयेनोक्तेन । टिट्टिभ आह । प्रिये ।

[6]अनिर्वेदः श्रियो मूलं चञ्चुर्मे लोहसंनिभा ।
अहोरात्राणि दीर्घाणि समुद्रः किं न शुष्यति ॥ ३२९ ॥
[7]दुरधिगमः परभागो यावत्पुरुषेण पौरुषं न कृतम् ।
जयति तुलामधिरूढो भास्वानपि जलदपटलानि ॥ ३३० ॥

टिट्टिभ्याह । यदि त्वयावश्यं समुद्रेण सह वैरानुष्ठानं कार्यं तदन्यानपि विहगानाहूय सुहृज्जनसहित[9] एवं समाचर । उक्तं च ।

[10]बहूनामप्यसाराणां समवायो हि दुर्जयः ।
तृणैरावेष्ट्यते रज्जुर्यया नागोऽपि बध्यते ॥ ३३१ ॥

1 The rays even of the young sun fall on the mountains (the feet even of a young boy fall on the heads of kings). What is the use or need of the age of those who are born with lustre पाद् (1) ray, (2) foot. भूभृत् (1) mountain, (2) king. 2 Shall make it dry ground; shall dry it up. 3 Nine hundred rivers नवनदीशतानि–नदीनां शतानि. 4 Eighteen hundred rivers. 5 Carrying only a drop. विप्रुष् वहतीति. 6 Absence of dejection is the root of prosperity (Cf the English ' A faint heart never won a fair lady '), my beak is as hard as iron, will not then the sea be dry (if I work) for long days and nights ? लोहसंनिभा. नृ. न. अहोरात्र is usually used in the masculine gender. 7 Superior excellence or merit is difficult to get only so long as a person has not put forth his manly power; even the sun dispels (lit conquers) multitudes of clouds when it enters the sign Libra of the zodiac The other meaning of तुलामधिरुह is to be balanced against : when a person is balanced against another, he can easily conquer him. दुरधिगम=दुःखेन अधिगन्तुं शक्यः; परभागः—परश्चासौ भागः. क. It is equal to समपद. 8 Declaration of open hostility. 9 Accompanied with your friends or relations. 10 The union even of many trifling is hard to overcome. (for) a rope is made up of grass whereby even an elephant is tied. असाराणां understand वस्तूनां. असार–नास्ति सारं यस्मिन्, ब

तथा च । [1]चटकाकाष्ठकूटेन मक्षिकादर्दुरैस्तथा ।
महाजनविरोधेन कुञ्जरः प्रलयं गतः ॥ ३३२ ॥
टिट्टिभ आह । कथमेतत् । सा प्राह ।

॥ कथा १५ ॥

कस्मिंश्चिद्वनोद्देशे चटकदंपती तमालतरुकृतनिलया[2] प्रतिवसतः । अथ गच्छता कालेन संततिरभवत्[3] । अन्यस्मिन्नहनि प्रमत्तो गजः कश्चित्तं तमालवृक्षं घर्मार्तश्छायार्थी[4] समाश्रितः । ततो मदोत्कर्षात्[5] तां तस्य शाखां चटकाक्रान्तां[6] पुष्कराग्रेणाकृष्य[7] बभञ्ज । तस्या भङ्गेन चटकाण्डानि सर्वाणि विशीर्णानि[8] । आयुःशेषतया च चटका कथमपि प्राणैर्न वियुक्ता । अथ साण्डभङ्गाभिभूता[9] प्रलापान्कुर्वाणा न कथंचिद्[10] तिष्ठत् । अत्रान्तरे तस्यास्तान्प्रलापाञ्श्रुत्वा काष्ठकूटो नाम पक्षी तस्याः परमसुहृत्तद्दुःखदुःखितोऽभ्येत्य तामुवाच । भवति किं वृथा प्रलापेन । उक्तं च ।

[11]नष्टं मृतमतिक्रान्तं नानुशोचन्ति पण्डिताः ।
पण्डितानां च मूर्खाणां विशेषोयं यतः स्मृतः ॥ ३३३ ॥
तथा च । [12]अशोच्यानीह भूतानि यो मूढस्तानि शोचति ।
स दुःखे लभते दुःखं द्वावनर्थौ निषेवते ॥ ३३४ ॥
अन्यच्च । [13]श्लेष्माश्रु बान्धवैर्मुक्तं प्रेतो भुङ्क्ते यतोवशः ।
तस्मान्न रोदितव्यं हि क्रियाः कार्याः प्रयत्नतः ॥ ३३५ ॥

१ An elephant was destroyed by the hostility with many people (creatures), viz., the sparrow, the wood-pecker, the fly and the frog. Properly speaking the first two padas ought to be चटका काष्ठकूटाभ्यां and मक्षिकादर्दुराभ्यां respectively. २ Who had made their nests on a Tamála tree. तमालतरौ कृतः निलयः याभ्याम्. ब. ३ Progeny, offspring. ४ Desirous of sitting in the shade. ५ Through excess of pride. ६ Occupied or inhabited by the sparrows. ७ Trunk. ८ Hurt, injured, broken. P. P. of शॄ 9 P. with वि. ९ Overcome with sorrow for the loss of her eggs. १० Never ceased, continued lamenting. ११ The wise do not bewail what is lost, what is dead and what is past. This is, therefore, said to be the difference between wise men and fools (who do bewail &c). १२ In this world all created things (भूतानि) are not fit to be lamented, and that fool who bewails their loss, gets one calamity in another and thus suffers two. १३ Since the helpless dead person has to eat the phlegmatic tears dropped down (in weeping) by the relatives, no one should weep, but perform all the funeral rites with all efforts.

चटका प्राह । अस्त्वेतत् । परं दुष्टगजेन मदान्मम संतानक्षयः कृतः । तद्यदि मम त्वं सुहृत्सत्यस्तदस्य गजापसदस्य कोपि वधोपायश्चिन्त्यः । यस्यानुष्ठानेन मे संततिनाशदुःखमपसरति । उक्तं च ।

आपदि येनोपकृतं येन च हसितं दशासु चान्यासु ।
उपकृदपकृदपि च तयोर्यस्तं पुरुषं परं मन्ये ॥ ३३६ ॥

काष्ठकूट आह । भवति सत्यमभिहितं भवत्या । उक्तं च ।

स सुहृद्व्यसने यःस्यात्स पुत्रो यस्तु भक्तिमान् ।
स भृत्यो यो विधेयज्ञः सा भार्या यत्र निर्वृतिः ॥ ३३७ ॥

तत्पश्य मे बुद्धिप्रभावम् । परं ममापि सुहृद्भूता वीणारवा नाम मक्षिकास्ति । तत्तामाहूयागच्छामि येन स दुरात्मा दुष्टगजो हन्यते । अथासौ सह चटकया मक्षिकामासाद्य प्रोवाच । भद्रे ममेयं चटका केनचिद्दुष्टगजेन पराभूताण्डस्फोटनेन । तत्तस्य वधोपायमनुतिष्ठतो मे साहाय्यं कर्तुमर्हसि । मक्षिकाप्याह । भद्र किमुच्यतेऽत्र विषये । उक्तं च ।

पुनःप्रत्युपकाराय मित्राणां क्रियते प्रियम् ।
यत्पुनर्मित्रमित्रस्य कार्यं मित्रैर्न किं कृतम् ॥ ३३८ ॥

---

१ The destruction of my offspring. २ The lowest of elephants. अपसद as a latter part of com-pounds has the sense of the "lowest", "worst" of &c. ३ Grief consequent on the loss of my young ones. ४ Goes away, is removed. ५ I consider that to be the best man who confers benefits on him who has done him good in adversity, and injury to him who has laughed at him in his extreme circumstances. For अन्यासु there is another reading as विषमासु. उपकृत् and अपकृत् Pre. P. from कृ with उप and अप having for their objects तयोः. परं=परमं =श्रेष्ठं. ६ He is a friend in reality who is friendly in need, he is a son who is devoted (to his parents), he is a servant who is obedient (lit. knowing what to do) and she is a wife from whom one gets happiness. सुहृद् &c. Cf. the English proverb—"A friend in need is a friend indeed." ७ Having the sound of a lute. वीणाया इव रवः यस्याः. ब. ८ Having invited or brought. ९ My friend. १० Breaking or destroying. ११ Doing, carrying out, executing. १२ What more need you say on the subject? that is, what you have said is enough to induce me to assist you. १३ Any good is done to friends for an obligation in return; that business which is done for the friend of a friend–is that not said to be done by friends?

सत्यमेतत्। परं ममापि भेको मेघनादो नाम मित्रं तिष्ठति। तमप्याहूय यथोचितं कुर्मः। उक्तं च।

[1]हितैः साधुसमाचारैः शास्त्रज्ञैर्मतिशालिभिः।
कथंचिन्न विकल्पन्ते विद्वद्भिश्चिन्तिता नयाः॥ ३३९॥

अथ ते त्रयोऽपि गत्वा मेघनादस्याग्रे पूर्वं वृत्तान्तं निवेद्य तस्थुः। अथ स प्रोवाच। [2]कियन्मात्रो गजो वराको महाजनस्य कुपितस्य। तन्मदीयो मन्त्रः कर्तव्यः। मक्षिके त्वं गत्वा मध्याह्नसमये तस्य मदोत्कटस्य गजस्य कर्णे [3]वीणारवसदृशं शब्दं कुरु येन [4]श्रवणसुखलालसो निमीलितनयनो भवति। ततश्च काष्ठकूटचञ्च्वा स्फोटितनयनोऽन्धीभूतस्तृषार्तो मम [5]गर्ततटाश्रितस्य [6]सपरिकरस्य शब्दं श्रुत्वा जलाशयं मत्वा अभ्येति। ततो गर्तमासाद्य पतिष्यति [7]पञ्चत्वं यास्यति चेति। एवं [8]समवायः कर्तव्यो यथा [9]वैरसाधनं भवति। अथ तथानुष्ठिते स मत्तगजो [10]मक्षिकागेयश्रवणसुखान्निमीलितनयनः पश्चात्[11]काष्ठकूटहृतचक्षुर्मध्याह्नसमये भ्राम्यन्मण्डूकशब्दानुसारी गच्छन्महतीं गर्तामासाद्य पतितो मृतश्च। अतोऽहं ब्रवीमि चटकाकाष्ठकूटेनेति।

टिट्टिभ आह। भद्र एवं भवतु। [12]सुहृद्वर्गसमुदायेन समुद्रं शोषयिष्यामीति निश्चित्य बकसारसमयूरादीन्समाहूय प्रोवाच। भोः पराभूतोऽहं समुद्रेणाण्डकापहारेण तच्चिन्त्यतामस्य शोषणोपायः ते संमन्त्र्य प्रोचुः [13]अशक्ता वयं समुद्रशोषणे तत्किं वृथा प्रयासेन। उक्तं च।

---

१ The plans designed in consultation with friends good conduct, versed in Shastras, endowed with tale and learned, do not change, or, are safe. साधुसमाचार. सा समाचारः यस्य. ब. शालिन् as a latter part of compounds mea endowed with or possessed of. २ Of what account is a po elephant to many creatures got angry, that is, th can easily defeat him. ३ Resembling the sound of lute. ४ Ardently desirous of the pleasure of the ear. त. ५ A hollow; a hole. ६ Accompanied with retinue. परिकरेण सहितस्य. ब. ७ Will die. पंचत्वं या or गम् mea to separate into the five elements, and thus to die. Union. ९ Revenge will be taken or accomplished. Hearing the song of the fly. ११ Whose eyes were tak out by the wood-pecker. १२ With a multitude of frien &c. १३ We are unable to dry up the sea.

अबलः प्रोन्नतं शत्रुं यो याति मदमोहितः ।
युद्धार्थं स निवर्तेत शीर्णदन्तो गजो यथा ॥ ३४० ॥

तदस्माकं स्वामी वैनतेयोस्ति । तत्तस्मै सर्वमेतत्परिभवस्थानं निवेद्यते येन स्वजातिपरिभवकुपितो वैरानृण्यं गच्छति । अथवात्रावलेपं करिष्यति तथापि नास्ति वो दुःखम् । उक्तं च ।

सुहृदि निरन्तरचित्ते गुणवति भृत्येनुवर्तिनि कलत्रे ।
स्वामिनि शक्तिसमेते निवेद्य दुःखं सुखीभवति ॥ ३४१ ॥

तद्यामो वैनतेयसकाशं यतोसावस्माकं स्वामी । तथानुष्ठिते सर्वे ते पक्षिणो विवर्णवदना बाष्पपूरितदृशो वैनतेयसकाशमुपेत्य करुणस्वरेण फूत्कर्तुमारब्धाः । अहो अब्रह्मण्यमब्रह्मण्यम् । अधुना सदाचारस्य टिट्टिभस्य भवति नाथे सति समुद्रेणाण्डान्यपहृतानि । तत्प्रनष्टमधुना पक्षिकुलम् । अन्येपि स्वेच्छया समुद्रेण व्यापादयिष्यन्ते । उक्तं च ।

एकस्य कर्म संवीक्ष्य करोत्यन्योपि गर्हितम् ।
गतानुगतिको लोको न लोकः पारमार्थिकः ॥ ३४२ ॥

१ That weak person who through folly attacks a powerful enemy, will come back (shorn of his pride like an elephant &c.). २ Let us report all this humiliation to him. ३ Will avenge the injury (lit. will be free from the debt of enmity &c.). ४ Or if he should show himself too proud to sympathize with us. ५ A man becomes happy by communicating the cause of his grief to a friend whose heart is the same with his (an intimate friend), a meritorious servant, obedient wife and a master who is able. निरंतरचित्ते–निरंतरं चित्तं यस्य तस्मिन्. ब. ६ So let us go. ७ With the eyes filled with tears. बाष्पैः पूरिताः दृशो येषां. ८ Alas! Alas! God forbid! ९ Your honour being the lord or king. Having seen a censurable action done by one man, another does it; people are blind followers of customs and not the lovers of truth. गतानुगतिक=गतं अनुगच्छतीति following the gones. पारमार्थिक adj. from परमार्थ the higest truth.

तथा च। चाटतस्करदुर्वृत्तैस्तथा साहसिकादिभिः।
पीड्यमानाः प्रजा रक्ष्याः कूटच्छद्मादिभिस्तथा॥ ३४३॥
प्रजानां धर्मषड्भागो राज्ञो भवति रक्षितुः।
अधर्मादपि षड्भागो जायते यो न रक्षति॥ ३४४॥
प्रजापीडनसंतापात्समुद्भूतो हुताशनः।
राज्ञः श्रियं कुलं प्राणान्नादग्ध्वा विनिवर्तते॥ ३४५॥
राजा बन्धुरबन्धूनां राजा चक्षुरचक्षुषाम्।
राजा पिता च माता च सर्वेषां न्यायवर्तिनाम्॥ ३४६॥
फलार्थी पार्थिवो लोकान्पालयेद्यत्नमास्थितः।
दानमानादितोयेन मालाकारोऽङ्कुरानिव॥ ३४७॥
यथा बीजाङ्कुरः सूक्ष्मः प्रयत्नेनाभिरक्षितः।
फलप्रदो भवेत्काले तद्वल्लोकः सुरक्षितः॥ ३४८॥
हिरण्यधान्यरत्नानि यानानि विविधानि च।
तथान्यदपि यत्किंचित्प्रजाभ्यः स्यान्नृपस्य तत्॥ ३४९॥

अथैव गरुडः समाकर्ण्य तद्दुःखदुःखितः कोपाविष्टश्च व्यचिन्तयत्। सत्यमुक्तमेतैः पक्षिभिः। अहो तदद्य गत्वा तं समुद्रं शोषयामः। एवं चिन्तयतस्तस्य विष्णुदूतः समागत्याह। भो गरुत्मन्भगवता नारायणेनाहं

१ Subjects should be protected from being persecuted by cheats, thieves, ill-behaved persons, adventurers and also by means of falsehood and other things. कूटच्छद्मानि आदीनि येषां तैः ब. २ A king who protects his subjects, gets one-sixth part of their religious merits ; he also gets one-sixth part of their irreligion when he does not protect them. षड्भागः=षष्ठः भागः क. Instead of अधर्मादपि one would have expected अधर्मस्यापि. ३ The fire arising from the pain of the oppression of the subjects, does not return (become cool) without burning the wealth, family and life of the king. संतापः also means heat, fire. ४ A king is the brother of the brotherless, and eye of the eyeless ; a king is the father and mother of all those who act justly. अबंधु and अचक्षुस् are ब. न्यायेन वर्तते इति. उप. ५ This verse is nearly the same as 220. ६ This is exactly equal to verse 223. ७ This is nearly equal to 224. ८ Let us dry; we shall dry.

तवं पार्श्वे प्रेषितः[1]। देवैकार्येण[2] श्रीभगवानमरावत्यां यास्यतीति। तत्त्सत्व-रमागम्यताम्। तच्छ्रुत्वा गरुडः साभिमानं[3] प्राह। भो दूत किं मया कुभृ-त्येन भगवान्करिष्यति। तद्गत्वा तं वद यदन्यो भृत्यो वाहनायास्मत्स्थाने[4] क्रियताम्। मदीयो नमस्कारो वाच्यो[5] भगवतः। उक्तं च।

[6]यो न वेत्ति गुणान्यस्य न तं सेवेत पंडितः।
न हि तस्मात्फलं किंचित्सुकृष्टादूषरादिव॥ ३५०॥

दूत आह। भो वैनतेय कदाचिदपि भगवन्तं प्रति त्वया नैतदभिहित-मदृक्। तत्कथय किं ते भगवतापमानस्थानं[7] कृतम्। गरुड आह। भग-वदाश्रयभूतेन[8] समुद्रेणास्मट्टिट्टिभाण्डान्यपहृतानि। तद्यदि निग्रहं[9] न करो-ति तदहं भगवतो न भृत्य इत्येष निश्चयस्त्वया वाच्यः। तद्द्रुततरं गत्वा भवता भगवतः समीपे गन्तव्यम्। अथ दूतमुखेन प्रणयकुपितं[10] वैनतेयं विज्ञाय भगवांश्चिन्तयामास। अहो स्थाने[11] कोपो वैनतेयस्य। तत्स्वयमेव गत्वा संमानपुरःसरं तमानयामि। उक्तं च।

[12]भक्तं शक्तं कुलीनं च न भृत्यमपमानयेत्।
पुत्रवल्लालयेन्नित्यं य इच्छेच्छ्रेय आत्मनः॥ ३५१॥

अन्यच्च। [13]राजा तुष्टोपि भृत्यानामर्थमात्रं प्रयच्छति।
ते तु संमानमात्रेण प्राणैरप्युपकुर्वते॥ ३५२॥

इत्येवं संप्रधार्य रुक्मपुरे वैनतेयसकाशं सत्वरमगमत्। वैनतेयोपि गृहागतं भगवन्तमवलोक्य त्रपाधोमुखः[14] प्रणम्योवाच। भगवन् त्वदाश्रयोन्मत्तेन[15] समुद्रेण मम भृत्यस्याण्डान्यपहृत्य मेपमानस्थानं कृतम्। परं युष्मल्लज्जयाहं[16] तं स्थलतां न नयामीति यतः स्वामिभयाच्छुनोपि प्रहारो न दीयते। उक्तं च।

१ Have been sent to you. २ On an errand of the gods. ३ With pride or egotism. अभिमानेन सह यथा तथा. अव्य. ४ Be appointed in my place. ५ Let my humble respects be paid to the god ? Give him my respects. ६ This verse is nearly equal to 47. ७ The place or object of insult or disrespect; cause of disrespect. ८ Being a sheltering place, that is, the vehicle or seat of &c. ९ Punishment or chastisement. १० Angry through love or affection. ११ In the proper place; right, just. १२ He, who wishes for his own welfare, should never disrespect a servant who is devoted, able and nobly-born, but should treat him affectionately like a son. १३ This verse is equal to 83. १४ With the head hung down through shame. १५ Intoxicated or grown insolent by the fact of his being your seat or abode. १६ Through fear of bringing shame upon you.

[1]येन स्याल्लघुता वाथ पीडा चित्ते प्रभोः क्वचित् ।
प्राणत्यागेपि तत्कर्म न कुर्यात्कुलसेवकः ॥ ३५३ ॥

तच्छ्रुत्वा भगवानाह । भो वैनतेय सत्यमभिहितं भवता । उक्तं च ।

[2]भृत्यापराधजो दण्डः स्वामिनो जायते यतः ।
तेन लज्जापि तस्योत्था न भृत्यस्य तथा पुनः ॥ ३५४ ॥

तदागच्छ येनाण्डानि समुद्रादादाय टिट्टिभं संभावयावोमरावतीं च गच्छावः । तथानुष्ठिते समुद्रो भगवता निर्भर्त्स्य[3]ग्नेयं[4] शरं संधाया[5]भिहितः । भोदुरात्मन्दीयन्तां टिट्टिभाण्डानि नो चेत्स्थलतां त्वां नयामि । ततः समुद्रेण सभयेन टिट्टिभाण्डानि तानि प्रदत्तानि टिट्टिभेनापि भार्यायै समर्पितानि ।

अतोहं ब्रवीमि शत्रोर्बलमविज्ञायेति ।

तस्मात्पुरुषेणो[6]द्यमो न त्याज्यः । तदाकर्ण्य संजीवकस्तमेव भूयोपि पप्रच्छ । भो मित्र कथं ज्ञेयो मयासौ दुष्टबुद्धिरिति । इयन्तं कालं याव[7]दुत्तरोत्तरस्नेहेन प्रसादेन[8] चाहं दृष्टो न कदाचित्तद्विकृतिर्दृष्टा[9] । तत्कथ्यतां येनाहमात्मरक्षार्थं तद्वधाय च यते । दमनक आह । भद्र किमत्र ज्ञेयम् । एष ते प्रत्ययः । यदि रक्तनेत्र[10]स्त्रिशिखां[11] भ्रुकुटिं दधानः सृक्किणी परिलेलिहत्त्वां दृष्ट्वा भवति तदुष्टबुद्धिरन्यथा सुप्रसाद[12]श्चेति । तदाज्ञापय माम् । स्वाश्रयं प्रति गच्छामि । त्वया च यथायं मन्त्रभेदो न भवति तथा कार्यम् यदि निशामुखं[13] प्राप्य गन्तुं शक्नोषि तद्देशत्यागः कार्यः । यतः ।

[14]त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ॥ ३५५ ॥

---

१ One who is a hereditary servant, should not do that action, which will detract from the merit, or cause pain to the mind of the master, even though he (servant) be at the point of death. २ Since punishment is awarded to a master for the offences of his servant, the shame thereof should also be his and not of the servant. तस्योत्था = भृत्योत्था—भृत्यात् उत्था proceeding from the actions of the servant. ३ Being scolded or taken to task. ४ Belonging to or presided over by fire. ५ Having aimed. ६ Industry, effort. ७ Up to this time. ८ I have been treated with increasing affection and favour. ९ Seen, found (by me). १० With red eyes. रक्ते नेत्रे यस्य सः. ब. ११ Contracting his eye-brows into three wrinkles (as a sign of anger). १२ Well-pleased. १३ Evening (lit. the face of the night). १४ One should sacrifice one individual for the good of the family, the family for the sake of the village, and the village for the good of the country, and the whole earth for one's own sake.

¹आपदर्थे धनं रक्षेद्दारान्रक्षेद्धनैरपि ।
आत्मानं सततं रक्षेद्दारैरपि धनैरपि ॥ ३५६ ॥

²बलवताभिभूतस्य विदेशगमनं तदनुप्रवेशो वा नीतिः । तद्देशत्यागः कार्यः । अथवात्मा सामादिभिरुपायैरभिरक्षणीयः । उक्तं च ।

³अपि पुत्रकलत्रैर्वा प्राणान्रक्षेत पण्डितः ।
विद्यमानैर्यतस्तैः स्यात्सर्वं भूयोपि देहिनाम् ॥ ३५७ ॥

तथा च । ⁴येन केनाप्युपायेन शुभेनाप्यशुभेन वा ।
उद्धरेद्दीनमात्मानं समर्थो धर्ममाचरेत् ॥ ३५८ ॥

⁵यो मायां कुरुते मूढः प्राणत्यागे धनादिके ।
तस्य प्राणाः प्रणश्यन्ति तैर्नष्टैर्नष्टमेव तत् ॥ ३५९ ॥

एवमभिधाय दमनकः करटकसकाशमगमत् । करटकोपि तमायान्तं दृष्ट्वा प्रोवाच । भद्र किं कृतं तत्र भवता । दमनक आह । मया तावन्नीतिबीजनिर्वापणं कृतं परतो दैवविहितायत्तम । उक्तं च यतः ।

⁷पराङ्मुखेपि दैवेत्र कृत्यं कार्यं विपश्चिता ।
आत्मदोषविनाशाय स्वचित्तस्तम्भनाय च ॥ ३६० ॥

---

१ One should save wealth against the time of difficulty, save the life of the wife, even at the sacrifice of wealth, and should always save himself even at the sacrifice of both wife and wealth. २ It is a politic step that when a man is defeated by a powerful person, he should either go to a foreign country or accommodate himself to his whims and thus gain him over. ३ A wise man should save his life even at the sacrifice of his son and wife, since it (life) being in existence, men will again obtain every thing (lost before). ४ By any remedy whatever, either fair or foul, one should save his poor soul, (for) one who is prosperous can be virtuous. ५ That fool who uses tricks &c to preserve his wealth and other things at the time of death, loses his life and that (life) being lost, everything else is (of course) lost. तैर्नष्टैः—Is an example of the Instrumental absolute in Sanskrit. ६ The sowing of the seeds of policy. • Everything further depends on the will of Fate दैवविहित=दैवविधान or विधि–what is ordained by Fate. दैवविहित आयत्तम्. स. ७ Even though destiny be adverse, a wise man should do his duty here, to prevent any blame being attached to himself, and to stop the yearning of his heart. आत्मदोष would be blame at the hands of others if he be idle, and स्वचित्तस्तंभनं–stopping the heart, *i. e.*, the desire of the heart.

तथा च। उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
दैवं हि दैवमिति कापुरुषा वदन्ति।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोत्र दोषः॥ ३६१॥

करटक आह। तत्कथय कीदृक्त्वया नीतिबीजं निर्वापितम्। सोब्रवीत्। मयान्योन्यं ताभ्यां मिथ्याप्रजल्पनेन भेदस्तथा विहितो यथा भूयोपि मन्त्रयन्तावेकस्थानस्थितौ न पश्यसि। करटक आह। अहो न युक्तं भवता विहितं यत्परस्परं तौ स्नेहार्द्रहृदयौ सुखाश्रयौ कोपसागरे प्रक्षिप्तौ। उक्तं च।

अविरुद्धं सुखस्थं यो दुःखमार्गे नियोजयेत्।
जन्मजन्मान्तरे दुःखी स नरः स्यादसंशयं॥ ३६२॥

अन्यत् त्वं यद्भेदमात्रेणापि तुष्टस्तदप्ययुक्तं यतः सर्वोपि जनो विरूपकरणे समर्थो भवति नोपकर्तुम्। उक्तं च।

घातयितुमेव नीचः परकार्यं वेत्ति न प्रसाधयितुम्।
पातयितुमेव शक्तिर्नाखोरुद्धर्तुमन्नपिटम्॥ ३६३॥

दमनक आह। अनभिज्ञो भवान्नीतिशास्त्रस्य तेनैतद्ब्रवीषि। उक्तं च यतः।

---

१ The goddess of wealth resorts to that excellent man who is industrious; it is the cowardly that say that Fate is fate; that is, that which is destined to happen, will happen; having put down fate, put forth your manly power to the best of your abilities; if any thing does not succeed when efforts are made for its accomplishment, what fault is there?, *i. e.* we are not to blame. पुरुषसिंह—पुरुष सिंह इव. क. २ Has reference to भेदः. ३ By making false statements to them. ४ Breach, rupture. ५ That you will not see them in one place consulting with each other. ६ Friendly disposed towards each other. ७ Living in happiness. ८ There is no doubt that the man, who directs to a path of misery a man who is not against any body and is in happiness, will be miserable in every birth or existence. सुखस्थं=सुखे तिष्ठतीति. उप. जन्मजन्मांतरे–in this and another birth. अस्मिन् जन्मनि अन्यस्मिंश्च. ९ Satisfied with merely having brought about a rupture between them. १० In doing what is evil or undesirable. ११ A wicked person knows only how to spoil other's business and not to accomplish it; a mouse has strength only to throw down a basket of food and not to lift it up.

जातमात्रं न यः शत्रुं व्याधिं च प्रशमं नयेत् ।
महाबलोपि तेनैव वृद्धिं प्राप्य स हन्यते ॥ ३६४ ॥

तच्छत्रुभूतोयमस्माकं [2]मन्त्रिपदापहरणात् । उक्तं च ।

[3]पितृपैतामहं स्थानं यो यस्यात्र जिगीषते ।
स तस्य सहजः शत्रुरुच्छेद्योपि प्रिये स्थितः ॥ ३६५ ॥

तन्मया स उदासीनतया[4] समानीतोभयप्रदानेन यावत्तावदहमपि[5] तेन साचिव्यात्प्रच्यावितः[6] । अथवा साध्विदमुच्यते ।

[7]दद्यात्साधुर्यदि निजपदे दुर्जनाय प्रवेशं
तन्नाशाय प्रभवति ततो वाञ्छमानः स्वयं सः ।
तस्माद्देया विपुलमतिभिर्नावकाशोधमानां
जारोपि स्याद्गृहपतिरिति श्रूयते वाक्यतोत्र ॥ ३६६ ॥

तेन मया तस्योपरि वधोपाय एष विरच्यते[8] । देशत्यागाय वा भविष्यति[9] । तच्च त्वां मुक्त्वान्यो न ज्ञास्यति । तद्युक्तमेतत्स्वार्थायानुष्ठितम् । उक्तं च यतः ।

[10]निस्त्रिंशं हृदयं कृत्वा वाणीं चेक्षुरसोपमाम् ।
दुःखं तत्र न कर्तव्यं हन्यात्तत्रापकारिणम् ॥ ३६७ ॥

---

१ See verse 233. २ He has become our enemy by having usurped the post of minister. ३ He, who wishes to deprive a person of a post which is hereditary, is his natural enemy and should be destroyed though he be kindly disposed towards him. जिगीषते desid. of जि 1 P. to conquer. उच्छेद्योपि &c. construe स प्रिये स्थितोपि उच्छेद्य. ४ Indifferently; disinterestedly. ५ As soon as &c. ६ Deprived of counsellorship. प्रच्यावित P. P. of the caus. of च्यु 1 A. ७ If a good man allow a wicked person access to his own post, he becomes himself able to destroy him, if he wish to do so; therefore, those who are possessed of great talents should give no access to the mean; it is heard from popular saying that even a paramour will be the master of a house. वाक्यतः from words, i. e. popular saying. ८ Is designed; planned. ९ (What I have done) will result in his leaving the country. १० Having made the heart relentless and the speech as sweet as sugar-cane juice, no sorrow should be felt and an evil-doer should be killed. तत्र in that case (where one can serve his purpose by destroying his enemy).

ऽयं मृतोप्यस्माकं भोज्यो भविष्यति । तदेकं तावद्वैरसाधनम् । अपरं नाचिव्यं च भविष्यति तृप्तिश्चेति । तद्गुणत्रयेस्मिन्नुपस्थिते कस्मान्मां दूषयसि त्वं जाड्यभावात् । उक्तं च ।

परस्य पीडनं कुर्वन्स्वार्थसिद्धिं च पण्डितः ।
मूढबुद्धिर्न भक्षेत वने चतुरको यथा ॥ ३६८ ॥

करटक आह । कथमेतत् । स आह ।

॥ कथा १६ ॥

अस्ति कस्मिंश्चिद्वनोद्देशे वज्रदंष्ट्रो नाम सिंहः । तस्य चतुरकक्रव्यमुखनामानौ शृगालवृकौ सदानुगतौ तत्रैव प्रतिवसतः । अथान्यदिने सिंहेन कदाचिदासन्नप्रसवा प्रसववेदनया स्वयूथाद्भ्रष्टोष्ट्री उपविष्टा कस्मिंश्चिद्वनोद्देशे समासादिता । अथ तां व्यापाद्य यावदुदरं स्फाटयति तावज्जीवँल्लघुदासेरकशिशुर्निष्क्रान्तः । सिंहोपि दासेरक्याः पिशितेन सपरिवारः परां तृप्तिमुपागतः परं स्नेहात्तं दासेरकं गृहमानीयेदमुवाच । भद्र न तेऽस्ति मृत्योर्भयं मत्तो नान्यस्मादपि । ततः स्वेच्छयात्र वने भ्रम्यतामिति । यतस्ते शङ्कुसदृशौ कर्णौ ततः शङ्कुकर्णो नाम भविष्यति । एवमनुदिने चत्वारोपि त एकस्थाने विहारिणः परस्परमनेकप्रकारगोष्ठीसुखमनुभवन्तस्तिष्ठन्ति । शङ्कुकर्णोपि यौवनपदवीमारूढः क्षणमपि न तं सिंहं मुञ्चति । अथ कदाचिद्वज्रदंष्ट्रस्य केनचिद्वन्येन मत्तगजेन सह युद्धमभवत् । तेन मदवीर्यात्स दन्तप्रहारैस्तथा क्षतशरीरो विहितो यथा प्रचलितुं न शक्नोति । तत्क्षुत्क्षामस्तान्प्रोवाच । भो भवन्तः । अन्विष्यतां

१ The accomplishing of revenge. २ When three such advantages are before us. ३ Through stupidity. ४ A wise person whose intellect is confused will not eat, if by so doing he can oppress his enemy and accomplish his own end, as was done by Chaturaka in the forest. ५ Having jaws of adamant, that is, jaws as hard as &c. ६ Being always in attendance. ७ Being near her confinement; about to be confined. ८ By the pangs of delivery. ९ Break open. (Caus. of स्फट् 6 P.). १० A young one of camel. दासेरक एव शिशुः. क. ११ The she-camel. १२ Resembling a cone. १३ Enjoying the pleasure of conversation on various subjects. १४ Attained his youth. १५ Wild. १६ Was wounded.

किंचित्सत्त्वं येनाहमेवंस्थितोपि तद्व्यापाद्यात्मनो युष्माकं च क्षुत्प्रणाशं करोमि । तच्छ्रुत्वा ते त्रयोपि वने संध्याकालं यावद्भ्रान्ताः परं न किंचित्सत्त्वमासादितम् । अथ चतुरकश्चिन्तयामास । यदि शङ्कुकर्णोयं व्यापाद्यते ततः सर्वेषां कतिचिद्दिनानि तृप्तिर्भवति परं नैनं स्वामी मित्रत्वादाश्रयसमाश्रितत्वाच्च विनाशयिष्यति । अथवा बुद्धिप्रभावेण स्वामिनं प्रतिबोध्य तथा करिष्ये यथा व्यापादयिष्यति । उक्तं च ।

अवध्यं चाथवागम्यमकृत्यं नास्ति किंचन ।
लोके बुद्धिमतां बुद्धेस्तस्मात्तां विनियोजयेत् ॥ ३३९ ॥

एवं विचिन्त्य शङ्कुकर्णमिदमाह । भोः शङ्कुकर्ण स्वामी तावत्पथ्यं विना क्षुधया पीड्यते स्वाम्यभावादस्माकमपि ध्रुवं विनाश एव । ततो वाक्यं किंचित्स्वाम्यर्थे वदिष्यामि । तच्छ्रूयताम् । शङ्कुकर्ण आह । भोः शीघ्रं निवेद्यतां येन ते वचनं शीघ्रं निर्विकल्पं करोमि । अपरं स्वामिनो हिते कृते मया सुकृतशतं कृतं भविष्यति । अथ चतुरक आह । भो भद्र आत्मशरीरं द्विगुणलाभेन प्रयच्छ येन ते द्विगुणं शरीरं भवति स्वामिनः पुनः प्राणयात्रा भवति । तदाकर्ण्य शङ्कुकर्णः प्राह । भद्र यद्येवं तन्मदीयप्रयोजनमेतदुच्यताम् । स्वाम्यर्थः क्रियतामिति । परमत्र धर्मः प्रतिभूरिति ते विचिन्त्य सर्वे सिंहसकाशमाजग्मुः । ततश्चतुरक आह । देव न किंचित्सत्त्वं प्राप्तम् । भगवानादित्योप्यस्तं गतः । तद्यदि स्वामी द्विगुणं शरीरं प्रयच्छति ततः शङ्कुकर्णोयं द्विगुणवृद्ध्या स्वशरीरं प्रयच्छति धर्मप्रतिभूत्वा । सिंह आह । भो

१ The satisfying of hunger. २ By reason of his having taken shelter with him. ३ There is nothing in this world that is difficult to destroy, inaccessible, and unfit to do, for the talent of the talented; therefore, one should use it. ४ I shall say something or propose something to you for the sake of our lord (the lion). ५ Without any doubt or suspicion. ६ When I have done the welfare of the lord; if I do what is for the welfare of our lord. ७ I shall have done a hundred righteous actions. ८ For two-fold benefit. ९ Let this my *readiness to serve the use of our lord* be reported to him (lion); that is, let the lion know that I am ready even to sacrifice my life for his. १० Thinking that justice was their surety having thought that justice was pledged &c. ११ For double the amount (the original and the principle being equal). १२ Justice being its security. धर्मः प्रतिभूर्यस्याः सा. ब. qualifying द्विगुणवृद्ध्या.

यद्येवं तत्सुदृढ्गनम् । व्यवहारस्यास्य धर्मः प्रतिभूः क्रियतामिति । अथ सिंहवचनानन्तरं वृकशृगालाभ्यां विदारितोभयकुक्षिः शङ्कुकर्णः पञ्चत्वमुपगतः । अथ वज्रदंष्ट्रश्चतुरकमाह । भोश्चतुरक यावदहं नदीं गत्वा स्नानदेवतार्चनविधिं कृत्वागच्छामि तावत्त्वयात्राप्रमत्तेन भाव्यमित्युक्त्वा नद्यां गतः । अथ तस्मिन्गते चतुरकश्चिन्तयामास । कथं ममैकाकिनो भोज्योयमुष्ट्रो भविष्यतीति विचिन्त्य क्रव्यमुखमाह । भोः क्रव्यमुख क्षुधालुर्भवान् । तद्यावदसौ स्वामी नागच्छति तावत्त्वमस्योष्ट्रस्य मांसं भक्षय । अहं त्वां स्वामिनो निर्दोषं प्रतिपादयिष्यामि । सोपि तच्छ्रुत्वा यावत्किंचिन्मांसमास्वादयति तावच्चतुरकेणोक्तम् । भोः क्रव्यमुख समागच्छति स्वामी । तत्त्यक्त्वेन दूरे तिष्ठ येनास्य भक्षणं न विकल्पयति । तथानुष्ठिते सिंहः समायातो यावदुष्ट्रं पश्यति तावद्रिक्तीकृतहृदयो दासेरकः । ततो भ्रुकुटिं कृत्वा परुषतरमाह । अहो केनैष उष्ट्र उच्छिष्टतां नीतो येन तमपि व्यापादयामि । एवमभिहिते क्रव्यमुखश्चतुरकमुखमवलोकयति । किल तद्वद किंचिद्येन मम शान्तिर्भवति । अथ चतुरको विहस्योवाच । भो मामनादृत्य पिशितं भक्षयित्वाधुना मन्मुखमवलोकयसि । तदास्वादयास्य दुर्नयतरोः फलमिति । तदाकर्ण्य क्रव्यमुखो जीवनाशभयाद्दूरदेशं गतः । एतस्मिन्नन्तरे तेन मार्गेण दासेरकसार्थो भाराक्रान्तः समायातः । तस्याग्रसरोष्ट्रस्य कण्ठे महती घण्टा बद्धा । तस्याः शब्दं दूरतोप्याकर्ण्य सिंहो जम्बुकमाह । भद्र ज्ञायतां किमेष रौद्रः शब्दः श्रूयतेश्रुतपूर्वः । तच्छ्रुत्वा चतुरकः किंचिद्वनान्तरं गत्वा सत्वरमभ्युपेत्य प्रोवाच । स्वामिन्गम्यतां गम्यतां यदि शक्नोषि गन्तुम् । सोब्रवीत् । भद्र किमेवं व्याकुलो दृश्यसे । तत्कथय किमेतदिति । चतुरक आह । स्वा-

१ Bargain, contract, transaction. २ Bathing and worshipping gods. ३ To be eaten by (me) alone. ४ The wolf. ५ I shall plead your innocence in the presence of our lord. ६ Suspect or doubt. Having सः or स्वामी for its subject. ७ Having the heart emptied or taken away. ८ Having frowned. ९ The state of being defiled by previous eating. १० Surely, certainly. ११ Of the tree of injustice or inequity. दुर्नयः एव तरुः. क. १२ A herd. १३ Confused, frightened.

मित्र एष धर्मराजस्त्वोपरि कुपितो यदनेनाकाले, दासेरकोऽयं मदीयो व्यापादितस्तत्सहस्रगुणमुष्ट्रमस्य सकाशाद्ग्रहीष्यामीति निश्चित्य बृहन्मानेमादायाग्रेसरन्योऽस्य ग्रीवायां घण्टां बद्ध्वा वध्यदासेरकसक्तानपि पितृपितामहानादाय वैरनिर्यातनार्थमायात एव । सिंहोऽपि तच्छ्रुत्वा सर्वतो दूरादेवावलोक्य मृतमुष्ट्रं परित्यज्य प्राणभयात्प्रनष्टः । चतुरकोऽपि शनैः शनैस्तस्योष्ट्रस्य मांसं भक्षयामास ।

अतोऽहं ब्रवीमि परस्य पीडनं कुर्वन्निति ।

अथ दमनके गते संजीवकश्चिन्तयामास । अहो किमेतन्मया कृतं यच्छष्पादोऽपि मांसाशिनस्तस्यानुगः संवृत्तः । अथवा साध्विदमुच्यते ।

अगम्यान्यः पुमान्याति असेव्यांश्च निषेवते ।
स मृत्युमुपगृह्णाति गर्भमश्वतरी यथा ॥ ३७० ॥

तत्किं करोमि । क्व गच्छामि । कथं मे शान्तिर्भविष्यति । अथवा तमेव पिङ्गलकं गच्छामि कदाचिन्मां शरणागतं रक्षन् प्राणैर्न वियोजयति । यत उक्तं च ।

धर्मार्थं यततामपीह विपदो दैवाद्यदि स्युः क्वचि-
त्तत्तासामुपशान्तये सुमतिभिः कार्यो विशेषान्नयः ।
लोके ख्यातिमुपागतात्र सकले लोकोक्तिरेषा यतो
दग्धानां किल वह्निना हितकरः सेकोऽपि तस्योद्भवः ॥ ३७१ ॥

१ That he &c. These words are reported as if uttered by Dharmarája with respect to the lion. २ One thousand times such camels &c. ३ With a great feeling of wounded pride. ४ Killed. Here वध्य has an active sense. ५ Belonging to, attached to. ६ To wreak vengeance; to retaliate. ७ Though a graminivorous animal. शष्प अत्तीति. ८ Follower. ९ That man, who goes to those who are not worthy of being resorted to, and serves those who are not fit to be served, meets with death, just as a mule meets with death in the shape of her conception. It is a general notion that a mule dies just after delivery. १० If misfortune should ever befall those who strive for justice by accident, talented persons should especially use justice for removing them; since this popular saying (लोकोक्ति) is known to all the world, that the lotion consisting of fire is a beneficial remedy for the burns of those who are scorched by fire. यततां = यतमानानां. लोकोक्तिः = लोकानां उक्तिः—lit. the speech of people. तस्योद्भवः = वह्निसमुद्भवः.

तथा च ।

लोकेऽथवा तनुभृतां निजकर्मपाकं नित्यं समाश्रितवतां सुहितक्रियाणाम् ।
भावार्जितं शुभमथाप्यशुभं निकामं यद्भावि तद्भवति नात्र विचारहेतुः ३७२

अपरं चान्यत्र गतस्यापि मे कस्यचिद्दुष्टसत्त्वस्य मांसाशिनः सकाशान्मृत्युर्भविष्यति । तद्वरं सिंहात् । उक्तं च ।

महता स्पर्धमानस्य विपदेव गरीयसी ।
दन्तभङ्गोऽपि नागानां श्लाघ्यो गिरिविदारणे ॥ ३७३ ॥

तथा च । महतोऽपि क्षयं लब्ध्वा श्लाघ्यं नीचोऽपि गच्छति ।
दानार्थी मधुपो यद्वद्गजकर्णसमाहतः ॥ ३७४ ॥

एवं निश्चित्य स्खलितगतिर्मन्दं मन्दं गत्वा सिंहाश्रयमपश्यत् । अहो साध्विदमुच्यते ।

अन्तर्लीनभुजङ्गमं गृहमिव व्यालाकुलं वा वनं
ग्राहाकीर्णमिवाभिरामकमलच्छायासनाथं सरः ।
नानादुष्टजनैरसत्यवचनासक्तैरनार्यैर्वृतं
दुःखेन प्रतिगम्यते प्रचकितै राज्ञां गृहं वार्धिवत् ॥ ३७५ ॥

एवं पठन्दमनकोक्ताकारं पिंगलकं दृष्ट्वा प्रचकितः संवृतशरीरो दूरतरं प्र-

---

१ Or whatever is destined to happen whether good or evil earned by their conduct, to those people in this world who always reap the fruits of their own actions and whose actions are well-directed, does certainly happen; here there is no cause for consideration (there is no use in considering &c.). २ Even calamity is more honourable to him who is rivalling with the great; even the breaking of the tusks of elephants is desirable in tearing mountains. ३ Even a mean person attains praise even by meeting with destuction at the hands of the great; just as a bee (also a drunkard) who is desirous of the rutting juice (also desirous of doing charity) is struck by the ears of the elephant. ४ The abode of a king which is filled with various sorts of wicked people, and by those rude fellows who are given to telling lies is approached by frightened people with great pain like the sea, which is like a house having snakes concealed inside, or like a forest filled with ferocious animals or like a lake abounding in alligators and contains multitudes of beautiful lotuses. The epithets in the first two lines can also be made applicable to the राज्ञां गृहं by taking the words भुजंगम् &c. in differant senses. अन्तर्लीनभुजंगमं. ब. वार्धि Sea (lit. वारः धीयन्ते यस्मिन् सः). ५ Startled. ६ Guarding his body.

णामकृत्यैव विनाप्युपविष्टः । पिङ्गलकोऽपि तथाविधं तं विलोक्य दमनकवाक्यं श्रद्दधानः कोपात्तस्योपरि पपात । अथ संजीवकः खरनख[1]रविकर्तितपृष्ठः शृङ्गाभ्यां तदुदरमुल्लिख्य[2] कथमपि तस्मादपेतः[3] । शृङ्गाभ्यां हन्तुमिच्छन्युद्धायावस्थितः[4] । अथ द्वावपि तौ पुष्पितपलाश[5]प्रतिमौ परस्परवधकाङ्क्षिणौ दृष्ट्वा करटको दमनकमाह । भो मूढमते अनयोर्विरोधं वितन्वता त्वया साधु न कृतम् । न च त्वं नीतितत्त्वं वेत्सि । नीतिविद्भिरुक्तं च ।

[6]कार्याण्युत्तमदण्डसाहसफलान्यायाससाध्यानि ये
प्रीत्या संशमयन्ति नीतिकुशलाः साम्नैव ते मन्त्रिणः ।
निःसाराल्पफलानि ये त्वविधिना वाञ्छन्ति दण्डोद्यमै-
स्तेषां दुर्नयचेष्टितैर्नरपतेरारोप्यते श्रीस्तुलाम् ॥ ३२६ ॥

तद्यदि स्वाम्यभिघातो[7] भविष्यति तत्किं त्वदीयमन्त्रबुद्ध्या[8] क्रियते । अथवा[9] यदि संजीवको न वध्यते तथाप्यभव्यं[10] यतः प्राणसंदेहात्तस्य[11] च वधः । तन्मूढ कथं त्वं मन्त्रिपदमभिलषसि । सामसिद्धिं[12] न वेत्सि । तद्वृथा मनोरथोऽयं ते दण्डरुचेः[13] । उक्तं च ।

१ Whose back was mauled by the sharp nails (of the lion). २ Having torn or scratched. ३ Having escaped from him with difficulty. ४ Became ready to fight. ५ Resembling the blossom of the Palâsa-tree, by reason of the red drops of blood with which their bodies were covered. ६ Those are really ministers versed in politics who by means of talent peacefully settle such affairs as are deserving of the highest punishment and as are to be accomplished with troubles; while the royal power is placed in the balance, that is, endangered by the imprudent actions of those who wish to accomplish worthless and insignificant affairs improperly and by means of punishment. उत्तम...नि- उत्तमदण्डसाहसं एव फलं येषां तानि. ब. नि....नि-निःसाराणि अल्पानि च फलानि येषां. ब. अविधिना by what is not a rule, against the rule. तुलामारोप्यते is placed in the balance, is made to totter. ७ Destruction. ८ Knowledge or power of counselling. ९ On the other hand. १० Not good. ११ His death will happen by his life being in danger. १२ Accomplishment (of an object) by peaceful means. साम्नैव सिद्धिः तु. त. १३ Of one fond of punishment as a means to an end. दण्डाय रुचिः यस्य. स. ब.

सामादिर्दण्डपर्यन्तो नयः प्रोक्तः स्वयंभुवा ।
तेषां दण्डस्तु पापीयांस्तं पश्चाद्विनियोजयेत् ॥ ३७७ ॥
तथा च । साम्नैव यत्र सिद्धिर्न तत्र दण्डो बुधेन विनियोज्यः ।
पित्तं यदि शर्करया शाम्यति कोऽर्थः पटोलेन ॥ ३७८ ॥
तथा च । आदौ साम प्रयोक्तव्यं पुरुषेण विजानता ।
सामसाध्यानि कार्याणि विक्रियां यान्ति न क्वचित् ॥ ३७९ ॥
न चन्द्रेण न चौषध्या न सूर्येण न वह्निना ।
साम्नैव विलयं याति विद्वेषिप्रभवं तमः ॥ ३८० ॥

तथा यच्च मन्त्रिपदमभिलषसि तदप्ययुक्तं यतस्त्वं मन्त्रगतिं न वेत्सि । यतः पञ्चविधो मन्त्रः स च कर्मणामारम्भोपायः पुरुषद्रव्यसंपद्देशकालविभागो विनिपातप्रतीकारः कार्यसिद्धिश्चेति । सोऽयं स्वाम्यमात्ययोरेकतमस्य किंवा द्वयोरपि विनिपातः समुत्पद्यते लग्नः । उक्तं च ।

---

१ Policy is said by the self-born (Brahman) to begin with peace (सामन्) and to end with punishment: of these punishment is sinful, and one should use it afterwards (that is, when the others have failed). सामादिः and दण्ड. पर्यन्तो यस्य स. ब. The order of these is साम, दाम, भेद and दण्ड. These four being the remedies of accomplishing objects. २ In that case where success is to be gained only by *peace*, a wise man should not make use of *punishment*; if bile can be made to subside by sugar, what is the use of पटोल ? (A kind of cucumber called कडु पडवळ in Maráthi and used in severe cases of bilious affections). ३ A clever man should first use *peace*; (for) the business accomplishable by peace can never be spoiled (lit. changed). विजानता=विशेषेण जानता. ४ The darkness (calamity) arising from a bitter foe, is dispelled only by means of peace and not by the moon, not by shining medicinal herbs, not by the sun and not by fire. विद्वेषिप्रभवं=विद्वेषी प्रभवः यस्य तत्. ब. ५ The course or direction which a counsel should take. ६ Mantra (counsel) is of five kinds such as:—(*a*) आरंभोपाय: the remedy to be applied at the beginning, (*b*) पुरुषद्रव्यसंपद् the plenty of men and wealth, (*c*) देशकालविभाग: the proper division of place and time, (*d*) विनिपात-प्रतीकार: the retaliation of a calamity, and (*e*) कार्यसिद्धि the accomplishment of a business. पुरुषद्रव्ययोः स. द्वं. ष. त. ७ Of one of the two, viz., the king and the minister. Here एकतम is inaccurately used for एकतर as in the Kâdambarî कतमां for कतराम्. ८ Is closely impending; Cf. संगच्छते लग्ना already explained.

णामकृति विनाप्युपविष्टः । पिंगलकोपि तथाविधं तं विलोक्य दमनकवाक्यं श्रद्दधानः कोपात्तस्योपरि पपात । अथ संजीवकः खरनखरविकर्तितपृष्ठः[१] शृङ्गाभ्यां तदुदरमुल्लिख्य[२] कथमपि तस्मादपेतः[३] । शृङ्गाभ्यां हन्तुमिच्छन्युद्धायावस्थितः[४] । अथ द्वावपि तौ पुष्पितपलाशप्रतिमौ[५] परस्परवधकाङ्क्षिणौ दृष्ट्वा करटको दमनकमाह । भो मूढमते अनयोर्विरोधं वितन्वता त्वया साधु न कृतम् । न च त्वं नीतितत्त्वं वेत्सि । नीतिविद्भिरुक्तं च ।

कार्याण्युत्तमदण्डसाहसफलान्यायाससाध्यानि[६] ये
प्रीत्या संशमयन्ति नीतिकुशलाः साम्नैव ते मन्त्रिणः ।
निःसाराल्पफलानि ये त्वविधिना वाञ्छन्ति दण्डोद्यमै-
स्तेषां दुर्नयचेष्टितैर्नरपतेरारोप्यते श्रीस्तुलाम् ॥ ३७६ ॥

तद्यदि स्वाम्यभिघातो[७] भविष्यति तत्किं त्वदीयमन्त्रबुद्ध्या[८] क्रियते । अथवा[९] यदि संजीवको न बध्यते तथाप्यभव्यं[१०] यतः प्राणसंदेहात्तस्य[११] च वधः । तन्मूढ कथं त्वं मन्त्रिपदमभिलषसि । सामसिद्धिं[१२] न वेत्सि । तद्वृथा मनोरथोयं ते दण्डरुचेः[१३] । उक्तं च ।

१ Whose back was mauled by the sharp nails (of the lion). २ Having torn or scratched. ३ Having escaped from him with difficulty. ४ Became ready to fight. ५ Resembling the blossom of the Palâśa-tree, by reason of the red drops of blood with which their bodies were covered. ६ Those are really ministers versed in politics who by means of talent peacefully settle such affairs as are deserving of the highest punishment and as are to be accomplished with troubles; while the royal power is placed in the balance, that is, endangered by the imprudent actions of those who wish to accomplish worthless and insignificant affairs improperly and by means of punishment. उत्तम...नि-उत्तमदण्डसाहसं एव फलं येषां तानि. ब. नि....नि-निःसाराणि अल्पानि च फलानि येषां. ब. अविधिना by what is not a rule, against the rule. तुलामारोप्यते is placed in the balance, is made to totter. ७ Destruction. ८ Knowledge or power of counselling. ९ On the other hand. १० Not good. ११ His death will happen by his life being in danger. १२ Accomplishment (of an object) by peaceful means. साम्नैव सिद्धिः तृ. त. १३ Of one fond of punishment as a means to an end. दण्डाय रुचिः यस्य. स. ब.

सामादिदण्डपर्यन्तो नयः प्रोक्तः स्वयंभुवा ।
तेषां दण्डस्तु पापीयांस्तं पश्चाद्विनियोजयेत् ॥ ३७७ ॥
तथा च । साम्नैव यत्र सिद्धिर्न तत्र दण्डो बुधेन विनियोज्यः ।
पित्तं यदि शर्करया शाम्यति कोऽर्थः पटोलेन ॥ ३७८ ॥
तथा च । आदौ साम प्रयोक्तव्यं पुरुषेण विजानता ।
सामसाध्यानि कार्याणि विक्रियां यान्ति न क्वचित् ॥ ३७९ ॥
न चन्द्रेण न चौषध्या न सूर्येण न वह्निना ।
साम्नैव विलयं याति विद्विषप्रभवं तमः ॥ ३८० ॥

तथा यत्त्वं मन्त्रिपदमभिलषसि तदप्ययुक्तं यतस्त्वं मन्त्रगतिं न वेत्सि । यतः पञ्चविधो मन्त्रः स च कर्मणामारम्भोपायः पुरुषद्रव्यसंपद्देशकालविभागो विनिपातप्रतीकारः कार्यसिद्धिश्चेति । सोयं स्वाम्यमात्ययोरेकतमस्य किंवा द्वयोरपि विनिपातः समुत्पद्यते लग्नः । उक्तं च ।

१ Policy is said by the self-born (Brahman) to begin with peace (सामन्) and to end with punishment: of these punishment is sinful, and one should use it afterwards (that is, when the others have failed). सामादिः and दण्ड. पर्यन्तो यस्य स. ब. The order of these is साम, दाम, भेद and दण्ड. These four being the remedies of accomplishing objects. २ In that case where success is to be gained only by *peace*, a wise man should not make use of *punishment*; if bile can be made to subside by sugar, what is the use of पटोल? (A kind of cucumber called कडू पडवळ in Marāthi and used in severe cases of bilious affections) ३ A clever man should first use *peace*; (for) the business accomplishable by peace can never be spoiled (lit. changed). विजानता=विशेषेण जानता. ४ The darkness (calamity) arising from a bitter foe, is dispelled only by means of peace and not by the moon, not by shining medicinal herbs, not by the sun and not by fire. विद्विषप्रभवं=विद्विषो प्रभवः यस्य तत्. ब. ५ The course or direction which a counsel should take. ६ Mantra (counsel) is of five kinds such as:—(*a*) आरंभोपायः the remedy to be applied at the beginning, (*b*) पुरुषद्रव्यसंपद् the plenty of men and wealth, (*c*) देशकालविभागः the proper division of place and time, (*d*) विनिपात-प्रतीकारः the retaliation of a calamity, and (*e*) कार्यसिद्धि the accomplishment of a business. पुरुषद्रव्ययोः संपद्. ष. त. ७ Of one of the two, viz., the king and the minister. Here एकतम is inaccurately used for एकतर as in the Kâdambarî कतमां for कतराम्. ८ Is closely impending; Cf. संपद्यते लग्ना already explained.

मन्त्रिणां भिन्नसंधाने भिषजां सान्निपातिके ।
कर्मणि व्यज्यते प्रज्ञा स्वस्थे को वा न पण्डितः ॥ ३८१ ॥ १

तन्मूर्ख नैतत्कर्तुं समर्थस्त्वम् । उक्तं च ।

घातयितुमेव नीचः परकार्यं वेत्ति न प्रसाधयितुम् ।
पातयितुमेव शक्तिर्नाखोरुद्धर्तुमन्नपिटम् ॥ ३८२ ॥

अथवा न ते दोषोयं स्वामिनो दोषो यस्ते वाक्यं श्रद्दधाति । उक्तं च ।

नराधिपा नीचजनानुवर्तिनो बुधोपदिष्टेन न यान्ति ये पथा ।
विशन्त्यतो दुर्गममार्गनिर्गमं समस्तसंबाधमनर्थपञ्जरम् ॥ ३८३ ॥

तद्यदि त्वमस्य मन्त्री भविष्यति तदान्योप्यस्य समीपे साधुजनो न गमिष्यति । उक्तं च ।

गुणालयोप्यसन्मन्त्री नृपतिर्नाधिगम्यते
प्रसन्नस्वादुसलिलो दुष्टग्राहो यथा ह्रदः ॥ ३८४ ॥

तथा शिष्टजनरहितस्य स्वामिनोपि नाशो भविष्यति । उक्तं च ।

चित्रास्वादकथैर्भृत्यैरनायासितकार्मुकैः ।
ये रमन्ते नृपास्तेषां रमन्ते रिपवः श्रिया ॥ ३८५ ॥

तत्किं मूर्खोपदेशेन । केवलं दोषो न गुणः । उक्तं च ।

१ This verse is equal to 127 २ This verse is equal to 363. ३ Those kings, who, following the advice of the mean, do not go by the way pointed out by the wise, enter as it were, into a cage of calamities surrounded by dangers on all sides (समस्तसंबाध) and affording no easy egress, that is, the way out of which is very difficult. दुर्गमः मार्गनिर्गमः यस्मात् ब. समस्तसंबाध:-समस्ताः संबाधाः यस्य. ब. ४ A king having bad ministers, though he be an abode of all virtues, is not approached, as a pond, though full of clear and sweet water, but containing wicked alligators, (is not approached). असन्मंत्री—असंतः मंत्रिणो यस्य. ब.; प्रसन्नस्वादुसलिलः-प्रसन्नं च स्वादु च सलिलं यस्य. ब.; दुष्टग्राहः—दुष्टाः ग्राहाः यस्मिन्. ब. ५ The enemies of those kings, who enjoy pleasures with such servants as are always talking of various kinds of tastes of things, and have never used their bows strenuously, always enjoy prosperity. चित्रास्वादकथैः=चित्रास्वादानां कथाः येषां तैः. ब.; अनायासितकार्मुकैः-अनायासितं कार्मुकं यैः. ब. ६ What is then the use of the advice of a fool?

नानाम्य नमते दारु नाश्मनि स्यात्क्षुरक्रिया ।
सूचीमुख विजानीहि नाशिष्यायोपदिश्यते ॥ ३८६ ॥

दमनक आह । कथमेतत् । सोऽब्रवीत् ।

॥ कथा १७ ॥

अस्ति कस्मिंश्चित्पर्वतैकदेशे वानरयूथम् । तच्च कदाचिद्धेमन्तसमये सौम्यवातसंस्पर्शवेपमानकलेवरं प्रवर्षद्घनधारानिपातसमाहतं न कथंचिच्छान्तिमगमत् । अथ केचिद्वानरा वह्निकणसदृशानि गुञ्जाफलानि विचित्य वह्निवाञ्छया फूत्कुर्वन्तः समन्तात्तस्थुः । अथ सूचीमुखो नाम पक्षी तेषां तं वृथायासमवलोक्य प्रोवाच । भो भवन्तः सर्वे मूर्खतमाः । नैते वह्निकणा वह्निकणसदृशानि गुञ्जाफलान्येतानि । तत्किं वृथाश्रमेण । नैतस्माच्छीतरक्षा भवति । तदन्विष्यतां कश्चिन्निर्वातो वनप्रदेशो गुहा वा गिरिकन्दरं वा । अद्यापि साटोपा मेघा दृश्यते । अथ तेषामेकतमो वृद्धवानरस्तमुवाच । भोः किं तवानेन व्यापारेण । तद्गम्यताम् । उक्तं च ।

१ A timber that cannot be bent, never bends; there will be no operation of a razor on a stone; oh needle-beaked one, know that no advice is given (should be given) to one who is not a faithful pupil, that is, who will not follow it. २ The season of the two months of मार्गशीर्ष and पौष that is, the winter season. ३ Whose bodies were shivering with cold by the touch of strong gust of wind. It is a व. and सौम्य ought to be असौम्य. असौम्यवातसंस्पर्शेन वेपमानं कलेवरं यस्य. ४ Beaten by the rain falling down in torrents. ५ Could get no peace of mind or ease with all attempts. ६ Resembling sparks of fire वह्निकणैः सदृशानि. तृ. त. ७ A kind of small fruit called in Marathi गुंजा and used in weighing gold and other valuable metals. ८ Blowing them (गुंजाफलानि) mistaking them for fire which they wanted to warm themselves with. ९ Vain attempt. १० There will be no protection from cold by these; you cannot protect yourselves from cold by means of these fruits. ११ Free from wind; not exposed to wind. १२ The cave of a mountain. १३ Increasing, spreading.

मुहुर्विघ्नितकर्माणं द्यूतकारं पराजितम् ।
नालापयेद्विवेकज्ञो य इच्छेच्छ्रेय आत्मनः ॥ ३८७ ॥
तथा च । आखेटकं वृथाक्लेशं मूर्खं व्यसनसंस्थितम् ।
समालापेन यो युङ्क्ते स गच्छति पराभवम् ॥ ३८८ ॥

सोपि तमनादृत्य भूयोपि वानराननवरतमाह । भोः किं वृथाक्लेशेन । अथ यावदसौ न कथंचित्प्रलपन्विरमति तावदेकेन वानरेण व्यर्थश्रमन्दाक्कुपितेन पक्षाभ्यां गृहीत्वा शिलायामास्फालित उपरतश्च ।

अतोहं ब्रवीमि नानाम्यं नमते दार्वित्यादि ।

तथा च । उपदेशोहि मूर्खाणां प्रकोपाय न शान्तये ।
पयःपानं भुजङ्गानां केवलं विषवर्धनम् ॥ ३८९ ॥
उपदेशो न दातव्यो यादृशे तादृशे जने ।
पश्य वानरमूर्खेण सुगृहा निगृहीकृता ॥ ३९० ॥

दमनक आह । कथमेतत् । सोब्रवीत् ।

॥ कथा १८ ॥

कस्मिंश्चिद्वने शमीवृक्षशाखालम्बितवसथं कृत्वारण्यचटकदंपती प्रतिवसतः स्म । अथ कदाचित्तयोः सुखसंस्थयोर्हेमन्तमेघो मन्दं मन्द

१ That considerate man who wishes for his own welfare should not speak with him, who interrupts his action often and often, him who is a gambler, and him who is defeated. विघ्नितानि कर्माणि येन. ब. २ He, who engages in conversation on equal terms with a hunter, with him whose attempts have been foiled, and a fool who is in difficulty, sustains a defeat. वृथाक्लेशं-वृथा क्लेशा यस्य त. ब. ३ Incessantly. unceasingly. ४ Did not cease talking. ५ Being seized with the wings. ६ Dashed, struck. ७ The advice given to a fool irritates him and does not satisfy (him); the drinking of milk by snakes only increases their poison. पयः पानं ष. त. विषवर्धनं ष. त. ८ Advice should not be given to any one whatever; behold, one having a good abode was deprived of it by a foolish ape. यादृश तादृश has an indefinite sense. ९ Habitation or nest hanging down from the branch of a S'ami tree. Here वसथ is, I think, a misprint for आवसथ. १० A pair of sparrows. ११ Living in a happy dwelling. सुखा संस्था ययोः तयोः. १२ The rain of हेमन्त, that is, the months of मार्गशीर्ष and पौष.

वर्षितुमारब्धः। अत्रान्तरे कश्चिच्छाखामृगो वातासारसमाहतः प्रोद्धूषितशरीरो दन्तवीणां वादयन्वेपमानस्तस्याः शम्या मूलमासाद्योपविष्टः। अथ तं तादृशमवलोक्य चटका प्राह। भो भद्र।

हस्तपादसमोपेतो दृश्यसे पुरुषाकृतिः।
शीतेन भिद्यसे मूढ कथं न कुरुषे गृहम्॥ ३९१॥

एतच्छ्रुत्वा वानरः सकोपमाह यत्त्वं कस्मान्मौनव्रता न भवसि। अहो धार्ष्ट्यमस्याः। अद्य मामुपहसति।

सूचीमुखि दुराचारे रे रे पण्डितवादिनि।
नाशङ्कसे प्रजल्पन्ती तत्किमेनां न हन्म्यहम्॥ ३९२॥

एवं प्रलप्य तामाह। मुग्धे किं तव ममोपरि चिन्तया। उक्तं च।

वाच्यं श्रद्धासमेतस्य पृच्छतश्च विशेषतः।
प्रोक्तं श्रद्धाविहीनस्य अरण्यरुदितोपमम्॥ ३९३॥

तत्किं बहुना तावत्। स कुलायस्थितया तयाभिहितो यावत्तावच्छमीमारुह्य तं कुलायं शतधा भङ्गमनयत्।

अतोऽहं ब्रवीम्युपदेशो न दातव्य इति

तन्मूर्ख शिक्षापितोऽपि न शिक्षितस्त्वम्। अथवा न ते दोषोऽस्ति यतः साधोः शिक्षा गुणाय संपद्यते नासाधोः। उक्तं च।

किं करोत्येव पाण्डित्यमस्थाने विनियोजितम्।
अन्धकारप्रतिच्छन्ने घटे दीप इवाहितः॥ ३९४॥

१ A monkey. २ A gust; a shower ३ With the body violently shaken. ४ Chattering his teeth. ५ Endowed with hands and feet, you seem to have a human shape; you are troubled by cold, why fool, do you not construct a house? ६ Oh you needle-mouthed and ill-behaved one, talking like a Pandita, you do not fear to talk; why should I then not kill her? ७ इतं वदतीति. The last words are not addressed to the sparrow but to the reader in general. ८ What have you to do by caring for me! ९ Advice should be given to one who has faith in the advice, and especially to one who may ask for it: what is said to one who is void of confidence, is like a cry in the wilderness. १० No sooner was he addressed by her than &c. ११ Taught. P. P. of the form शिक्षापय, a prâkritik from the caus. of शिक्षते, the desiderative of शक्. १२ The instruction imparted to a good man tends to advantage (गुणाय). १३ What can wisdom do when it is used or employed in a wrong place; it is like a lamp placed in a pot covered over with darkness.

तव्यर्थपाण्डित्यं त्वमाश्रितः । मम वचनमशृण्वन्नात्मनः शान्तिमपि न वेत्सि । उक्तं च ।

¹अप्यात्मनो विनाशं गणयति न खलः परव्यसनहृष्टः ।
प्रायो मस्तकनाशे समरमुखे नृत्यति कबन्धः ॥ ३९५॥

अहो साध्विदमुच्यते ।

²धर्मबुद्धिः कुबुद्धिश्च द्वावेतौ विदितौ मम ।
पुत्रेण व्यर्थपाण्डित्यात्पिता धूमेन घातितः ॥ ३९६ ॥

दमनक आह । कथमेतत् । सोब्रवीत् ।

॥ कथा १९॥

कस्मिंश्चिद्देशे धर्मबुद्धिः पापबुद्धिश्च द्वे मित्रे प्रतिवसतः । अथ कदाचित्पापबुद्धिना चिन्तितं यदहं तावन्मूर्खो दारिद्र्योपेतश्च । तदेनं धर्मबुद्धिमादाय देशान्तरं गत्वास्याश्रयेणार्थोपार्जनं कृत्वैनमपि वञ्चयित्वा सुखीभवामि । अथान्यस्मिन्नहनि पापबुद्धिर्धर्मबुद्धिं प्राह । भो मित्र वार्द्धकभावे किमात्मनश्चेष्टितं स्मरिष्यसि । देशान्तरमदृष्ट्वा कां शिष्टजनवार्तां कथयिष्यसि । उक्तं च ।

- ⁶देशान्तरेषु बहुविधभाषावेषादि येन न ज्ञातम् ।
भ्रमता धरणीपीठे तस्य फलं जन्मनो व्यर्थम् ॥ ३९७ ॥

तथा च । ⁷विद्यां वित्तं शिल्पं तावन्नाप्नोति मानवः सम्यक् ।
यावद्व्रजति न भूमौ देशाद्देशान्तरं हृष्टः ॥ ३९८ ॥

---

१ A wicked man delighted at the misery of others does not mind even his own ruin; generally when the head is severed from the trunk, the latter dances in the front of a battle. परव्यसनहृष्ट-परव्यसनेन हृष्टः. तृ. त. २ Dharmabuddhi (one religiously inclined) and Kubuddhi (one of evil intentions)-both these are known to me, a son killed his father with smoke through vain wisdom. ३ Overcome by poverty. ४ What exploit of yours (performed in youth) will you remember in old age? ५ Intelligence about respectable people. ६ Vain is the fruit of the existence of that man, who, while wandering on the surface of the earth, has not known the various languages and dresses &c. of different countries. विविधभाषावेषौ आदौ यस्य तत्. ७ A man does not properly acquire learning, wealth and art so long as he does not go from country to country on the earth with a delighted heart.

अथ तद्वचनमाकर्ण्य प्रहृष्टमनास्तेनैव सह गुरुजनानुज्ञातः शुभेऽहनि देशान्तरं[१] प्रस्थितः। तत्र च धर्मबुद्धिप्रभावेण भ्रमता पापबुद्धिना प्रभूततरं वित्तमासादितम्। ततश्च तौ द्वावपि प्रभूतोपार्जितवित्तौ[२] प्रहृष्टौ स्वगृहं प्रत्यौत्सुक्येन प्रस्थितौ। उक्तं च।

[३]प्राप्तविद्यार्थशिल्पानां देशान्तरनिवासिनाम्।
क्रोशमात्रोऽपि भूभागः शतयोजनवद्भवेत्॥ ३९९॥

अथ स्वस्थानसमीपवर्तिना पापबुद्धिना धर्मबुद्धिरभिहितः। भद्र न सर्वमेतद्धनं गृहं प्रति नेतुं युज्यते यतः कुटुम्बिनो बान्धवाश्च प्रार्थयिष्यन्ति[४]। तदत्रैव वनगहने[५] क्वापि भूमौ निक्षिप्य किंचिन्मात्रमादाय[६] गृहं प्रविशावो भूयोऽपि प्रयोजने संजाते[७] तन्मात्रं[८] समेत्यास्मात्स्थानान्नेष्यावः। उक्तं च।

[९]न वित्तं दर्शयेत्प्राज्ञः कस्यचित्स्वल्पमप्यहो।
मुनेरपि यतस्तस्य दर्शनाच्चलते मनः॥ ४००॥

तथा च [१०]यथामिषं जले मत्स्यैर्भक्ष्यते श्वापदैर्भुवि।
आकाशे पक्षिभिश्चैव तथा सर्वत्र वित्तवान्॥ ४०१॥

तदाकर्ण्य धर्मबुद्धिराह। भद्र एवं क्रियताम्। तथानुष्ठिते द्वावपि तौ स्वगृहं गत्वा सुखेन स्थितवन्तौ। अन्यदा च पापबुद्धिर्निशीथे तत्रागत्य सर्वं वित्तमादाय गर्तां पूरयित्वा[११] स्वभवनं जगाम। अथान्येद्युर्धर्मबुद्धिं समेत्य प्रोवाच। सखे बहुकुटुम्बा[१२] वयं वित्ताभावात्सीदामः[१३]। तद्गत्वा ततः स्थानात्किंचिन्मात्रं वित्तमानयावः। सोऽब्रवीत्। भद्र एवं क्रियतामिति। अथ द्वावपि गत्वा यावत्स्थानं खननमावद्रिक्तभाण्डं दृष्टवन्तौ। अत्रान्तरे पापबुद्धिः शिरस्ताडयन्[१४] प्रोवाच। भो धर्मबुद्धे त्वया हृतमेतद्धनं नान्येन यतो

---

१ In the foreign country. २ Who had acquired much wealth. It is a ब. but one expects it to be उपार्जितप्रभूतवित्तौ. ३ To those who have acquired learning, wealth and knowledge of art, and are residing in a foreign country, the distance of even a *Koss*, will be (appear) like a hundred Yojanas. This, of course, will happen by reason of their anxiety to reach home. ४ Will ask for it. ५ In some difficult place in the forest. ६ A little. ७ When an occasion arises, when there is need. ८ Only as much as is wanted. ९ A wise man should not show his wealth, however little, to any body; since the mind even of a sage is tempted (to take it). चलते lit. moves, that is, moves from the right path. १० Just as flesh is devoured by the fish in water, by the beasts on land and by the birds in the air (sky), so is a rich man (deprived of his wealth) everywhere. ११ Having filled up or covered the hole made in the ground. १२ Having many members in the family. बहु कुटुंबं येषां ते. ब. १३ Suffer misery. १४ Beating his head.

भूयोपि गर्तापूरणं कृतम् । तत्प्रयच्छ मे तस्यार्धमथवाहं राजकुले निवेदयिष्यामि । स आह । भो दुरात्मन्मा मैवं वद । धर्मबुद्धिः खल्वहम् नैतच्चौरकर्म करोमि । उक्तं च ।

मातृवत्परदाराणि परद्रव्याणि लोष्टवत् ।
आत्मवत्सर्वभूतानि यः पश्यति स पश्यति ॥ ४०२ ॥

एवं तौ द्वावपि विवदमानौ धर्माधिकारिणं गतवन्तौ प्रोचतुः परस्परं दूषयन्तौ । अथ धर्माधिकरणाधिष्ठितपुरुषैर्दिव्यार्थं यावन्नियोजितौ तावद्धर्मबुद्धिराह । अहो न सम्यग्दृष्टो न्यायः । उक्तं च ।

विवादेऽन्विष्यते पत्रं तदभावे तु साक्षिणः ।
साक्ष्यभावात्ततो दिव्यं प्रवदन्ति मनीषिणः ॥ ४०३ ॥

अत्र विषये मम वृक्षदेवताः साक्षिभूताः सन्ति । ता एवावयोरेकतमं चौरं साधुं वा करिष्यन्ति । अथ तैः सर्वैरभिहितम् । भो युक्तमुक्तं भवता । उक्तं च ।

अन्त्यजोपि यदा साक्षी विवादे संप्रजायते ।
न तत्र विद्यते दिव्यं किं पुनर्यत्र देवताः ॥ ४०४ ॥

तदस्माकमप्यत्र विषये महत्कौतूहलमस्ति । तत्प्रत्यूषसमये द्वाभ्यामस्माभिः सह तत्र वनोद्देशे गन्तव्यमिति । अथ पापबुद्धिः स्वगृहं गत्वा

---

१ I shall give information of this to the king's officers. २ I am really, as my name signifies (धर्मबुद्धि), righteous-minded. ३ He, who looks upon others' wives as mothers, and on others' wealth as a lump of earth, and on all creatures as upon himself, really considers rightly or correctly. परदार is used here as a neuter noun as an exceptional case. ४ Accusing each other of crime. ५ Persons appointed to the office of judge, judges. ६ Were ordered to go through an ordeal. ७ The judgment is not justly pronounced, the decision given is unjust. ८ In a dispute, first a written proof is required in the absence of a writing, witnesses are wanted and in the absence of witnesses, an ordeal is resorted to; so say the wise. ९ In this case, in the present instance. १० Sylvan deities are my witnesses. ११ For एकतरं.—inaccurately used. १२ Will declare. १३ In a dispute, when even a low caste is coming forth as a witness, there is no ordeal required: how much more so, when there are deities themselves as witnesses. १४ At the time of early morning.

स्वजनकमुवाच । तात प्रभूतोयं मयार्थो धर्मबुद्धेश्चोरितः । स च तव व-चनेन परिणतिं[1] यास्यति । अन्यथा मम प्राणैः सह यास्यति[2] । स आह । वत्स द्रुत वद येन प्रोच्य[3] तद्द्रव्यं स्थिरतां नयामि[4] । पापबुद्धिराह । तात अस्ति तत्प्रदेशे महाशमी । तस्यां महत्कोटरमस्ति । तत्र त्वं सांप्रतमेव प्र-विश । ततः प्रभाते हं यदा सत्यश्रावणं करोमि[5] तदा त्वया वाच्यं यद्धर्म-बुद्धिश्चौर इति । तथानुष्ठिते प्रत्यूषे पापबुद्धिः स्नात्वा धर्मबुद्धिपुरःसरो राजपुरुषैः सह तां शमीमभ्येत्य तारस्वरेण प्रोवाच ।

> [6]आदित्यचन्द्रावनिलोनलश्च
> द्यौर्भूमिरापो हृदयं यमश्च ।
> अहश्च रात्रिश्च उभे च संध्ये
> धर्मो हि जानाति नरस्य वृत्तम् ॥ ४०५ ॥

तत्कथयतु वनदेवता आवयोर्यश्चौर इति । अथ पापबुद्धिपिता शमी-कोटरस्थः प्रोवाच । भो धर्मबुद्धिना हृतमेतद्धनम् । तदाकर्ण्य सर्वे राज-पुरुषा विस्मयोत्फुल्ललोचना[7] यावद्धर्मबुद्धेर्वित्तहरणोचितं निग्रहं शास्त्र-दृष्ट्यावलोकयन्ति[8] तावद्धर्मबुद्धिना तच्छमीकोटरं वह्निभोज्यद्रव्यैः[9] परिवार्य वह्निना संदीपितम् । अथ ज्वलति तस्मिञ्शमीकोटरेऽर्धदग्धशरीरः स्फोटि-तेक्षणः[10] करुणं परिदेवयन्पापबुद्धिपिता निश्चक्राम । ततस्तैः सर्वैः पृष्टः सर्वं पापबुद्धिचेष्टितं निवेदयामास । अथ ते राजपुरुषाः पापबुद्धिं शमीशाखायां प्रतिलम्ब्य[11] धर्मबुद्धिं प्रशस्येदमूचुः । अहो साध्विदमुच्यते ।

---

१ Will be secured (lit. will be ripe). २ Go away with my life, will deprive me of life. ३ Having declared aloud. ४ Make it firm in your possession. ५ Make truth heard, declare the truth. ६ This verse is equal to 182. ७ With the eyes glistening with wonder. ब. ८ Were considering according to law what was the punishment to be awarded to *Dharmabuddhi* adequately to his crime of theft. ९ With combustible things or materials. १० With broken eyes. क. ११ Having hanged.

उपायं चिन्तयेत्प्राज्ञस्तथापायं च चिन्तयेत् ।
पश्यतो बकमूर्खस्य नकुलेन हता बकाः ॥ ४०६ ॥

धर्मबुद्धिः प्राह । कथमेतत् । ते प्राचुः ।

॥ कथा २० ॥

अस्ति कस्मिंश्चिद्वनोद्देशे बहुबकसनाथो वटपादपः । तस्य कोटरे कृष्णसर्पः प्रतिवसति स्म । स च बकबालकानजातपक्षानपि सदैव भक्षयन्कालं नयति । अथैको बको भक्षितानि शिशूनि वैराग्यात्सरस्तीरमासाद्य बाष्पपूरपूर्णलोचनोऽधोमुखस्तिष्ठति । न च तादृक्चेष्टितमवलोक्य कुलीरकः प्रोवाच । माम किमेवं रुद्यते भवताद्य । स आह । भद्र किं करोमि । मम मन्दभाग्यस्य बालकाः कोटरनिवासिना सर्पेण भक्षिताः । दुःखितोऽहं तद्दुःखेन । तत्कथय मे यद्यस्ति कश्चिदुपायस्तद्विनाशाय । तदाकर्ण्य कुलीरकश्चिन्तयामास । अयं तावदस्मत्सहजवैरी । तथोपदेशं प्रयच्छामि सत्यानृतं यथान्येऽपि बकाः सर्वे संक्षयमायान्ति । उक्तं च ।

नवनीतसमां वाणीं कृत्वा चित्तं सुनिर्दयम् ।
तथा प्रबोध्यते शत्रुः सान्वयो म्रियते यथा ॥ ४०७ ॥

आह च । माम यद्येवं तन्मत्स्यमांसशकलानि नकुलस्य बिलद्वारात्सर्पकोटरं यावत्प्रक्षिप यथा नकुलस्तन्मार्गेण गत्वा तं दुष्टसर्पं विनाशयति । अथ तथानुष्ठिते मत्स्यमांसानुसारिणा नकुलेन तं कृष्णसर्पं

१ A wise man should think out a remedy as also an injury , while a foolish crane was looking on, the cranes were destroyed by a mangoose. २ Even before they had wings : before they were fledged. ३ Through absence of all desires consequent on the offspring being devoured. ४ Flooded or filled with. ५ Thus circumstanced. ६ Natural enemy. ७ True and false, that is, apparently true but really false. ८ Having made the words (as soft) as butter, and the heart very hard, an enemy is *so advised* (should be so advised) that he dies together with his family.

निहत्य तेऽपि तद्वृक्षाश्रयाः सर्वे बकाश्च शनैः शनैर्भक्षिताः । अतो वयं ब्रूम उपायं चिन्तयेदिति ।

तदनेन पापबुद्धिनोपायश्चिन्तितो नापायः । तस्य प्राप्तं फलम् । एवं मूढ त्वयाप्युपायश्चिन्तितो नापायः पापबुद्धिवत् । तन्न चासि त्वं सज्जनः केवलं पापबुद्धिरसि ज्ञातो मया स्वामिनः प्राणसंदेहानयनात् । प्रकटीकृतं त्वया स्वयमेवात्मनो दुष्टत्वं कौटिल्यं च । अथवा साध्विदमुच्यते :

यत्नादपि कः पश्येच्छिखिनामाहारनिःसरणमार्गम् ।
यदि जलदध्वनिमुदितास्त एव मूढा न नृत्येयुः ॥ ४०८ ॥

तद्यदि त्वं स्वामिन एनां दशां नयसि तदस्मद्विधस्य का गणना । तस्मान्ममासन्नेन भवता न भाव्यम् । उक्तं च ।

तुलां लोहसहस्रस्य यत्र खादन्ति मूषिकाः ।
राजंस्तत्र हरेच्छ्येनो बालकं नात्र संशयः ॥ ४०९ ॥

दमनक आह । कथमेतत् । सोऽब्रवीत् ।

॥ कथा २१ ॥

अस्ति कस्मिंश्चिदधिष्ठाने जीर्णधनो नाम वणिक्पुत्रः । स च द्रव्यक्षयाद्देशान्तरगमनमना व्यचिन्तयत् ।

यत्र देशेऽथवा स्थाने भोगान्भुक्त्वा स्ववीर्यतः ।
तस्मिन्विभावहीनो यो वसेत्स पुरुषाधमः ॥ ४१० ॥

१ Residing on that tree २ Nor are you good-hearted. ३ By endangering the life of your lord. ४ Crookedness. ५ Who can know, even with efforts, the way by which peacocks go out for seeking prey, if those fools delighted at the thunder of the clouds, do not dance. आहार &c. आहाराय निःसरणमार्गम्; जलदध्वनि &c. तृ. त. ६ What account will you make of us? Of what account are persons like us? ७ You should not be near me. ८ In the case where mice eat the weight of a thousand (lbs.) of iron, oh king, there is no doubt that a crane can take away the child. ९ Of declined wealth जीर्णं धनं यस्य. ब. १० That man is the worst of man who resides, when without wealth, even in that place or country where he has enjoyed pleasures through his own valour.

तथा च । [१]येनाहंकारयुक्तेन चिरं विलसितं पुरा ।

दीनं वदति तत्रैव यः परेषां स निन्दितः ॥ ४११ ॥

तस्य च गृहे लोहभार[२]घटिता पूर्वपुरुषोपार्जिता तुलासीत् । तां च कस्यचिद्वणिजो गृहे निक्षेप[३]भूतां कृत्वा देशान्तरं प्रस्थितः । ततः सुचिरं कालं देशान्तरं भ्रान्त्वा पुनस्तदेव स्वपुरमागत्य तं श्रेष्ठिनमुवाच । भोः श्रेष्ठिन्दीयतां मे सा निक्षेपतुला[४] । स आह । भो नास्ति सा त्वदीया तुला । मूषकैर्भक्षिता । जीर्णधन आह । भोः श्रेष्ठिन्नास्ति दोषस्ते यदि मूषिकैर्भक्षितेति । [५]ईदृगेव संसारः । न किंचिदत्र शाश्वतमस्ति । परमहं नद्यां स्नानार्थं गमिष्यामि । तत्त्वमात्मीयं शिशुमेतं मया सह स्नानोपकरणहस्तं[६] प्रेषयेति । सोऽपि चौर्यभयात्तस्य[७] शङ्कितः स्वपुत्रमुवाच । वत्स पितृव्योयं तव स्नानार्थं नद्यां यास्यति । तद्गम्यतामनेन सार्धं स्नानोपकरणमादायेति । अहो साध्विदमुच्यते ।

[८]न भक्त्या कस्यचित्कोपि प्रियं प्रकुरुते नरः ।

मुक्त्वा भयं प्रलोभं वा कार्यकारणमेव वा ॥ ४१२ ॥

तथा च । [९]अत्यादरो भवेद्यत्र कार्यकारणवर्जितः ।

तत्र शङ्का प्रकर्तव्या परिणामे सुखावहा ॥ ४१३ ॥

---

१ That man is censurable in the eyes of others who speaks piteously in that very place where he has before enjoyed pleasures, being full of self-pride. २ Made of many weights of iron, that is, made of iron weighing many lbs &c. ३ Having kept as a deposit. ४ The balance kept as a deposit. It is a क. निक्षेप एव तुला. ५ Such is the world. ६ Carrying in his hands the materials of bathing. स्नानस्य उपकरणानि. ष. त. तानि हस्ते यस्य ब. ७ Being afraid of him through the fear of the theft committed. ८ No body does any good to another through mere devotion, except through fear, avarice or a motive to accomplish some object कार्यकारण—कार्यस्य कारणं. ष. त. कार्यकारण may also mean cause and effect. ९ In that place where thereis great respect shown without any particular motive for accomplishing an object, there a doubt should be entertained as it is beneficial in the end. सुखावहा-सुखं आवहतीति. उप.

अथासौ वणिक्शिशुः स्नानोप… …द्राय प्रहृष्टमनास्तेनाभ्यागतेन सह
प्रस्थितः । तथानुष्ठिते वणिक्ता… शिशुं नदीगुहायां प्रक्षिप्य तद्द्वार
बृहच्छिलयाच्छाद्य सत्वरं गृहमाग… …ष्टश्च तेन वणिजा भो अभ्यागत
तत्कथ्यतां कुत्र मे शिशुर्यस्त्वया… …गत इति । स आह । नदी-
तटात्स श्येनेन हृत इति । श्रे… …मिथ्यावादिन्कि
बालं हर्तुं शक्नोति । तत्समर्पय मे… …यथा राजकुले निवेदयिष्या-
मीति । स आह । भोः सत्यव… …। श्येनो बालं न नयति
तथा मूषिका अपि लोहभारघ्… …तुलां न भक्षयन्ति । तदर्प-
य मे तुलां यदि दारकेण प्रय… … । एवं विवदमानौ द्वा-
वपि राजकुलं गतौ । तत्र … …तारस्वरेण प्रोवाच । भो
अब्रह्मण्यमब्रह्मण्यम् । मम शिशुर… …पहृतः । अथ धर्माधिकारि-
णस्तमूचुः । भोः समर्प्यतां श्रेष्ठिसु… …आह । किं करोमि । पश्यतो मे
नदीतटाच्छ्येनेनापहृतः शिशुः । त… …। प्रोचुः । भो न सत्यमभिहितं
भवता । किं श्येनः शिशुं हर्तुं सम… …। स आह । भो भोः
श्रूयतां मद्वचः ।

तुलां लोहसहस्रस्य यत्र … मूषकाः ।
राजंस्तत्र हरेच्छ्येनो बा… …त्र संशयः ॥ ४१४ ॥

… ते प्रोचुः कथमेतत् । ततः श्रेष्ठी … …नामादितः सर्वं वृत्तान्तं निवे-
दयामास । ततस्तैर्विहस्य द्वावपि तौ … …रं संबोध्य तुलाशिशुप्रदानेन
संतोषितौ ।

अतोऽहं ब्रवीमि तुलां लोहसहस्रस्य … ।
तन्मूर्ख संजीवकप्रसादमसहमानेन … …त्कृतम् । अहो साध्विदमुच्यते ।

१ Guest. २ In a cave inside … river. ३ If you want your son. ४ From the beginning. ५ … restoring the balance and the son respectively. ६ Not b… …ing the favour shown (by the lion) to Sanjivaka.

प्रायेणात्र कुलान्वितं कुकुलजाः श्रीवल्लभं दुर्भगा
दातारं कृपणा ऋजूननृजवो वित्तान्वितं निर्धनाः ।
वैरूप्योपहताश्च कान्तवपुषं धर्माश्रयं पापिनो
नानाशास्त्रविचक्षणं च पुरुषं निन्दन्ति मूर्खा जनाः ॥ ४१५ ॥

तथा च । मूर्खाणां पण्डिता द्वेष्या निर्धनानां महाधनाः ।
व्रतिनः पापशीलानामसतीनां कुलस्त्रियः ॥ ४१६ ॥

तन्मूर्ख त्वया हितमप्यहितं कृतम् । उक्तं च ।

पण्डितोपि वरं शत्रुर्न मूर्खो हितकारकः ।
वानरेण हतो राजा विप्राश्चौरेण रक्षिताः ॥ ४१७ ॥

दमनक आह । कथमेतत् । सोब्रवीत् ।

॥ कथा २२ ॥

कस्यचिद्राज्ञो नित्यं वानरोतिभक्तिपरोङ्गसेवकोन्तःपुरेप्यप्रतिषिद्धप्रसरोतिविश्वासस्थानमभूत् । एकदा राज्ञो निद्रां गतस्य वानरे व्यजनं नीत्वा वायुं विदधति राज्ञो वक्षःस्थलोपरि मक्षिकोपविष्टा । व्यजनेन मुहुर्मुहुर्निषिध्यमानापि पुनःपुनस्तत्रैवोपविशति । ततस्तेन स्वभावचपलेन मूर्खेण वानरेण क्रुद्धेन सता तीक्ष्णं खड्गमादाय तस्या उपरि प्रहारो विहितः ।

---

१ Generally in this world, those born in a low family calumniate those who are nobly born, the unfortunate the fortunate, misers a generous man, the crooked the straightforward, the poor the rich, those who are deformed the handsome, sinful the religious, and the foolish censure those who are well-versed in various sciences. श्रीवल्लभं-श्रियः वल्लभं the favourite of the goddess of wealth. २ The wise are an object of hatred to the foolish, the rich to the poor, those, who are devoted to religious observances, to the sinful, and virtuous women to the debauched ones. महाधनाः-ब. पापशील-पापं शीलं येषां ते. ब. ३ An enemy, that is wise, is preferable even to a friend (हितकारक) who is foolish ; a king was killed by a monkey, while Brâhmans were saved by a thief. ४ Greatly attached. अतिभक्तिः परं यस्य. ब. ५ A personal attendant. ६ Not forbidden access even to the women's apartments. ७ Was fanning him with a fan (taking a fan). ८ Mischievously inclined by nature. ९ the fly (मक्षिका.) १० Was made, dealt (कृतः).

ततो मक्षिकोड्डीय गता परं तेन शितधारेणासिना राज्ञो वक्षो द्विधा जातं राजा मृतश्च । तस्माच्चिरायुरिच्छता नृपेण मूर्खोनुचरो न रक्षणीयः । अपरमेकस्मिन्नगरे कोपि विप्रो महाविद्वान्परं पूर्वजन्मयोगेन चौरो वर्तते । तस्मिन्पुर्यन्यदेशादागतांश्चतुरो विप्रान्बहूनि वस्तूनि विक्रीणतो दृष्ट्वा चिन्तितवान् । अहो केनोपायेनैषां धनं लभे । इति विचिन्त्य तेषां पुरोनेकानि शास्त्रोक्तानि सुभाषितानि चातिप्रियाणि मधुराणि वचनानि जल्पता तेषां मनसि विश्वासमुत्पाद्य सेवा कर्तुमारब्धा । अथवा साध्विदमुच्यते ।

"असती भवति सलज्जा क्षारं नीरं च शीतलं भवति ।
दम्भो भवति विवेकी प्रियवक्ता भवति धूर्तजनः ॥ ४१८ ॥

अथ तस्मिन्सेवां कुर्वति तैर्विप्रैः सर्ववस्तूनि विक्रीय बहुमूल्यानि रत्नानि क्रीतानि । ततस्तानि जङ्घामध्ये तत्समक्षं प्रक्षिप्य स्वदेशं प्रति गन्तुमुद्यमो विहितः । ततः स धूर्तविप्रस्तान्विप्रान्गन्तुमुद्यतान्प्रेक्ष्य चिन्ताव्याकुलितमनाः संजातः । अहो धनमेतन्न किंचिन्मम चटितम् । अथैभिः सह यामि । पथि क्वापि विषं दत्त्वैतान्निहत्य सर्वरत्नानि गृह्णामि । इति विचिन्त्य तेषामग्रे सकरुणं विलप्येदमाह । भो मित्राणि यूयं मामेकाकिनं मुक्त्वा गन्तुमुद्यताः । तन्मे मनो भवद्भिः सह स्नेहपाशेन बद्धं भवद्विरहनाम्नैवाकुलं संजातं यथा धृतिं क्वापि न धत्ते । ततो यूयमनुग्रहं विधाय सहायभूतं मामपि सहैव नयत । तद्वचः श्रुत्वा ते करुणार्द्रचित्तास्तेन सममेव स्वदेशं प्रति प्रस्थिताः । अथाध्वनि तेषां पञ्चानामपि पल्लीपुरमध्ये व्रजतां ध्वाङ्क्षाः कथयितुमारब्धाः

---

१ Having a sharp edge. शिता धारा यस्य. ब० २ A king desirous of long life. ३ By the force of sin committed in the previous existence. ४ Acc. Plu. of the Pre. P. of क्री 9 P. with वि. ५ An unchaste woman is bashful (affects to be modest), salt water is cool, a hypocrite affects to be considerate, and a roguish person talks sweetly. दम्भ here means a hypocrite person and not hypocrisy ६ The thigh. ७ Obtained by me. ८ Has become full of dejection at the very mention of separation from you. ९ Takes no courage anywhere. १० The name of a town. ११ Crows.

रे रे किराता धावत धावत । ... लक्षधनिनो यान्ति । एतान्निहत्य धनं नयत । ततः किरातैर्ध्वाङ्क्षवचनमाकर्ण्य सत्वरं गत्वा ते विप्रा लगुडप्रहारैर्जर्जरीकृत्य वस्त्राणि मोचयित्वा विलोकिताः परं धनं किंचिन्न लब्धम् । तदा तैः किरातैरभिहितं । भोः पान्थाः पुरा कदापि ध्वाङ्क्षवचनमनृतं नासीत् । ततो भवतां ... क्वापि धनं विद्यते तदर्पयत । अन्यथा सर्वेषामपि वधं विधाय ... विदार्य प्रत्यङ्गं प्रेक्ष्य धनं नेष्यामः । तदा तेषामीदृशं वचन ... कर्ण्य चौरविप्रेण मनसि चिन्तितम् । यदेषां विप्राणां वधं विधाय ... विलोक्य रत्नानि नेष्यन्ति तदापि मां वधिष्यन्ति ततोहं पूर्वमेवात्मानं ... सर्मर्प्यैतान्मुञ्चामि । उक्तं च ।

मृत्योर्बिभेषि किं ... न स नीतं विमुञ्चति ।
अद्य वाब्दशतान्ते वा मृत्युर्वै प्राणिनां ध्रुवः ॥ ४१९ ॥

तथा च । गवार्थे ब्राह्मणार्थे ... प्राणत्यागं करोति यः ।
सूर्यस्य मण्डलं भित्त्वा स याति परमां गतिम् ॥ ४२० ॥

इति निश्चित्याभिहितम् । ... किराता यद्येवं तर्हि मां पूर्वं निहत्य विलोकयत । ततस्तैस्तथानुष्ठिते ... धनरहितमवलोक्यापरे चत्वारोपि मुक्ताः ॥

अतोहं ब्रवीमि पण्डितोपि वरं शत्रुरिति ।

अथैवं संवदतोस्तयोः सं ... कः क्षणमेकं पिङ्गलकेन सह युद्धं कृत्वा तस्य खरनखरप्रहारै ... वसुंधरापीठे निपपात । अथ

१ Savages, barbar... ...sons possessing wealth to the amount of a lac and ... ter ३ Having defeated, ४ Searched. ५ Having ... ed every limb. ६ Without jewels, or valuables ... ...ng surrendered (myself). ८ Child, why do you fe... ... He does not spare him who fears him (death). ... is sure to overtake mortals either to-day or at ... ...t of a hundred years. अब्दशतान्ते अब्दानां शतं ... gives up his life for the sake of cows, and Bráhm... to the highest place after having penetrated thr... ... of the sun. १० While they were thus ... ...

तं गतासुमवलोक्य पिङ्गलकस्तद्गुणस्मरणार्द्रहृदयः[1] प्रोवाच । भो अयुक्तं मया पापेन कृतं संजीवकं व्यापादयता यतो विश्वासघातादन्यन्नास्ति पापतरं[2] कर्म । उक्तं च ।

[3]मित्रद्रोही कृतघ्नश्च यश्च विश्वासघातकः ।
ते नरा नरकं यान्ति यावच्चन्द्रदिवाकरौ ॥ ४२१ ॥

तथा मया सभामध्ये स सदैव प्रशंसितः । तत्किं कथयिष्यामि तेषामग्रतः । उक्तं च ।

[4]उक्तो भवति यः पूर्वं गुणवानिति संसदि ।
न तस्य दोषो वक्तव्यः प्रतिज्ञाभङ्गभीरुणा ॥ ४२२ ॥

एवंविधं प्रलपन्तं दमनकः समेत्य सहर्षमिदमाह । देव कातरतमस्तवैष[5] न्यायो यद्द्रोहकारिणं शष्पभुजं हत्वेत्थं शोचसि । तन्नैतदुपपन्नं भूभुजाम् । उक्तं च ।

[6]पिता वा यदि वा भ्राता पुत्रो भार्याथवा सुहृत् ।
प्राणद्रोहं यदा गच्छेत्तं हतो नास्ति पातकम् ॥ ४२३ ॥

तथा च ।

[7]राजा घृणी ब्राह्मणः सर्वभक्षी
स्त्री चावशा दुष्टमतिः सहायः ।
प्रेष्यः प्रतीपोधिकृतः प्रमादी
त्याज्या अमी यश्च कृतं न वेत्ति ॥ ४२४ ॥

१ With his heart melted with pity by remembering merits. २ More sinful or wicked. ३ A man, who kills his friend, who is ungrateful, and who breaks faith with others—these men go to hell and remain there so long as there are the moon and sun (that is, perpetually). ४ This verse is equal to 244. ५ This your judgment is the most cowardly. ६ There is no sin in killing either a father, brother, son, wife or friend; when he or she conspires against one's life. ७ These seven, viz., a merciful king, a Brâhmana eating all, that is, voracious, a wife that is not under proper control, a wicked-minded companion, a servant going against one's wishes, a careless officer and one who does not recognize what is done and one who is ungrateful—should be abandoned. प्रतीप lit. against the current of water (प्रति—इप् from अप्) and hence going

अपि च ।

सत्यानृता च परुषा प्रियवादिनी च
हिंस्रा दयालुरपि चार्थपरा वदान्या ।
भूरिव्यया प्रचुरवित्तसमागमा च
वेश्याङ्गनेव नृपनीतिरनेकरूपा ॥ ४२५ ॥

एवं तेन संबोधितः पिङ्गलकः संजीवकशोकं त्यक्त्वा दमनकसाचिव्येन राज्यमकरोत् ॥

समाप्तं चेदं मित्रभेदं नाम प्रथमं तन्त्रम् ॥

---

१ Royal policy is of various forms like a harlot, viz., it is true, false, harsh, sweet-speaking, cruel, compassionate, intent on acquiring wealth, bountiful, extravagant and associating with one having much weath. All these adjectives apply equally to a *king* and a harlot. २ Sorrow for the death of Sanjivaka. ३ Here ends this first Tantra entitled मित्रभेद.

A
POPULAR EDITION
OF THE
SECOND AND THIRD TANTRAS
OF
VISHNUS'ARMAN.

(Containing a full Glossary and a literal translation of the verses occurring in the Text.)

BY

MAHADEVA SHIVARAM APTE, B. A.,
1st Assistant Master, High School, Satara.



PUBLISHED BY HARI NARAYEN GOKHALE
Manager, Arya-Bhushana Press,
POONA.





1884.

PRINTED AT THE *Arya-Bhúshana* PRESS, POONA.

PREFACE.

The following is a Popular Edition of the Second and Third Tantras containing full explanatory notes and a glossary of words, adapted to meet the requirements of less advanced students. By Popular Edition is meant such a one as can be easily understood without the help of a teacher even by a student who has studied the first few lessons of Dr. Bhandarkar's 2nd Book. It is thus hoped that it will be largely availed of by the generality of students and especially by those who study privately. An experience of some years as a teacher of Sanskrit has convinced the editor that a book of the kind now presented would be generally acceptable. Hence he thinks that the publication of the book meets a long felt want.

No pains have been spared to make this book useful to these for whom it is intended. Almost all the verses have been literally translated into English except only a few which, it was thought, could be easily understood.

How far the object in view is carried out is left entirely to the public to judge.

Any suggestions as to the meaning of a particular passage or individual words will be deemed a favour.

The Editor.

अथ

द्वितीयतन्त्रम् ।

अथेदमारभ्यते मित्रप्राप्तिकं नाम द्वितीयं तन्त्रं यस्यायमादिमः श्लोकः ।

असाधना अपि प्राज्ञा बुद्धिमन्तो बहुश्रुताः ।
साधयन्त्याशु कार्याणि काकाखुमृगकूर्मवत् ॥ १ ॥

तद्यथानुश्रूयते ।

अस्ति दाक्षिणात्ये जनपदे महिलारोप्यं नाम नगरम् । तस्य नातिदूरेण महांश्छायावान्न्यग्रोधपादपो नानाविहंगोपभुक्तफलः कीटैरावृतकोटरश्छायाश्वासितपथिकजनसमूहश्च । अथवा युक्तम् ।

---

१ Called the acquisition of friends. It is a ब. स. क being added to make it ब. मित्रप्राप्तिः यस्मिन् तत्. २ The wise, talented and well-read (lit. those who have heard much) though without means, accomplish their purposes quickly, as did the crow, mouse, deer and tortoise (in the following book). ३ For the explanation of this, see the 1st Tantra. ४ Not far from it, near it. ५ A large banian tree full of shade or shady. ६ The fruits of which were eaten by various kinds of birds. नानाविहंगैः उपभुक्तानि फलानि यस्य स. ब. ७ The hollows of which were filled with insects or worms. ब. ८ In the shade of which multitudes of travellers took rest. ब.

[1]छायासुप्तमृगः शकुन्तिनिवहैर्विष्वग्विलुप्तच्छदः
कीटैरावृतकोटरः कपिकुलैः स्कन्धे कृतप्रश्रयः ।
विश्रब्धं मधुपैर्निपीतकुसुमः श्लाघ्यः सतां सत्तरुः
सर्वाङ्गैर्बहुजीवसंघसुखदो भूभारभूतोपरः ॥ २ ॥

तत्र च लघुपतनको[2] नाम वायसः प्रतिवसति स्म । स कदाचित्प्राणयात्रार्थं[3] पुरमुद्दिश्य[4] प्रचलितो यावत्पश्यति तावज्जालहस्तोतिकृष्णतनुः[5] स्फुटितचरण[6] ऊर्ध्वकेशो[7] यमकिंकराकारो[8] नरः संमुखो बभूव । अथ तं दृष्ट्वा व्यचिन्तयत् । यदयं दुरात्माद्य ममाश्रयवटपादपसंमुखोभ्येति[9] । तन्न ज्ञायते किमद्य वटवासिनां[10] विहंगानां विनाशो भविष्यति न वा । एवं बहुविधं विचिन्त्य तत्क्षणान्निवृत्य तमेव वटपादपं गत्वा सर्वान्विहंगान्प्रोवाच । भो अयं दुरात्मा लुब्धको[11] जालतण्डुलहस्तः[12] समभ्येति । तत्सर्वथा तस्य न विश्वसनीयम् । एष जालं

१ The shade of which was resorted to by the beasts of the forest for rest, the leaves of which were occupied in many places by multitudes (flights) of birds, the hollows of which were filled with worms, the branches of which were inhabited by herds of monkeys, the honey in the flowers of which was fearlessly drunk in by the bees–such an excellent tree, worthy of praise at the hands of the good, afforded pleasure to many creatures by its various limbs (parts), so that any other tree besides, was only a burden to the earth. Almost all the compounds in this verse are ब. छायायां सुप्ताः मृगाः यस्य. Others should be similarly dissolved. बहु...दः–बहुजीवसंघाय सुखं ददातीति. उप. २ लघु पतनं यस्य. ब. Short of flight. ३ In search of prey or livelihood. ४ Towards. It is used as a preposition being the gerund of दिश् with उद्. ५ With a net in hand. जालं हस्तयोः यस्य ब. ६ Of very black complexion. ब. ७ Splay-footed. स्फुटितौ चरणौ यस्य. ब. ८ With the hair standing erect. ९ Having the form of the servants of Yama (god of death) यमकिंकरस्येव आकारः यस्य. ब. १० The banian tree which is my resting-place. ११ Residing in the वट tree. १२ A hunter. १३ Carrying a net and rice in his hands. जालतंडुलौ हस्तयोः यस्य. ब.

प्रसार्य तण्डुलान्प्रक्षेप्स्यति । ते भवद्भिः सर्वैरपि हालाहलसदृशा द्रष्टव्याः । एवं वदतस्तस्य स लुब्धकस्तत्र वटतल आगत्य जालं प्रसार्य सिन्दुवारसदृशांस्तण्डुलान्प्रक्षिप्य नातिदूरं गत्वा निभृतः स्थितः । अथ ये पक्षिणस्तत्र स्थितास्ते लघुपतनकवाक्यार्गलया निवारितास्तांस्तण्डुलान्हालाहलाङ्कुरानिव वीक्षमाणा निभृतास्तस्थुः । अत्रान्तरे चित्रग्रीवो नाम कपोतराजः सहस्रपरिवारः प्राणयात्रार्थं परिभ्रमंस्तांस्तण्डुलान्दूरतोपि पश्यंल्लघुपतनकेन निवार्यमाणोपि जिह्वालौल्याद्भक्षणार्थमपतत्सपरिवारो निबद्धश्च । अथवा साध्विदमुच्यते ।

१४जिह्वालौल्यप्रसक्तानां जलमध्यनिवासिनाम् ।
अचिन्तितो वधोऽज्ञानां मीनानामिव जायते ॥ ३ ॥

अथवा न तस्य दोषोस्ति । उक्तं च ।

१५पौलस्त्यः कथमन्यदारहरणे दोषं न विज्ञातवान्
रामेणापि कथं न हेमहरिणस्यासंभवो लक्षितः ।

---

१ Will scatter, throw. (2nd Future of क्षिप् with प्र.) २ Like the deadly poison. (हालाहल.) ३ A kind of plant and its seed. ४ Hidden, concealed. ५ By the bar or bolt in the shape of the advice of Laghupatanaka. ६ Sprouts. ७ Of variegated neck. चित्रा ग्रीवा यस्य. ब. ८ The king of pigeons. ९ With a retinue consisting of a thousand followers. सहस्रं परिवारः यस्य. ब. १० Being warded off or prevented. Pre. P. Passive of the caus. of वृ with नि. ११ Through the greediness of tongue. १२ Alighted (on the ground). १३ Was caught or entangled (in the net). १४ Unexpected death befalls those who are greedy of tongue, who live in the midst of water, and those who are ignorant, as it does the fish. जिह्वालौल्य &c. स. त. १५ How did not *Paulastya* (Râvana) know that it was a crime to take away another's wife, how did not *Ràma* even perceive the impossibility of a golden deer, and how did *Yudhishthira* bring upon himself a calamity by means of gambling (dice) all on a sudden ? Generally the intellect of those whose minds are rendered senseless by a near danger, fails or is lessened. विज्ञातवान् P. P. Active of ज्ञा with वि. हेमहरिणः = हेम्नः हरिणः. ष. त., प्रत्यासन्न &c. प्रत्यासन्नया विपत्त्या मूढानि मनांसि येषां तेषां. ब.

अक्षैश्चापि युधिष्ठिरेण सहसा प्राप्तो ह्यनर्थः कथं
प्रत्यासन्नविपत्तिमूढमनसां प्रायो मतिः क्षीयते ॥ ४ ॥

तथा च । [1]कृतान्तपाशबद्धानां दैवोपहतचेतसाम् ।
बुद्धयः कुब्जगामिन्यो भवन्ति महतामपि ॥ ५ ॥

अत्रान्तरे लुब्धकस्तान्बद्धान्विज्ञाय प्रहृष्टमनाः [2]प्रोद्यतयष्टिस्तद्वधार्थं प्राधावितः । चित्रग्रीवोप्यात्मानं सपरिवारं बद्धं मत्वा लुब्धकमायान्तं दृष्ट्वा तान्कपोतानूचे । अहो न भेतव्यम् । उक्तं च ।

[3]व्यसनेष्वेव सर्वेषु यस्य बुद्धिर्न हीयते ।
स तेषां पारमभ्येति तत्प्रभावादसंशयम् ॥ ६ ॥

तत्सर्वे [4]हेलयोड्डीय [5]सपाशजाला अस्यादर्शनं[6] गत्वा मुक्तिं प्राप्नुमः । नोचेद्भयविक्लवाः[7] सन्तो हेलया समुत्पातं न करिष्यथ ततो मृत्युमवाप्स्यथ । उक्तं च ।

[8]तनवोप्यायता नित्यं तन्तवो बहुलाः समाः ।
बहून्बहुत्वादायासान्सहन्तीत्युपमा सताम् ॥ ७ ॥

तथानुष्ठिते लुब्धको जालमादायाकाशे गच्छतां तेषां पृष्ठतो[9] भूमिस्थोपि पर्यधावत । तत ऊर्ध्वाननः[10] श्लोकमपठत् ।

१ The intellect of even the great who are tied by the nets of the god of death, whose minds are warped by ill-fate, go astray or in a crooked direction. कृतांतस्य पाशैः बद्धानां. तृ. त. दैवेन उपहतानि चेतांसि येषां. ब. २ Having raised a stick. प्रोद्यता यष्टिः येन. ब. ३ That man, whose presence of mind does not leave him in all calamities, surmounts them without doubt through its power. हीयते lit. is abandoned from हा 3 P. Passive. ४ With speed, speedily. ५ Together with the nets and snares. पाशजालैः सहिताः. तृ. त. ६ Having gone beyond the reach of his sight. ७ Being bewildered or confounded. ८ Thin but long fibers of equal length always sustain many efforts (pulls) by reason of their large number. The same simile applies to the good. सहंति = सहंते. ९ After (them). १० With the face upwards. ऊर्ध्वं आननं यस्य. ब.

जालमादाय गच्छन्ति संहताः पक्षिणोप्यमी ।
यावच्च विवदिष्यन्ते पतिष्यन्ति न संशयः ॥ ८ ॥

लघुपतनकोपि प्राणयात्राक्रियां त्यक्त्वा किमत्र भविष्यतीति कुतूहलात्तत्पृष्ठलग्नोनुसरति । अथ दृष्टेरगोचरतां गतान्विज्ञाय लुब्धको निराशः श्लोकमपठन्निवृत्तश्च ।

न हि भवति यन्न भाव्यं भवति च भाव्यं विनापि यत्नेन ।
करतलगतमपि नश्यति यस्य हि भवितव्यता नास्ति ॥ ९ ॥

तथा च । पराङ्मुखे विधौ चेत्स्यात्कथंचिद्द्रविणोदयः ।
तत्सोन्यदपि संगृह्य याति शङ्खनिधिर्यथा ॥ १० ॥

तदास्तां तावद्विहंगामिषलाभः । कुटुम्बवर्तनोपायभूतं जालमपि मे नष्टम् । चित्रग्रीवोपि लुब्धकमदर्शनीभूतं ज्ञात्वा तानुवाच । भोः निवृत्तः स दुरात्मा लुब्धकः । तत्सर्वैरपि स्वस्थैर्गम्यतां महिलारोप्यस्य प्रागुत्तरे दिग्भागे । तत्र मम सुहृद्धिरण्यको नाम मूषकः । सर्वेषां स पाशच्छेदं विधास्यति । उक्तं च ।

सर्वेषामेव मर्त्यानां व्यसने समुपस्थिते ।
वाङ्मात्रेणापि साहाय्यं मित्रादन्यो न संदधे ॥ ११ ॥

१ These birds united together are going away with the net; but there is no doubt that as soon as they begin to dispute, they will fall down. २ Going after them. द्वि. त. ३ The state of being beyond the reach of sight, gone beyond the reach of sight. ४ That which is not to happen, does not happen, but that which is to happen, does happen even without efforts; that which is not destined to live, perishes, though placed on the palm of one's hand ५ When fate is adverse, there may happen with great difficulty the rise of wealth, but that goes away taking with it something else, as does शङ्खनिधि—a store of conches. ६ Let the desire of catching the birds be aside, not to mention &c. ७ Which was the means of acquiring the livelihood of my family. ८ Having known that he had disappeared. ९ In the front of महि० and towards the north. १० When a calamity befalls any creatures, no one but a friend will assist them, even with so much as exchanging words.

एवं ते कपोताश्चित्रग्रीवेण संबोधिता महिलारोप्ये नगरे हिरण्य-कबिलदुर्गं प्रापुः । हिरण्यकोपि सहस्रमुखबिलदुर्गं प्रविष्टोकुतोभयः सुखेनास्ते । अथवा साध्विदमुच्यते ।

दंष्ट्राविरहितः सर्पो मदहीनो तथा गजः ।
सर्वेषां जायते वश्यो दुर्गहीनस्तथा नृपः ॥ १२ ॥

तथा च । न गजानां सहस्रेण न च लक्षेण वाजिनाम् ।
तत्कर्म सिध्यते राज्ञां दुर्गेणैकेन यद्रणे ॥ १३ ॥

शतमेकोपि संधत्ते प्राकारस्थो धनुर्धरः ।
तस्माद्दुर्गं प्रशंसन्ति नीतिशास्त्रविदो जनाः ॥ १४ ॥

अथ चित्रग्रीवो बिलमासाद्य तारस्वरेण प्रोवाच । भो भो मित्र हिरण्यक सत्वरमागच्छ । महती मे व्यसनावस्था वर्तते । तच्छ्रुत्वा हिरण्यकोपि बिलदुर्गान्तर्गतः सन्प्रोवाच । भोः को भवान् । किमर्थ-मायातः । किं कारणम् । कीदृक्ते व्यसनावस्थानम् । तत्कथ्यतामि-ति । तच्छ्रुत्वा चित्रग्रीव आह । भोश्चित्रग्रीवो नाम कपोतराजोहं ते सुहृत् । तत्सत्वरमागच्छ । गुरुतरं प्रयोजनमस्ति । तदाकर्ण्य पुलकि-ततनुः प्रहृष्टात्मा स्थिरमनास्त्वरमाणो निष्क्रान्तः । अथवा साध्विद-मुच्यते ।

---

१ The fort-like hole. बिलं दुर्गमिव. २ A fort-like hole having a hundred entrances. सहस्रमुख=सहस्रं मुखानि यस्य. ब. ३ Without fear from any quarter. नास्ति कुतो भयं यस्य. ब. ४ A snake without fangs, an elephant without the ruts and a king without a fort, become subject to the power of all, that is, are easily conquered by all. All the compounds in this verse are तृ. त. ५ That thing which kings accomplish in battle with only a fort, cannot succeed by a thousand elephants and by a hundred thousand horses. ६ For translation see Pancha-tantra Part I. ७ In a loud tone, aloud. ८ A state of calamity or danger, a dangerous condition. ९ What is the nature of the danger you are in? १० The need of your assistance is greater than you are aware of. Unless we explain this way there is no propriety of the comparative termination तर. ११ Steady in mind.

सुहृदः स्नेहसंपन्ना लोचनानन्ददायिनः ।
गृहे गृहवतां नित्यमागच्छन्ति महात्मनाम्[1] ॥ १५॥

तथा च । भवनेतिथयो[2] यस्य समागच्छन्ति नित्यशः ।
यत्सौख्यं तस्य चित्ते स्यान्न तत्स्वर्गेपि जायते ॥ १६ ॥

अथ चित्रग्रीवं सपरिजनं बद्धमालोक्य हिरण्यकः सविषादमिद[3]-माह । भोः किमेतत् । स आह । भो जानन्नपि किं पृच्छसि । उक्तं च यतः ।

[4]यस्माच्च येन च यथा च यदा च यच्च
यावच्च यत्र च शुभाशुभमात्मकर्म ।
तस्माच्च तेन च तथा च तदा च तच्च
तावच्च तत्र च कृतान्तवशादुपैति ॥ १७ ॥

तत्प्राप्तं मयैतद्व्यसनं[5] जिह्वालोल्यात् । तत्त्वं पाशमोक्षं[6] कुरु माविलम्बम्[7] । तदाकर्ण्य हिरण्यकः प्राह ।

[8]अध्यर्धायोजनशतादामिषं वीक्षते खगः ।
सोपि पार्श्वस्थितं दैवाद्बन्धनं न च पश्यति ॥ १८ ॥

१ 'Friends full of affection and giving delight to the eyes' of the beholders (their friends) always go to the houses of the magnanimous house-holder. There is a different reading for आगच्छन्ति. It is नागच्छन्ति, which means do not come, that is, if they come at all, they do so rarely. २ That happiness, which is produced in the mind of him to whose house guests always come, is not to be had even in heaven. ३ Sadly, sorrowfully. विषादेन सहितं यथा तथा. अव्य. ४ Through the power of the god of death, one goes for that reason, by that cause, in that manner, at that time, to that, for that period and there; from which reason, by which cause, in which manner, at which time, to which, for what time, and where he has committed either a good or evil action (in the past birth). ५ Misery; calamity. ६ Release us from bondage, from the snares. पाशात् मोक्षः. पं. त. ७ Without delay. It is an adverbial compound. नास्ति or न. क्रियते विलम्बो यथा तथा. ८ A bird (lit. खग sky-goer) sees flesh from a distance of a hundred and fifty yojanas, but the very bird does unfortunately not see the snares (prepared to catch him) even when near him. A yojana is equal to 8 miles or 4 Koss.

तथा च । [१]रविनिशाकरयोर्ग्रहपीडनं
गजभुजंगविहंगमबन्धनम् ।
मतिमतां च निरीक्ष्य दरिद्रतां
विधिरहो बलवानिति मे मतिः ॥ १९ ॥

तथा च । [२]व्योमैकान्तविहारिणोपि विहगाः संप्राप्नुवन्त्यापदं
बध्यन्ते निपुणैरगाधसलिलान्मीनाः समुद्रादपि ।
दुर्नीतं किमिहास्ति किं च सुकृतं कः स्थानलाभे गुणः
कालः सर्वजनान्प्रसारितकरो गृह्णाति दूरादपि ॥ २० ॥

एवमुक्त्वा चित्रग्रीवस्य पाशं छेत्तुमुद्यतं स तमाह । भद्र मा मैवं कुरु । प्रथमं मम भृत्यानां पाशच्छेदं कुरु तद[३]नु ममापि च । तच्छ्रुत्वा कुपितो हिरण्यकः प्राह । भो न युक्तमुक्तं भवता यतः[४]स्वामिनोनन्तरं भृत्याः । स आह । भद्र मा मैवं वद । मदा[५]श्रयाः सर्व एते

१ Having seen the obscuration (lit. persecution) of the sun and moon by the planet (Râhu), the confinement of elephants, snakes and birds, and the poverty of the talented, it is my conviction that destiny is powerful. The first two lines occur differently elsewhere as शशिदिवाकरयोः ग्रहपीडनं, गजभुजंगमयोरपि बंधनं. where the word विहंगम is omitted. २ The birds, though sporting in the solitude of the sky, meet with calamities, the fish are caught even from the deep ocean by persons expert in catching them; what is the special effect of misconduct or of good conduct in this world, and what is the special merit or advantage of securing a particular place, (for) time (death) with outstretched hands seizes all creatures even from a distance. अगाधसलिलात् adjective of समुद्रात् अगाधं सलिलं यस्य. ब. प्रसारितकरः=प्रसारितौ करौ येन. ब. The last line is differently worded as कालोयं व्यसनप्रसारितकरो गृह्णाति दूरादपि-which means this death ready with open arms for calamities &c. ३ Thereafter. अनु in this sense governs the accusative. ४ Since the servants (come, take) after the master, that is, the master deserves precedence over servants. ५ Dependent on me (अहं आश्रयः येषां. ब.).

वराकाः। अपरं स्वकुटुम्बं परित्यज्य समागताः। तत्कथमेतावन्मात्र-मपि संमानं न करोमि। उक्तं च।

यः संमानं समाधत्ते भृत्यानां क्षितिपोऽधिकम्।
वित्ताभावेऽपि तं दृष्ट्वा ते त्यजन्ति न कर्हिचित्॥ २१॥

तथा च। विश्वासः संपदां मूलं तेन यूथपतिर्गजः।
सिंहो मृगाधिपत्येऽपि न मृगैरुपयुज्यते॥ २२॥

अपरं मम कदाचित्पाशच्छेदं कुर्वतस्ते दन्तभङ्गो भवति। अथवा दुरात्मा लुब्धकः समभ्येति। तन्नूनं मम नरकपात एव। उक्तं च।

सदाचारेषु भृत्येषु संसीदत्सु च यः प्रभुः।
सुखी स्यान्नरकं याति परत्रेह च सीदति॥ २३॥

तच्छ्रुत्वा प्रहृष्टो हिरण्यकः प्राह। भो वेद्म्यहं राजधर्मम्। परं मया तव परीक्षा कृता। तत्सर्वेषां पूर्वं पाशच्छेदं करिष्यामि। भवानप्यनेन विधिना बहुकपोतपरिवारो भविष्यति। उक्तं च।

कारुण्यं सविभागश्च यस्य भृत्येषु सर्वदा।
संभवेत्स महीपालस्त्रैलोक्यस्यापि रक्षणे॥ २४॥

१ Poor fellows. Cf. Marâthi बापडा or बिचारा. २ Why then should I not show even so much respect? एतावन्मात्रम्-एतावती मात्रा यस्य. ब. ३ The servants never desert that king even in the absence of wealth, who shows great respect for them ४ Confidence is the root of prosperity, whereby the elephant is the chief of the herd; the lion though lord of the beasts, is not availed of (used) by the beasts. उपयुज्यते may mean *is not joined*. ५ Besides. ६ Falling into or going to hell. ७ That lord, who is happy while his righteous servants are suffering misery, goes to hell and suffers pain both in the next world and here. ८ I only put you to the test, tried you. ९ Having many pigeons for your retinue. १० That king, who has compassion for, and is always even-handed towards, his servants, will be able to protect even the three worlds. सविभाग is, I think, a misprint for संविभाग which means *equal share*. त्रैलोक्य-the collection of the three worlds. त्रयाणां लोकानां समाहारः-समाहारद्विगु.

एवमुक्त्वा सर्वेषां पाशच्छेदं कृत्वा हिरण्यकश्चित्रग्रीवमाह । मित्र गम्यतामधुना स्वाश्रये । भूयोपि व्यसने प्राप्ते समागन्तव्यम् । इति तान्प्रेष्य[१] पुनरपि दुर्गं प्रविष्टः । चित्रग्रीवोपि सपरिवारः स्वाश्रयमगमत् । अथवा साध्विदमुच्यते ।

[२]मित्रवान्साधयत्यर्थान्दुःसाध्यानपि वै यतः ।
तस्मान्मित्राणि कुर्वीत समानान्येव चात्मनः ॥ २५ ॥

लघुपतनकोपि सर्वं तं चित्रग्रीवबन्धमोक्षम[३]वलोक्य विस्मितमना व्यचिन्तयत् । अहो बुद्धिरस्य[४] हिरण्यकस्य शक्तिश्च दुर्गस्य सामग्री च । तदीदृगेव विधिर्विहंगानां बन्धनमोक्षात्मकः[५] । अहं च न कस्यचिद्विश्वसिमि चलप्रकृतिश्च[६] । तथाप्येनं मित्रं करोमि । उक्तं च ।

[७]अपि संपूर्णतायुक्तैः कर्तव्या सुहृदो बुधैः ।
नदीशः परिपूर्णोपि चन्द्रोदयमपेक्षते ॥ २६ ॥

एवं संप्रधार्य पादपादवतीर्य बिलद्वारमाश्रित्य चित्रग्रीववच्छब्देन[८] हिरण्यकं समाहूतवान् । एह्येहि भो हिरण्यक एहि । तच्छब्दं श्रुत्वा हिरण्यको व्यचिन्तयत् । किमन्योपि कश्चित्कपोतो बंधनशेषस्तिष्ठति[९] येन मां व्याहरति । आह च । भोः को भवान् । स आह । अहं लघुपतनको नाम वायसः । तच्छ्रुत्वा विशेषादन्तर्लीनो[१०] हिरण्यक आह । भो द्रुतं गम्यतामस्मात्स्थानात् । वायस आह । अहं तव पार्श्वे

१ Having sent, dismissed. २ Since a man who has friends accomplishes objects difficult of accomplishment, one should make such friends as are equal to one (in disposition). ३ The freedom from confinement. बंधात् मोक्षः. पं. त. ४ How great the talent and strength of this Hiranyaka and the materials in his fort ! ५ This is exactly the way in which birds are caught and released. बंधनमोक्षात्मक is a ब. ६ Of a fickle nature. ७ Wise men, though endowed with plenty, should make friends; the lord of rivers (the ocean) though full of water expects or wants the rise of the moon (to rise higher still). ८ With voice like that of Chitragriva. ९ Having his net yet remaining uncut. १० Hiding himself still more inside.

गुरुकार्येण समागतः। तत्किं न क्रियते मया सह दर्शनम्। हिरण्यक आह। न मेस्ति त्वया सह संगमेन प्रयोजनमिति। स आह। भोश्चित्रग्रीवस्य मया तव सकाशात्पाशमोक्षणं दृष्टम्। तेन मम महती प्रीतिः संजाता। तत्कदाचिन्ममापि बन्धने जाते तव पार्श्वान्मुक्तिर्भवेत्। तत्क्रियतां मया सह मैत्री। हिरण्यक आह। अहो त्वं भोक्ता। अहं ते भोज्यभूतः। तत्का त्वया सह मम मैत्री। तद्गम्यतां मैत्रीविरोधभावात्। उक्तं च।

ययोरेव समं वित्तं ययोरेव समं कुलम्।
तयोर्मैत्री विवाहश्च न तु पुष्टविपुष्टयोः॥ २७॥

तथा च। यो मित्रं कुरुते मूढ आत्मनोसदृशं कुधीः।
हीनं वाप्याधिकं वापि हास्यतां यात्यसौ जनः॥ २८॥

तद्गम्यतामिति। वायस आह। भो हिरण्यक एषोहं तव दुर्गद्वार उपविष्टः। यदि त्वं मैत्रीं करोपि ततोहं प्राणयात्रां करिष्यामि। अन्यथा प्रायोपवेशनं मे स्यादिति। हिरण्यक आह। भोस्त्वया वैरिणा सह कथं मैत्रीं करोमि। उक्तं च।

वैरिणा न हि संदध्यात्सुश्लिष्टेनापि संधिना।
सुतप्तमपि पानीयं शमयत्येव पावकम्॥ २९॥

१ On some important business. २ Why do you not see me? ३ Because. ४ At your hands. ५ Eater. ६ Object of eating, that is, food. ७ On account of the absence of friendship, or by reason of the impossibility of friendship. ८ Friendship and marriage are fit between those two only whose wealth and family are equal and not between those who are rich and poor or fat and lean. ९ That foolish person, who makes such friends as are unequal to him, that is, either lower or higher than himself, is ridiculed. १० Here I &c. ११ I shall starve myself to death. १२ One should not make friends with an enemy though bound to him with firm ties; water, though well-heated, does indeed extinguish fire.

वायस आह । [1]भोस्त्वया सह दर्शनमपि नास्ति कुतो वैरम् । तत्किमनुचितं वदसि । हिरण्यक आह । द्विविधं वैरं भवति सहजं [2] कृत्रिमं [3] च । तत्सहजवैरी त्वमस्माकम् । उक्तं च ।

[4]कृत्रिमं नाशमभ्येति वैरं द्राक्कृत्रिमैर्गुणैः ।
प्राणदानं विना नैव सहजं याति संक्षयम् ॥ ३० ॥

वायस आह । भो द्विविधस्य वैरस्य लक्षणं [5] श्रोतुमिच्छामि । तत्कथ्यताम् । हिरण्यक आह । भोः कारणेन निर्वृत्तं [6] कृत्रिमम् । [7]तत्तदर्होपकारकरणाद्गच्छति । स्वाभाविकं च पुनः कथमपि न गच्छति । [8]तद्यथा नकुलसर्पाणां शष्पभुङ्नखायुधानां जलवह्न्योर्देवदैत्यानां सारमेयमार्जाराणामीश्वरदरिद्राणां सपत्नीनां सिंहगजानां लुब्धकहरिणानां श्रोत्रियभ्रष्टक्रियाणां मूर्खपण्डितानां पतिव्रताकुलटानां सज्जनदुर्जनानाम् । [9]न कश्चित्केनापि व्यापादितः । [10]तथापि प्राणान्संतापयन्ति स्म । वायस आह । [11]तदकारणमेतत् । श्रूयतां मे वचनम् ।

१ I have not seen you even, then how can there be enmity? २ Natural. सह जातं. ३ Artificial. ४ Artificial enmity is soon destroyed by artificial remedies; while natural friendship is never destroyed without the sacrifice of life. ५ Characteristic, mark. ६ Brought about. ७ It is removed by conferring obligations fit for it. ८ It is as follows: (1) The enmity between the mungoose and snake; (2) that between graminivorous animals and those having nails for their weapons. नखानि आयुधानि येषां. ब.; (3) between water and fire; (4) between gods and demons; (5) between dogs and cats; (6) between the rich and poor; (7) between one's fellow-wives. सपत्नी-समानः पतिर्यस्याः. ब; (8) between the lion and elephant; (9) between the hunter and deer; (10) between a Brâhman versed in the Vedas and an apostate. भ्रष्टाः क्रियाः येषां ते. ब.; (11) between the foolish and wise; (12) between chaste women and adulteresses; (13) and that between the good and wicked. ९ None of these (mentioned above) has killed the other. १० Still they cause affliction to the mind. ११ This is without a cause.

कारणान्मित्रतां याति कारणाद्याति शत्रुताम्।
तस्मान्मित्रत्वमेवात्र योज्यं वैरं न धीमता ॥ ३१ ॥

तस्मात्कुरु मया सह संगमं मित्रधर्मार्थम्। हिरण्यक आह। भोः श्रूयतां नीतिसर्वस्वम्।

सकृद्दुष्टमपीष्टं यः पुनः संधातुमिच्छति।
स मृत्युमुपगृह्णाति गर्भमश्वतरी यथा ॥ ३२ ॥

अथवा गुणवानहं न मे कश्चिद्वैरयातनां करिष्यत्येतदपि न संभाव्यम्। उक्तं च।

सिंहो व्याकरणस्य कर्तुरहरत्प्राणान्प्रियान्पाणिने-
र्मीमांसाकृतमुन्ममाथ सहसा हस्ती मुनिं जैमिनिम्।
छन्दोज्ञाननिधिं जघान मकरो वेलातटे पिङ्गल-
मज्ञानावृतचेतसामतिरुषां कोऽर्थस्तिरश्चां गुणैः ॥ ३३ ॥

वायस आह। अस्त्वेतत्तथापि श्रूयताम्।

उपकाराच्च लोकानां निमित्तान्मृगपक्षिणाम्।
भयाल्लोभाच्च मूर्खाणां मैत्री स्याद्दर्शनात्सताम् ॥ ३४ ॥

---

१ One becomes another's friend or enemy from some cause; therefore, a prudent man should form friendship and not enmity (with others). २ Association, friendship. ३ For the sake of friendly duty. ४ The essence of morality or the moral science. ५ He who wants to make friends of him who has once been his enemy, meets with death, as does the mule meet death in the form of her offspring. ६ The requital of enmity. ७ A lion took away the life of Pâṇini the author of grammar; an elephant destroyed all on a sudden the sage Jaimini, the founder of Mîmâmsâ (the system of philosophy), an alligator killed on the sea-shore Pingala, who was, as it were, a store of the Vedic knowledge; what is the use of accomplishments to the lower animals whose minds are full of ignorance and who are very passionate, that is, they cannot appreciate merit. अज्ञानावृतचेतसां-अज्ञानेनावृतानि चेतांसि येषां तेषाम्. ब. ८ Friendship is formed among people by reason of obligations (mutually conferred), among beasts and birds for some motive, among fools through fear and greed, and between the good at the very sight.

तत्साधुरहम् । अपरं त्वां शपथादिभिर्निर्भयं[1] करिष्यामि । स आह । न मेस्ति[2] ते शपथैः प्रत्ययः । उक्तं च ।

[3]शपथैः संधितस्यापि न विश्वासं व्रजेद्रिपोः ।
अद्रोहशपथं कृत्वा वृत्रः शक्रेण सूदितः ॥ ३५ ॥

[4] न विश्वासं विना शत्रुर्देवानामपि सिध्यति ।
विश्वासात्त्रिदशेन्द्रेण दितेर्गर्भो विदारितः ॥ ३६ ॥

अन्यच्च ।

[5]बृहस्पतेरपि प्राज्ञस्तस्मान्नैवात्र विश्वसेत् ।
य इच्छेदात्मनो वृद्धिमायुष्यं च सुखानि च ॥ ३७ ॥

तथा च ।

[6]सुसूक्ष्मेणापि च्छिद्रेण प्रविश्याभ्यन्तरं रिपुः ।
नाशयेच्च शनैः पश्चात्प्लवं सलिलपूरवत् ॥ ३८ ॥

[7]न विश्वसेदविश्वस्ते विश्वस्तेपि न विश्वसेत् ।
विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति ॥ ३९ ॥

---

१ Free from fear. २ I have no faith in your oaths. ३ No confidence should be placed in an enemy though joined or united to us by oaths ; Vritra was killed by Indra after taking an oath not to kill him (Vritra). ४ An enemy is not conquered even by the gods; unless faith is put in them; the lord of the gods (Indra) tore open the womb or fœtus of Diti (the mother of demons) through faith. ५ Therefore, a man, who is wiser even than Brihaspati, should never put faith in any one, if he wishes his own prosperity, life and happiness. ६ An enemy, having entered even by a very small hole (by finding a very trifling defect), will gradually destroy (any one) afterwards, as does a flood of water sink a boat. ७ One should not place confidence in one who is unworthy of it, as also in one who is trustworthy ; (for) the danger arising from placing confidence, cuts down even the roots.

न वध्यते ह्यविश्वस्तो दुर्बलोपि बलोत्कटैः ।
विश्वस्ताश्चाशु वध्यन्ते बलवन्तोपि दुर्बलैः ॥ ४० ॥
सुकृत्यं विष्णुगुप्तस्य मित्राप्तिर्भार्गवस्य च ।
बृहस्पतेरविश्वासो नीतिसंधिस्त्रिधा स्थितः ॥ ४१ ॥
महताप्यर्थसारेण यो विश्वासं समागतः ।
भार्यासु सुविरक्तासु तदन्तं तस्य जीवितम् ॥ ४२ ॥

तच्छ्रुत्वा लघुपतनकोपि निरुत्तरश्चिन्तयामास । अहो बुद्धिप्रागल्भ्यमस्य नीतिविषये । अथवा त एवास्योपरि मैत्रीपक्षपातः । स आह । भो हिरण्यक ।

सख्यं साप्तपदीनं भो इत्याहुर्विबुधा जनाः ।
बलात्त्वं मित्रतां प्राप्तो वचनं मम तच्छृणु ॥ ४३ ॥

दुर्गस्थेनापि त्वया मया सह नित्यमेवालापो गुणदोषसुभाषित-

---

१ Even a weak person who has not put faith, is not killed even by the powerful; while those who have confided (in any one) are quickly destroyed by the weak, though themselves very powerful. २ The Sukritya of Vishnugupta, the Mitrâpati of Bhârgava (Sukra), and Avisvása of Brihaspati-thus threefold is Smriti. *Sukritya* &c. are the treatises on Nîti. They mean good *action*, the acquisition of friends and mistrust respectively. ३ He, who though with a large fortune, has put faith in his wife feeling no affection for him, has his death at her hands. महता &c. is an instance of the Instrumental absolute. ४ Without answer; having nothing to say in reply. ५ How great is his proficiency in the science of politics! ६ I have, or there is, great partiality for his friendship; I am inclined to make friends with him. ७ Friendship is formed by going with any one seven steps (lit. of seven paces. Adj. from सप्तपद्), so say the wise; you have become my friend against your will (that is, I have forced you to be my friend) so hear what I say. ८ Even by remaining in your fort-like hole. ९ Such as conversation on diverse subjects that is about merits and demerits &c. गुणदोषयोः सुभाषितमोष्ठीकथाः आदयो यस्य स. ब.

गोष्ठीकथादिः[1] सर्वदा कर्तव्यो यथेवं न विश्वसिषि । तच्छ्रुत्वा हिरण्यकोपि व्यचिन्तयत् । विदग्धवचनोयं[2] दृश्यते लघुपतनकः सत्यवाक्यश्च[3] । तद्युक्तमनेन मैत्रीकरणम् । परं कदाचिन्मम दुर्गे चरणपातोपि[4] न कार्यः । उक्तं च ।

[5]भीतभीतः पुरा शत्रुर्मन्दंमन्दं विसर्पति ।
भूमौ प्रहेलया पश्चाज्जारहस्तोङ्गनास्विव ॥ ४४ ॥

तच्छ्रुत्वा वायस आह । भद्र एवं भवतु । ततः प्रभृति द्वौ तावपि सुभाषितगोष्ठीसुखमनुभवन्तौ तिष्ठतः । परस्परं कृतोपकारौ[6] कालं नयतः । लघुपतनकोपि मांसशकलानि [7]मेध्यानि बलिशेषाण्यन्यानि[8] वत्सलाहृतानि[9] पक्वान्नविशेषाणि हिरण्यकार्थमानयति । हिरण्यकोपि तण्डुलानन्यांश्च भक्ष्यविशेषाँल्लघुपतनकार्थं[10] रात्रावाहृत्य तत्कालायातस्यार्पयति[11] । अथवा युज्यते द्वयोरप्येतत् । उक्तं च ।

[12]ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति ।
भुङ्क्ते भोजयते चैव षड्विधं प्रीतिलक्षणम् ॥ ४५ ॥
[13]नोपकारं विना प्रीतिः कथंचित्कस्यचिद्भवेत् ।
उपयाचितदानेन यतो देवा अभीष्टदाः ॥ ४६ ॥

---

१ In this way, that is, openly, by coming out &c. २ Clever or eloquent in speech. विदग्धं वचनं यस्य. ब. ३ True of words. ब. ४ Even so much as placing his foot. ५ An enemy being afraid first approaches gently walking on the ground and then with haste or speed, as does the hand of a paramour on women. ६ Conferring obligations on each other. कृतोपकारौ—कृताः उपकाराः याभ्यां तौ. ब. ७ Sacrificial pieces of flesh (मेध्य lit. fit for sacrifice). ८ The remains of offerings. बलिभ्यः शेषाणि. पं. त. ९ Other good dainties brought by him through *friendship* or *affection* (वत्सल). १० Special things to be eaten. The word विशेष as a latter part of compounds has *this sense.* ११ To him who returned at that time (रात्रौ). १२ Six-fold is the way of manifesting friendship, viz. a friend gives anything, takes in return, confides a secret and asks it, eats and causes to eat. १३ Nobody's love can ever be secured without conferring obligations ; since the gods even become givers of what is desired by being given *what is promised* or by means of a vow. अभीष्टं ददाति इत्य

[1]तावत्प्रीतिर्भवेल्लोके यावद्दानं प्रदीयते ।
वत्सः क्षीरक्षयं दृष्ट्वा परित्यजति मातरम् ॥ ४७ ॥

[2]पश्य दानस्य माहात्म्यं सद्यः प्रत्ययकारकम् ।
यत्प्रभावादपि द्वेषी मित्रतां याति तत्क्षणात् ॥ ४८ ॥

[3]पुत्रादपि प्रियतरं खलु तेन दानं
मन्ये पशोरपि विवेकविवर्जितस्य ।
दत्ते खलेपि निखिलं खलु येन दुग्धं
नित्यं ददाति महिषी ससुतापि पश्य ॥ ४९ ॥

किं बहुना ।

[4]प्रीतिं निरन्तरां कृत्वा दुर्भेद्यां नखमांसवत् ।
मूषको वायसश्चैव गतौ कृत्रिममित्रताम् ॥ ५० ॥

एवं स मूषकस्तदुपकाररञ्जितस्तथा विश्वस्तो यथा तस्य पक्षमध्ये प्रविष्टस्तेन सह सर्वदैव गोष्ठीं करोति । अथान्यस्मिन्नहनि वायसोऽश्रुपूर्णनयनः समभ्येत्य सगद्गदं तमुवाच । भद्र हिरण्यक विरक्तिः संजाता मे सांप्रतं देशस्यास्योपरि । तदन्यत्र यास्यामि । हिरण्यक

---

१ There will be affection only so long as anything is given; even the calf of a cow leaves off its mother when it sees the stopping of milk, that is, as soon as a calf sees that it can get no milk from the cow, it leaves it off. २ Observe the importance of gift, which produces fruit immediately and through whose power an enemy is in a moment turned into a friend. ३ I, therefore, think that a gift is dearer than even the son in the case of beasts, which are without consideration or discriminating power, whereby a she-buffalo, even when its calf is alive, gives the whole of its milk even to a wicked person. विवेक &c. is पू. म.; ससुता. ब. ४ Having formed close and indissoluble friendship like the relation between the nails and flesh, the mouse and the crow became artificial friends (being naturally enemies). ५ Pleased by the obligations (of the crow) पू. त. ६ One day, on a certain day—not the next day as one would expect. ७ Stammeringly. गद्गदेन सहितं यथा तथा.

आह । भद्र किं विरक्तेः कारणम् । स आह । भद्र श्रूयताम् । अत्र[1] देशे महत्यानावृष्ट्या दुर्भिक्षं संजातम् । दुर्भिक्षत्वाज्जनो बुभुक्षा[2]पीडितः कोपि बलि[3]मात्रमपि न प्रयच्छति । अपरं गृहे गृहे बुभुक्षितजनैर्विहंगानां बन्धनाय पाशाः प्रगुणी[4]कृताः सन्ति । अहमप्यायुःशेषतया पाशेन बद्ध उद्धे[5]रितोस्मि । एतद्विरक्तेः कारणम् । तेनाहं विदेशं चलित इति बाष्पमोक्षं करोमि । हिरण्यक आह । अथ भवान्क प्रस्थितः । स आह । अस्ति दक्षिणा[6]पथे वनगह[7]नमध्ये महासरः । तत्र त्वत्तोधिकः[8] परमसुहृत्कूर्मो मन्थरको नाम । स च मे मत्स्यमांसखण्डानि दास्यति । तद्भक्षणा[9]त्तेन सह सुभाषितगोष्ठीसुखमनुभवन्सुखेन कालं नेष्यामि । नाहमत्र विहंगानां पाशबन्धनेन क्षयं द्रष्टुमिच्छामि । उक्तं च ।

[10]कोतिभारः समर्थानां किं दूरं व्यवसायिनाम् ।
को विदेशः सविद्यानां कः परः प्रियवादिनाम् ॥ ५१ ॥

---

१ अस्मिन् In this. २ Hunger, lit. desire of eating. भोक्तुं इच्छा. Desi. noun from भुज् 7 A. to eat. ३ Even an oblation (of rice daily offered by householders and eaten by crows). ४ Made ready. ५ उद्धरितः for उद्धृत. P. P. of धृ 1 P with उद् saved, drawn up. ६ In the southern region. ७ A difficult or impassable place in the forest. ८ More than yourself (as regards friendship). ९ By eating them (मत्स्यमांसखण्डानि) तेषां भक्षणात्. It is an instance of the objective genetive in Sanskrit. १० What thing is a heavy burden to the able? What is remote to those who are industrious? What country is foreign to those who are possessed of learning, and who is a stranger to those who talk sweetly? The answers to all these questions are negative. This is an instance of what is called *question of appeal* in Sanskrit—a question of appeal being that in which a positive question expects a negative answer, and a negative question a positive answer; for instance, the reply to the first question कोतिभारः समर्थानां is न कोपि.

{ [1]विद्वत्वं च नृपत्वं च नैव तुल्यं कदाचन।
{ स्वदेशे पूज्यते राजा विद्वान्सर्वत्र पूज्यते ॥ ५२ ॥

तथा च। [2]अनावृष्टिहते देशे सस्ये च प्रलयं गते।
धन्यास्तात न पश्यन्ति देशभङ्गं कुलक्षयम् ॥ ५३ ॥

हिरण्यक आह। यद्येवं तदहमपि त्वया सहागमिष्यामि। ममापि महद्दुःखं वर्तते। वायस आह। भोस्तव किं दुःखम्। तत्कथय। हिरण्यक आह। भो बहु वक्तव्यमस्त्यत्र[3] विषये। तत्रैव गत्वा सर्वं सविस्तरं[4] कथयिष्यामि। वायस आह। अहं तावदाकाशगतिस्[5]तत्कथं भवतो मया सह गमनम्। स आह यदि मे प्राणान्रक्षसि[6] तदा स्वपृष्ठमारोप्य मां तत्र प्रापयिष्यसि। नान्यथा मम गतिरस्ति। तच्छ्रुत्वा सानन्दं वायस आह। यद्येवं तद्धन्योहं यद्भवतापि सह तत्र कालं नयामि। अहं संपातादिकान्[7]अष्टावुड्डीनगतिविशेषान्[8]वेद्मि। तत्समारोह मम पृष्ठं येन सुखेन त्वां तत्सरः प्रापयामि। हिरण्यक आह। उड्डीनानां[9] नामानि श्रोतुमिच्छामि। स आह।

[10]संपातं विप्रपातं च महापातं निपातनम्।
वक्रं तिर्यक्तथा चोर्ध्वमष्टमं लघुसंज्ञकम् ॥ ५४ ॥

---

१ The quality of learning and royalty are never equal; a king is honoured (only) in his own kingdom, (while) a learned man is honoured everywhere. २ When a country is stricken by famine (drought) and when the corn is destroyed, blessed indeed are those who do not remain there to see the destruction of the country and the extirpation of their families. Construe the second half thus: ये देशभंगं कुलक्षयं च न पश्यन्ति ते धन्याः। ३ Much is to be said on this subject-अत्रविषये= अस्मिन् विषये. ४ At length, in detail. विस्तरेण सहितं यथा तथा. अव्य. ५ Having access to, or motion through, the air. आकाशे गतिर्यस्य. ब. ६ If you save my life, that is, if you do not kill me being your enemy. ७ In which falling down or alighting (संपात) is the chief. संपातः आदिर्येषां ते. ब. ८ The various modes of flight. ९ Flight. १० *Sampáta* (ordinary flight downwards), *Viprapáta*, (a higher flight) *Mahápáta* (a great flight) and *Nipátana* (flying down), *Vakra* (a crooked flight), *Tiryak* (downward flight), *Urdhvá* (upward flight) and the eighth called *Laghu*, these are the eight modes of flight.

तच्छ्रुत्वा हिरण्यकस्तत्क्षणादेव तदुपरि समारूढः । सोपि शनैः-शनैस्तमादाय संपातोड्डीनप्रस्थितः क्रमेण तत्सरः प्राप्तः । ततो लघुपतनकं मूषकाधिष्ठितं विलोक्य दूरतोपि देशकालविदसामान्यकाकोयमिति ज्ञात्वा सत्वरं मन्थरको जले प्रविष्टः । लघुपतनकोपि तीरस्थतरुकोटरे हिरण्यकं मुक्त्वा शाखाग्रमारुह्य तारस्वरेण प्रोवाच। भो मन्थरक आगच्छागच्छ । तव मित्रमहं लघुपतनको नाम वायसश्चिरात्सोत्कण्ठः समायातः । तदागत्यालिङ्गय माम् । उक्तं च ।

किं चन्दनैः सकर्पूरैस्तुहिनैः किं च शीतलैः ।
सर्वे ते मित्रगात्रस्य कलां नार्हन्ति षोडशीम् ॥ ५५ ॥

तच्छ्रुत्वा निपुणतरं ज्ञात्वा सत्वरं सलिलान्निष्क्रम्य पुलकिततनुरानन्दाश्रुपूरितनयनो मन्थरकः प्रोवाच । एह्येहि मित्र आलिङ्गय माम् ॥ [12] चिरकालान्मया त्वं सम्यङ्न ज्ञातः । तेनाहं सलिलान्तः प्रविष्टः । उक्तं च ।

[13] यस्य न ज्ञायते वीर्यं न कुलं न विचेष्टितम् ।
न तेन संगतिं कुर्यादित्युवाच बृहस्पतिः ॥ ५६ ॥

---

१ Going by the flight called *Sampàta*. २ Seated upon or ridden by a mouse. तृ. त. ३ Knowing what is fit for place and time,. that is, prudent.. ४ Knowing that he was an extraordinary crow. ५ Situated on the bank. ६ Having placed. ७ With a loud tone; aloud. क. ८ Full of anxiety. ९ What is the good of sandal mixed with camphor and of cold snow, for they all do not equal even one-sixteenth part of the pleasure derived from the embrace of a friend. सकर्पूरैः ब. १० More distinctly. ११ With the eyes filled with the tears of joy. आनंदाश्रुभिः पूरिते नयने यस्य स. ब. १२ I could not know you well as a long time has elapsed since we met last. १३ One should not form friendship with him whose valour, family and actions are not known—so said Brihaspati.

एवमुक्ते लघुपतनको वृक्षादवतीर्य तमालिङ्गितवान्। अथवा साध्विदमुच्यते।

[1]अमृतस्य प्रवाहैः किं कायक्षालनसंभवैः।
चिरान्मित्रपरिष्वङ्गो योसौ मूल्यविवर्जितः॥ ५७॥

एवं द्वावपि तौ विहितालिङ्गनौ परस्परं पुलकितशरीरौ वृक्षादधः समुपविष्टौ प्रोचतुरात्मचरित्रवृत्तान्तम्। हिरण्यकोपि मन्थरकस्य प्रणामं कृत्वा वायसाभ्याशे[2] समुपविष्टः। अथ तं समालोक्य मन्थरको लघुपतनकमाह। भोः कोयं मूषकः। कस्मात्त्वया भक्ष्यभूतोपि पृष्ठमारोप्यानीतः। [3]तन्नात्र स्वल्पकारणेन भाव्यम्। तच्छ्रुत्वा लघुपतनक आह। भो हिरण्यको नाम मूषकोयम्। मम सुहृद्द्वितीयमिव जीवितम्। तत्किं बहुना।

[4]पर्जन्यस्य यथा धारा यथा च दिवि तारकाः।
सिकतारेणवो यद्वत्संख्यया परिवर्जिताः॥ ५८॥
[5]गुणाः संख्यापरित्यक्तास्तद्वदस्य महात्मनः।
परं निर्वेदमापन्नः संप्राप्तोयं तवान्तिकम्॥ ५९॥

मन्थरक आह। किमस्य वैराग्यकारणम्। वायस आह। पृष्टो मया। परमनेनाभिहितम्। यद्बहु वक्तव्यमस्ति तत्रैव गतः कथयिष्यामि।

---

१ What is the good of streams of nectar which are intended to wash the body; that which is the embrace of a friend after a long time, is really invaluable. २ Proximity. ३ There is here some great or extraordinary motive. ४ As the streams of rain, the stars in the sky, the grains of sand are innumerable, so are the merits of this magnanimous person; but since he has become greatly dejected, he is come near you. ५ The expressions संख्यापरिवर्जिताः and संख्यापरित्यक्ताः are similar and mean one and the same thing.

ममापि न निवेदितम् । तद्भद्र हिरण्यक इदानीं निवेद्यतामुभयोरप्यावयोस्तदात्मनो वैराग्यकारणम् । सोऽब्रवीत् ।

॥ कथा १ ॥

अस्ति दाक्षिणात्ये जनपदे महिलारोप्यं नाम नगरम् । तस्य नातिदूरे मठायतनं[1] भगवतः श्रीमहादेवस्य । तत्र च ताम्रचूडो नाम परिव्राजकः प्रतिवसति स्म । स च नगरे भिक्षाटनं[2] कृत्वा प्राणयात्रां समाचरति । भिक्षाशेषं[3] च तत्रैव भिक्षापात्रे निधाय तद्भिक्षापात्रं नागदन्ते[4] विलम्ब्य पश्चाद्रात्रौ स्वपिति । प्रत्यूषे च तदन्नं कर्मकराणां[5] दत्त्वा सम्यक्तत्रैव देवतायतने संमार्जनोपलेपनमण्डनादिकं[6] समाज्ञापयति । अन्यस्मिन्नहनि मम बान्धवैर्निवेदितम् । स्वामिन् मठायतने सिद्धमन्नं[7] मूषकभयात्तत्रैव भिक्षापात्रे निहितं नागदन्तेवलम्बितं तिष्ठति सदैव । तद्वयं भक्षयितुं न शक्नुमः । स्वामिनः पुनरगम्यं किमपि नास्ति । तत्किं वृथाटनेनान्यत्र । अद्य तत्र गत्वा यथेच्छं भुञ्ज्महे[8] तव प्रसादात् । तदाकर्ण्याहं सकलयूथपरिवृतस्तत्क्षणादेव तत्र गतः । उत्पत्य च तस्मिन्भिक्षापात्रे समारूढः[9] । तत्र भक्ष्यविशेषाणि[10] सेवकानां दत्त्वा पश्चात्स्वयमेव भक्षयामि । सर्वेषां तृप्तौ जातायां भूयः स्वगृहं गच्छामः । एवं नित्यमेव तदन्नं भक्षयामि । परिव्राजकोपि यथाशक्ति रक्षति । परं यदैव निद्रान्तरितो[11] भवति तदाहं तत्रारुह्यात्मकृत्यं करोमि । अथ कदाचित्तेन मम रक्षणार्थं[12] महान्यत्नः कृतः । जर्जरवंशः[13] समानीतः । तेन सुप्तोपि मम भयाद्भिक्षापात्रं ताडयति । अहमप्यभक्षितेप्यन्ने[14] प्रहारभयादपसर्पामि । एवं तेन सह

---

१ A monastery; a temple २ Wandering about for alms. ३ The remains of the alms (after eating &c.). ४ A peg; a nail. ५ Labourers. ६ Sprinkling of water (सडा in Marâthi) cow-dunging or smearing and decorating &c. ७ Ready food, that is, cooked food &c. ८ भुञ्ज्महे=भुनजामहे Let us eat. ९ Got into the begging-pot. १० For भक्ष्यविशेषान्. ११ Was lost in sleep, was asleep. १२ मम रक्षणार्थम्-मत्तः (अन्नस्य) रक्षणार्थम्. To save the food from being eaten by me. १३ A worn-out bamboo-stick. १४ Even before I had eaten the food,

सकलां रात्रिं विग्रहपरस्य[1] कालो व्रजति । अथान्यस्मिन्नहनि तस्य मठे बृहत्स्फिङ्नामा परिव्राजकस्तस्य सुहृत्तीर्थयात्राप्रसङ्गेन[2] पान्थः प्राघूर्णकः[3] समायातः । तं दृष्ट्वा प्रत्युत्थानविधिना[4] संभाव्य प्रतिपत्ति-पूर्वकम्[5] अभ्यागतक्रियया[6] नियोजितः । ततश्च रात्रावेकत्र कुशसंस्तरे[7] द्वावपि प्रसुप्तौ धर्मकथां कथयितुमारब्धौ । अथ बृहत्स्फिक्कथागोष्ठीषु स ताम्रचूडो मूषकत्रासाव्याक्षिप्तमना[8] जर्जरवंशेन भिक्षापात्रं ताडयं-स्तस्य शून्यं[9] प्रतिवचनं प्रयच्छति । तन्मना[10] न किंचिदुदाहरति[11] । अ-थासावभ्यागतः परं कोपमुपागतस्तमुवाच । भोस्ताम्रचूड परिज्ञात-स्त्वं सम्यङ् सुहृत् । तेन मया सह साह्लादं[12] न जल्पसि । तद्रात्रावपि[13] त्वदीयं मठं त्यक्त्वान्यत्र मठे यास्यामि । उक्तं च ।

[14]एह्यागच्छ समाश्रयासनमिदं कस्माच्चिराद्दृश्यसे
का वार्ता अतिदुर्बलोसि कुशलं प्रीतोस्मि ते दर्शनात् ।
एवं ये समुपागतान्प्रणयिनः प्रह्लादयन्त्यादरात्
तेषां युक्तमशङ्कितेन मनसा हर्म्याणि गन्तुं सदा ॥ ६० ॥

---

१ Quarrelling with him the whole night, struggling with him to get the food. २ In the course of wandering on holy pilgrimages. ३ A guest. ४ Having honoured him with the ceremony of प्रत्युत्थान which consists in rising up from one's seat in order to receive a guest. ५ Respectfully. प्रतिपत्तिः पूर्वा यस्मिन्कर्मणि यथा तथा. अव्य. ६ A guest. ७ A bed. ८ Having the mind distracted. व्याक्षिप्तं मनः यस्य सः ब. ९ Meaningless, unmeaning. १० Having his mind solely directed towards him. तस्मिन् मनः यस्य. ब. ११ Speaks, says. १२ Delightfully. अव्य. १३ Even at night, even while it is night. १४ It is always proper to go without any doubt in the mind, to the houses of those friends, who respectfully please the guests come to them in the following manner:— come on, come, take this seat, how do you come after a long time? what is the news? you are very weak, I hope you are well, I am pleased at your sight. समुपागतान् lit. those who come or have arrived.

[1]गृही यत्रागतं दृष्ट्वा दिशो वीक्षेत वाप्यधः ।
तत्र ये सदने यान्ति ते शृङ्गरहिता वृषाः ॥ ६१ ॥
[2]नाभ्युत्थानक्रिया यत्र नालापा मधुराक्षराः ।
गुणदोषकथा नैव तत्र हर्म्ये न गम्यते ॥ ६२ ॥

तदेकमठप्राप्त्यापि[3] त्वं गर्वितः । त्यक्तः सुहृत्स्नेहः । नैतद्वेत्सि य-त्त्वया मठाश्रयव्याजेन[4] नरकोपार्जना कृता । उक्तं च ।

[5]नरकाय मतिस्ते चेत्पौरोहित्यं समाचर ।
वर्षं यावत्किमन्येन मठचिन्तां दिनत्रयम् ॥ ६३ ॥

तन्मूर्ख शोचितव्यस्त्वं[6] गर्वं गतः । तदहं त्वदीयं मठं परित्यज्य यास्यामि । अथ तच्छ्रुत्वा भयत्रस्तमनास्ताम्रचूडस्तमुवाच । भो भगवन् मा मैवं वद । न त्वत्समोन्यो मम सुहृत्कश्चिदस्ति । परं तच्छ्रूयतां गोष्ठीशैथिल्यकारणम्[7] । एष दुरात्मा मूषकः प्रोन्नतस्थाने[8] धृतमपि भिक्षापात्रमुत्प्लुत्यारोहति भिक्षाशेषं च तत्रस्थं भक्षयति । तदभावादेव मठे मार्जनक्रियापि न भवति । तन्मूषकत्रासार्थमेतेन[9] वंशेन भिक्षापात्रं मुहुर्मुहुस्ताडयामि । नान्यत्कारणमिति । अपरमे-तत्कुतूहलं पश्यास्य दुरात्मनो यन्मार्जारमर्कटादयोपि तिरस्कृता[10] अस्योत्पतनेन । बृहत्स्फिगाह । अथ ज्ञायते तस्य बिलं कस्मिंस्तत्प्र-

---

१ Those, who go to that house the owner of which having seen a guest arrived, looks about or down, are bulls without horns. २ One should not go to that house, where there is no proper reception (by getting up to receive a guest), where there are no sweet words uttered and where there is no conversation about merits and demerits. ३ Even by obtaining one monastery, that is, by being the superintendent of only one &c. ४ Under the guise of resorting to a monastery. ५ If you have a mind to go to hell, do the duties of a family-priest for one year; what need is there of any thing else, look after the affairs of a monastery only for three days. ६ Your case is deplorable, since you are full of pride. ७ The reason of my being in-different to the conversation, the reason why I could take no interest in the conversation. ८ Though placed on a very high place. ९ To scare away the mouse. १० Surpassed (lit. despised).

देशे। ताम्रचूड आह। भगवन् न वेद्मि सम्यक्। स आह। नूनं निधानस्योपरि[1] तस्य बिलम्। निधानोष्मणा प्रकूर्दते[2]। उक्तं च।

[3]ऊष्मापि वित्तजो वृद्धिं तेजो नयति देहिनाम्।
किं पुनस्तस्य संभोगस्त्यागकर्मसमन्वितः॥ ६४॥

तथा च।[4]नाकस्माच्छाण्डिलीमाता विक्रीणाति तिलैस्तिलान्।
लुञ्चितानितरैर्येन कार्यमत्र भविष्यति॥ ६५॥

ताम्रचूड आह। कथमेतत्। स आह।

॥ कथा २ ॥

यदहं कस्मिंश्चित्स्थाने प्रावृट्काले[5] व्रतग्रहणनिमित्तं[6] कंचिद्ब्राह्मणं वासार्थं[7] प्रार्थितवान्। ततश्च तद्वचनात्[8] तेनापि शुश्रूषितः[9] सुखेन देवार्चनपर[10]स्तिष्ठामि। अथान्यस्मिन्नहनि प्रत्यूषे प्रबुद्धोऽहं ब्राह्मणब्राह्मणीसंवादे दत्तावधानः[11] शृणोमि। तत्र ब्राह्मण आह। ब्राह्मणि प्रभाते दक्षिणायनसंक्रान्ति[12]रनन्तदानफलदा[13] भविष्यति। तदहं प्रतिग्रहार्थं[14] ग्रामान्तरं यास्यामि। त्वया ब्राह्मणैकस्य भगवतः सूर्यस्योद्देशेन[15] किंचिद्भोजनं दातव्यम्। अथ तच्छ्रुत्वा ब्राह्मणी परुषतर[16]वचनैस्तं भर्त्स-[17]

---

१ Above a treasure. २ (He) jumps so high. ३ Even the mere warmth of wealth heightens the lusture of men ; how much more then its actual enjoyment accompanied with charity and other actions Here we might take त्यागकर्म to mean the act of charity. ४ Shándilimátá does not exchange pared sesame for unpared ones without any motive; so there must be some cause for it. ५ In the rainy season. ६ For the purpose of undertaking a vow for the performance of some religious ceremony. ७ For staying in my house. ८ At his advice. This goes with देवार्चन परः तिष्ठामि. ९ Waited upon or served by him. शुश्रूषित P. P. of the desid of श्रु 5 P. १० Intent on worshipping gods. ११ Who had paid attention to. १२ The summer solstice (lit. संक्रान्ति means crossing or going beyond). १३ Giving endless fruit of gifts &c. इप. १४ For receiving gifts or dakshiná. १५ Referring to the god, the sun. १६ Harsh. १७ Scolding or reviling him. Pre. P. of भर्त्स् 10 U.

यमाना प्राह । कुतस्ते दारिद्र्योपहतस्य[१] भोजनप्राप्तिः । तत्किं न लज्जस एवं ब्रुवाणः । किं च न मया तव हस्तलग्नया[२] कचिदपि लब्धं सुखं न मिष्टान्नस्यास्वादनं न च हस्तपादकण्ठादिभूषणम्[३] । तच्छ्रुत्वा भयत्रस्तोपि विप्रो मन्दं मन्दं प्राह । ब्राह्मणि नैतद्युज्यते वक्तुम् । उक्तं च ।

[४]ग्रासादपि तदर्धं च कस्मान्नो दीयतेर्थिषु ।
इच्छानुरूपो विभवः कदा कस्य भविष्यति ॥ ६६ ॥

[५]ईश्वरा भूरिदानेन यल्लभन्ते फलं किल ।
दरिद्रस्तच्च काकिण्या प्राप्नुयादिति नः श्रुतिः ॥ ६७ ॥

[६]दाता लघुरपि सेव्यो भवति न कृपणो महानपि समृध्या ।
कूपोन्तःस्वादुजलः प्रीत्यै लोकस्य न समुद्रः ॥ ६८ ॥

तथा च । [७]अकृतत्यागमहिम्ना मिथ्या किं राजराजशब्देन ।
गोप्तारं न निधीनां कथयन्ति महेश्वरं विबुधाः ॥ ६९ ॥

---

१ Striken by poverty. २ Who have fallen into your hands. ३ Ornament for the hands, feet, neck &c. ४ Why should not even half of a morsel of food be given to supplicants? When will any one ever obtain prosperity according to his desire? ५ Such is our श्रुति, or we hear, that a poor man obtains with even a *cowre* that fruit which the rich do by means of large gifts. ६ A donor, though insignificant, becomes fit to be waited upon, and not one who is miserly though rich in prosperity; a well which contains fresh water inside is liked by people and not the sea. अन्तः स्वादु जलं यस्य. ब. ७ What is the use of the vain title of king of kings when it is not accompanied with great gifts by way of charity; wise men do not call the person who guards a treasure, a great man: अकृत &c. is a ब. (न कृतः त्यागमहिमा यस्य).

अपि च। [1]सदादानः परिक्षीणः शस्त एव करीश्वरः।
अदानः पीनगात्रोपि निन्द्य एव हि गर्दभः॥ ७० ॥
[2]यच्छञ्जलमपि जलदो वल्लभतामेति सकललोकस्य।
नित्यं प्रसारितकरो मित्रोपि न वीक्षितुं शक्यः॥ ७१ ॥

एवं ज्ञात्वा दारिद्र्याभिभूतैरपि [3]स्वल्पात्स्वल्पतरं काले पात्रे च देयम्। उक्तं च।

[4]सत्पात्रं महती श्रद्धा देशकालं यथोचितम्।
यद्दीयते विवेकज्ञैस्तदनन्ताय कल्पते॥ ७२ ॥

तथा च। [5]अतितृष्णा न कर्तव्या तृष्णां नैव परित्यजेत्।
अतितृष्णाभिभूतस्य चूडा भवति मस्तके॥ ७३ ॥

ब्राह्मण्याह। कथमेतत्। स आह।

॥ कथा ३ ॥

अस्ति कस्मिंश्चिद्वनोद्देशे [6]पुलिन्दः। स च पापर्द्धिं कर्तुं प्रस्थितः।

---

१ A lord of elephants, who is always charitable (that is, from whose temples rutting juice is flowing) though emaciated, is praiseworthy; while an ass, who is not charitable (that is, from whom no rut flows) though fat-bodied, is certainly censurable. सदादान, अदान and पीनगात्र are ब. Here, of course, there is a play upon the word दान which has both the senses given above, viz. (1) charity and (2) rut. २ A cloud, who gives only water, becomes a favourite with the people; while the sun (also a friend) who has always his hand (rays) stretched forth in supplication, is not even fit to be seen. जलद. उप. ३ A little out of a little. ४ That which is given away by the prudent to a fitting object with great faith, at a proper place and time, and according as prescribed, tends to everlasting happiness. Here the construction is rather unusual. After सत्पात्रं &c. we must understand something like अस्तीति वीक्ष्य &c. ५ There should not be unbounded ambition, nor should one leave off a desire altogether, (for) a crest grows on the head of him who is overtaken by excessive greed. ६ A barbarian, a forester.

अथ तेन प्रसर्पता महानञ्जनपर्वतशिखराकारः क्रोडः समासादितः । तं दृष्ट्वा कर्णान्ताकृष्टनिशितसायकेन समाहतः । तेनापि कोपाविष्टेन चेतसा बालेन्दुद्युतिना दंष्ट्राग्रेण पाटितोदरः पुलिन्दो गतासुर्भूतलेपतत् । अथ लुब्धकं व्यापाद्य सूकरोपि शरप्रहारवेदनया पञ्चत्वं गतः । एतस्मिन्नन्तरे कश्चिदासन्नमृत्युः शृगाल इतस्ततः परिभ्रमंस्तं प्रदेशमाजगाम । यावद्वराहपुलिन्दौ द्वावपि पश्यति तावत्प्रहृष्टो व्यचिन्तयत् । भोः सानुकूलो मे विधिः । तेनैतदप्यचिन्तितं भोजनमुपस्थितम् । अथवा साध्विदमुच्यते ।

अकृतेप्युद्यमे पुंसामन्यजन्मकृतं फलम् ।
शुभाशुभं समभ्येति विधिना संनियोजितम् ॥ ७४ ॥

तथा च । यस्मिन्देशे च काले च वयसा यादृशेन च ।
कृतं शुभाशुभं कर्म तत्तथा तेन भुज्यते ॥ ७५ ॥

तदहं तथा भक्षयामि यथा बहून्यहानि मे प्राणयात्रा भवति । तत्तावदेवं स्नायुपाशं धनुष्कोटिगतं भक्षयामि । उक्तं च ।

शनैःशनैश्च भोक्तव्यं स्वयं वित्तमुपार्जितम् ।
रसायनमिव प्राज्ञैर्हेलया न कदाचन ॥ ७६ ॥

एवं मनसा निश्चित्य चापघटितकोटिं मुखे प्रक्षिप्य स्नायुं

---

१ While wandering about in search of game. २ Resembling the top of a mountain of collyrium. ३ A boar. ४ Who had drawn his sharp arrow as far as the ear. ५ Having the lustre of the young moon. ६ Whose belly was torn open. पाटितं उदरं यस्य स०. ब. ७ A hunter. ८ A hog, boar. ९ He whose death was at hand or near. १० Favourable. ११ Unexpected. १२ Even though no exertions are made, any fruit either good or evil secured in the by-gone birth, is obtained by men, being directed towards them by fate. १३ A man reaps the fruit of an action either good or evil done by him in a particular place, at a particular time, and at a particular period of life. १४ In the first place, first. १५ The net or snare of entrail sticking to the end of the bow. १६ Wise men should spend or enjoy the wealth obtained by them gradually like the elixir of life and never with haste. १७ The end of the bow-string.

भक्षितुं प्रवृत्तः। ततश्च कर्तिते पाशे तालुदेशं विदार्य चापकोटिर्मस्तकमध्येन निष्क्रान्ता। सोपि मृतः। अतोहं ब्रवीमि।

अतितृष्णा न कर्तव्या तृष्णां नैव परित्यजेत्।
अतितृष्णाभिभूतस्य चूडा भवति मस्तके॥ ७७॥

अथैवं सा तेन प्रबोधिता ब्राह्मण्याह। यद्येवं तदस्ति मे गृहे स्तोकतिलराशिः। ततस्तिलाल्लुञ्चित्वा तिलचूर्णेन ब्राह्मणं भोजयिष्यामीति। ततस्तद्वचनं श्रुत्वा ब्राह्मणो ग्रामं गतः। सापि तिलानुष्णोदकेन संमर्द्य कुट्टित्वा सूर्यातपे दत्तवती। अत्रान्तरे तस्या गृहकर्मव्यग्रायास्तिलानां मध्ये कश्चित्सारमेयो मूत्रोत्सर्गं चकार। तं दृष्ट्वा सा चिन्तितवती। अहो नैपुण्यं पश्य पराङ्मुखीभूतस्य विधेर्यदेते तिला अभोज्याः कृताः। तदहमेतान्समादाय कस्यचिद्गृहं गत्वा लुञ्चितैरलुञ्चितानानयामि। सर्वोपि जनोनेन विधिना प्रदास्यतीति। अथ यस्मिन्गृहेहं भिक्षार्थं प्रविष्टस्तत्र गृहे सापि तिलानादाय प्रविष्टा विक्रयं कर्तुम्। आह च। गृह्णातु कश्चिदलुञ्चितैर्लुञ्चितांस्तिलान्। अथ तद्गृहगृहिणी गृ[illegible]टा यावदलुञ्चितैर्लुञ्चितान्गृह्णाति तावदस्याः [illegible]ण कामन्दकिशास्त्रं दृष्ट्वा व्याहृतम्। मातः अग्राह्याः खल्विमे तिल[illegible]। नास्या अलुञ्चितैर्लुञ्चिता ग्राह्याः। कारणं किंचिद्भविष्यति। तेनैषालुञ्चितैर्लुञ्चितान्प्रयच्छति। तच्छ्रुत्वा तया परित्यक्तास्ते तिलाः। अतोहं ब्रवीमि।

नाकस्माच्छाण्डिलीमाता विक्रीणाति तिलैस्तिलान्।
लुञ्चितानितरैर्येन कार्यमत्र भविष्यति॥ ७८॥

१ The palate. २ From the middle of the head. ३ Small, little. ४ Having peeled or pared. ५ Having washed. ६ Having pounded. ७ Exposed them to the sun. ८ While she was engaged in her household duties. (Gen. abs. construction.) ९ Urinated, made water. १० Skill, proficiency. ११ Unfit for eating. १२ Anybody will be ready to exchange in this way. १३ As soon as; no sooner than. १४ A work of Kámandaki in Niti.

एतदुक्त्वा स भूयोपि प्राह । अथ ज्ञायते तस्य क्रमणमार्गः । ता-म्रचूड आह । भगवन् ज्ञायते यत एकाकी न समागच्छति । किं त्वसंख्ययूथपरिवृतः पश्यतो मे परिभ्रमन्नितस्ततः सर्वजनेन सहाग-च्छति याति च । अभ्यागत आह । अस्ति किंचित्खनित्रकम् । स आह । बाढमस्ति । एषा सर्वलोहमयी स्वहस्तिका । अभ्यागत आह । तर्हि प्रत्यूषे त्वया मया सह बोद्धव्यं येन द्वावपि जनचर-णामलिनायां भूमौ तत्पदानुसारेण गच्छावः । मयापि तद्वचनमाक-र्ण्य चिन्तितम् । अहो विनष्टोस्मि यतोस्य साभिप्रायवचांसि श्रूयन्ते । नूनं यथा निधानं ज्ञातं तथा दुर्गमप्यस्माकं ज्ञास्यति । एतदभिप्राया-देव ज्ञायते । उक्तं च ।

सकृदपि दृष्ट्वा पुरुषं विबुधा जानन्ति सारतां तस्य ।
हस्ततुलयापि निपुणाः पलप्रमाणं विजानन्ति ॥ ७९ ॥

वाञ्छैव सूचयति पूर्वतरं भविष्यं
पुंसां यदन्यतनुजं त्वशुभं शुभं वा ।
विज्ञायते शिशुरजातकलापचिह्नः
प्रत्युद्गतैरपसरन्सरसः कलापी ॥ ८० ॥

ततोहं भयत्रस्तमनाः संपरिवारो दुर्गमार्गं परित्यज्यान्यमार्गेण गन्तुं प्रवृत्तः । सपरिजनो यावदग्रतो गच्छामि तावत्संमुखो बृहत्कायो

---

१ Is the way by which he comes known? Here अथ is used to ask a question. २ A spade, a pick-axe. ३ Yes. ४ A spade. ५ Should wake up, rise. ६ Before the ground is dirtied by the steps of the people, that is, before the dust is trodden by people and foot-prints of the mice are effaced. ७ Words full of meaning; significant words. ८ This is known from his mere intention. ९ Wise men know the strength of a person by seeing him only once; experts know the weight of a *pala* even by weighing it on their hands. १० Even mere desire indicates long beforehand that which is to befall people the coming existence whether good or evil; a young peacock, even before it has its feathers grown, is known to turn out a fine bird by means of his steps turned backwards. ११ Having a large body. ब.

मार्जारः समायाति । स च मूषकवृन्दमवलोक्य तन्मध्ये सहसोत्पपात । अथ ते मूषका मां कुमार्गगामिनेमवलोक्य गर्हयन्तो हतशेषा रुधिरप्लावितवसुंधरास्तमेव दुर्गं प्रविष्टाः । अथवा साध्विदमुच्यते ।

"छित्त्वा पाशमपास्य कूटरचनां भङ्क्त्वा बलाद्वागुरां
पर्यन्ताग्निशिखाकलापजटिलान्निर्गत्य दूरं वनात् ।
व्याधानां शरगोचरादपि जवेनोत्पत्य धावन्मृगः
कूपान्तः पतितः करोतु विधुरे किंवा विधौ पौरुषम् ॥८१॥

अथाहमेकोऽन्यत्र गतः । शेषा मूढतया तत्रैव दुर्गे प्रविष्टाः । अत्रान्तरे स दुष्टपरिव्राजको रुधिरबिन्दुचर्चितां भूमिमवलोक्य तेनैव दुर्गमार्गेणागत्योपस्थितः । ततश्च स्वहस्त्रिकया खनितुमारब्धः । अथ तेन खनता प्राप्तं तन्निधानं यस्योपरि सदैवाहं कृतवसतिर्यस्योष्मणा महादुर्गमपि गच्छामि । ततो हृष्टमनास्ताम्रचूडमिदमूचेऽभ्यागतः । "भो भगवन् इदानीं स्वपिहि निःशङ्कः । अस्योष्मणा मूषकस्ते जागरणं करोति । एवमुक्त्वा निधानमादाय मठाभिमुखं प्रस्थितौ द्वावपि । अहमपि यावन्निधानमागच्छामि तावदरमणीयमुद्वेगकारकं तत्स्थानं

---

१ A multitude २ Going by a bad way, that is, going astray. उप. ३ Those who remained without being killed, those who survived the killed. पं. त. ४ Who smeared the earth or ground with their blood. रुधिरेण प्लाविता वसुंधरा यैः ते. ब. ५ Having broken the snares, removed the trap, having forcibly broken the net, having gone far away from the forest covered with a number of flames of fire spreading around, having speedily escaped by flight from the range of the arrow of hunters, a deer while running fell into a well; what manly effort could he do when the fate was adverse ! पर्यन्ता ... जटिलात् is a Babu. compound qualifying वनात्. करोतु here the use of the imperative is rather *unusual.* ६ Smeared or covered with drops of blood. तृ. त. ७ Approached, came near. ८ A pick-axe. ९ Who made a residence. कृता वसतिर्येन. ब. १० A difficult place. ११ By the warmth of it, that is, on its strength. १२ Dreary, desolate.

वीक्षितुमपि न शक्नोमि । अचिन्त्यं च किं करोमि । क्व गच्छामि । कथं मे स्यान्मनसः प्रशान्तिः[1] । एवं चिन्तयतो महाकष्टेन स दिवसो व्यतिक्रान्तः । अथास्तमितेऽर्के[2] सोद्वेगो[3] निरुत्साहस्तस्मिन्मठे सपरिवारः प्रविष्टः । अथास्मत्परिग्रह[4]शब्दमाकर्ण्य ताम्रचूडोपि भूयो भिक्षापात्रं जर्जरवंशेन ताडयितुं प्रवृत्तः । अथासावभ्यागतः प्राह । सखे किमद्यापि निःशङ्को न निद्रां गच्छसि । स आह । भगवन् भूयोपि समायातः सपरिवारः स दुष्टात्मा मूषकः । तद्भयाज्जर्जरवंशेन भिक्षापात्रं ताडयामि । ततो विहस्याभ्यागतः प्राह । सखे मा भैषीः । वित्तेन सहगतोस्य कूर्दनोत्साहः[5] । सर्वेषामपि जन्तूनामियमेव स्थितिः । उक्तं च ।

[6]यदुत्साही सदा मर्त्यः पराभवति यज्जनान् ।
यदुद्धतं वदेद्वाक्यं तत्सर्वं वित्तजं बलम् ॥ ८२ ॥

अथाहं तच्छ्रुत्वा कोपाविष्टो भिक्षापात्रमुद्दिश्य विशेषादुत्कूर्दितोऽप्राप्त[7] एव भूमौ निपतितः । तच्छ्रुत्वासौ मे शत्रुर्विहस्य ताम्रचूडमुवाच । भोः पश्य पश्य कौतूहलम । आह च ।

[8]अर्थेन बलवान्सर्वो अर्थयुक्तः स पण्डितः ।
पश्यैनं मूषकं व्यर्थं संजातेः समतां गतम् ॥ ८३ ॥

तत्स्वपिहि त्वं गतशङ्कः । यदस्योत्पतनकारणं तदावयोर्हस्तगतं[9] जातम् । अथवा साध्विदमुच्यते ।

[10]दंष्ट्राविरहितः सर्पो मदहीनो यथा गजः ।

---

१ Peace. २ The sun. ३ Full of mental agitation. ४ Retinue followers. ५ The energy to leap or jump up. ६ That a man is always full of vivacity, despises people and speaks insolently is all owing to (the power imparted by) wealth. ७ Without reaching my destination. ८ Everybody is powerful by wealth; he who possesses wealth is clever; look at this mouse reduced to the level of his kind when deprived of wealth (व्यर्थम्). व्यर्थ is a Bahu. विगतः अर्थः यस्मात्. ९ Has fallen into our hands, is in our possession. १० A serpent without fangs, an elephant without intoxication (when not in ruts) so also a man deprived of wealth, exists only in name.

तथार्थेन विहीनोत्र पुरुषो नामधारकः ॥ ८४ ॥

तच्छ्रुत्वाहं मनसा विचिन्तितवान् । यतोङ्गुलिमात्रमपि[1] कूर्दनशक्तिर्नास्ति तद्धिगर्थहीनस्य पुरुषस्य जीवितम् । उक्तं च ।

[2]अर्थेन च विहीनस्य पुरुषस्याल्पमेधसः ।
उच्छिद्यन्ते क्रियाः सर्वा ग्रीष्मे कुसरितो यथा ॥ ८५ ॥

[3]यथा काकयवाः प्रोक्ता यथारण्यभवास्तिलाः ।
नाममात्रा न सिद्धौ हि धनहीनास्तथा नराः ॥ ८६ ॥

[4]सन्तोपि न हि राजन्ते दरिद्रस्येतरे गुणाः ।
आदित्य इव भूतानां श्रीर्गुणानां प्रकाशिनी ॥ ८७ ॥

[5]न तथा बाध्यते लोके प्रकृत्या निर्धनो जनः ।
यथा द्रव्याणि संप्राप्य तैर्विहीनः सुखैधितः ॥ ८८ ॥

[6]शुष्कस्य कीटखातस्य वह्निदग्धस्य सर्वतः ।
तरोरप्यूषरस्थस्य वरं जन्म न चार्थिनः ॥ ८९ ॥

[7]शङ्कनीया हि सर्वत्र निष्प्रतापा दरिद्रता ।

---

१ Even as high as a finger. २ All the actions of a man who is without wealth and who possesses little talent, are rendered useless, as is the case with small rivers in summer. ३ Just as the corn called *Kākayava* and the sesame produced in the forest, exist only in name and not in reality (that is, although they exist they are of no use) so do persons void of wealth. ४ Although there may be other qualities in a poor man, they do not shine; it is wealth that brings to light all the qualities, as the sun does all things. सन्तः. Pre. P. of अस् 2 P ५ A person who is originally poor is not so afflicted in this world as the one, who, having obtained wealth, and being accustomed to pleasures, is, when deprived of it (wealth). ६ Better is the existence even of that tree which is dried up, eaten through by worms, scorched by fire on all sides and situated in a barren ground, than that of a beggar. ७ Poverty which is impotent is liable to suspicion everywhere; for, a man goes away by abandoning a poor man even when he comes (to him), to confer some obligation. निष्प्रताप & निःस्व are both ब. compounds.

उपकर्तुमपि प्राप्तं निःस्वं संत्यज्य गच्छति ॥ १० ॥
[१]उन्नम्योन्नम्य तत्रैव निर्धनानां मनोरथाः ।
हृदयेष्वेव लीयन्ते विधवास्त्रीस्तनाविव ॥ ११ ॥
[२]व्यक्तेपि वासरे नित्यं दौर्गत्यतमसावृतः ।
अग्रतोपि स्थितो यत्नान्न केनापीह दृश्यते ॥ १२ ॥

एवं विलप्याहं [३]भग्नोत्साहस्तन्निधानं [४]गण्डोपधानीयकृतं दृष्ट्वा स्वं दुर्गं प्रभाते गतः । ततश्च मद्भृत्याः प्रभाते गच्छन्तो [५]मिथो जल्पन्ति । अहो असमर्थोयमुदरपूरणेस्माकम् केवलमस्य [६]पृष्ठलग्नानां बिडालादिविपत्तयः । [७]तत्किमनेनाराधितेन । उक्तं च ।

[८]यत्सकाशान्न लाभः स्यात्केवलाः स्युर्विपत्तयः ।
स स्वामी दूरतस्त्याज्यो विशेषादनुजीविभिः ॥ १३ ॥

एवं तेषां वचांसि श्रुत्वा स्वदुर्गं प्रविष्टोहम् । यावन्न कश्चिन्मम संमुखोभ्येति तावन्मया चिन्तितम । [९]धिगियं दरिद्रता । अथवा साध्विदमुच्यते ।

[१०]मृतो दरिद्रः पुरुषो मृतं मैथुनमप्रजम् ।
मृतमश्रोत्रियं श्राद्धं मृतो यज्ञस्त्वदक्षिणः ॥ १४ ॥

---

१ The desires of those who have no wealth rise constantly in the mind and sink down even there, like the breasts of a widow. २ One who is surrounded by the darkness of adversity is not noticed by any one even if he make efforts, though standing in the front in the open day-light. ३ Dispirited. ४ Placed under the pillow (lit. made into a pillow). ५ Among themselves. ६ Of us, who follow him or go after him. ७ Then what is the use of pleasing or propitiating him? ८ That master, from whom no benefit is to be derived but only miseries are to be encountered, should be abandoned especially by the servants even from afar. ९ The particle धिक् generally governs the accusative and very rarely the nominative as in the present instance. १० A poor man is (to all intents and purposes) dead, useless (lit. dead) is the sexual intercourse that produces no issue, vain is the S'radha ceremony in which there is no श्रोत्रिय (a Brâhman who has studied the Vedas and Vedângas) and of no use is the sacrifice in which no Dakshinâ is given to Brâhmans &c. दक्षिणा is the money given away in charity.

एवं मे चिन्तयतस्ते भृत्या मम शत्रूणां सेवका जाताः । ते च मामेकाकिनं दृष्ट्वा[1] विडम्बनां कुर्वन्ति । अथ मयैकाकिना योगनिद्रां[2] गतेन भूयो विचिन्तितम् । यत्तस्य कुतपस्विनः[3] समाश्रयं गत्वा तद्गण्डोपधानवर्तिकृतां[4] वित्तपेटां शनैः शनैर्विदार्य[5] तस्य निद्रावशं गतस्य स्वदुर्गे तद्वित्तमानयामि येन भूयोपि मे वित्तप्रभावेनाधिपत्यं[6] पूर्ववद्भवति । उक्तं च ।

[7]व्यथयन्ति परं चेतो मनोरथशतैर्जनाः ।
नानुष्ठानैर्धनैर्हीनाः कुलजा विधवा इव ॥ ९५ ॥
[8]दौर्गत्यं देहिनां दुःखमपमानकरं परम् ।
येन स्वैरपि मन्यन्ते जीवन्तोपि मृता इव ॥ ९६ ॥
[9]दैन्यस्य पात्रतामेति पराभूतेः परं पदम् ।
विपदामाश्रयः शश्वद्दौर्गत्यकलुषीकृतः ॥ ९७ ॥
[10]लज्जन्ते बान्धवास्तेन संबन्धं गोपयन्ति च ।
मित्राण्यमित्रतां यान्ति यस्य न स्युः कपर्दकाः ॥ ९८ ॥
[11]मूर्तं लाघवमेवैतदपायानामिदं गृहम् ।
पर्यायो मरणस्यायं निर्धनत्वं शरीरिणाम् ॥ ९९ ॥

१ Made a mockery of me. २ This is explained in Tantra I. ३ A bad ascetic. ४ The box containing the wealth. ५ Having opened. ६ Sovereignty, viz., of mice. ७ Persons without wealth trouble their minds by hundreds of desires and not by acts, as do widows born in noble families. ८ Poverty is a great misery very humiliating to people, whereby (poor) people, though alive, are considered even by their relatives (स्वैः) as dead. ९ A person distressed by poverty, is always subjected to insults, is a great object of scorn and is the abode of all calamities. Here the subject दौर्गत्यकलुषीकृतः is to be supplied before every predicate, such as एति, अस्ति &c. दौर्गत्यं is an abstract noun formed from दुर्गत. १० The relatives feel ashamed of and deny all relationship with, him who has no money, and his friends become his enemies. कपर्दक-a cowri कवडी. ११ The state of being poor is insignificance incarnate, is the abode of all injuries and is a synonym for death (in the case of mortals.)

[1]अजाधूलिरिव त्रस्तैर्मार्जनीरेणुवज्जनैः ।
दीपखट्वोत्थच्छायेव त्यज्यते निर्धनो जनैः ॥ १०० ॥
[2]शौचावशिष्टयाप्यस्ति किंचित्कार्यं कचिन्मृदा ।
निर्धनेन जनेनैव न तु किंचित्प्रयोजनम् ॥ १०१ ॥
[3]अधनो दातुकामोपि संप्राप्तो धनिनां गृहम् ।
मन्यते याचकोयं धिग्दारिद्र्यं खलु देहिनाम् ॥ १०२ ॥

अतो वित्तापहारं विदधतो यदि मे मृत्युः स्यात्तथापि शोभनम् । उक्तं च । [5]स्ववित्तहरणं दृष्ट्वा यो न रक्षत्यसौ नरः ।
पितरोपि न गृह्णन्ति तद्दत्तं सलिलाञ्जलिम् ॥ १०३ ॥

तथा च । [6]गवार्थे ब्राह्मणार्थे च स्त्रीवित्तहरणे तथा ।
प्राणांस्त्यजति यो युद्धे तस्य लोकाः सनातनाः ॥ १०४ ॥

एवं निश्चित्य रात्रौ तत्र गत्वा निद्रावशमुपागतस्य पेटायां मया छिद्रं कृतं यावत्तावत्प्रबुद्धो दुष्टतापसः । ततश्च जर्जरवंशप्रहारेण शिरसि ताडितः कथंचिदायुःशेषतया निर्गतोहं न मृतश्च । उक्तं च ।

---

१ A poor man is shunned by people through fright, just as the dust raised by shegoats, dust thrown about by a broom and the shadow of a bed projected by a lamp. दीपखट्वोत्थच्छायेव &c. Dissolve खट्वायाः उत्तिष्ठतीति=खट्वोत्था-दीपेन खट्वोत्था दीपखट्वोत्था. क.॰ २ There is sometimes some use even of that earth which remains after it is used for cleansing the secret parts after stools, but there is no use whatsoever of a man who has no wealth. ३ A poor man, when he goes to the houses of the rich even with the desire of giving them anything, is considered to be a mendicant-fie upon the poverty of men! ४ If I were to die while taking away the wealth, that would also be good or desirable. ५ Even the manes do not accept the cavityfuls of water given by him who does not protect his own wealth, when he sees that it is being taken away. ६ The worlds of perpetual happiness are secured by him who loses his life for the sake of cows and Brâhmans, and also when the wealth of a woman is being taken away, and in a battle. ७ When he was under the influence of sleep.

[1]प्राप्तव्यमर्थं लभते मनुष्यो
देवोपि तं लङ्घयितुं न शक्तः।
तस्मान्न शोचामि न विस्मयो मे
यदस्मदीयं न हि तत्परेषाम्॥ १०५॥

काकंकूर्मौ पृच्छतः। कथमेतत्। हिरण्यक आह।

॥ कथा ४ ॥

अस्ति कस्मिंश्चिन्नगरे सागरदत्तो नाम वणिक्। तत्सूनुना रूपकशतेन विक्रियमाणः पुस्तको गृहीतः। तस्मिंश्च लिखितमस्ति।

प्राप्तव्यमर्थं लभते मनुष्यो
देवोपि तं लङ्घयितुं न शक्तः।
तस्मान्न शोचामि न विस्मयो मे
यदस्मदीयं न हि तत्परेषाम्॥ १०६॥

तद्दृष्ट्वा सागरदत्तेन तनुजः पृष्टः। पुत्र कियता मूल्येनैष पुस्तको गृहीतः। सोऽब्रवीत्। रूपकशतेन। तच्छ्रुत्वा सागरदत्तोऽब्रवीत्। धिङ्मूर्ख त्वं लिखितैकश्लोकं पुस्तकं रूपकशतेन यद्गृह्णास्येतया बुद्ध्या कथं द्रव्योपार्जनं करिष्यसि। तदद्यप्रभृति त्वया मे गृहे न प्रवेष्टव्यम्। एवं निर्भर्त्स्य गृहान्निःसारितः। स च तेन निर्वेदेन विप्रकृष्टदेशान्तरं गत्वा किमपि नगरमासाद्यावस्थितः। अथ कतिपयदिवसै-

१ A man obtains as much wealth as he is destined to do, even god is not able to prevent him from so doing; therefore, I neither lament nor wonder; that which is our, cannot belong to others. प्राप्तव्य has the force of certainty. For a hundred rupees. रूपकाणां शतेन. ष. त. ३ This word always used in the masculine gender. ४ A son. ५ For what or how much price? ६ That in which there is written only one verse. लिखितः एकः श्लोकः यस्मिन् तत्. ब. ७ With this ... nt (for business). ८ Dejection, sorrow. ९ Very distant or remote.

स्तन्नगरनिवासिना[1] केनचिदसौ पृष्टः । कुतो भवानागतः । किंनामा त्वम् । असावब्रवीत् । प्राप्तव्यमर्थं लभते मनुष्यः । अथान्येनापि पृष्टेनानेन तथैवोत्तरं दत्तम् । एवं च तस्य नगरस्य मध्ये प्राप्तव्यमर्थ इति तस्य प्रसिद्धं नाम जातम् । अथ राजकन्या चन्द्रवती नामाभिनवरूप[2]यौवनसंपन्नासखीद्वितीयै[3]कस्मिन्दिवसे नगरं निरीक्षमाणा[4]स्ति । तत्रैव च कश्चिद्राजपुत्रोतीव रूपसंपन्नो[5] मनोरमश्च[6] कथमपि तस्या दृष्टिगोचरे[7] गतः । तद्दर्शनसमकालमेव[8] कुसुमबाणाहतया[9] तया निजसख्यभिहिता । सखि यथा किलानेन सह समागमो भवति तथाद्य त्वया यतितव्यम्[10] । एवं च श्रुत्वा सा सखी तत्सकाशं गत्वा शीघ्रमब्रवीत् । यदहं चन्द्रवत्या तवान्तिकं[11] प्रेषिता । भणितं च त्वां प्रति तया । यन्मम त्वद्दर्शनान्मनोभवेन पश्चिमावस्था[12] कृता । तद्यदि शीघ्रमेव मदन्तिके न समेष्यसि तदा मे मरणं शरणम्[13] । इति श्रुत्वा तेनाभिहितम् । यद्यवश्यं मया तत्रागन्तव्यं तत्कथय केनोपायेन प्रवेष्टव्यम् । अथ सख्याभिहितम् । रात्रौ सौधावलम्बितया[14] दृढवरत्रया[15] त्वया तत्रारोढव्यम् । सोब्रवीत् । यद्येवं निश्चयो भवत्यास्तदहमेवं करिष्यामि । इति निश्चित्य सखी चन्द्रवतीसकाशं गता । अथागतायां रजन्यां स राजपुत्रः स्वचेतसा व्यचिन्तयत् । अहो महदकृत्यमेतत्[16] । उक्तं च ।

---

१ Residing in that town. Here तन्नगर is a कर्म. २ Endowed with blooming youth and beauty. अभिनवाभ्यां रूपयौवनाभ्यां संपन्ना. तृ. त. ३ Accompanied by her female friend, lit. having her female friend as her second. सखी द्वितीया यस्याः सा. ब. ४ Surveying. ५ Endowed with (manly) beauty. तृ. त. ६ Charming to the mind. मनः रमयतीति-उप. ७ Came within the range of her sight. ८ At the very moment when she saw him. ९ Struck by the arrows of Cupid (lit. the flower-arrowed one) कुसुमबाण-कुसुमान्येव बाणाः यस्य सः. ब. १० Should endeavour or strive (Pot. Pass. P. of यत् 1 A.) ११ Near. १२ The extreme or last stage. १३ Recourse, support. मे मरणं शरणम् means death will be my only recourse, that is, I shall die. १४ Hanging down from the terrace of the palace. १५ Rope. १६ An unfit action, an evil deed.

[1]गुरोः सुतां मित्रभार्यां स्वामिसेवकगेहिनीम्।
यो गच्छति पुमांल्लोके तमाहुर्ब्रह्मघातिनम्॥ १०७॥

अपरं च।

[2]अयशः प्राप्यते येन येन चापगतिर्भवेत्।
स्वर्गाच्च भ्रश्यति येन तत्कर्म न संमाचरेत्॥ १०८॥

इति सम्यग्विचार्य तत्सकाशं न जगाम। अथ प्राप्तव्यमर्थः पर्यटन्धवलगृहपार्श्वे[3] रात्राववलम्बितवरत्रां दृष्ट्वा कौतुकाविष्टहृदयस्[4]तामालम्ब्याधिरूढः। तया च राजपुत्र्या स एवायमित्याश्वस्तचित्तया[5] स्नानाच्छादनपानाच्छादनादिना संमान्य तेन सह शयनतलमाश्रितया[6] तदङ्गसंस्पर्शसंजातहर्षरोमाञ्चितगात्रयो[7]क्तम्। युष्मद्दर्शनमात्रानुरक्तया[8] मयात्मा प्रदत्तोयम्। त्वद्वर्जमन्यो[9] भर्ता मनस्यपि मे न भविष्यतीति। तत्कस्मान्मया सह न ब्रवीषि। सोब्रवीत्। प्राप्तव्यमर्थं लभते मनुष्यः। इत्युक्ते तयान्योयमिति मत्वा धवलगृहादुत्तार्य[10] मुक्तः[11]। स तु खण्डदेव[12]कुले[13] गत्वा सुप्तः। अथ तत्र कयाचित्स्वैरिण्यां[14] दत्तसंकेतको[15] यावद्-

---

१ They (people) call him a Brâhman-murderer who has sexual intercourse with the daughter of his preceptor, the wife of his friend and the wife of his master or servant. २ O. 9 should not do that action by which a man obtains infamy, by which he [illegible], and by which he falls off from heaven. ३ A palace, lit. a house whitened with chunam. ४ With the mind filled with curiostiy. ५ With the mind set at ease. आश्वस्तं चित्तं यस्याः. ब. ६ Lying down on the bed. ७ With the limbs covered with horripilation produced from the joy arising from the contact with his body. तदंगसंस्पर्शसंजातात् हर्षात् रोमाञ्चितानि गात्राणि यस्याः ब. ८ Who became attached to you just at your very sight. युष्मद्दर्शनमात्रेण अनुरक्तया तृ. त. ९ Without or excepting you. अन्य comp. १० Having let down or brought down (abs. of तृ with उद् caus.) ११ Was dismissed, let go. १२ A god called in Marâthi खंडोबा. १३ A house, temple. १४ A loose or unchaste woman. १५ With whom an appointment was made. दत्तः संकेतः यस्मै. ब.

ण्डपाशकः प्राप्तस्तावदसौ पूर्वसुप्तस्तेन दृष्टो रहस्यसंरक्षणार्थमभिहितश्च। को भवान्। सोऽब्रवीत्। प्राप्तव्यमर्थं लभते मनुष्यः। इति श्रुत्वा दण्डपाशकेनाभिहितम्। यच्छून्यं देवगृहमिदम्। तदत्र मदीयस्थाने गत्वा स्वपिहि। तथा प्रतिपद्य स मतिविपर्यासादन्यशयने सुप्तः। अथ तस्य रक्षकस्य बृहत्कन्या विनयवती नाम रूपयौवनसंपन्ना कस्यापि पुरुषस्यानुरक्ता संकेतं दत्त्वा तत्र शयने सुप्तासीत्। अथ सा तमायातं दृष्ट्वा स एवायमस्मद्वल्लभ इति रात्रौ घनतरान्धकारव्यामोहितोत्थाय भोजनाच्छादनादिक्रियां कारयित्वा गान्धर्वविवाहेनात्मानं विवाहयित्वा तेन समं शयने स्थिता विकसितवदनकमला तमाह। किमद्यापि मया सह विश्रब्धं भवान्न ब्रवीति। सोऽब्रवीत्। प्राप्तव्यमर्थं लभते मनुष्यः। इति श्रुत्वा तया चिन्तितम्। यत्कार्यमसमीक्षितं क्रियते तस्येदृक्फलविपाको भवतीति। एवं विमृश्य सविषादया तया निःसारितोऽसौ। स च यावद्वीथीमार्गेण गच्छति तावदन्यविषयवासी वरकीर्तिर्नाम वरो महता वाद्यशब्देनागच्छति। प्राप्तव्यमर्थोऽपि तैः समं गन्तुमारब्धः। अथ यावत्प्रत्यासन्ने लग्नसमये राजमार्गासन्नश्रेष्ठिगृहद्वारि रचितमण्डपवेदिकायां कृतकौतुकमङ्गलवेषा

---

१ A constable, a police watchman. २ Who slept there already. ३ In order to preserve the secret (of his going to the place of secret meeting). ४ Having agreed or consented. ५ Through an error of understanding. ६ The eldest daughter. ७ Being deceived by the darkness thicker than usual. ८ Having caused him to marry herself. ९ With her blooming lotus-like face. १० Without consideration. न समीक्षितं यथा तथा. अव्य. ११ The maturity of the fruit. १२ By her who was full of grief. १३ Along the street, or by the public road. १४ Living in another kingdom or country. १५ A bridegroom. १६ तैः viz., वरेण सह गच्छद्भिः नरैः. १७ When the time for marriage was at hand. १८ At the door of the merchant's house situated along the main-street. राजमार्गासन्नं श्रेष्ठिगृहं तस्य द्वारि. १९ Having *mandapa* (a temporary hall) and an altar raised near it. रचितमंडप वेदिके यस्मिन्. ब. qualifying द्वारि. २० Who had put on an auspicious dress for the festivity of marriage. कृतः कौतुकाय मंगलवेषो यया. ब.

वणिक्सुतास्ते तावन्मद्दमत्तो हस्त्यारोहकं[1] हत्वा प्रणश्यज्जनकोलाहलेन[2] लोकमाकुलयंस्तमेवोद्देशं प्राप्तः । तं च दृष्ट्वा सर्वे वैरानुयायिनो[3] वरेण सह प्रणश्य दिशो जग्मुः[4] । अथास्मिन्नवसरे भयतरललोचनामे[5]काकिनीं कन्यामवलोक्य मा भैषीरहं परित्रातेति सुधीरं[6] स्थिरीकृत्य[7] दक्षिणपाणौ संगृह्य महासाहसिकर्तया[8] प्राप्तव्यमर्थः पैरुषवाक्यैर्हस्तिनं[9] निर्भर्त्सितवान्[10] । ततः कथमपि दैवयोगादपयाते हस्तिनि यावत्ससुहृद्बान्धवोतिक्रान्ते[11] लग्नसमये वरकीर्तिरागच्छति तावत्तां कन्यामन्यहस्तगतां[12] दृष्ट्वाभिहितम् । भोः श्वशुरक विरुद्धमिदं त्वयानुष्ठितं यन्मह्यं प्रदाय[13] कन्यान्यस्मै प्रदत्तेति । सोब्रवीत् ।

भो अहमपि हस्तिभयपलायितो[14] भवद्भिः सहायातो न जाने किमिदं वृत्तम् । इत्यभिधाय दुहितरं प्रष्टुमारब्धः । वत्से न त्वया सुन्दरं कृतम् । तत्कथ्यतां कोयं वृत्तान्तः । साब्रवीत् । यदहमनेन प्राणसंशयाद्[15]रक्षिता तदेनं मुक्त्वा मम जीवन्त्या[16] नान्यः पाणिं ग्रहीष्यतीति ।[17] अनेन वार्त्ताव्यतिकरेण रजनी व्युष्टा । अथ प्रातस्तत्र संजाते महाजनसमवाये[18] वार्त्ताव्यतिकरं श्रुत्वा राजदुहिता तद्देशमागता[19] ।

---

१ A rider or a driver of elephants. २ Confounding or frightening the people by the noise made by the people while running away. प्रणश्यत् जन is a क. ३ The followers of the bridegroom. ४ Went in different directions, lit. went to the quarters; ran away. ५ With the eyes unsteady through fright. ६ Very boldly. ७ Having made steady, having comforted. ८ With great daring. ९ With harsh words. १० Censured or reproached (P. P. Active of भर्त्स् 10 with निस्.) ११ Accompanied with his friend and relatives. सुहृद्बांधवैः सहित: ब. १२ Gone into the hands of another. १३ Having promised to give. १४ Run away through the fear of the elephant. १५ Danger to life. १६ While I live. १७ The night dawned while this incident was taking place. व्युष्ट Adj. spent. १८ Multitude. १९ To that place. तं देशं. क.

कर्णपरंपरया श्रुत्वा दण्डपाशकसुतापि तत्रैवागता। अथ तं महाजनसमवायं श्रुत्वा राजापि तत्रैवाजगाम। प्राप्तव्यमर्थं प्राह। यद्विश्रब्धं कथय कीदृशोसौ वृत्तान्तः। अथ सोब्रवीत्। प्राप्तव्यमर्थं लभते मनुष्य इति। राजकन्या स्मृत्वाब्रवीत्। देवोपि तं लङ्घयितुं न शक्तः। ततो दण्डपाशकसुताब्रवीत्। तस्मान्न शोचामि न विस्मयो म इति। तमखिललोकवृत्तान्तमाकर्ण्य वणिक्सुताब्रवीत्। यदस्मदीयं न हि तत्परेषामिति। अभयदानं दत्त्वा राजा पृथक्पृथग्वृत्तान्तान्ज्ञात्वावगततत्त्वस्तस्मै प्राप्तव्यमर्थाय स्वदुहितरं सबहुमानं ग्रामसहस्रेण समं सर्वालंकारपरिवारयुतां दत्त्वा त्वं मे पुत्रोसीति नगरविदितं तं यौवराज्येभिषिक्तवान्। दण्डपाशकेनापि स्वदुहिता स्वशक्त्या वस्त्रदानादिना संभाव्य प्राप्तव्यमर्थाय प्रदत्ता। अथ प्राप्तव्यमर्थेनापि स्वीयपितृमातरौ समस्तकुटुम्बावृतौ तस्मिन्नगरे संमानपुरःसरं समानीतौ। अथ सोपि स्वगोत्रेण सह विविधभोगानुपभुञ्जानः सुखेनावस्थितः। अतोहं ब्रवीमि॥

प्राप्तव्यमर्थं लभते मनुष्यो
देवोपि तं लङ्घयितुं न शक्तः।
तस्मान्न शोचामि न विस्मयो मे
यदस्मदीयं न हि तत्परेषाम्॥ १०९॥

तदेतत्सकलं सुखदुःखमनुभूय परं विषादमागतोनेन मित्रेण त्वत्सकाशमानीतः। तदेतन्मे वैराग्यकारणम्। मन्थरक आह। भद्र भवति सुहृदयमसंदिग्धं यः क्षुत्क्षामोपि शत्रुभूतं त्वां भक्षस्थाने स्थितमेवं पृष्ठमारोप्यानयति न मार्गेपि भक्षयति। उक्तं च यतः।

---

१ From ear to ear, from one person to another. २ After giving a promise to spare them or not to punish them. ३ Separately. ४ Who knew the truth. अवगतं तत्त्वं येन सः ब. ५ Together with all ornaments and retinue. ६ Him, who was known to the people of the town. नगरे विदितं. स. त. ७ Crowned him as heir-apparent to the throne. ८ Together with all the members of their family. ९ Members of family. १० He is undoubtedly a friend; he is a friend indeed.

[1]विकारं याति नो चित्तं वित्ते यस्य कदाचन।
मित्रस्य सुकुलीनस्य कारयेन्मित्रमुत्तमम्॥ ११० ॥

[2]विद्वाद्भिः सुहृदामत्र चिह्नैरेतैरसंशयम्।
परीक्षाकरणं प्रोक्तं होमाग्नेरिव पण्डितैः॥ १११ ॥

तथा च। [3]आपत्काले तु संप्राप्ते यन्मित्रं मित्रमेव तत्।
वृद्धिकाले तु संप्राप्ते दुर्जनोपि सुहृद्भवेत्॥ ११२ ॥

तन्ममाप्यधास्य विषये[4] विश्वासः समुत्पन्नो यतो नीतिविरुद्धेयं[5] मैत्री मांसाशिभिर्वायसैः सह जलचराणाम्। अथवा साध्विदमुच्यते।

[6]मित्रं कोपि न कस्यापि नितान्तं न च वैरकृत्।
दृश्यते मित्रविध्वस्तः कार्याद्वैरिप्ररक्षितः॥ ११३ ॥

तत्स्वागतं भवतः। स्वगृहवदास्यतामत्र सरस्तीरे[7]। यच्च वित्तनाशो विदेशवासश्च ते संजातस्तत्र विषये संतापो न कर्तव्यः। उक्तं च।

[8]अभ्रछाया खलप्रीतिः सिद्धमन्नं च योषितः।
किंचित्कालोपभोग्यानि यौवनानि धनानि च॥ ११४ ॥

---

१ One should make friends with that excellent man, who is nobly born, and whose mind never changes even in prosperity (वित्ते). Here the causal form कारयेत् is used for the primitive कुर्यात्. २ The learned say that by these unmistakable signs friends should be known, just as the examination of the fire of sacrifice is prescribed by those versed in it. ३ He, who is our friend when adversity befalls us, is a real friend; when the time of prosperity comes, even a wicked man will be our friend. ४ In respect of this. ५ Against the rules of politics. ६ No body is one's friend or bitter enemy, (because) one is seen to be destroyed by a friend and saved by an enemy according as occasion arises. Here कार्यात् is to be taken with both विध्वस्त and रक्षित. ७ Remain here as in your own house and make yourself at home. ८ The shadow cast by a cloud, the love of a wicked person, cooked food, women, youth and wealth–these are to be enjoyed only for a short time.

अत एव विवेकिनो[1] जितात्मानो[2] धनस्पृहां न कुर्वन्ति । उक्तं च ।

[3]सुसंचितैर्जीवनवत्सुरक्षितै-
र्निजेपि देहे न वियोजितैः क्वचित् ।
पुंसो यमान्तं व्रजतोपि निष्ठुरै-
रेतैर्धनैः पञ्चपदी न दीयते ॥ ११५ ॥

अन्यच्च । [4]यथामिषं जले मत्स्यैर्भक्ष्यते श्वापदैर्भुवि ।
आकाशे पक्षिभिश्चैव तथा सर्वत्र वित्तवान् ॥ ११६ ॥
[5]निर्दोषमपि वित्ताढ्यं दोषैर्योजयते नृपः ।
निर्धनः प्राप्तदोषोपि सर्वत्र निरुपद्रवः ॥ ११७ ॥
[6]अर्थानामर्जने दुःखमर्जितानां च रक्षणे ।
नाशे दुःखं व्यये दुःखं धिगर्थाः कष्टसंश्रयाः ॥ ११८ ॥
[7]अर्थार्थी यानि कष्टानि मूढोयं सहते जनः ।
शतांशेनापि मोक्षार्थी तानि चेन्मोक्षमाप्नुयात् ॥ ११९ ॥

अपरं विदेशवासजमपि[8] वैराग्यं[9] त्वया न कार्यम् । यतः ।

---

१ The wise or considerate. २ Those who have subdued themselves. जितः आत्मा यैः ते. ब. ३ These heartless riches, which are collected with care, protected as one's own life and never used even for one's own body, do not accompany the owner even five steps when he goes to the abode (अन्त) of Yama, that is, dies. ४ As flesh is devoured by the fish in water, by the beasts on land and by the birds in the sky, so is a rich man (deprived of his riches) everywhere. ५ A king accuses a rich man, though free from fault, of crimes; while a poor man though found to be guilty, is free from molestation everywhere. प्राप्तदोषः=प्राप्तः दोषः येन. ब. ६ There is trouble in the earning of wealth and also in protecting that (wealth) which is earned; there is pain both in the destruction and expenditure of wealth; a fie on wealth which is the resort of all troubles! For नाशे दुःखं other editions read आये दुःखम् which means there is trouble or pain in the acquisition of it. कष्टसंश्रयाः ष. त. or कष्टाः संश्रयाः येषां ते. ब. ७ If one who longs for absolution were to undergo even a hundredth part of those troubles which a foolish man, who desires wealth, does, he would obtain salvation. तानि चेत्=तानि सहेत चेत्. ८ Proceeding from residence in a foreign country. विदेशवासात् जातं or जायते. उप. ९ Absence of all desires. विरागस्य भावः वैराग्यम्.

[1]को धीरस्य मनस्विनः स्वविषयः को वै विदेशः स्मृतो
यं देशं श्रयते तमेव कुरुते बाहुप्रतापार्जितम् ।
यद्दंष्ट्रानखलाङ्गुलप्रहरणैः सिंहो वनं गाहते
तस्मिन्नेव हतद्विपेन्द्ररुधिरैस्तृष्णां छिनत्त्यात्मनः ॥ १२० ॥

अर्थहीनः परे देशे गतोपि यः प्रज्ञावान्भवति स कथंचिदपि न सीदति[2] । उक्तं च ।

[3]कोतिभारः समर्थानां किं दूरं व्यवसायिनाम् ।
को विदेशः सुविद्यानां कः परः प्रियवादिनाम् ॥ १२१ ॥

तत्प्रज्ञानिधिर्[4]भवान्न प्राकृतपुरुषतुल्यः[5] । अपरं प्राप्तोप्यर्थः कर्मणा[6] नश्यति । तदेतावन्ति दिनानि . त्वदीयमासीत् । मुहूर्तमप्यनात्मीयं[7] भोक्तुं न लभ्यते । स्वयमागतमपि विधिर्नापह्रियते[8] ।

[9]अर्थस्योपार्जनं कृत्वा नैव भोगं समश्नुते ।
अरण्यं महदासाद्य मूढः सोमिलको यथा ॥ १२२ ॥

हिरण्यक आह । कथमेतत् । स आह ।

---

१ What is said to be the own or foreign country of a wise and prudent person? He acquires by the might of his arm that country to which he resorts; the lion slakes his thirst with the blood of elephants killed by the help of the weapons in the shape of his jaws, nails and tail, in the very forest which he happens to enter. Another reading for को वै विदेशः स्मृतः is को वा विदेशस्तथा which means or what is also a foreign country? For यद्दंष्ट्रानखलांगुलप्रहरणैः we have यद् . प्रहरणः which is an adjective qualifying the word. सिंहः. दंष्ट्रानखलांगुलानि प्रहरणानि यस्य. ब. २ Suffers misery or pain. ३ What is a great burden to the able? what is remote or distant to those who are adventurous? what is a foreign country to those who are very learned? and who is a stranger or an enemy to those who are sweet-speakers? सुविद्यानां= शोभना. विद्या येषां. ब. ४ A treasure or store of wisdom. ५ An ordinary person. ६ By the ordinance of fate. ७ That which is not one's own. न. त. ८ Is taken away by fate. ९ By having acquired wealth a man does not necessarily enjoy it, just as was the case with the foolish *Somilaka* (in the following story) after reaching a large forest.

॥ कथा ५ ॥

अस्ति कस्मिंश्चिदधिष्ठाने सोमिलको नाम कौलिको[1] वसति स्म । सोनेकविधपट्टरचनारञ्जितानि[2] पार्थिवोचितानि[3] सदैव वस्त्राण्युत्पादयति । परं तस्य चानेकविधपट्टरचनानिपुणस्यापि[4] न भोजनाच्छादनाभ्यधिकं[5] कथमप्यर्थमात्रं संपद्यते । अथान्ये तत्र सामान्यकौलिकाः[6] स्थूलवस्त्रसंपादनविज्ञानिनो[7] महर्द्धिसंपन्नाः[8] । तानवलोक्य स स्वभार्यामाह । प्रिये पश्यैतान्स्थूलपट्टकारकान्धनकनकसमृद्धान्[9] । तैद्धारणकं[10] ममैतत्स्थानम् । तदन्यत्रोपार्जनाय गच्छामि । सा प्राह भोः प्रियतम मिथ्या प्रलपितमेतद्यदन्यत्र गतानां धनं भवति स्वस्थाने न भवति । उक्तं च ।

[11]उत्पतन्ति यदाकाशे निपतन्ति महीतले ।
पक्षिणां तदपि प्राप्त्या नादत्तमुपतिष्ठति ॥ १२३ ॥

तथा च ।

[12]न हि भवति यन्न भाव्यं भवति च भाव्यं विनापि यत्नेन ।
करतलगतमपि नश्यति यस्य तु भवितव्यता नास्ति ॥ १२४ ॥

---

१ A weaver. २ Variegated by reason of the threads of various colours being interwoven. ३ Fit for kings to wear. ४ Although he was skilled in weaving various kinds of garments. ५ More than what was barely necessary for food and clothing. ६ Ordinary, common, not skilled ७ Knowing only how to make coarse clothes. ८ Prosperity. ९ Wealth in general (धन) and gold (कनक). १० This place is not my debtor, that is, it owes me nothing. ११ That which is not given already (in the previous existence) is not obtained by the birds even, if they fly in the air or alight on the earth. १२ For that which is not to take place does not take place, and that which is to take place, does take place even without efforts; that which is not destined to live, perishes even though placed on the palm of the hand.

१ यथा धेनुसहस्रेषु वत्सो विन्दति मातरम् ।
तथा पूर्वकृतं कर्म कर्तारमनुगच्छति ॥ १२५ ॥
२ शेते सह शयानेन गच्छन्तमनुगच्छति ।
नराणां प्राक्तनं कर्म तिष्ठति तु सहात्मना ॥ १२६ ॥
३ यथा छायातपौ नित्यं सुसंबद्धौ परस्परम् ।
एवं कर्म च कर्ता च संश्लिष्टावितरेतरम् ॥ १२७ ॥

तस्मादत्रैव व्यवसायपरो भव । कौलिक आह । प्रिये न सम्यगभिहितं भवत्या । व्यवसायं विना न कर्म फलति । उक्तं च ।

६ यथैकेन न हस्तेन तालिका संप्रपद्यते ।
तथोद्यमपरित्यक्तं न फलं कर्मणः स्मृतम् ॥ १२८ ॥
७ पश्य कर्मवशात्प्राप्तं भोज्यकालेपि भोजनम् ।
हस्तोद्यमं विना वक्त्रे प्रविशेन्न कथंचन ॥ १२९ ॥

तथा च । ८ उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
दैवं हि दैवमिति कापुरुषा वदन्ति ।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोत्र दोषः ॥ १३० ॥

---

१ Just as the calf knows its mother even among a thousand cows, so an action done in the previous existence goes to the doer (finds out the doer). २ The action done by men in the previous existence, sleeps with them while they sleep, goes with them when they go and remains with them (standing when they stand). ३ Just as light and shade always closely follow each other, so an action and its doer are (closely) united with each other. ४ Be industrious, work. ५ Some adventure. ६ Just as the clap of the hands cannot be produced with only one hand, so it is said there is no fruit of that action which is not accompanied with exertions. ७ See, the food, obtained through fate even at the time of meals, will never enter the mouth without the exertions of the hand. ८ The goddess of wealth approaches that lion-like man who is industrious ; it is the cowardly that say that fate is fate ; so having set aside fate do manly efforts to the best of your powers ; if anything does not succeed when exertions are made for it, what fault is there ? that is, then we are not to blame.

यथा च । [1]उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः ।
न हि सुप्तस्य सिंहस्य विशन्ति वदने मृगाः ॥ १३१ ॥
[2]उद्यमेन विना राजन्न सिध्यन्ति मनोरथाः ।
कातरा इति जल्पन्ति यद्भाव्यं तद्भविष्यति ॥ १३२ ॥
[3]स्वशक्त्या कुर्वतः कर्म न चेत्सिद्धिं प्रयच्छति ।
नोपालभ्यः पुमांस्तत्र दैवान्तरितपौरुषः ॥ १३३ ॥

तन्मयावश्यं देशान्तरं गन्तव्यम् । इति निश्चित्य वर्धमानपुरं गत्वा तत्र वर्षत्रयं[4] स्थित्वा सुवर्णशतत्रयोपार्जनं[5] कृत्वा भूयः स्वगृहं प्रस्थितः। अथार्धपथे गच्छतस्तस्य कदाचिदटव्यां[6] पर्यटतो भगवान्रविरस्तमुपागतः । तत्र च व्यालभयात्[7] स्थूलतरवटस्कंध आरुह्य प्रसुप्तो यावत्तिष्ठति[8] तावन्निशीथे द्वौ पुरुषौ रौद्राकारौ[9] परस्परं जल्पन्तावशृणोत् । तत्रैक आह । भोः कर्तः त्वं किं सम्यङ्न वेत्सि यदस्य सोमिलकस्य भोजनाच्छादनाद्दतेधिका समृद्धिर्नास्ति । तत्किं त्वयास्य सुवर्णशतत्रयं दत्तम् । स आह । भोः कर्मन् मयावश्यं दातव्यं व्यवसायिनां तत्र च तस्य परिणतिस्त्वदायत्तेति[10] ।

अथ यावदसौ कौलिकः प्रबुद्धः[11] सुवर्णग्रन्थिमवलोकयति[12] तावद्रिक्तं पश्यति । ततः साक्षेपं[13] चिन्तयामास । अहो किमेतत् । महता कष्टेनोपार्जितं वित्तं हेलया[14] क्वापि गतम् । व्यर्थश्रमोकिंचनैः[15] कथं स्वपत्न्या मित्राणां च मुखं दर्शयिष्यामि । इति निश्चित्य तदेव पत्तनं

---

१ Actions succeed by industry and not by mere wishes; (for) beasts do not (of their own accord) enter the mouth of a lion while he is asleep. २ Oh king, desires do not succeed without exertion; it is the cowardly that say that what is to happen will happen. ३ If an action does not succeed when one has put forth all one's powers; no one is to blame in that case, because his manliness is rendered futile by his fate. ४ For three years—वर्षाणां त्रि. स. त. ५ Having earned three hundred coins of gold. ६ Forest. ७ Through the fear of some wild beast. ८ At ti... of night. ९ Of terrible forms. १० End, result. ११ Awakened. १२ The knot or purse that contained the g... १३ Revilingly, censuringly. १४ Speedily, all at once. १५ ...ose efforts are in vain and who has nothing. व्यर्थश्रम—व्यर्थः श्रमाः यस्य ब. & नास्ति किंचन यस्य. ब.

गतः । तत्र च वर्षमात्रेणापि[1] सुवर्णशतपञ्चकमुपार्ज्य[2] भूयोपि स्व-
स्थानं प्रति प्रस्थितः । यावदर्धपथे भूयोऽटवीगतस्य भगवान्भानुरस्तं
जगामाथ सुवर्णनाशभयात्[3]सुश्रान्तोपि[4] न विश्राम्यति केवलं कृतगृहो-
त्कण्ठः[5] सत्वरं व्रजति । अत्रान्तरे द्वौ पुरुषौ तादृशौ[6] दृष्टिदेशे[7] समा-
गच्छन्तौ जल्पन्तौ च शृणोति । तत्रैकः प्राह । भोः कर्तः किं त्वयै-
तस्य सुवर्णशतपञ्चकं दत्तम्। तत्किं न वेत्सि यद्भोजनाच्छादनाभ्य-
धिकमस्य किंचिन्नास्ति । स आह । भोः कर्मन् मयावश्यं देयं व्य-
वसायिनाम् । तस्य परिणामस्त्वदायत्तः । तत्किं मामुपालम्भयसि ।
तच्छ्रुत्वा सोमिलको यावद्ग्रन्थिमवलोकयति तावत्सुवर्णं नास्ति । ततः
परं दुःखमापन्नो व्यचिन्तयत् । अहो किं मम धनरहितस्य जीवि-
तेन । तदत्र वटवृक्ष आत्मानमुद्बध्य[8] प्राणांस्त्यजामि । एवं निश्चित्य
दर्भमयीं[9] रज्जुं[10] विधाय स्वकण्ठे पाशं नियोज्य शाखायामात्मानं नि-
बध्य यावत्प्रक्षिपति[11] तावदेकः पुमानाकाशस्थ[12] एवेदमाह । भो भोः
सोमिलक मैवं साहसं कुरु । अहं ते वित्तापहारको न ते भोजना-
च्छादनाभ्यधिकं वराटिकामपि[13] सहामि[14] । तद्गच्छ स्वगृहं प्रति । अ-
न्यच्च भवदीयसाहसेनाहं[15] तुष्टः । तथा मे न स्याद्व्यर्थं दर्शनम् । त-
त्प्रार्थ्यतामभीष्टो वरः कश्चित् । सोमिलक आह । यद्येवं तद्देहि मे
प्रभूतं धनम् । स आह । भोः किं करिष्यसि भोगरहितेन[16] धनेन य-
तस्तव भोजनाच्छादनाभ्याधिका प्राप्तिरपि नास्ति । उक्तं च ।

[17]किं तया क्रियते लक्ष्म्या या वधूरिव केवला ।
या न वेश्येव सामान्या पथिकैरुपभुज्यते ॥ १३४ ॥

---

१ Even in the course of one year. २ Five hundred coins of gold. ३ Through the fear of losing the gold. ४ Though greatly tired or fatigued. ५ With eagerness to reach home. कृता गृहाय उत्कंठा येन. ब. ६ Such as are described above. ७ In the range of the sight. ८ Having hanged or hung up. ९ Made of Darbha grass. १० Rope. ११ Throws himself down. १२ While sitting, in the sky. १३ A cowrie १४ सहामि for सहे. १५ Adventure, boldness. १६ Which will give you no enjoyment. १७ What is to be done with that wealth which is only like one's wife and not a common property like a harlot, who is enjoyed by travellers (or by any body whatever).

सोमिलक आह । यद्यपि भोगो नास्ति तथापि भवतु मे धनम् । उक्तं च ।

[१]कृपणोप्यकुलीनोपि सदा संश्रितमानुषैः ।
सेव्यते स नरो लोके यस्य स्याद्वित्तसंचयः ॥ १३५ ॥

तथा च । [२]शिथिलौ च सुबद्धौ च पततः पततो न वा ।
निरीक्षितौ मया भद्रे दश वर्षाणि पञ्च च ॥ १३६ ॥

पुरुष आह । किमेतत् । सोब्रवीत् ।

॥ कथा ६ ॥

कस्मिंश्चिदधिष्ठाने तीक्ष्णविषाणो[३] नाम महावृषभो वसति । स च मदातिरेकात्[४]परित्यक्तनिजयूथः[५] शृङ्गाभ्यां नदीतटानि विदारयन्स्वेच्छया मरकतसदृशानि[६] शष्पाणि भक्षयन्नरण्यचरो बभूव । अथ तत्रैव वने प्रलोभको[७] नाम शृगालः प्रतिवसति स्म । स कदाचित्स्वभार्यया सह नदीपुलिने[८] सुखोपविष्टस्तिष्ठति । अत्रान्तरे स तीक्ष्णविषाणो जलार्थं तदेव पुलिनमवतीर्णः । ततश्च तस्य लम्बमानौ वृषणावालोक्य[९] शृगाल्या शृगालोभिहितः । स्वामिन् पश्यास्य वृषभस्य मांसपिण्डौ लम्बमानौ यथा स्थितौ । ततः क्षणेन प्रहरेण[१०] वा पतिष्यतः । एवं ज्ञात्वा भवता पृष्ठयायिना[११] भाव्यम् । शृगाल आह । प्रिये न ज्ञायते

१ That man, who has hoards of wealth, though miserly and low-born, is served by those who resort to him. संश्रितमानुषैः—संश्रिताश्च ते मानुषाः. क. २ Good lady, I have observed for fifteen years those two, which are loose and well-formed and appear as if they fall down or do not. ३ Of sharp or pointed horns. तीक्ष्णे विषाणे यस्य. ब. ४ Through excess of intoxication. ५ Who had left off his own herd, who had separated himself from the herd. परित्यक्तं निजयूथं येन. ब. ६ Tender grass as green as emerald. ७ Enticer, seducer. ८ Sand-bank. ९ Testicles. १० The fourth part of the day and, therefore, equal to 3 hours. ११ You should always be after him.

कदाचिदेतयोः पतनं भविष्यति वा न वा । तत्किं वृथा श्रमाय मां नियोजयसि । अत्रस्थस्तावज्जलार्थमागतान्मूषकान्भक्षयिष्यामि समं त्वया मार्गोयं यतस्तेषाम् । अथ यदा त्वां मुक्त्वास्य तीक्ष्णविषाणस्य वृषभस्य पृष्ठे गमिष्यामि तदागत्यान्यः कश्चिदेतत्स्थानं समाश्रयिष्यति । नैतद्युज्यते कर्तुम् । उक्तं च ।

यो ध्रुवाणि परित्यज्य अध्रुवाणि निषेवते ।
ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव च ॥ १३७ ॥

शृगाल्याह । भोः कापुरुषस्त्वं यत्किंचित्प्राप्तं तेनापि संतोषं करोषि । उक्तं च ।

सुपूरा स्यात्कुनदिका सुपूरो मूषिकाञ्जलिः ।
सुसंतुष्टः कापुरुषः स्वल्पकेनापि तुष्यति ॥ १३८ ॥

तस्मात्पुरुषेण सदैवोत्साहवता विशेषार्थिना भाव्यम् । उक्तं च ।

यत्रोत्साहसमारम्भो यत्रालस्यविनिग्रहः ।
नयविक्रमसंयोगस्तत्र श्रीरचला ध्रुवम् ॥ १३९ ॥

तद्दैवमिति संचिन्त्य त्यजेन्नोद्योगमात्मनः ।
अनुयोगं विना तैलं तिलानां नोपजायते ॥ १४० ॥

१ Why do you then ask me to do that wherein my attempts will be useless. वृथाश्रमाय (कर्मणे) वृथा श्रमाः यस्मिन्. ब. २ If. ३ That man, who having left off what is certain, runs after that which is uncertain, loses what is certain, while what is uncertain is already lost. ४ A small river is easily filled, the cavity of the hands of a mouse is easily filled, and a mean fellow, who is quite contented with his lot, is satisfied even with little. ५ Full of energy. ६ One who wishes for something special. ७ The goddess of wealth is certainly firm there, where there are the display of energy, the curbing of laziness and the combination of justice and valour. ८ One should not give up one's industry depending on fortune; no oil can be extracted from sesamum without the application of labour. There is a different reading for अनुयोगं विना which is अनुद्योगेन नो तैलं तिलेभ्योपीह जायते which means no oil can be obtained even from sesamum without exertions.

अन्यच्च । [१]यः स्तोकेनापि संतोषं कुरुते मन्दधीर्जनः ।
तस्य भाग्यविहीनस्य दत्ता श्रीरपि मार्ज्यते ॥ १४१ ॥

यच्च त्वं वदसि । एतौ पतिष्यतो न वेति । तदप्ययुक्तम् । उक्तं च ।

[२]कृतनिश्चयिनो वन्द्यास्तुङ्गिमा नोपभुज्यते ।
चातकः को वराकोयं यस्येन्द्रो वारिवाहकः ॥ १४२ ॥

अपरं मूषकमांसस्य निर्विण्णो[३]ऽहम् । एतौ च मांसपिण्डौ पतनप्रा[४]यौ दृश्येते । तत्सर्वथा नान्यथा कर्तव्यमिति । अथासौ तदाकर्ण्य मूषकप्राप्तिस्थानं[५] परित्यज्य तीक्ष्णविषाणस्य पृष्ठमन्वगच्छत् । अथवा साध्विदमुच्यते ।

[६]तावत्स्यात्सर्वकृत्येषु पुरुषोत्र स्वयं प्रभुः ।
स्त्रीवाक्याङ्कुशविक्षुण्णो यावन्नो ध्रियते बलात् ॥ १४३ ॥

[७]अकृत्यं मन्यते कृत्यमगम्यं मन्यते सुगम् ।
अभक्ष्यं मन्यते भक्ष्यं स्त्रीवाक्यप्रेरितो नरः ॥ १४४ ॥

एवं स तस्य पृष्ठतः सभार्यः परिभ्रमंश्चिरकालमनयत् । न च तयोः पतनमभूत् । ततश्च निर्वेदात्पञ्चदशे वर्षे शृगालः स्वभार्यामाह ।

१ The wealth of that unfortunate and dull headed fellow who contents himself with little, though obtained, is lost. मार्ज्यते lit. is washed off. २ Those whose resolution is firm are to be saluted; mere greatness is not enjoyed, that is, is of no use; what is the poor Châtaka bird (compared to Indra), but even Indra is the bearer of water to him, that is, is his menial servant? ३ Disgusted. P. P. of विद् with निस्. ४ Almost about to fall, ready to fall. ५ The place of obtaining mice. ६ A man will be the master of himself in all things only so long as he is not held forcibly back by the goad in the form of the words of his wife. स्त्रीवाक्याङ्कुश. क. ७ A man impelled by the words of his wife thinks anything unfit to do as fit, considers anything that is inaccessible as accessible, and thinks what is unfit to eat as fit. स्त्रीवाक्य &c. is a तृ. त. and अकृत्य &c. are न. त.

शिथिलौ च सुबद्धौ च पततः पततो न वा।
निरीक्षितौ मया भद्रे दश वर्षाणि पञ्च च ॥ १४५ ॥

तयोस्तत्पश्चादपि पातो न भविष्यति। तत्तदैव स्वस्थानं गच्छावः। अतोहं ब्रवीमि।

शिथिलौ च सुबद्धौ च पततः पततो न वा।
निरीक्षितौ मया भद्रे दश वर्षाणि पञ्च च ॥ १४६ ॥

पुरुष आह। यद्येवं तद्गच्छ त्वं भूयोपि वर्धमानपुरम्। तत्र द्वौ वाणिक्पुत्रौ वसतः। एको गुप्तधनः। द्वितीय उपभुक्तधनः। ततस्तयोः स्वरूपं बुद्ध्वैकस्य वरः प्रार्थनीयः। यदि ते धनेन प्रयोजनमभक्षितेन ततस्त्वामपि गुप्तधनं करोमि। अथवा दत्तभोग्येन धनेन ते प्रयोजनं तदुपभुक्तधनं करोमीति। एवमुक्त्वादर्शनं गतः। सोमिलकोपि विस्मितमना भूयोपि वर्धमानपुरं गतः। अथ संध्यासमये श्रान्तः कथमपि तत्पुरं प्राप्तो गुप्तधनगृहं पृच्छन्कृच्छ्राल्लब्ध्वास्तमितसूर्ये प्रविष्टः। अथासौ भार्यापुत्रसमेतेन गुप्तधनेन निर्भर्त्स्यमानो हठाद्गृहं प्रविश्योपविष्टः। ततश्च भोजनवेलायां तस्यापि भक्तिवर्जितं किंचिदशनं दत्तम्। ततश्च भुक्त्वा तत्रैव यावत्सुप्तो निशीथे पश्यति तावत्तावपि द्वौ पुरुषौ परस्परं मन्त्रयतः। तत्रैक आह। भोः कर्तः किं त्वयास्य गुप्तधनस्यान्योधिको व्ययो निर्मितो यत्सोमिलकस्यानेन भोजनं दत्तम्। तदयुक्तं त्वया कृतम्। स आह। भोः कर्मन् न ममात्र दोषः। मया पुरुषस्य लाभप्राप्तिर्दातव्या। तत्परिणतिः पुनस्त्वदायत्तेति। अथासौ यावदुत्तिष्ठति तावद्गुप्तधनो

१ After that, viz., the period of 15 years. २ He whose wealth is concealed. गुप्तं धनं यस्य. ब. ३ One who has enjoyed wealth. ब. ४ Nature; another reading for स्वरूप is चेष्टितं which means movements, actions. ५ Given away in charity and enjoyed. ६ Having obtained. It has for its object तत् viz. गृहं. ७ At sunset, when it was sunset. ८ Together with his wife and son. ९ Forcibly. १० Without respect or honour. ११ More than usual.

विसूचिकया खिद्यमानो रुजाभिभूतः क्षणं तिष्ठति । ततो द्वितीयेह्नि तद्दोषेण कृतोपवासः संजातः । सोमिलकोपि प्रभाते तद्गृहान्निष्क्रम्योपभुक्तधनगृहं गतः । तेनापि चाभ्युत्थानादिना सत्कृतो विहितभोजनाच्छादनसंमानस्तस्यैव गृहे भव्यशय्यामारुह्य सुष्वाप । ततश्च निशीथे यावत्पश्यति तावत्तावेव द्वौ पुरुषौ मिथो मन्त्रयतः । अत्र तयोरेक आह । भोः कर्तः अनेन सोमिलकस्योपकारं कुर्वता प्रभूतो व्ययः कृतः । तत्कथय कथमस्योद्धारकविधिर्भविष्यति । अनेन सर्वमेतद्व्यवहारकगृहात्समानीतम् । स आह । भोः कर्मन् मम कृत्यमेतत् । परिणतिस्त्वदायत्तेति । अथ प्रभातसमये राजपुरुषो राजप्रसादजं वित्तमादाय समायात उपभुक्तधनाय समर्पयामास । तद्दृष्ट्वा सोमिलकश्चिन्तयामास । संचयरहितोपि वरमेष उपभुक्तधनो नासौ कदर्यो गुप्तधनः । उक्तं च ।

अग्निहोत्रफला वेदाः शीलवृत्तफलं श्रुतम् ।
रतिपुत्रफला दारा दत्तभुक्तफलं धनम् ॥ १४७ ॥

तद्विधाता मां दत्तभुक्तधनं करोतु । न कार्यं मे गुप्तधनेन । ततः सोमिलको दत्तभुक्तधनः संजातः । अतोहं ब्रवीमि ।

अर्थस्योपार्जनं कृत्वा नैव भोगं समश्नुते ।
अरण्यं महदासाद्य मूढः सोमिलको यथा ॥ १४८ ॥

---

१ Cholera-another reading is विसूचिकादोषेण which means by the effects of Cholera. २ Overcome by a disease. ३ He who had observed a fast. कृतः उपवासः. येन. ब. ४ The ceremony of rising up from one's seat to receive a guest. ५ To whom was done the honour of food, clothing &c. विहितः भोजनाच्छादनयोः संमानः यस्य or विहिताः भोजनाच्छादनसंमानाः यस्य. ब. According to the latter it may mean-who was given food and clothing and shown proper respect. ६ Large, spacious. ७ The act of repaying the debt. ८ A dealer, trader. ९ Proceeding from the favour of the king as the result of the king's favour. १० The fruit of the Vedas is the keeping up of the sacred fire, good disposition and conduct are the fruit of sacred lore, sexual enjoyment and sons are the fruits derived from wife and charity and enjoyment are the fruits of wealth.

तन्मद्र हिरण्यक एवं ज्ञात्वा धनविषये संतापो न कार्यः । अथ [१]विद्यमानमपि धनं भोज्यवन्ध्यतया तदविद्यमानं मन्तव्यम् । उक्तं च ।

[२]गृहमध्यनिखातेन धनेन धनिनो यदि ।
भवामः किं न तेनैव धनेन धनिनो वयम् ॥ १४९ ॥

तथा च ।

[३]उपार्जितानामर्थानां त्याग एव हि रक्षणम् ।
तडागोदरसंस्थानां परीवाह इवाम्भसाम् ॥ १५० ॥

अन्यच्च ।

[४]दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य ।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ॥ १५१ ॥

एवं ज्ञात्वा विवेकिना न स्थित्यर्थं वित्तोपार्जनं कर्तव्यं यतो दुःखाय तत् । उक्तं च ।

[५]संतोषामृततृप्तानां यत्सुखं शान्तचेतसाम् ।
कुतस्तद्धनलुब्धानामितश्चेतश्च धावताम् ॥ १५२ ॥
[६]पीयूषमिव संतोषं पिबतां निर्वृतिः परा ।
दुःखं निरन्तरं पुंसामसंतोषवतां पुनः ॥ १५३ ॥

१ By reason of the absence of enjoyment. २ If people are to be considered as rich by that wealth which is buried in the middle of the house, why should we not be considered rich by the same wealth ? (since both do not enjoy it). ३ Charity alone is the proper mode of protecting that wealth which is earned, just as the flowing out of the water in the body of a lake is the proper mode of utilizing it. ४ Charity, enjoyment and destruction-these three are the conditions of wealth-the third is the condition of the wealth of him who neither gives away in charity nor enjoys. ५ Whence can those, who are greedy of wealth and run after it here and there, get that happiness which those who are satisfied with the nectar of contentment and whose minds are calm, get ? ६ Great is the happiness enjoyed by those who drink the nectar in the form of contentment, while perpetual misery is suffered by those who are discontented.

¹निरोधाच्चेतसोक्षाणि निरुद्धान्यखिलान्यपि ।
आच्छादिते रवौ मेघैः संछन्नाः स्युर्गभस्तयः ॥ १५४ ॥

²वाञ्छाविच्छेदनं प्राहुः स्वास्थ्यं शान्ता महर्षयः ।
वाञ्छा निवर्तते नार्थैः पिपासेवाग्निसेवनैः ॥ १५५ ॥

³अनिन्द्यमपि निन्दन्ति स्तुवन्त्यस्तुत्यमुच्चकैः ।
स्वापतेयकृते मर्त्याः किं किं नाम न कुर्वते ॥ १५६ ॥

⁴धर्मार्थं यस्य वित्तेहा तस्यापि न शुभावहा ।
प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् ॥ १५७ ॥

⁵दानेन तुल्यो विधिरस्ति नान्यो
लोभाच्च नान्योस्ति परः पृथिव्याम् ।
विभूषणं शीलसमं न चान्यत्
संतोषतुल्यं धनमस्ति नान्यत् ॥ १५८ ॥

१ By the curbing of the mind, all the organs of sense are curbed; when the sun is covered over by the clouds, the rays are all concealed. २ The sages whose minds are calm say that the checking of desires is the peace of mind; a desire is not removed by wealth as thirst is not slaked by resorting to fire. ३ What indeed do mortals not do for the sake of wealth. (स्वापतेय)? for they censure even him who is not fit to be censured, and loudly praise him who does not deserve praise. ४ The desire of wealth even for religion does not do any good to any body; it is better to avoid mud from a distance than to touch it and then wash it off. For शुभावहा there is another reading which is सुखावहा, meaning bringing about happiness. ५ There is no other act equal to charity; there is no enemy on the earth other than avarice, there is no other ornament so great as good disposition, and no wealth equal to contentment. The second line is read differently as लाभोस्तिनान्यो परतः पृथिव्याः which means there is no gain greater than that of the earth.

[1]दारिद्र्यस्य परा [2]मूर्तिर्यन्मानद्रविणाल्पता ।
जरद्गवधनः शर्वस्तथापि परमेश्वरः ॥ १५९ ॥

एवं ज्ञात्वा भद्र त्वया संतोषः कार्य इति । मन्थरकवचनमाकर्ण्य वायस आह । भद्र मन्थरको यदेवं वदति तत्त्वया चित्तेकर्तव्यम् । अथवा साध्विदमुच्यते ।

[3]सुलभाः पुरुषा राजन्सततं प्रियवादिनः ।
अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः ॥ १६० ॥

[4]अप्रियाण्यपि पथ्यानि ये वदन्ति नृणामिह ।
त एव सुहृदः प्रोक्ता अन्ये स्युर्नामधारकाः ॥ १६१ ॥

अथैवं जल्पतां तेषां चित्राङ्गो नाम हरिणो लुब्धकैत्रासितस्तास्मिन्नेव सरसि प्रविष्टः । अथायान्तं[6] ससंभ्रममवलोक्य लघुपतनको वृक्षमारूढः । हिरण्यकः शरस्तम्बं प्रविष्टः । मन्थरकः सलिलाशयमास्थितः । अथ लघुपतनको मृगं सम्यक्परिज्ञाय मन्थरकमुवाच । एह्येहि सखे मन्थरक मृगोयं तृषार्तोत्र समायातः सरसि प्रविष्टः ।

१ The fact that there is the lack of the riches of respect is the great image of poverty ; although S'arva (God *Siva*) has an old bull for his wealth, still he is the great god of all. This verse is altogether omitted in other editions. मान एव द्रविणं. क. जरद्गवः एव धनं यस्य. ब. २ Should be borne in mind (lit. should be committed to the mind.) ३ Oh king, such persons as always speak sweetly are easy to find ; but he, who says what is unpleasant but beneficial is hard to get. ४ Those alone are said to be friends who speak what is unpleasant but beneficial to men ; others are friends only in name. नामधारक lit. holder or bearer of a name. For अन्ये स्युः we have elsewhere येन्ये स्युः-in that case ते should be understood before नामधारकाः. ५ Scared or frightened by the hunters. ६ Understand तं after आयान्तं. ७ A thicket of reeds. ८ Reservoir. ९ Having well or minutely examined.

तस्य शब्दोयं न मानुषसंभव इति । तच्छ्रुत्वा मन्थरको देशकालोचितमाह । भो लघुपतनक यथायं मृगो दृश्यते प्रभूतमुच्छ्वासमुद्वहन् भ्रान्तदृष्ट्या पृष्ठतोवलोकयति तन्न तृषार्त्त एष नूनं लुब्धकत्रासितः । तज्ज्ञायतामस्य पृष्ठे लुब्धका आगच्छन्ति न वेति । उक्तं च ।

"भयत्रस्तो नरः श्वासं प्रभूतं कुरुते मुहुः ।
दिशोवलोकयत्येव न स्वास्थ्यं व्रजति कचित् ॥ १६२ ॥

तच्छ्रुत्वा चित्राङ्ग आह । भो मन्थरक ज्ञातं त्वया सम्यङ्मे त्रासकारणम् । अहं लुब्धकशरप्रहारोद्धारितः कृच्छ्रेणात्र समायातः मम यूथं तैर्लुब्धकैर्व्यापादितं भविष्यति । तच्छरणागतस्य मे दर्शय किंचिदगम्यं स्थानं लुब्धकानाम् । तदाकर्ण्य मन्थरक आह । भोश्चित्राङ्ग श्रूयतां नीतिशास्त्रम् ।

"द्वावुपायाविह प्रोक्तौ विमुक्तौ शत्रुदर्शने ।
हस्तयोश्चालनादेको द्वितीयः पादवेगजः ॥ १६३ ।

तद्गम्यतां शीघ्रं घनं वनं यावदद्यापि नागच्छन्ति ते दुरात्मानो लुब्धकाः । अत्रान्तरे लघुपतनकः सत्वरमभ्युपेत्योवाच । भो मन्थरक गतास्ते लुब्धकाः स्वगृहोन्मुखाः प्रचुरमांसपिण्डधारिणः । तच्चि-

१ Proceeding or arising from a human being. ॠ. २ What was fit for the place and occasion. ३ Sighing very heavily. ४ With bewildered looks. ५ A man who is frightened breathes heavily, looks about him often and often and is never at peace. ६ The cause of my fright. ७ Saved or spared from the arrows of hunters. ८ With great difficulty. ९ The herd to which I belong. १० Two remedies are here prescribed for one's release in the sight of the enemy-the one by means of the movement of the hands and the other from the velocity or speed of the feet. ११ Deep, dense. १२ Homewards, with their faces homewards. स्वगृहेभ्यो उन्मुखाः. ष. त.

याङ्ग त्वं विश्रब्धो जलाद्बहिर्भव । ततस्ते चत्वारोपि मित्रभावेमाश्रिताः तस्मिन्सरसि मध्याह्नसमये वृक्षच्छायाधस्तात्सुभाषितगोष्ठीसुखमनुभवन्तः सुखेन कालं नयन्ति । अथवा युक्तमेतदुच्यते ।

सुभाषितरसास्वादबद्धरोमाञ्चकञ्चुकम् ।
विनापि संगमं स्त्रीणां कवीनां सुखमेधते ॥ १६४ ॥

तथा च ।

सकृदुक्तं न गृह्णाति स्वयं वा न करोति यः ।
यस्य संपुटिका नास्ति कुतस्तस्य सुभाषितम् ॥ १६५ ॥

अथैकस्मिन्नहनि गोष्ठीसमये मृगो नायातः । अथ ते व्याकुलीभूताः परस्परं जल्पितुमारब्धाः । अहो किमद्य सुहृन्न समायातः । किं सिंहादिभिः क्वचिद्व्यापादित उत लुब्धकैरथवानले प्रपतितो गर्ताविषमे वा नवतृणलौल्यादिति । अथवा साध्विदमुच्यते ।

१ Come out of the water. २ Who had become great friends. ३ Enjoying the pleasure derived from the conversation on good sayings. ४ This is aptly said. ५ The happiness of poets, in which there is a sort of upper garment formed by the hair standing on their ends at the pleasure derived from witty sayings, increases even without a contact with women. The reading elsewhere is सुभाषित-कञ्चुकाः विनापि संगमं स्त्रीणां कवयः सुखमेधते. This is easier and more appropriate, as the first line is made to qualify कवयः— and एधते here means the same as above. The sense is, as the hair of men stand on their ends at the contact with a woman, so do those of poets &c. ६ How can he, who does not understand anything when once uttered, or does not reproduce it himself, and who has no collection of witty sayings, have power to speak on useful subjects? संपुटिका is a box used for ornaments and valuables. ७ A very difficult ditch. ८ Through eagerness to eat fresh grass.

[१]स्वगृहोद्यानगतेपि स्निग्धैः पापं विशङ्क्यते मोहात् ।
किमु दृष्टबह्वपायप्रतिभयकान्तारमध्यस्थे ॥ १६६ ॥

अथ मन्थरको वायसमाह । भो लघुपतनक अहं हिरण्यकश्च तावद्द्वावप्यशक्तौ तस्यान्वेषणं कर्तुं मन्दगतित्वात् । तद्गत्वा त्वमरण्यं शोधय यदि कुत्रचित्तं जीवन्तं पश्यसीति । तदाकर्ण्य लघुपतनको नातिदूरे यावद्गच्छति तावत्पल्वेलतीरे चित्राङ्गः कूटपाशनियन्त्रित-स्तिष्ठति । तं दृष्ट्वा शोकव्याकुलितमनास्तमवोचत् । भद्र किमिदम् । चित्राङ्गोपि वायसमवलोक्य विशेषेण दुःखितमना बभूव ।

अथवा युक्तमेतत् ।

[४]अपि मन्दत्वमापन्नो नष्टो वापीष्टदर्शनात् ।
प्रायेण प्राणिनां भूयो दुःखावेगोधिको भवेत् ॥ १६७ ॥

ततश्च बाष्पावसाने चित्राङ्गो लघुपतनकमाह । भो मित्र संजातोयं तावन्मम मृत्युः । तद्युक्तं[६] संपन्नं यद्भवता सह मे दर्शनं संजातम् । उक्तं च ।

[७]प्राणात्यये समुत्पन्ने यदि स्यान्मित्रदर्शनम् ।
तद्द्वाभ्यां सुखदं पश्चाज्जीवतोपि मृतस्य च ॥ १६८ ॥

---

१ Even when a man has gone into the garden attached to the house, his friends suspect evil about him through fondness; how much more then will they do so, when he is in the midst of the forest in which many dangers are observable and which is dangerous. दृष्टबह्वपाय & प्रतिभय are both adjectives qualifying कांतार—the first is a ब. २ A pond, a puddle. ३ Caught in a trap. ४ Generally, the velocity of the grief of creatures though lessened or lost, increases at the sight of a friend. Here आपन्न and नष्ट go naturally with दुःखावेगः and hence the translation. They might also go with प्राणिनां but in that case, the construction would be ungrammatical as these participles instead of being in the Genetive are in the Nominative case. ५ At the end of tears, that is, after shedding tears. ६ A proper thing has happened or come to pass. ७ If when the end of life has approached, a friend is seen, it becomes beneficial in two ways afterwards whether a person lives or dies.

तत्क्षन्तव्यं यन्मया प्रणयात्सुभावितगोष्ठीष्वभिहितम्। तथा हिरण्यकमन्थरकौ मम वाक्याद्वाच्यौ।

अज्ञानाज्जानतो वापि दुरुक्तं यदुदाहृतम्।
मया तत्क्षम्यतामद्य द्वाभ्यामपि प्रसादतः॥ १६९॥

तच्छ्रुत्वा लघुपतनक आह। भद्र न भेतव्यमस्मद्विधैर्मित्रैर्विद्यमानैः। यावदहं द्रुततरं हिरण्यकं गृहीत्वागच्छामि। अपरं ये सत्पुरुषा भवन्ति ते व्यसने न व्याकुलत्वमुपयान्ति। उक्तं च।

संपदि यस्य न हर्षो विपदि विषादो रणे न भीरुत्वम्।
तं भुवनत्रयतिलकं जनयति जननी सुतं विरलम्॥ १७०॥

एवमुक्त्वा लघुपतनकश्चित्राङ्गमाश्वास्य यत्र हिरण्यकमन्थरकौ तिष्ठतस्तत्र गत्वा सर्वं चित्राङ्गपाशपतनं कथितवान्। हिरण्यकं च चित्राङ्गपाशमोक्षणं प्रति कृतनिश्चयं पृष्ठमारोप्य भूयोपि सत्वरं चित्राङ्गसमीपे गतः। सोपि मूषकमवलोक्य किंचिज्जीविताशया संश्लिष्ट आह।

१ Whatever (harsh) words I may have spoken in the course of our former conversation. २ Both of you should kindly pardon me for whatever ill words I may have uttered either unknowingly or knowingly. ३ When there are friends like us alive. This is an instance of the Instrumental absolute in Sanskrit. अस्मद्विधैर्मित्रैर्विद्यमानैः = अस्मद्विधेषु मित्रेषु विद्यमानेषु. ४ Do not become bewildered or confused. ५ A mother rarely brings forth a son who has no delight in prosperity; sorrow in adversity, timidity in battle, and who is the best in the three worlds. भुवनत्रयतिलक a mark on the forehead of the three worlds, and hence the most prominent figure in the three worlds. Another reading for रणे न भीरुत्वं is रणे च धीरत्वं which means "and who has boldness in battle." ६ The account how *Chitrânga* was caught in the snare. ७ Who had formed the resolution of freeing *Chitrânga* from the snare. पं. त. ८ Possessed by the desire of living, who had hopes of living &c.

[1]आपन्नाशाय विबुधैः कर्तव्याः सुहृदोमलाः ।
न तरत्यापदं कश्चिद्योत्र मित्रविवर्जितः ॥ १७१ ॥

हिरण्यक आह । भद्र त्वं तावन्नीतिशास्त्रज्ञो दक्षः[2] इति । तत्कथमत्र कूटपाशे पतितः । स आह । भो न कालोयं विवादस्य । तत्र यावत्स पापात्मा लुब्धकः समभ्येति तावद्द्रुततरं कर्तयेमं[3] मत्पादपाशम् । तदाकर्ण्य विहस्याह हिरण्यकः । किं मय्यपि समायाते लुब्धकाद्बिभेषि । ततः शास्त्रं प्रति महती मे विरक्तिः[4] संपन्ना यन्नवाद्विधा अपि नीतिशास्त्रविद् एतामवस्थां प्राप्नुवन्ति । तेन त्वां पृच्छामि । स आह । भद्र कर्मणा बुद्धिरपि हन्यते[5] । उक्तं च ।

[6]कृतान्तपाशबद्धानां दैवोपहतचेतसाम् ।
बुद्धयः कुब्जगामिन्यो भवन्ति महतामपि ॥ १७२ ॥

[7]विधात्रा रचिता या सा ललाटेक्षरमालिका ।
न तां मार्जयितुं शक्ताः स्वशक्त्याप्यतिपण्डिताः ॥ १७३ ॥

एवं तयोः प्रवदतोः सुहृद्व्यसनसंतप्तहृदयो[8] मन्थरकः शनैःशनैस्तं प्रदेशमाजगाम । तं दृष्ट्वा लघुपतनको हिरण्यकमाह । अहो न शोभनमापतितम् । हिरण्यक आह । किं स लुब्धकः समायाति । स

१ For the removal of adversity wise men should make such friends as are free from faults (अमलाः); he who is without friends in this world does not surmount a difficulty. For सुहृदोमलाः we have सुहृदो जनैः which gives better sense. २ Very cautious, circumspect. ३ Imper. 2nd P. Sing. of कृत् caus.—used in the primitive sense. ४ Here विरक्ति means absence of belief, diffidence. ५ Even intellect is overpowered by fate. ६ The talents even of the great, who are tied by the snares of the god of death (who are about to die) and whose minds are enfeebled by fate go astray from the right path, (that is, they too act like ordinary persons). ७ Even great scholars are not able with their own power to wipe off that line of letters which is written on the forehead by the Creator. ८ Whose mind was afflicted by the calamity of his friend.

आह । [1]आस्तां तावल्लुब्धकवार्त्ता । एष मन्थरकः समागच्छति । तद्-[2]नीतिरनुष्ठितानेन यतो वयमप्यस्य[3]कारणान्नूनं व्यापादनं यास्यामो यदि स पापात्मा लुब्धकः समागमिष्यति । तदहं तावत्[4]खमुत्पतिष्यामि । त्वं पुनर्बिलं प्रविश्यात्मानं रक्षयिष्यसि । चित्राङ्गोपि वेगेन [5]दिगन्तरं यास्यति । [6]एष पुनर्जलचरः स्थले कथं भविष्यतीति व्याकुलोस्मि । अत्रान्तरे प्राप्तोयं मन्थरकः । हिरण्यक आह । भद्र न युक्तमनुष्ठितं भवता यदत्र समायातः । तद्भूयोपि द्रुततरं गम्यतां यावदसौ लुब्धको न समायाति । मन्थरक आह । भद्र किं करोमि । न शक्नोमि तत्रस्थो मित्रव्यसनाग्निदाघं[7] सोढुम् । तेनाहमत्रागतः । अथवा साध्विदमुच्यते ।

[8]दयितजनविप्रयोगो वित्तवियोगश्च केन सह्याः स्युः ।
यदि सुमहौषधकल्पो वयस्यजनसंगमो न स्यात् ॥ १७४ ॥

एवं तस्य प्रवदत [9]आकर्णपूरितशरासनो लुब्धकोप्युपागतः । तं दृष्ट्वा मूषकेण तस्य स्नायुपाशस्तत्क्षणात्खण्डितः । अत्रान्तरे चित्राङ्गः सत्वरं पृष्ठमवलोकयन्प्रधावितः । लघुपतनको वृक्षमारूढः । हिरण्यकश्च समीपवर्ति बिलं प्रविष्टः । अथासौ लुब्धको मृगगमनाद्विषण्णवदनो व्यर्थश्रमस्तं मन्थरकं मन्दंमन्दं स्थलमध्ये गच्छन्तं दृष्टवान् । चिन्तयच्च । यद्यपि [10]कुरंगो धात्रापहृतस्तथाप्ययं कूर्म आहारार्थं

१ In the first place (तावत्) let the news of the hunter's coming be aside. २ He has acted against the general rules of conduct. ३ On his account. ४ The sky. ५ To another region. अन्यां दिशं. ६ I am uneasy as to how this water-animal will fare on land. ७ Heat. ८ If there be not the society of friends like a very efficacious medicine, who can bear the separation of beloved persons and the loss of wealth? ९ Who had drawn his bow as far as the ear, whose bow was fully bent. आकर्णपूरितं शरासनं यस्य. १० A deer.

संपादितः । तदद्यास्यामिषेण मे कुटुम्बस्याहारनिर्वृत्तिर्भविष्यति । एवं विचिन्त्य तं दर्भैः संच्छाद्य धनुषि समारोप्य स्कन्धे कृत्वा गृहं प्रति प्रस्थितः । अत्रान्तरे तं नीयमानमवलोक्य हिरण्यको दुःखाकुलः पर्यदेवयत् । कष्टं भोः कष्टमापतितम् ।

एकस्य दुःखस्य न यावदन्तं
गच्छाम्यहं पारमिवार्णवस्य ।
तावद्द्वितीयं समुपस्थितं मे
छिद्रेष्वनर्था बहुलीभवन्ति ॥ १७५ ॥

यदि तावत्कृतान्तेन मे धननाशो विहितस्तन्मार्गश्रान्तस्य विश्रामभूतं मित्रं कस्मादपहृतम् । अपरमपि मित्रं परं मन्थरकसमं न स्यात् । उक्तं च ।

असंपत्तौ परो लाभो गुह्यस्य कथनं तथा ।
आपद्विमोक्षणं चैव मित्रस्यैतत्फलत्रयम् ॥ १७६ ॥

तदस्य पश्चान्नान्यः सुहृन्मे । तत्किं ममोपर्यनवरतं व्यसनशरैर्वर्षति हन्त विधिः । यत आदौ तावद्वित्तनाशस्ततः परिवारभ्रंशस्ततो देशत्यागस्ततो मित्रवियोग इति । अथवा स्वरूपमेतत्सर्वेषामेव जन्तूनां जीवितधर्मस्य । उक्तं च ।

१ Accomplishment. २ Having taken or placed on the shoulder. ३ Lamented (Imperfect of देव् 10 with परि.) ४ Oh! a calamity has befallen us! ५ Before I have gone to the end of one calamity, as if beyond the ocean, another has befallen me. Misfortunes never come single (one calamity closely follows another). ६ Who had become an object of peace to the mind. ७ These three are the fruits derived from a friend viz. a great benefit in adversity, the confiding of a secret, and freedom from calamity. ८ Incessantly, unceasingly. ९ Alas! woe! १० Falling off, desertion. ११ The way or mode of life.

[1]कायः संनिहितापायः संपदः पदमापदाम्।
समागमाः सापगमाः सर्वमुत्पादभङ्गुरम् ॥ १७७ ॥

तथाच। [2]क्षते प्रहारा निपतन्त्यभीक्ष्णं
धनक्षये वर्धति जाठराग्निः।
आपत्सु वैराणि समुद्भवन्ति
छिद्रेष्वनर्था बहुलीभवन्ति ॥ १७८ ॥

अहो साधूक्तं केनापि।

[3]प्राप्ते भये परित्राणं प्रीतिविश्रम्भभाजनम्।
केन रत्नमिदं सृष्टं मित्रमित्यक्षरद्वयम् ॥ १७९ ॥

[4]अत्रान्तर आक्रन्दपरौ चित्राङ्गलघुपतनकौ तत्रैव समायातौ। अथ हिरण्यक आह। अहो किं वृथाप्रलपितेन। तद्यावदेष मन्थरको दृष्टिगोचरान्न[5] नीयते तावदस्य मोक्षोपायश्चिन्त्यतामिति। उक्तं च।

[6]व्यसनं प्राप्य यो मोहात्केवलं परिदेवयेत्।
क्रन्दनं वर्धयत्येव तस्यान्तं नाधिगच्छति ॥ १८० ॥

---

१ The body has calamities always at hand; wealth is the abode of miseries; associations or meetings of friends or relatives are followed by separation; everything is perishable even at birth. संनिहितापायः-संनिहिताः अपायाः यस्य. ब. सापगमाः=अपगमेन सहिताः ब. उत्पादभंगुर-उत्पादे भंगुरं. स. त. This verse occurs differently read as :-कायः संनिहितापायः संपदः क्षणभंगुराः। समागमा सापगमाः सर्वेषामेव देहिनाम्। where क्षणभंगुर means-transitory, lasting for a moment, and the last part सर्वेषामेव देहिनां is easy enough. २ Strokes repeatedly fall on a wound, the fire in the belly increases when there is the lack of wealth and hostilities arise in adversity; (so) misfortunes never come single. वर्धति for वर्धते. ३ Who has created this jewel, viz, the two letters मित्र, which protects when a danger arises and which is a receptacle for affection and confidence? प्रीतिविश्रम्भयोः भाजनम् ष. त. अक्षरयोः द्वयं. ष. त. ४ Crying aloud (lit. intent on crying.) आक्रंदः परं ययोः. ब. ५ not carried beyond the reach of our sight. ६ He, who after meeting with a calamity, foolishly laments, only increases grief and never goes to its end (is not freed from it by crying).

[1]केवलं व्यसनस्योक्तं भेषजं नयपण्डितैः ।
तस्योच्छेदसमारम्भो विषादपरिवर्जनम् ॥ १८१ ॥

अन्यच्च ।

[2]अतीतलाभस्य च रक्षणार्थं
भविष्यलाभस्य च संगमार्थम् ।
आपत्प्रपन्नस्य च मोक्षणार्थं
यन्मन्त्र्यतेसौ परमो हि मन्त्रः ॥ १८२ ॥

तच्छ्रुत्वा वायस आह । भो यद्येवं तत्क्रियतां [3]मद्वचः । एष चित्राङ्गोस्य मार्गे[4]गत्वा किंचित्पल्वलमासाद्य तस्य तीरे निश्चेतनो भूत्वा पततु । अहमप्यस्य शिरसि समारुह्य मन्दैश्चञ्चुप्रहारैः शिर [5]उल्लेखिष्यामि येनासौ लुब्धकोमुं मृतं मत्वा [6]मम चञ्चुप्रहारप्रत्ययेन मन्थरकं भूमौ क्षिप्त्वा मृगार्थं धावति । अत्रान्तरे त्वया [7]दर्भमयबन्धनवेष्टनानि खण्डनीयानि येनासौ मन्थरको द्रुततरं पल्वलं प्रविशति । चित्राङ्गः प्राह । भो [8]भद्रोयं दृष्टो मन्त्रस्त्वया । नूनं मन्थरको [9]मुक्तो मन्तव्यः । उक्तं च ।

[10]सिद्धिं वा यदि वासिद्धिं चित्तोत्साहो निवेदयेत् ।
प्रथमं सर्वजन्तूनां प्राज्ञो वेत्ति न चेतरः ॥ १८३ ॥

---

१ The only effective remedy against a calamity prescribed by those versed in morality, is to begin to undo it and to give up feeling sorry for it. २ That is said to be a great or effective counsel which is made use of in protecting a gain already obtained, in securing a future profit and in releasing a person from calamities which have befallen him. संगम lit. meeting with, getting &c. For यन्मन्त्र्यते one would naturally expect यो मन्त्र्यते. ३ Let my words be acted up to; follow my advice. ४ Going along the road taken by him. ५ Shall scratch or peck. ६ By the evidence of my pecking, by being convinced that he is dead by the fact of my scratching him. ७ The snares which are made of *darbha* grass and by which he is tied or bound. ८ Capital is the remedy that you have suggested. ९ Should be considered as already freed. १० A wise man (alone) knows that the state of the mind of all creatures indicates beforehand whether an action will succeed or fail, and no other (person).

तदेवं क्रियताम् । तथानुष्ठिते स लुब्धकस्तथैव मार्गासन्नपल्वल-[१]स्थं चित्राङ्गं वायससनाथमद्राक्षीत्[२] । तं दृष्ट्वा हर्षितमना व्यचिन्तयत् । नूनं पाशवेदनया वराकोयं मृगो[३] गत्वायुःशेषजीवितः[४] पाशं त्रोटयित्वा कथमप्येतद्वनान्तरं प्रविष्टो यावन्मृतः[५] । तद्वश्योयं मे कच्छपः सुयन्त्रितत्वात्[६] । तदेनमपि तावद्गृह्णामीत्यवधार्य कच्छपं भूतले प्रक्षिप्य मृगमुपाद्रवत्[७] । अत्रान्तरे हिरण्यकेन वज्रोपमदंष्ट्राप्रहारेण[८] तद्दर्भवेष्टनं तत्क्षणात्खण्डशः कृतम्[९] । मन्थरकोपि तृणमध्यान्निष्क्रम्य पल्वलं प्रविष्टः । चित्राङ्गोप्यप्राप्तस्यापि[१०] तस्योत्थाय वायसेन सह द्रुतं प्रनष्टः । अत्रान्तरे विलक्षो विषादपरो[११] निवृत्तो लुब्धको यावत्पश्यति तावत्कच्छपोपि गतः । ततश्च तत्रोपविश्येमं श्लोकमपठत् ।

प्राप्तो[१२] बन्धनमप्ययं गुरुमृगस्तावत्त्वया मे हृतः
संप्राप्तः कमठः स चापि नियतं नष्टस्तवादेशतः ।
क्षुत्क्षामोत्र वने भ्रमामि शिशुकैस्त्यक्तः समं भार्यया
यत्स्वामिन्न कृतं कृतान्त कुरु रे तत्रापि सज्जोस्म्यहम् ॥ १८४ ॥

एवं बहुविधं विलप्य स्वगृहं गतः । अथ तस्मिन्दूरीभूते सर्वेपि ते काककूर्ममृगाखवः परमानन्दभाजो[१३] मिलित्वा परस्परमालिङ्ग्य

---

१ A pond or lake situated near the road. २ Accompanied with the crow. ३ This poor deer. ४ Remaining alive as his life was not spent. आयुःशेषात् जीवितः पं. त. ५ As soon as he entered. ६ This tortoise is in my power by reason of his being securely tied. सुयन्त्रितत्व Abs. noun from सुयन्त्रित P. P. of यन्त्र्. ७ Ran towards the deer. ८ With the strokes of his teeth resembling (उपम) adamant (in hardness) वज्रोपम-वज्रस्य उपमा यासां ताः वज्रोपमाः (दंष्ट्राः) ब. ९ Was cut to pieces. १० Even before he (the hunter) could approach him (the deer). ११ Abashed and sad. १२ Oh lord, god of death, as soon as this big deer was caught in my snares, it has been snatched away by you; even the tortoise which was seized has undoubtedly been lost by your orders; I wander in this forest parched with hunger and abandoned by my children as well as by my wife; do what you have not done yet, I am ready even for that. १३ Enjoying great happiness. परं आनंदं भजंतीति. उप.

[१]पुनर्जातानिवात्मनो[२] मन्यमानास्तदेव सरः प्राप्य महासुखेन सुभाषितगोष्ठीविनोदं[३] कुर्वन्तः कालं नयन्ति स्म । एवं ज्ञात्वा विवेकिना मित्रसंग्रहः कार्यः । तथा मित्रेण सहाव्याजेन[४] वर्तितव्यम् । उक्तं च ।

[५]यो मित्राणि करोत्यत्र कौटिल्येन न वर्तते ।
स दुःखं न पराभूतेः प्राप्नोति हि कथंचन ॥ १८५ ॥

[६]समाप्तं चेदं मित्रसंप्राप्त्यभिधानं द्वितीयं तन्त्रम् ॥



१ As if born again. २ Themselves. This plural is against rules. It ought to have been आत्मानं which is the reading of other editions. ३ Diversion produced from conversation. गोष्ठ्याः विनोदं. पं. त. ४ Without any hypocrisy, frankly. ५ He who makes friends in this world and does not act towards them crookedly, never meets with the pain of mortification (पराभूतेः). ६ Thus or here ends this Second Part or Series called मित्रसंप्राप्ति or Acquisition of Friends.

अथ

तृतीयतन्त्रम् ।

अथेदमारभ्यते काकोलूकीयं नाम तृतीयं तन्त्रं यस्यायमादिमः श्लोकः ।

न विश्वसेत्पूर्वविरोधितस्य
शत्रोश्च मित्रत्वमुपागतस्य ।
दग्धां गुहां पश्य उलूकपूर्णां
काकप्रणीतेन हुताशनेन ॥ १ ॥

तद्यथानुश्रूयते ।

अस्ति दाक्षिणात्ये जनपदे महिलारोप्यं नाम नगरम् । तस्य समीपेऽनेकखगसनाथोतिघनतरपत्रच्छन्नो महान्यग्रोधपादपस्तिष्ठति । तत्र मेघवर्णो नाम वायसराजोनेककाकपरिवारः प्रतिवसति स्म । स

१ The natural enmity between the crow and the owl. २ One should not place confidence in a man who has been on enemical terms before, and also in an enemy who has become friend; see! The hollow of a tree filled with owls was burnt down by the fire thrown into it by crows. ३ Inhabited or filled with various birds. तृ. त. खग is an उपपद compound-खे (आकाशे) गच्छतीति=खगः. ४ Covered with thick foliage. Here the comparative termination तर has propriety. ५ Having the complexion of, or resembling, a cloud. मेघस्य वर्ण इव वर्णो यस्य. ब. ६ Having many crows for attendants; attended by many crows. अनेके काकाः परिवारो यस्य. ब.

तत्र विहितदुर्गरचनः सपरिजनः कालं नयति । अथान्योरिमर्दनो नामोलूकराजोसंख्योलूकपरिवृतो गिरिगुहादुर्गाश्रयः प्रतिवसति स्म । स च रात्रावागत्य तस्य न्यग्रोधस्य समन्तात्परिभ्रमति । यं कंचि-द्वायसमासादयति तं व्यापादयति । एवं नित्याभिगमनाच्छनैःशनैस्तन्न्यग्रोधपादपदुर्गं निर्वायसं कृतम् । अथवा भवत्येवम् । यतः ।

य उपेक्षेत शत्रुं स्वं प्रचरन्तं यदृच्छया ।
रोगं वालस्यसंयुक्तः स शनैस्तेन हन्यते ॥ २ ॥

तथा च । जातमात्रं न यः शत्रुं व्याधिं च प्रशमं नयेत् ।
महाबलोपि तेनैव वृद्धिं प्राप्य स हन्यते ॥ ३ ॥

अथान्येद्युः स वायसराजः सर्वान्सचिवानाहूय प्रोवाच । भो उत्कटस्तावदस्माकं शत्रुरुद्यमसंपन्नश्च कालवित्रित्यमेव निशागमे समेत्य व्यापादनं करोति । तत्कथमस्य प्रतिविधातव्यम् । वयं तावद्रात्रौ न पश्यामो न च तस्य दुर्गं विजानीमो येन गत्वा प्रहरामः । तदत्र किं युज्यते संधिविग्रहयानासनसंश्रयद्वैधीभावानामेकतमस्य क्रियमाणस्य । अथ ते प्रोचुः । युक्तमभिहितं देवेन यदेष प्रश्नः कृतः । उक्तं च ।

---

१ Who had constructed a fort to live in. विहिता दुर्गरचना येन. ब. २ The destroyer of an enemy अरि-मर्दनः. ष. त. ३ See अन् .काकपरिवारः above. ४ Residing in a fort-like mountain cave. गिरिगुहा एव दुर्गः तस्मिन् आश्रयो यस्य. ब. ५ Round about. ६ By daily or frequent visits. ७ That fort-like nest made on the banian tree. ८ Void of crows. निर्गताः वायसाः यस्मात्. ब. ९ He, who being overtaken by sloth, accidentally neglects his enemy wandering about, or a disease, that is growing, is gradually destroyed by him or it. १० He, who, though very powerful, does not destroy his enemy or a disease as soon as he or it manifests himself or itself, is destroyed by that enemy or disease when he or it, grows strong. महाबलः-महत् बलं यस्य. ब. ११ One day and not the next day. १२ Furious or dangerous. १३ Endowed with industry, or industrious. १४ Knowing the right time to plan an undertaking-here of course-the plan of attacking the crows. १५ On the approach of night. १६ To act again or retaliate. १७ So that we can go and strike (them, viz. the owls). १८ These have been explained fully in notes to Tantra I which see.

[1]अपृष्टेनापि वक्तव्यं सचिवेनात्र किंचन ।
पृष्टेन त्वरितं पथ्यं वाच्यं च प्रियमप्रियम् ॥ ४ ॥
[2]यो न पृष्टो हितं ब्रूते परिणामे सुखावहम् ।
मन्त्री च प्रियवक्ता च केवलं स रिपुः स्मृत ॥ ५ ॥
[3]सुलभाः पुरुषा राजन्सततं प्रियवादिनः ।
अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः ॥ ६ ॥
[4]तस्मादेकान्तमासाद्य मन्त्रः कार्यो महीपते ।
येन तस्य वयं कुर्मो निश्चयं कारणं तथा ॥ ७ ॥

अथ तस्यान्वयगताः[5] पञ्च सचिवाः । तद्यथा[6] नामानि । उज्जीवी संजीव्यनुजीवी प्रजीवी चिरंजीवी च । स तेषामादौ तावदुज्जीविनं पृष्टवान् । भद्र एवं[8] स्थिते किं मन्यते भवान् । स आह । राजन् बलवता सह विग्रहो न कार्यः । यतः स बलवान्कालप्रहर्ता[9] च तस्मात्संधेयः । उक्तं च ।

१ A minister should give counsel (lit. speak anything) even unasked, and when consulted he should at once speak out anything whether favourable or otherwise. २ He, who being asked, does not advise something that is salutary in the end, and he, who being a minister talks sweetly (that is, says such things as are likely to please his master), is said to be a bitter enemy. ३ It is very easy, oh king, to find such persons as always speak what is pleasing, but one who speaks of what is unpleasant but salutary, is very rare. ४ Therefore, oh king, having retired to a solitary place, let a consultation be held so that we may arrange or plan its execution and attain the [illegible]. ५ Hereditary. ६ Their names are as under. ७ All [illegible] names signify almost the same thing. ८ Such being the case; under such circumstances. ९ Leading an attack at the proper time.

१बलीयसि प्रणमतां काले प्रहरतामपि ।
संपदो नापगच्छन्ति प्रतीप इव निम्नगाः ॥ ८ ॥
२सत्याढ्यो धार्मिकश्चार्यो भ्रातृसंघातवान्बली ।
अनेकविजयी चैव संधेयः स रिपुर्भवेत् ॥ ९ ॥
३संधिः कार्योऽप्यनार्येण विज्ञाय प्राणसंशयम् ।
प्राणैः संरक्षितैः सर्वं यतो भवति रक्षितम् ॥ १० ॥

..कयुद्धविजयी स तेन विशेषात्संधेयः । उक्तं च ।

५अनेकयुद्धविजयी संधानं यस्य गच्छति ।
तत्प्रभावेन तस्याशु वशमायान्त्यरातयः ॥ ११ ॥
६संधिमिच्छेत्समेनापि संदिग्धो विजयो युधि ।
न हि सांशयिकं कुर्यादित्युवाच बृहस्पतिः ॥ १२ ॥

१ The prosperity of those, who bow down before the strong and strike at the right time, does not go away from them as rivers do not flow back or against the current For प्रतीपे we have प्रतीपम् in the same sense. प्रतीप is deri[illegible] from प्रति against and अप् water and means against water, that is, against the current or course of &c. निम्नगा from निम्न (adj.) low, deep and ग from गम् and therefore, literally means—that which goes or flows low or deep. २ That enemy, who is very truthful, pious, having a number of relatives &c. powerful and who has gained successes in various ways, deserves to be made peace with. सत्याढ्य. स. त. ३ Peace should be made even with an ignoble person knowing that there is danger to life, since when life is protected, everything else becomes protected. ४ Specially, especially. ५ Enemies soon come under the power of him who makes friends with one who is victorious in many battles owing to his prowess. ६ One should wish to make peace even with one who is his equal, for victory in battle is doubtful. No dangerous or doubtful thing should be undertaken; so says Brihaspati.

¹संदिग्धो विजयो नित्यं द्यूतेनापि हि युद्ध्यताम् ।
उपायत्रितयादूर्ध्वं तस्माद्युद्धं समाचरेत् ॥ १३ ॥

²असंदधानो मानान्धः समेनापि हतो भृशम् ।
आमकुम्भ इवान्येन करोत्युभयसंक्षयम् ॥ १४ ॥

³समं शक्तिमता युद्धमशक्तस्य हि मृत्यवे ।
दृषत्कुम्भमिवाभित्त्वा तावत्तिष्ठति शक्तिमान् ॥ १५ ॥

⁴भूमिर्मित्रं हिरण्यं च विग्रहस्य फलत्रयम् ।
नास्त्येकमपि यद्येषां विग्रहं न समाचरेत् ॥ १६ ॥

⁵खनन्नाखुबिलं सिंहः पाषाणशकलाकुलम् ।
प्राप्नोति नखभङ्गं हि फलं वा मूषको भवेत् ॥ १७ ॥

⁶तस्मान्न स्यात्फलं यत्र पुष्टं युद्धं च केवलम् ।
न हि तत्स्वयमुत्पाद्यं कर्तव्यं च कथंचन ॥ १८ ॥

१ Victory is always doubtful, therefore one should fight even by means of gambling; after the first three remedies are tried, war should be made. उपायत्रितय are three remedies of the four (साम peace, दान bribery, भेद sowing dissension and दण्ड war) generally used in dealing with an enemy. २ A person blinded by pride and not making peace even with his equal, being easily killed, causes the destruction of both, as one unburnt earthen jar does by coming in contact with another. ३ Fight with a powerful person causes the destruction of the weak; (for) a powerful man having broken (destroyed)another, like a stone-jar remains itself un-... ४ Acquisition of territory, friend and gold are the fruits of war; if even one of these is not to be obtained, ... should be declared. ५ A lion digging the hole of a ... filled with pieces of stone, has his claws broken ; or ... fruit is at all obtained, it will be a mouse only. ६ No ... should be raked up and war made in which there ... no substantial fruit but only fighting.

[1]बलीयसा समाक्रान्तो वैतसीं वृत्तिमाश्रयेत् ।
वाञ्छन्नभ्रंशिनीं लक्ष्मीं न भौजंगीं कदाचन ॥ १९ ॥

[2]कुर्वन्हि वैतसीं वृत्तिं प्राप्नोति महतीं श्रियम् ।
भुजंगवृत्तिः प्राप्नोति वधमेव हि केवलम् ॥ २० ॥

[3]कूर्मसंकोचमास्थाय प्रहारानपि मर्षयेत् ।
कालेकाले च मतिमानुत्तिष्ठेत्कृष्णसर्पवत् ॥ २१ ॥

[4]आगतं विग्रहं दृष्ट्वा सुसाम्ना प्रशमं नयेत् ।
विजयस्य ह्यनित्यत्वाद्रभसा न समुत्पतेत् ॥ २२ ॥

तथा च । [5]बलिना सह योद्धव्यमिति नास्ति निदर्शनम् ।
प्रतिवातं न हि घनः कदाचिदुपसर्पति ॥ २३ ॥

१ He, who is over-taken by a powerful person, should resort to the condition of a cane (which bends down) and never to that of a serpent, if he wishes to have unfailing prosperity. [A serpent expands his hood and so becomes more terrible than otherwise]. भौजंगी is an adjective from भुजंग and वैतसी from वेतस a reed, a cane. २ He, who assumes the condition of a reed, obtains great wealth; while he, who assumes that of a serpent, meets with nothing but death. ३ One should even bear blows by assuming the contraction of a tortoise (that is by shrinking back before a powerful enemy); a wise man should rise up (lift up his head) at times (that is at favourable times), like the black serpent. Another edition reads this verse as follows :— कौर्मं संकोचमास्थाय...त् । आगतं विग्रहं मत्वा सुसाम्ना प्रशमं नयेत् ॥ The latter half means-having seen that hostility has arisen, one should put it down with peaceful means. ४ Having seen hostility arisen, one should settle it down by peaceful remedies; one should never rashly attack an enemy by reason of the uncertainty of victory (that is, as one is not sure of always getting victory in battle). ५ There is no scriptural authority that one should fight with a powerful person; a cloud never goes against the current of wind.

एवमुज्जीवी साममन्त्रं[1] संधिकारकं[2] विज्ञप्तवान्[3] । अथ तच्छ्रुत्वा रक्ताक्षं विनमाह । भद्र तवाभिप्रायं श्रोतुमिच्छामि । स आह । देव न मे एतत्प्रतिभाति यच्छत्रुणा सह संधानं क्रियते[4] । उक्तं च ।

[5]शत्रुणा न हि संदध्यात्सुश्लिष्टेनापि संधिना ।
सुतप्तमपि पानीयं शमयत्येव पावकम् ॥ २४ ॥

अपरं च स क्रूरो लुब्धो धर्मरहितः[6] । तत्त्वया विशेषाद्[7]संधेयः ।

[8]सत्यधर्मविहीनेन न संदध्यात्कथंचन ।
सुसंधितोप्यसाधुत्वादचिराद्याति विक्रियाम् ॥ २५ ॥

तस्मात्तेन योद्धव्यमिति मे निश्चयः । उक्तं च ।

[9]क्रूरो लुब्धोलसोसत्यः प्रमादी भीरुरस्थिरः ।
मूढो योधावमन्ता च सुखोच्छेद्यो भवेद्रिपुः ॥ २६ ॥

अपरं पराभूतास्तेन वयम् । तद्यदि संधानं करिष्यथ तद्भूयोपि काकविनाशं करिष्यति । उक्तं च ।

१ Counsel for peace-making. २ Calculated to bring about peace. ३ Advised; lit. requested. In Sanskrit any thing said by the inferiors to their superiors is called a विज्ञप्ति; while what the superiors say to their inferiors is a नियोग, आज्ञा. This of course is due to rules of formality. ४ Peace should be (is) made. ५ One should never enter into an alliance with the enemy even by a well-formed peace; water though greatly heated does certainly extinguish fire. ६ Godless, impious. ७ Should not be made peace with for this special reason. ८ One should not make peace with one who is destitute of truth and religion (or it may mean [illegible] religion), because though tied down by firm alliance, he will soon change on account of his evil disposition. ९ An enemy who is cruel, avaricious, lazy, untruthful, careless, timid, unsteady, foolish and the despiser of warriors, can be easily crushed. सुखोच्छेद्य-सुखेन उच्छेद्य. तृ. क.

[१]चतुर्थोपायसाध्ये तु शत्रौ सान्त्वमपक्रिया ।
स्वेद्यमानज्वरं प्राज्ञः कोम्भसा परिषिञ्चति ॥ २७ ॥

[२]सामवादाः सकोपस्य तस्य प्रत्युत दीपकाः ।
सुतप्तस्येव सहसा सर्पिषस्तोयबिन्दवः ॥ २८ ॥

यच्चैतद्वदति देवो रिपुर्बलवांस्तदप्यकारणम् । उक्तं च ।

[४]प्रमाणाभ्यधिकस्यापि महत्सत्त्वमधिष्ठितः ।
पदं मूर्ध्नि समाधत्ते केसरी मत्तदन्तिनः ॥ २९ ॥

[५]उत्साहशक्तिसंपन्नो हन्याच्छत्रुं लघुर्गुरुम् ।
यथा कण्ठीरवो नागं भारद्वाजाः प्रचक्षते ॥ ३० ॥

[६]मायया शत्रवो वध्या अधिकाः स्युर्बलेन ये ।
यथा स्त्रीरूपमास्थाय हता भीमेन कीचकाः ॥ ३१ ॥

१ Offering terms of peace to an enemy, who can be won over by the fourth remedy (viz. the fourth of the four सामन्, दान, भेद and दण्ड) is a bad means; what wise man will sprinkle water over a person whose body is covered with the perspiration of fever? स्वेद्यमानज्वर–स्वेद्यमानः ज्वरः. क. २ Talking of peace to one who is angry excites him the more (instead of pacifying him) as drops of water thrown suddenly into the ghee which is greatly boiled, agitate it greatly. प्रत्युत lit. on the contrary. ३ Groundless, without reason. ४ The lion possessed of great strength places his foot (paw) on the head of an intoxicated elephant who is bigger in dimensions. प्रमाणाभ्यधिक. तृ. त. ५ Even a weak person possessed of the power of energy will kill a powerful one, as is told by the *Bhâradvâjas* that *Kanthirara* (the lion) killed *Naga* (the elephant). ६ Those enemies who are superior in strength, should be destroyed by means of deceit (माया); as the *Kichakas* were killed by *Bhima* who assumed the form of his wife (*Draupadi*). The death of *Kichaka*, who sought to spoil the chastity of *Draupadi* while at the court of Viráta is an incident well-known to many.

तथा च । मृत्योरिवोग्रदण्डस्य राज्ञो यान्ति वशं द्विषः ।
सर्वसहं तु मन्यन्ते तृणाय रिपवश्च तम् ॥ ३२ ॥
न जातु शमनं यस्य तेजस्तेजस्वितेजसाम् ।
वृथाजातेन किं तेन मातुर्यौवनहारिणा ॥ ३३ ॥
या लक्ष्मीर्नानुलिप्ताङ्गी वैरिशोणितकुङ्कुमैः ।
कान्तापि मनसः प्रीतिं न सा धत्ते मनस्विनाम् ॥ ३४ ॥
रिपुरक्तेन संसिक्ता तत्स्त्रीनेत्राम्बुभिस्तथा ।
न भूमिर्यस्य भूपस्य का श्लाघा तस्य जीविते ॥ ३५ ॥

एवं संजीवी विग्रहमेवं विज्ञापयामास । अथ तच्छ्रुत्वानुजीविनमाह । भद्र त्वमपि स्वाभिप्रायं वद । स आह । देव दुष्टः स बलाधिको निर्मर्यादश्च । तत्र तेन न संधिर्न विग्रहो युक्तः । केवलं यानमर्हं स्यात् । उक्तं च ।

१ Enemies are easily subdued by that king whose punishment (septre) is very terrible like that of Death; while they (enemies) consider him, who bears every thing, as insignificant as grass. उग्रदंड-उग्रः दंडः यस्य. ब. सर्वसह-उप० सर्वं सहते इति. तृणाय or तृणवत् मन् is an idiom frequently used in the sense of contempt or scorn. २ What is the good of the birth of him whose valour (तेजः) is not sufficient to overcome that of the enemies and who, therefore, simply deprives his mother of her youth? यस्य तेजः शत्रुतेजसां शमनं न (भवति). ३ That glory which is not smeared with the *Kumkuma* in the form of the blood of the enemy, does not please the mind of the wise, like a woman who, though handsome, does not please the mind without the red mark of कुंकुम on her forehead. अनुलिप्ताङ्गी ब. प्रीतिं धत्ते lit. holds or bears pleasure. ४ What credit or praise is due to a king for his existence whose land is not wet by the blood of the enemies as well as by the tears flowing down the eyes of their wives? The meaning is, that king is really said to live who sheds his enemies' blood and destroys them in war. तेषां स्त्री: &c. ५ Counsel or advice to declare war. ६ Superior in strength. बलेन अधिकः. तृ. त. ७ Without any bounds of propriety. निर्गता मर्यादा यस्य. ब. ८ Marching against, expedition-the third of the six remedies used in dealing with an enemy.

[१]बलोत्कृष्टेन दुष्टेन मर्यादारहितेन च ।
न संधिर्विग्रहो नैव विना यानं प्रशस्यते ॥ ३६ ॥
[२]द्विधाकारं भवेद्यानं भये प्राणार्थरक्षणम् ।
एकमन्यज्जिगीषोश्च यात्रालक्षणमुच्यते ॥ ३७ ॥
[३]कार्तिके वाथ चैत्रे वा विजिगीषोः प्रशस्यते ।
यानमुत्कृष्टवीर्यस्य शत्रुदेशे न चान्यदा ॥ ३८ ॥
[४]अवस्कन्दप्रदानस्य सर्वे कालाः प्रकीर्तिताः ।
व्यसने वर्तमानस्य शत्रोश्छिद्रान्वितस्य च ॥ ३९ ॥
[५]स्वस्थानं सुदृढं कृत्वा शूरैश्चाप्तैर्महाबलैः ।
परदेशं ततो गच्छेत्प्रणिधिव्याप्तमग्रतः ॥ ४० ॥
[६]अज्ञातवीवधासारतोयसस्यो व्रजेत्तु यः ।
परराष्ट्रं न भूयः स स्वराष्ट्रमपि गच्छति ॥ ४१ ॥

---

१ Only यान marching against is suited in the case of him, who is superior in strength, wicked and without the bounds of propriety and neither peace nor war. २ Marching against (यान) is of two kinds-one that saves life and property at the time of danger and other is said to be the sign of a conqueror going on a holy pilgrimage. द्विधाकारं-द्विधा आकारो यस्य. ब. यात्रा. ३ The expedition of an eminently powerful conqueror, into the territories of an enemy is said to be the most opportune either in the month of Kartika or Chaitra and not in any other. उत्कृष्टवीर्य. ब. ४ All times are preferable for leading an attack or assault, and also in the case of an enemy who is involved in a difficulty and has a weak point or defect (छिद्र). अवस्कन्दप्रदान-ष. त. ५ Having made one's own territory quite secure by means of men who are brave, trustworthy and powerful, one should march against another's country which has already been occupied by one's own emissaries. आप्त=यथार्थ वक्ता true, worthy of confidence. ६ He, who not knowing the roads of a foreign country, provisions, water and corn, marches against an enemy does not only reach the enemy's country but does not even return home. अज्ञात-सस्यः—अज्ञातानि वीवधासारतोयसस्यानि येन. ब. स. understand गच्छति after परराष्ट्रं न.

तत्ते युक्तं कर्तुमपसरणम् । अन्यच्च ।

तत्र युक्तं प्रभो कर्तुं द्वितीयं यानमेव च ।
न विग्रहो न संधानं बलिना तेन पापिना ॥ ४२ ॥

अपरं कारणापेक्षया सरणं क्रियते बुधैः । उक्तं च ।

यदपसरति मेषः कारणं तत्प्रहर्तुं
मृगपतिरतिकोपात्संकुचत्युत्पतिष्णुः ।
हृदयनिहितभावा गूढमन्त्रप्रचाराः
किमपि विगणयन्तो बुद्धिमन्तः सहन्ते ॥ ४३ ॥

अन्यच्च ।

बलवन्तं रिपुं दृष्ट्वा देशत्यागं करोति यः ।
युधिष्ठिर इवाप्नोति पुनर्जीवन्स मेदिनीम् ॥ ४४ ॥

१ Here the correct reading seems to be तत्तेयुक्तं कर्तुमपसरणं. It is not proper for you to return. २ It is, therefore, proper, oh lord, for you to adopt the second remedy, viz. of marching against and neither hostility nor peace (संधानं=संधिं) because, he (the enemy, viz. owl) is powerful and wicked. यानं usualy occupies the third place among the six remedies mentioned and already explained; but here the order seems to be changed as यान is said to be the second of the six remedies. ३ With the object of accomplishing some thing or end. कारणस्य अपेक्षया. ष. त. ४ The reason why a goat retreats (in fighting) is due to the fact that he wishes to strike the lord of beasts (the lion) contracts his body with the desire of angrily falling upon his prey; talented persons whose motives are concealed in the heart and the operations of whose counsels are secretly planned, endure (some inconvenience) with due deliberations. उत्पतिष्णुः adj. from उत्पत्. Cf. करिष्णु. हृदयनिहितभावाः and गूढमंत्रप्रचाराः are ब. विगणयन्तः considering. Here I take किमपि as the object of सहन्ते. ५ He who having seen a powerful enemy, leaves his own country, obtains it again if he lives as did *Udhishthira*. The fact of *Udhishthira* having regained his kingdom after living in the forest for 13 years is well-known.

[1]युध्यतेहंकृतिं कृत्वा दुर्बलो यो बलीयसा ।
स तस्य वाञ्छितं कुर्यादात्मनश्च कुलक्षयम् ॥ ४५ ॥

तद्बलवताभि[2]युक्तस्या[3]पसरणसमयोयं न संधिर्विग्रहश्च । एवम् जीविमन्त्रोपसरणस्यं । अथैतदाकर्ण्य प्रजीविनमाह । भद्र त्वमप्यात्मनोभिप्रायं वद । स आह । देव मम संधिविग्रहयानान्यपि त्रीण्येव न प्रति[4]भान्ति विशेषत[5]श्चासनम् । उक्तं च ।

[6]नक्रः स्वस्थानमासाद्य गजेन्द्रमपि कर्षति ।
स एव प्रच्युतः स्थानाच्छुनापि परिभूयते ॥ ४६ ॥

अन्यच्च ।

[7]अभियुक्तो बलवता दुर्गे तिष्ठेत्प्रयत्नवान् ।
तत्रस्थः सुहृदाह्वानं प्रकुर्वीतात्ममुक्तये ॥ ४७ ॥
[8]यो रिपोरागमं श्रुत्वा भयसंत्रस्तमानसः ।
स्वस्थानं हि त्यजेत्तत्र न तु भूयो विशेच्च सः ॥ ४८ ॥
[9]दंष्ट्राविरहितः सर्पो मदहीनो यथा गजः ।
स्थानहीनस्तथा राजा गम्यः स्यात्सर्वजन्तुषु ॥ ४९ ॥

---

१ That weak person, who fights with a powerful one through the pride of his own strength, does what is desired by him (the enemy) and causes the destruction of his own family. अहंकृतिं कृत्वा by doing egotism, that is, through egotism or self-pride. २ Attacked. ३ For retreating. ४ Do not appear (advisable). ५ But especially आसन maintaining one's ground. ६ Having reached his own place, a crocodile can draw towards himself even the best of elephants; but that very crocodile when driven from its place, is despised even by a dog. ७ Being attacked by a powerful enemy a person should, with all attempts, take his stand in a fortress; and having stationed himself there he should call his friends for his own release. ८ He, who at hearing the approach of an enemy and being frightened, abandons his own place, will never enter that place again. ९ As a serpent without fangs and as an elephant without intoxication, so a king deprived of his place, can be attacked by all creatures (lit. is approachable by all). Here all the compounds are ष. त.

[1]निजस्थानस्थितोप्येकः शतं योद्धुं सहेन्नरः ।
बलिनामपि शत्रूणां तस्मात्स्थानं न संत्यजेत् ॥ ५० ॥
[2]तस्माद्दुर्गं दृढं कृत्वा वीवधासारसंयुतम् ।
प्राकारपरिखायुक्तं यन्त्रादिभिरलंकृतम् ॥ ५१ ॥
तिष्ठेन्मध्यगतो नित्यं युद्धाय कृतनिश्चयः ।
जीवन्संप्राप्स्यति राज्यं मृतो वा स्वर्गमेष्यति ॥ ५२ ॥

अन्यच्च ।

[3]बलिनापि न बाध्यन्ते लघवोप्येकसंश्रयाः ।
प्रभञ्जनविपक्षेण यथैकस्था महीरुहाः ॥ ५३ ॥
[4]महानप्येकजो वृक्षः सर्वतः सुप्रतिष्ठितः ।
सुमन्देनापि वातेन शक्यो धूनयितुं यतः ॥ ५४ ॥
एवं मनुष्यमप्येकं शौर्येणापि समन्वितम् ।
शक्यं द्विषन्तो मन्यन्ते हिंसन्ति च ततः परम् ॥ ५५ ॥

१ Even a single individual when in his own place can afford to fight with one hundred powerful men on the side of the enemy; so a place should not be relinquished. २ Therefore, having made a fortress strong, with good roads and provisions, and furnished with a rampart and ditch, and endowed with machines and others, one should always remain in its midst with a firm determination to fight; (after doing so) if one lives, one will obtain a kingdom or if one dies, one will obtain heaven. वीवधासारसंयुतं वीवधासाराभ्यां संयुतं (युक्तं). तृ. त. मध्यगतः=दुर्गमध्ये गतः. ३ Even weak persons, who live together, are not injured even by a powerful enemy ; just as trees, (महीरुहा :—मह्यां रोहन्तीति. उप.) which grow together are not shaken by a powerful wind which is adverse or blowing in the opposite direction. A different reading for बाध्यन्ते is साध्यन्ते which almost means the same. साध्यन्ते lit. means, are accomplished, that is, won or vanquished. प्रभंजनविपक्षेण is a० क. प्रभंजनः एव विपक्ष having an enemy no less than storm itself. ४ As even a large tree, which grows singly and which is well placed on all sides, can be shaken even by a gentle wind, so enemies consider that person who is single (unassisted) who is possessed of valour, as easily conquerable and th kill him. एकजः--एक एव जातः.

एवं प्रजीविमन्त्रः । इदमासनसंज्ञकम् । एतत्समाकर्ण्य चिरंजीविनमाह । भद्र त्वमपि स्वाभिप्रायं वद । स आह । देव षाड्गुण्यमध्ये मम संश्रयः प्रतिभाति । तस्यानुष्ठानं कार्यम् । उक्तं च ।

असहायः समर्थोपि तेजस्वी किं करिष्यति ।
निर्वाते ज्वलितो वह्निः स्वयमेव प्रशाम्यति ॥ ५६ ॥

तदत्रैव स्थितेन त्वया कश्चित्समर्थ आश्रयणीयो यो विपत्प्रतीकारं करोति । यदि पुनस्त्वं तव स्थानं त्यक्त्वा प्रयास्यसि तत्कोपि ते वाङ्मात्रेणापि सहायत्वं न करिष्यति । उक्तं च ।

वनानि दहतो वह्नेः सखा भवति मारुतः ।
स एव दीपनाशाय कृशे कस्यास्ति सौरवम् ॥ ५७ ॥

अथवा नैष एकान्तो यद्बलिनमेकं समाश्रयेत् । लघूनामपि संश्रयो रक्षायै भवति । उक्तं च ।

संघातवान्यथा वेणुर्निबिडैर्वेणुभिर्वृतः ।
न शक्यते समुच्छेत्तुं दुर्बलोपि तथा नृपः ॥ ५८ ॥

१ This is what goes by the name of आसन. २ Out of the collection of the six remedies. ३ I prefer संश्रय, that is, taking shelter. ४ What can even a powerful and energetic person, who is without any assistance, do? Fire kindled in a place without air, is extinguished of itself (not being fed or assisted by the wind which is its assistant). असहाय–नास्ति सहायः यस्य. ब. Understand प्रदेशे after निर्वाते. ५ Some powerful person should be resorted to. ६ Even by words, much less in action. ७ The wind assists (becomes the helper of) the fire that burns forests, but that very wind puts out a lamp; who has any respect for the weak? दीपनाशाय This is an idiomatic use of the Dative. Cf. यतस्तौ स्वल्पदुःखाय in Book I and the note thereon. ८ This is not an exclusive recourse that &c. Just as a bamboo though small yet growing in a collection and surrounded by thicket of bamboos, cannot be cut down, so a king who is weak &c. cannot be destroyed. As संघातवान् वेणुः expresses the sense of *unity* निबिडैर्वेणुभिर्वृतः is superfluous.

[1]अथ ये संहता वृक्षाः सर्वतः सुप्रतिष्ठिताः ।
ते न रौद्रानिलेनापि हन्यन्तेन्योन्यसंश्रयात् ॥ ५९ ॥
[2]महानप्येकजो वृक्षो बलवान्सुप्रतिष्ठितः ।
प्रसह्य इव वातेन शक्यः स्यादपि मर्दितुम् ॥ ६० ॥

यदि पुनरुत्तमे संश्रयो भवति तत्किमुच्यते । उक्तं च ।

[4]महाजनस्य संपर्कः कस्य नोन्नतिकारकः ।
पद्मपत्रस्थितं तोयं धत्ते मुक्ताफलश्रियम् ॥ ६१ ॥

ततः संश्रयं विना न कश्चित्प्रतीकारो भवति । [5]तस्मात्संश्रयात्कार्यो विग्रह इति मेभिप्रायः । एवं चिरंजीविमन्त्रः । अथैवं तेनाभिहिते स मेघवर्णो राजा चिरंतनं पितृसचिवं दीर्घायुषं सकलनीतिपारं गतं स्थिरजीविनामानं प्रणम्य प्रोवाच । तात [9]यदेते मया पृष्टाः सचिवास्तावदत्र स्थितस्यापि तव तत्परीक्षार्थं येन त्वं सकलं श्रुत्वा यदुचितं तन्मे समादिशसि । तद्युक्तं भवति तत्समादेश्यम् । स आह । वत्स

१ In the same way, those trees which are growing together and are well fixed on all sides, are not destroyed even by a strong wind by reason of their mutual assistance or shelter. संहताः P. P. of हन् with सम् 2 P. रौद्रानिलः-रौद्रश्चासौ अनिलश्च. क. २ Even a large tree, growing singly, strong and well placed, can be forcibly destroyed by the wind. ३ But if shelter is taken with the best of men, then what need we say of the result? that is, the result in that case will be the most desirable in every respect. ४ To whom is not the contact with the great elevating? Water when it is on the leaf of a lotus, assumes the lustre of a pearl. ५ So it is my advice that hostility should be declared by taking shelter with a powerful person. ६ Of long standing, old. ७ The minister of (his) father. ८ Long-lived; of a long life. ९ The reason why these ministers were asked advice by me in spite of your presence here, was to test you, so that by hearing all, you may advise me to follow that course which you think proper.

सर्वैरप्येतैर्नीतिशास्त्राश्रयमुक्तं सचिवैः । तदुपयुज्यते स्वकाले । परमेष द्वैधीभावस्य कालः । उक्तं च ।

अविश्वासं सदा तिष्ठेत्संधिना विग्रहेण च ।
द्वैधीभावं च संश्रित्य पार्श्वे शत्रोर्बलीयसः ॥ ६२ ॥

तच्छत्रुं विश्वास्य विश्वस्तैर्लोभं दर्शयद्भिः सुखेनोच्छिद्यते रिपुः । उक्तं च ।

उच्छेद्यमपि विद्वांसो वर्धयन्त्यरिमेकदा ।
गुडेन वर्धितः श्लेष्मा सुखं वृद्ध्या निपात्यते ॥ ६३ ॥

तथा च ।

स्त्रीणां शत्रोः कुमित्रस्य पण्यस्त्रीणां विशेषतः ।
यो भवेदेकभावोत्र न स जीवति मानवः ॥ ६४ ॥

---

१ All these ministers have said or advised in conformity with the science of politics—नीतिशास्त्राश्रयं=नीतिशास्त्रस्य आश्रयः यस्मिन् तत् (वस्तु understood) ब. or it may be taken to be an adverbial compound and may be dissolved as नीतिशास्त्रस्य आश्रयः यस्मिन् कर्मणि यथा तथा. २ The advice given by each is suitable at its proper time. ३ Duplicity, treachery. ४ One always remains in doubt or uncertainty by resorting to peace and war; but he can remain in security near a more powerful enemy by having recourse to duplicity. Understand तिष्ठेत् after बलीयसः. अविश्वासं adv. compound. नास्ति विश्वासः यस्मिन्कर्मणि यथा तथा. The reading for the last Pâda, viz. पार्श्वे शत्रोर्बलीयसः is पापे शत्रौ बलीयसि which means in the case of an enemy who is wicked but powerful. ५ So those, in whom confidence is reposed, having caused the enemy to confide in them and by holding out some bait, easily destroy him. ६ Learned men allow an enemy, though fit or liable to be crushed, to grow in strength once for all; asthma allowed to grow by means of molasses is easily cured. ७ He, who will place implicit faith in [illegible], in an enemy, in a false or wicked friend and espe[illegible] in harlots, will not live (that is, will be destroyed [illegible] hands of any one of these.). पण्यस्त्री a woman who [illegible] on the money or price given to her for her enjoyment [illegible] overs. एकभावः=एकः (अनन्यसदृशः) भावः यस्य सः. ब.

¹कृत्यं देवद्विजातीनामात्मनश्च गुरोस्तथा।
एकभावेन कर्तव्यं शेषं द्विर्भावमाश्रितैः॥ ६५॥

²एको भावः सदा शस्तो यतीनां भावितात्मनाम्।
स्त्रीलुब्धानां न लोकानां विशेषेण महीभृताम्॥ ६६॥

तद्द्वैधीभावं संश्रितस्य तव स्वस्थाने वासो भविष्यति लोभाश्रयाच्च³ शत्रुमुच्चाटयिष्यसि⁴। अपरं यदि किंचिच्छिद्रं⁵ तस्य पश्यसि तद्गत्वा व्यापादयिष्यसि। मेघवर्ण आह। तात मयाविदितः संश्रयस्तस्य। तत्कथं छिद्रं ज्ञायते तस्य। स्थिरजीव्याह। वत्स न केवलं स्थानं छिद्राण्यपि तस्य प्रकटीकरिष्यामि⁶ प्रणिधिभिः। उक्तं च।

⁷गन्धेन गावः पश्यन्ति वेदैः पश्यन्ति वै द्विजाः।
चारैः पश्यन्ति राजानश्चक्षुर्भ्यामितरे जनाः॥ ६७॥

उक्तं चात्र विषये।

⁸यस्तीर्थानि निजे पक्षे परपक्षे विशेषतः।
गुप्तैश्चारैर्नृपो वेत्ति न स दुर्गतिमाप्नुयात्॥ ६८॥

१ The business of gods, Brahmans, one's self and of the preceptor, should be performed with a devoted mind; as to that of all the rest, it may be done by having recourse to treachery or duplicity. एकभाव—एकश्चासौ भावः. कर्म. द्विर्भाव means reduplication and here of course it stands for द्वैधीभाव and as opposed to एकभाव. २ Sole devotion is always preferable in the case of ascetics, in the case of those whose soul is purified by meditating on the universal soul, of those who are fond of women and especially of kings. भावितात्मन्—भावितः आत्मा यस्य. ब. ३ By your enemy's having recourse to avarice. ४ Will remove, kill. 2nd Fut. of चट् 10 U. with उद्. ५ A weak point, a defect. ६ Will make known or bring to light. ७ Cows know (see) things by smell, Brahmans by means of the Vedas, kings by the employment of spies and other people by their eyes. ८ That king who ascertains the helps of his own party and especially of the enemy by means of secret emissaries, will never come to grief or will never meet with a difficulty.

मेघवर्ण आह । तात कानि तीर्थान्युच्यन्ते कतिसंख्यानि[1] च । कीदृशा गुप्तचराः । तत्सर्वं निवेद्यतामिति । स आह । अत्र विषये भगवता नारदेन युधिष्ठिरः प्रोक्तः । यच्छत्रुपक्षेऽष्टादश तीर्थानि स्वपक्षे पञ्चदश । त्रिभिस्त्रिभिर्गुप्तचरैस्तानि[2] ज्ञेयानि । तैर्ज्ञातैः[3] स्वपक्षः परपक्षश्च वश्यो भवति । उक्तं च नारदेन युधिष्ठिरं प्रति ।

[4]कच्चिदष्टादशान्येषु स्वपक्षे दशपञ्च च ।
त्रिभिस्त्रिभिरविज्ञातैर्वेत्सि तीर्थानि चारकैः ॥ ६९ ॥

तीर्थशब्देनायुक्तकर्माभिधीयते[5] । तद्यदि तेषां कुत्सितं[6] भवति तत्स्वामिनोऽभिधानाय । प्रधानं[7] भवति तद्वृद्धये स्याद्दिति । तद्यथा[8] मन्त्री पुरोहितः सेनापतिर्युवराजो[9] दौवारिक[10] आन्तर्वासिकः[11] प्रशास्ता[12] समाहर्तृ[13]संनिधातृ[14]प्रदेष्टृ[15]ज्ञापकाः[16] साधनाध्यक्षो[17] गजाध्यक्षः कोशाध्यक्षो दुर्गपाल[18]करपाल[19]सीमापालप्रोत्कट[20]भृत्याः । एषां भेदेन द्राग्रिपुः साध्यते[21] । स्वपक्षे च देवी जननी कञ्चुकी मालिकः[22] शय्यापालकः स्पाशः[23] सांवत्सरिको[24] भिषग्जलवाहकस्ताम्बूलवाहकाचार्याङ्गरक्षक[25] स्थानचिन्तक[26]छत्त्रधरो विलासिनी[27] । एषां वैरद्वारेण[28] स्वपक्षे विघातः । तथा च ।

१ How many in number? कति संख्या येषां तानि. २ By three secret spies on each side. ३ When they are known (Instru. absolute) तेषु ज्ञातेषु. ४ I hope you will know by employing three secret emissaries that there are eighteen तीर्थs in the enemy's party and fifteen in one's own. ५ By the word तीर्थ is meant an अयुक्तकर्मा or an official. ६ If their actions be bad or evil. ७ Excellent, capital. ८ They (the officials) are as under. ९ The heir apparent to the throne. १० A warder or door-keeper. ११ The superintendent of the female apartments. १२ The Spiritual guide. १३ A collector of taxes. १४ An introducer of persons at court, an usher. १५ The chief justice. १६ The master of requests. १७ The chief of the army. १८ The protector of the fort. १९ The receiver-general of taxes. २० Furious. २१ Is vanquished or conquered. २२ A florist, a gardner. २३ A spy. २४ An astrologer or maker of an almanac. २५ A personal attendant or body-guard. २६ A quarter-master. २७ A harlot. २८ Through the enmity among these.

वैद्यसांवत्सरिकाचार्याः स्वपक्षेधिकृताश्चराः ।
यथाहितुण्डिकोन्मत्ताः सर्वं जानन्ति शत्रुषु ॥ ७० ॥

था च ।

²कृत्वा कृत्यविदस्तीर्थैरन्तः प्रणिधयः पदम् ।
विदांकुर्वन्तु महतस्तलं विद्विषदम्भसः ॥ ७१ ॥

एवं मन्त्रिवाक्यमाकर्ण्यात्रान्तरे मेघवर्ण आह । तात अथ किं-
निमित्तमेवंविधं प्राणान्तिकं सदैव वायसोलूकानां वैरम् । स आह ।
वत्स कदाचिद्धंसशुककबककोकिलचातकोलूकमयूरकपोतपारावतवि-
ष्करप्रभृतयः सर्वेपि पक्षिणः समेत्य सोद्वेगं मन्त्रयितुमारब्धाः ।
हो अस्माकं वैनतेयो राजा स च तावच्छ्रीवासुदेवासक्तो नास्मा-
कं कामापचिन्तां करोति । तत्किं तेन वृथास्वामिना यो लुब्धकपा-
शैर्नित्यं निबध्यमानानां न रक्षां विधत्ते । उक्तं च ।

¹⁰यो न रक्षति वित्रस्तान्पीड्यमानान्परैः सदा ।
जन्तून्पार्थिवरूपेण स कृतान्तो न संशयः ॥ ७२ ॥

¹¹यदि न स्यान्नरपतिः सम्यङ्नेता इमाः प्रजाः ।
अकर्णधारा पुरुषा विप्लवन्ते ह नौरिव ॥ ७३ ॥

---

¹ A physician, an astrologer, a preceptor and spies employed in one's own party, as also snake charmers and drunkards, know every thing that happens in the enemy's camp. २ Let the spies, who know their duty having made an entrance into the enemy's secrets by means of officials (तीर्थैः) sound the bottom of their secrets as the bottom of water is sounded by the help of flights of steps leading into the water (तीर्थैः). ३ Resulting in the destruction of life. It is ब. ब. प्राणानाम् अन्तः यस्मिन्. ४ Once on a time. ५ A cock. ६ Anxiously, excitedly. ७ Attached to or devoted to god, Vasudeva. ८ Does not care for us even in the least. ९ Being caught adj. अस्माकं understood. १० He who does not protect (the subjects) who are terror-striken and are always tormented by others, is, no doubt, death itself in the shape of a king. ११ If there be no king to guide these subjects properly, they would be destroyed as a boat without the helmsman sinks in water. कर्णधार the guide of ship—नास्ति कर्णधारो यस्याः सा. ब.

षडिमान्पुरुषो जह्याद्भिन्नां नावमिवार्णवे ।
अप्रवक्तारमाचार्यमनधीयानमृत्विजम् ॥ ७४ ॥
अरक्षितारं राजानं भार्यां चाप्रियवादिनीम् ।
ग्रामकामं च गोपालं वनकामं च नापितम् ॥ ७५ ॥

तत्संचिन्त्यान्यः कश्चिद्राजा विहंगमानां क्रियतामिति । अथ तैर्भद्राकारमुलूकमवलोक्य सर्वैरभिहितम् । यदेष उलूको राजास्माकं भविष्यति । तदानीयन्तां नृपाभिषेकसंबन्धिनः संभारा इति । अथ साधिते विविधतीर्थोदके प्रगुणीकृतेष्टोत्तरशतमूलिकासंघाते प्रदत्ते सिंहासने वर्तिते ससद्वीपवतीधरित्रीमण्डले प्रस्तारिते व्याघ्रचर्मण्यापूरितेषु हेमकुम्भेषु दीपेषु वाद्येषु च सज्जीकृतेषु दर्पणादिमाङ्गल्यवस्तुषु पठत्सु वन्दिमुख्येषु वेदोच्चारणपरेषु समुदितमुखेषु ब्राह्मणेषु गीतपरे युवतीजन आनीतायामग्रमहिष्यां कृकालिकायामुलूकोऽभिषेकार्थं यावत्सिंहासन उपविशति तावत्कुतोपि वायसः समायातः । सोऽचिन्तयत् । अहो किमेष पक्षिमेलापकी महोत्सवश्च । अथ ते पक्षिणस्तं दृष्ट्वा मिथः प्रोचुः । पक्षिणां मध्ये वायसश्चतुरः श्रूयते । उक्तं च ।

---

१ A man should abandon the following six like a broken vessel in the sea—viz. a preceptor who does not speak or teach, a sacrificial priest who does not continue his study, a king who does not protect, a wife who speaks harshly, a cowherd fond of the village and a barber fond of the forest. ग्रामकाम—ग्रामाय कामः यस्य. ब. २ After due deliberation or consideration. ३ Of a lovely or beautiful aspect. भद्रः आकारः यस्य. ब. ४ Connected with or concerning the coronation of a king. ५ When the water of the various holy places had been procured (साधिते). ६ After the collection (संघात) of one hundred and eight roots of trees had been made ready. ७ After the figure of the globe of the earth with its seven islands had been drawn (वर्तिते). ८ Spread. ९ When the golden jars, lamps and musical instruments had been filled respectively with water, oil and wind; the wind-pipes are said to be filled with *wind* when the(y) Is blown with the mouth. १० Bards. ११ Engaged in repeating the Vedas. १२ Collectively, all at once. १३ The oldest or chief queen. १४ The multitude or assemblage of birds. १५ Among themselves.

[1]नराणां नापितो धूर्तः पक्षिणां चैव वायसः ।
दंष्ट्रिणां च शृगालस्तु श्वेतभिक्षुस्तपस्विनाम् ॥ ७६ ॥

तदस्यापि वचनं ग्राह्यम् । उक्तं च ।

[3]बहुधा बहुभिः सार्धं चिन्तिताः सुविरूपिताः ।
कथंचिन्न विलीयन्ते विद्वद्भिश्चिन्तिता नयाः ॥ ७७ ॥

अथ वायसः समेत्य तानाह । अहो किं महाजनसमागमोयं परममहोत्सवश्च । ते प्रोचुः । भो नास्ति कश्चिद्विहंगानां राजा । तदस्योलूकस्य विहंगराजाभिषेको निरूपितोस्तिष्ठति समस्तपक्षिभिः । त्वमपि मतं देहि । प्रस्तावे समागतोसि । अथासौ काको विहस्याह । अहो न युक्तमेतद्यन्मयूरहंसकोकिलचक्रवाकशुकहारीतसारसादिषु पक्षिप्रधानेषु विद्यमानेषु दिवान्धस्यास्य करालवक्त्रस्याभिषेकः क्रियते । तन्नैतन्मम मतम् । यतः ।

[1]वक्रनासश्च कर्काक्षो रौद्रश्चाप्रियदर्शनः ।
अक्रुद्धोयं दिवान्धः स्यात्क्रुद्धः कीदृग्भविष्यति ॥ ७८ ॥

तथा च ।

१ The barber is the shrewdest of men, the crow of birds, the jackal of all carnivorous animals and the श्वेतभिक्षु (an ascetic with white garments) of all saints. २ His opinion should also be taken or asked. ३ Any design planned in consultation with many people and well examined, generally does not fail, when it is thought of by the learned. ४ Having met (them). ५ Appointed, fixed. ६ You have come at an opportune moment or opportunely. . species of parrot. ८ Blind during day time. ९ Of terrible look. करालं वक्त्रं यस्य. ब. १० This owl (lit. day-blind son) not angry is crook-nosed, squint-eyed, terrible and of an unpleasant aspect and how much so will he be when angry. The compounds in the first half of the verse are ब.

¹स्वभावरौद्रमत्युग्रं क्रूरमप्रियदर्शनम् ।
उलूकं नृपतिं कृत्वा का नः सिद्धिर्भविष्यति ॥ ७९ ॥

अपरं वैनतेये स्वामिनि स्थिते किमेष दिवान्धः स्वामी क्रियते । ²तद्यपि गुणवान्भवति तथाप्येकस्मिन्स्वामिनि स्थिते नान्यो भूः ³प्रशस्यते ।

⁴एक एव हितार्थो यस्तेजस्वी पार्थिवो भुवः ।
युगान्त इव भास्वन्तो बहवोऽत्र विपत्तये ॥ ८० ॥

तत्तस्य नाम्नापि यूयं परेषामगम्या भविष्यथ । उक्तं च ।

⁵गुरूणां नाममात्रेऽपि गृहीते स्वामिसंभवे ।
दुष्टानां पुरतः क्षेमं तत्क्षणादेव जायते ॥ ८१ ॥

तथा च ।

⁶व्यपदेशेन महतां सिद्धिः संजायते परा ।
शशिनो व्यपदेशेन वसन्ति शशकाः सुखम् ॥ ८२ ॥

त ऊचुः । कथमेतत् । स आह ।

॥ कथा १ ॥

आस्ति कस्मिंश्चिद्वने चतुर्दन्तो नाम महागजो यूथाधिपः प्रतिवसति स्म । तत्र कदाचिन्महत्यनावृष्टिः संजाता ⁷प्रभूतवर्षाणि यावत् ।

१ What success will be ours or what success can we get by making this owl, which is terrible by nature, very fierce, cruel and of an unpleasant look, a king? २ Even if he (the owl) be full of merits. ३ Is proper or right. ४ Even one king, who is powerful or lustrous, is beneficial to the earth; while many tend to destruction as the many suns do at the time of the end of the creation. ५ Even at the mere mention of the name of the great, which is that the our lord, before the wicked, some welfare is in a moment produced. ६ By the designation of the great, good success is obtained; by calling the moon their lord, the hares lived happily (in their own places.) ७ For many years. यावत् in the sense of "so long as"—governs the Accusative.

-थया तडागह्रदपल्वलसरांसि शोषमुपागतानि । अथ तैः समस्तगजैः गजराजः प्रोक्तः । देव पिपासाकुला गजकलभा मृतप्राया अपरे ... । तदन्विष्यतां कश्चिज्जलाशयो यत्र जलपानेन स्वस्थता ... अन्ति । ततश्चिरं ध्यात्वा तेनाभिहितम् । अस्ति महाह्रदो विविक्ते प्रदेशे स्थलमध्यगतः पातालगङ्गाजलेन सदैव पूर्णः । तत्तत्र गम्यतामिति । तथानुष्ठिते पञ्चरात्रमुपसर्पद्भिः समासादितस्तैः स ह्रदः । तत्र स्वेच्छया जलमवगाह्यास्तमनवेलायां निष्क्रान्ताः । तस्य च ह्रदस्य समन्ताच्छशकबिलानि असंख्यानि सुकोमलभूमौ तिष्ठन्ति । तेऽपि समस्तैरपि तैर्गजैरितस्ततो भ्रमद्भिः परिभग्नाः । बहवः शशका भग्नपादशिरोग्रीवा विहिताः केचिन्मृताः केचिज्जीवशेषा जाताः । अथ गते तस्मिन्गजयूथे शशकाः सोद्वेगा गजपादक्षुण्णसमावासाः केचिद्भग्नपादा अन्ये जर्जरितकलेवरा रुधिरप्लुता अन्ये हतशिशवो बाष्पपिहितलोचनाः समेत्य मिथो मन्त्रं चक्रुः । अहो विनष्टा वयम् । नित्यमेवैतद्गजयूथमागमिष्यति यतो नान्यत्र जलमस्ति । तत्सर्वेषां नाशो भविष्यति । उक्तं च ।

स्पृशन्नपि गजो हन्ति जिघ्रन्नपि भुजंगमः ।
हसन्नपि नृपो हन्ति मानयन्नपि दुर्जनः ॥ ८३ ॥

तच्चिन्त्यतां कश्चिदुपायः । तत्रैकः प्रोवाच । गम्यतां देशत्यागेन ... अन्यत्र । उक्तं च मनुना व्यासेन च ।

१ A deep lake or pool. २ A tank. ३ A young elephant. ४ Peace of mind. ५ Lonely, solitary. ६ Situated in the middle of land. ७ The Ganga or river flowing under ground. ८ Going near or approaching it for five nights. ९ Having bathed into. १० A hole, a pit. ११ They, viz. the pits or holes. १२ With feet, heads and necks broken. १३ With only life remaining. १४ Whose habitations were trodden down by the feet of the elephants. गजपादैः क्षुण्णाः समावासा येषां. ब. १५ Covered with blood. १६ With the eyes filled with tears. ब. १७ An elephant kills merely by touching, a snake merely by smelling, a king merely by laughing and a wicked man even by paying respect.

[1]त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ॥ ८४ ॥

मनुः ।

[2]क्षेम्यां सस्यप्रदां नित्यं पशुवृद्धिकरीमपि ।
परित्यजेन्नृपो भूमिमात्मार्थमविचारयन् ॥ ८५ ॥
[3]आपदर्थे धनं रक्षेद्दारान्रक्षेद्धनैरपि ।
आत्मानं सततं रक्षेद्दारैरपि धनैरपि ॥ ८६ ॥

ततश्चान्ये प्रोचुः । भोः पितृपैतामहं[4] स्थानं न शक्यते सहसा त्यक्तुम् । तत्क्रियतां तेषां कृते काचिद्विभीषिका[5] यत्कथमपि दैवात् समायान्ति । उक्तं च ।

[6]निर्विषेणापि सर्पेण कर्तव्या महती फटा ।
विषं भवतु मा वास्तु फटाटोपो भयंकरः ॥ ८७ ॥

अथान्ये प्रोचुः । यद्येवं ततस्तेषां महद्विभीषिकास्थानमस्ति येन नागमिष्यन्ति । सा च चतुरदूतायत्ता[7] विभीषिका । यतो विजयदत्तो नाम राजास्मत्स्वामी शशकश्चन्द्रमण्डले निवसति तत्प्रेष्यतां कश्चि-न्मिथ्यादूतो[8] यूथाधिपसकाशं[9] यच्चन्द्रस्त्वामत्र ह्रद आगच्छन्तं[10]

१ One should abandon a single individual for the sake of the family, a family for a village, a village for a country and the earth for one's own sake. २ A king should abandon for his own sake without any hesitation or thought, the land (country) though prosperous, (क्षेम्य) always yielding corn, and tending to the increase of cattle. अविचारयन् does not mean thoughtlessly. ३ One should save wealth against the time of difficulty, protect the wife even at the expense of wealth, and oneself always by sacrificing both wife and wealth. Here the instrumental is used idiomatically in this sense. ४ Handed down from ancestors or forefathers. ५ A means of terrifying, a scare-crow. ६ Even that snake who has no poison should expand his hood fully; there may or may not be poison, but the very spreading of the hood is terrible to look at. ७ Dependent on a clever messenger: ष. त. ८ A false or pretended messenger. ९ To the lord of elephants. १० With the message that &c.

निषेधयति[1] यतोस्मत्परिग्रहोस्य समन्ताद्वसति । एवमभिहिते श्रद्धेयवच[2]नात्कदापि निवर्तते । अथान्ये प्रोचुः । यद्येवं तदस्ति लम्बकर्णो नाम शशकः । स च वचनरचनाचतुरो[3] दूतकर्मज्ञः[4] । स तत्र प्रेष्यतामिति । उक्तं च ।

[5]साकारो निःस्पृहो वाग्मी नानाशास्त्रविचक्षणः ।
परचित्तावगन्ता च राज्ञो दूतः स इष्यते ॥ ८८ ॥

अन्यच्च ।

[6]यो मूर्खं लौल्यसंपन्नं राजद्वारिकमाचरेत् ।
मिथ्यावादं विशेषेण तस्य कार्यं न सिध्यति ॥ ८९ ॥

[7]तदन्विष्यतां यद्यस्माद्व्यसनादात्मनां सुनिर्मुक्तिः । अथान्ये प्रोचुः । अहो युक्तमेतत् । नान्यः कश्चिदुपायोस्माकं जीवितस्य । तथैव क्रियताम् । अथ लम्बकर्णो गजयूथाधिपसमीपे निरूपितो[8] गतश्च । तथानुष्ठिते लम्बकर्णोपि गजमार्गमासाद्यागम्यं[9] स्थलमारुह्य तं गजमुवाच । भो भो दुष्टगज किमेवं लीलया[10] निःशङ्कतयात्र चन्द्रह्रदे[11] आगच्छसि । तन्नागन्तव्यं निवर्त्यतामिति । तदाकर्ण्य विस्मितमना गज आह । भोः कस्त्वम् । स आह । अहं विजयदत्तो नाम शशकश्चन्द्रमण्डले वसामि । सांप्रतं भगवता चन्द्रमसा तव पार्श्वे प्रहितस्तस्य वचनस्य श्रद्धेयत्वात्[12] । तच्छ्रुत्वा स आह । भोः शशक तत्कथय भगवतश्चन्द्रमसः संदेशं येन सत्वरं[13] क्रियते । स आह । भव-

१ Forbids, prevents. २ Thinking those words to be reliable. ३ Very clever ir putting words together, very skilful in composition. ४ Conversant with the duties of a messenger. ५ That messenger, who is well-formed, free from any desire, eloquent, and well-versed in various sciences, and who can know the minds of others, is a desirable one to a king. साकार. ब. ६ The business of him, who appoints a foolish, and greedy royal-porter, and especially one who tells lies, to do any work, will not succeed. Here आचरेत् is used in a very peculiar sense, viz. do, that is, depute. ७ So let that remedy be sought after, whereby we shall be free from this calamity. ८ Was deputed or appointed. ९ Inaccessible (to the elephant). १० With ease or sport. ११ The moon-lake. १२ Capacity to inspire confidence. १३ So that it may be done quickly.

[1]तातीतेदिवसे यूथेन सहागच्छता प्रभूताः शशका निपातिताः । तत्किं न वेत्ति भवान्यन्मम परिग्रहोयम् । तद्यदि जीवितेन ते प्रयोज[illegible] [2]केनापि प्रयोजनेनाप्यत्र ह्रदे नागन्तव्यमिति संदेशः । गज आह । अथ क्व वर्तते भगवान्स्वामी चन्द्रः । स आह । अत्र ह्रदे सांप्रतं शशकानां [3]भवद्यूथमथितानां हतशेषाणां समाश्वासनाय समायातस्तिष्ठति । अहं पुनस्तवान्तिकं प्रेषितः । गज आह । यद्येवं तद्दर्शय मे तं स्वामिनं येन प्रणम्यान्यत्र गच्छामः । शशक आह । भो आगच्छ मया सहैकाकी येन दर्शयामि । तथानुष्ठिते शशको निशासमये तं गजं ह्रदतीरे नीत्वा जलमध्ये स्थितं चन्द्रबिम्बमदर्शयत् । आह च । भो एष नः स्वामी जलमध्ये [4]समाधिस्थस्तिष्ठति तन्निभृतं प्रणम्य सत्वरं व्रजेति । नो चेत्समाधिभङ्गाद्भूयोपि प्रभूतं कोपं करिष्यति । अथ गजोपि त्रस्तमनास्तं प्रणम्य पुनर्गमनाय प्रस्थितः । शशकाश्च [5]तद्दिनादारभ्य सपरिवाराः सुखेन स्वेषु स्थानेषु तिष्ठन्ति स्म । अतोहं ब्रवीमि ।

व्यपदेशेन महतां सिद्धिः संजायते परा ।
शशिनो व्यपदेशेन वसन्ति शशकाः सुखम् ॥ १० ॥

तथा च ।

[6]क्षुद्रमर्थपतिं प्राप्य न्यायान्वेषणतत्परौ ।
उभावपि क्षयं प्राप्तौ पुरा शशकपिञ्जलौ ॥ ११ ॥

ते प्रोचुः । कथमेतत् । स आह ।

॥ कथा २ ॥

अस्ति कस्मिंश्चिद्वृक्षे पुराहं वसामि । तत्राधस्तात्कोटरे कपिञ्जलो नाम [7]चटकः प्रतिवसति स्म । अथ सदैवास्तमनवेलायामागतयोरनेकसुभाषितगोष्ठ्या [8]देवर्षिब्रह्मर्षिराजर्षि[9]पुराणचरितकीर्तनेन

---

१ Yesterday. २ On any business or account. ३ Destroyed by your herd. ४ Engaged in meditation. ५ From that day forward, thenceforward. ६ Formerly a hare and a sparrow, *Kapinjala*, going to a mean king wishing to seek redress, were both destroyed. ७ A sparrow. ८ The celestial, Brahmanical and royal sages. ९ Old, ancient.

च पर्यटनदृष्टानेककौतूहलप्रकथनेन च परमसुखमनुभवतोः कालो व्रजति । अथ कदाचित्कपिञ्जलः प्राणयात्रार्थमन्यैश्चटकैः सहान्यं पक्वशालिप्रायं देशं गतः । ततो यावन्निशासमयेपि नायातस्तावदहं सोद्वेगमनास्तद्वियोगदुःखितश्चिन्तितवान् । अहो किमद्य कपिञ्जलो नायातः । किं केनापि पाशेन बद्ध उताहोस्वित्केनापि व्यापादितः । सर्वथा यदि कुशली भवति तन्मां विना न तिष्ठति । एवं मे चिन्तयतो बहून्यहानि व्यतिक्रान्तानि । ततश्च तत्र कोटरे कदाचिच्छीघ्रगो नाम शशकोस्तमनवेलायामागत्य प्रविष्टः । मयापि कपिंजलनिराशत्वेन न निवारितः । अथान्यस्मिन्नहनि कपिंजलः शालिभक्षणादतीव पीवरतनुः स्वमाश्रयं स्मृत्वा भूयोप्यत्रैव समायातः । अथवा साध्विदमुच्यते ।

न तादृग्जायते सौख्यमपि स्वर्गे शरीरिणाम् ।
दरिद्रेपि हि यादृक्स्यात्स्वदेशे स्वपुरे गृहे ॥ ९२ ॥

अथासौ कोटरान्तर्गतं शशकं दृष्ट्वा साक्षेपमाह । भो मदीयमेतद्गृहम् । तच्छीघ्रं निष्क्रम्यताम् । शशक आह । न तवेदं गृहं किंतु ममैव । तत्किं मिथ्या परुषाणि जल्पसि । उक्तं च ।

वापीकूपतडागानां देवालयकुजन्मनाम् ।
उत्सर्गात्परतः स्वाम्यमपि कर्तुं न शक्यते ॥ ९३ ॥

तथा च ।

१ By the mention of various curiosities seen in rambling (by us). २ Full of ripe rice-crop. ३ Grieved at his separation. ४ Or. ५ If he is safe or all right. ६ Going quickly, of quick motion. ७ By reason of the despair of meeting *Kapinjala* again. ८ That happiness, which people, enjoy in their own country, town and house though poor, is never obtained even in heaven. ९ Revilingly. १० Speak harsh words. ११ It is not possible to assert one's mastery over a well, a pond, a lake, temple and a tree after they have been once left off or abandoned.

[१]प्रत्यक्षं यस्य यद्भुक्तं गृहाद्यं दश वत्सरान् ।
तत्र भुक्तिः प्रमाणं स्यान्न साक्षी नाक्षराणि च ॥ ९४ ॥
[२]मानुषाणामयं न्यायो मुनिभिः परिकीर्तितः ।
तिरश्चां च विहंगानां यावच्छिशुसमाश्रयः ॥ ९५ ॥

तन्ममैतद्गृहं न तवेति । कपिंजल आह । भो यदि [३]स्मृतं प्रमाणीकरोषि तदागच्छ मया सह येन [४]स्मृतिपाठकं पृष्ट्वा स यस्य ददाति स गृह्णातु । तथानुष्ठिते मयापि चिन्तितम् । किमत्र भविष्यति । मया द्रष्टव्योयं न्यायः । ततः कौतुकादहमपि [५]तावनु प्रस्थितः । अत्रान्तरे [६]तीक्ष्णदंष्ट्रो नामारण्यमार्जारस्तयोर्[७]विवादं श्रुत्वा [८]मार्गासन्नं नदीतटमासाद्य [९]कृतकुशोपग्रहो निमीलितैकनयन उर्ध्वबाहुर्[१०]अर्धपादस्पृष्टभूमिः श्रीसूर्याभिमुख[११] इमां [१२]धर्मदेशनामकरोत् । अहो असारोयं संसारः [१३]क्षणभंगुराः प्राणाः । स्वप्नसदृशः प्रियसमागमः [१४]इन्द्रजालवत्कुटुम्बपरिग्रहोयम् । तद्धर्मं [१५]मुक्त्वा नान्या गतिरस्ति । उक्तं च ।

[१६]यस्य धर्मविहीनानि दिनान्यायान्ति यान्ति च ।
स लोहकारभस्त्रेव श्वसन्नपि न जीवति ॥ ९६ ॥

१ Mere possession is a proof of ownership in that case where houses and other things are occupied (enjoyed) for ten years in the presence of the owner, and neither witnesses nor documents (letters or writing). २ This is the decision laid down by sages in the case of men; while in that of the lower animals and birds possession lasts only so long as their young ones live therein (that is, in the nest). ३ Smriti-law. ४ One versed in law, or one who has studied the Smritis. ५ After them (two). ६ Of sharp or pointed jaws ७ Dispute. ८ Lying adjacent to the road. ९ Who had taken *Kusa* grass in hand. कृतः कुशोपग्रहः येन. ब. १० Who touched the ground with half his foot. ब. ११ With his face towards the god, sun. १२ Religious instruction. १३ Perishing in a moment. १४ Jugglery, delusion. १५ Without. १६ The man whose days come and go away without the performance of any religious action, does not live though alive, like the bellows of a black-smith.

[1] नाच्छादयति कौपीनं न दंशमशकापहम् ।
शुनः पुच्छमिवानर्थं पाण्डित्यं धर्मवर्जितम् ॥ ९७ ॥

अन्यच्च ।

[2] पुलका इव धान्येषु पूतिका इव पक्षिषु ।
मशका इव मर्त्येषु येषां धर्मो न कारणम् ॥ ९८ ॥
[3] श्रेयः पुष्पफलं वृक्षाद्दध्नः श्रेयो घृतं स्मृतम् ।
श्रेयस्तैलं च पिण्याकाच्छ्रेयान्धर्मस्तु मानुषात् ॥ ९९ ॥
[4] सृष्टा मूत्रपुरीषार्थमाहाराय च केवलम् ।
धर्महीनाः परार्थाय पुरुषाः पशवो यथा ॥ १०० ॥
[5] स्थैर्यं सर्वेषु कृत्येषु शंसन्ति नयपण्डिताः ।
बह्वन्तराययुक्तस्य धर्मस्य त्वरिता गतिः ॥ १०१ ॥
[6] संक्षेपात्कथ्यते धर्मो जनाः किं विस्तरेण वः ।
परोपकारः पुण्याय पापाय परपीडनम् ॥ १०२ ॥

---

१ Learning without religion is as useless as the tail of a dog which neither covers the secret part nor wards off gnats or mosquitos, because it (पांडित्य) cannot remove or cover sin (कौपीन). २ Those whose origin does not lie in religion, are like पुलकs in corn, पूतिका (a bird) among birds and gnats among mortals. ३ Flowers and fruits are better than or preferable to a tree, clarified butter is said to be preferable to curds, oil to oil-cake and religion to a human being. पुष्पफलं is समाहारद्वंद्व. ४ Construe (यद्यपि नराः) परार्थाय सृष्टा (स्तथापि) यदाधर्महीनास्तदा ते पशव इव मूत्रपुरीषार्थं आहाराय च केवलम् (भवन्ति) Men, who are created for the sake of spiritual actions, but who are without religion, are like beasts only giving out urine and odure and eating food. Here पर = परम-and परार्थं, therefore, means परमार्थ the highest good to be secured by following a religious course of conduct. ५ Those who are proficient in politics always praise steadiness or patience in all actions ; but the course of religion, which is beset with many obstacles, is very speedy. ६ Briefly do we describe to you, oh people, your religion, what is the use of prolixity ? Obligations conferred on others lead to merit, while the persecution of others leads to sin.

¹श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम् ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥ १०३ ॥

अथ तस्य तां धर्मदेशनां श्रुत्वा शशक आह । भोः कपिंजल एष नदीतीरे तपस्वी²धर्मवादी तिष्ठति । तदेनं पृच्छावः । कपिंजल आह । ननु स्वभावतो³यमस्माकं शत्रुभूतः । तद्दूरे स्थित्वा पृच्छावः । कदाचिदस्य व्रतवैकल्यं⁴ संपत्स्यते । ततो दूरस्थौ⁵तावूचतुः । भोस्त-पस्विन्धर्मदेशक आवयोर्विवादो वर्तते । तद्धर्मशास्त्रद्वारेणास्माकं नि-र्णयं देहि । यो हीनवादी⁶ स ते भक्ष्य इति । स आह । भद्रौ मां मैवं वदतः । निवृत्तोहं नरकमार्गाद्धिंसाकर्मणः⁷ अहिंसैव धर्ममार्गः उक्तं च ।

⁸अहिंसापूर्वको धर्मो यस्मात्सद्भिरुदाहृतः ।
यूकमत्कुणदंशादींस्तस्मात्तानपि रक्षयेत् ॥ १०४ ॥

⁹हिंसकान्येव भूतानि यो हिनस्ति स निर्घृणः
स याति नरकं घोरं किं पुनर्यः शुभानि च ॥ १०५॥

एते ये याज्ञिका अपि यज्ञकर्मणि पशून्घ्नन्ति ते मूर्खाः । परमार्थं¹⁰

१ Let the essence of religion be heard, and being heard be carefully attended to ; one may do what is unfavourable to himself and not that which is so (unfavourable) to others. आत्मनः प्रतिकूलानि समाचरेत परेषां न समाचरेत्. २ An ascetic who preaches religion. ३ By nature. ४ Deficiency. ५ According to the precepts laid down in law. ६ Making a defective statement ७ The action of killing which is a way to hell. Here नरकमार्ग is an adjective of हिंसाकर्मण:. ८ As the absence of killing is said by the god to be the foremost thing in religion, one should abstain from killing even such creatures as, louse, bug, gnat and others. ९ He, who kills even those creatures which are carnivorous, is said to be cruel and goes to the horrible hell, much more, therefore, does he who kills those which are innocent (शुभानि). किं पुनः means how much more, or how much less ? १० The real essence or truth.

श्रुतेर्न जानन्ति । तत्र किलैतदुक्तं यदजैर्यष्टव्यम् । अजा व्रीहयस्त्रैवार्षिकाः कथ्यन्ते न पुनः पशुविशेषाः । उक्तं च ।

३ वृक्षांश्छित्त्वा पशून्हत्वा कृत्वा रुधिरकर्दमम् ।
यद्येवं गम्यते स्वर्गे नरकं केन गम्यते ॥ १०६ ॥

तन्नाहं भक्षयिष्यामि जयपराजयनिर्णयं करिष्यामि । परं वृद्धोऽहं दूरान्न यथावच्छृणोमि । एवं ज्ञात्वा समीपवर्तिनौ भूत्वा विवादं वदतं येन मे विज्ञातपरमार्थं विवादं वदतः परत्रं न विरुध्यते । उक्तं च ।

मानाद्वा यदि वा लोभात्क्रोधाद्वा यदि वा भयात् ।
यो न्यायमन्यथा ब्रूते स याति नरकं नरः ॥ १०७ ॥

तथा च ।

९ एकमश्वानृते हन्ति दश हन्ति गवानृते ।
शतं कन्यानृते हन्ति सहस्रं पुरुषानृते ॥ १०८ ॥

१० उपविष्टः सभामध्ये यो न वक्ति स्फुटं वचः ।
तस्माद्दूरेण स त्याज्यो न्यायो वा कीर्तयेदृतम् ॥ १०९ ॥

१ By Aja (she-goats) is to be understood व्रीहि a kind of rice. २ And not the animals अज. ३ If by cutting down trees, killing animals and shedding blood (lit. making a mud of blood) one can go to heaven, what is there by doing which one can go to hell? that is, these are enough to take one to hell. ४ Correctly, rightly. ५ The cause or point in dispute. ६ While I am deciding your case, the truth of which is known. ७ Heaven, heavenly bliss: परत्रभवं सुखं = परत्रम्. ८ That man, who either through pride, avarice, anger or fear, decides a case wrongly or unjustly, goes to hell. ९ He, who makes a false statement with respect to a horse, is said to kill one creature, he who does so with respect to cows, kills ten, he who does so with respect to a daughter, kills a hundred and he who does so with respect to man, kills a thousand. १० He, who seated on the judgment seat, does not speak out his decision nor gives a true judgment, should be abandoned from a distance. ऋतं truth. Understand न before कीर्तयेत्.

तस्माद्विश्रब्धैर्भूत्वा कर्णोपान्ते निवेद्यताम् । किं बहुना । तेन क्षुद्रेण तूर्णं विश्वासितावुभौ यथा बुद्धिविहीनौ तौ संजातावङ्कवर्तिनौ । ततश्च तेनापि समकालमेकः पादान्तेनाक्रान्तोऽन्यो दंष्ट्राक्रकचेन । ततो गतप्राणौ तौ भक्षिताविति । अतोहं ब्रवीमि ।

क्षुद्रमर्थपतिं प्राप्य न्यायान्वेषणतत्परौ ।
उभावपि क्षयं प्राप्तौ पुरा शशकपिञ्जलौ ॥ ११० ॥

तद्भवन्तोप्येवं दिवान्धमर्थपतिमासाद्य रात्र्यन्धाः शशकपिञ्जलमार्गेण यास्यन्ति । एवं ज्ञात्वा यदुचितं तद्विधेयम् । अथ तस्य तद्वचनं श्रुत्वा साध्वनेनाभिहितमित्युक्त्वा भूयोपि पार्थिवार्थं समेत्य मन्त्रयिष्याम इति ब्रुवाणाः सर्वे यथाभिमतं जग्मुः । केवलमवशिष्टं भद्रासनोपविष्टोभिषेकार्थं दिवान्धः कृकालिकया सहास्ते । अथ तेनाभिहितम् । कः कोत्र । भोः किमद्यापि न क्रियते मेभिषेकः । अथ कृकालिकयाभिहितम् । भद्र कृतोयं विघ्नस्ते काकेन । गतास्ते विहगा यथेप्सितासु दिक्षु । केवलमेक एवायं वायसः केनापि हेतुना तिष्ठति । तदुत्तिष्ठ येन त्वां स्वाश्रयं प्रापयिष्यामि । तच्छ्रुत्वा स सविषादं वायसमाह । भो दुष्टात्मन किं मया तेपकृतं यद्राज्याभिषेको मे विघ्नितः । तदद्यप्रभृति सान्वयमावयोर्वैरम् । उक्तं च ।

रोहते सायकैर्विद्धं वनं परशुना हतम् ।
वाचा दुरुक्तं बीभत्सं न संरोहति वाक्क्षतम् ॥ १११ ॥

१ For विश्रब्धाभ्यां. २ Near the ear, that is, by coming close to me. ३ Quickly. ४ So that they became destitute of talent and went quite close to him. ५ At once. ६ Was seized under the paw. ७ With the saw-like jaws. ८ Being blind or unable to see during night. ९ Will go by the way gone by *Sasaka* and Pinjala; that is, meet with the same fate. १० This goes with मंत्रयिष्यामः. ११ As each pleased or liked. १२ Seated on a splendid seat. १३ Who is there? १४ For some purpose or motive. १५ Together with the retinue. १६ A forest pierced by arrows and cut down by an axe grows (again); but the wound caused by words which are abusive and obscene is never healed. रोहते = रोहति. वाक्क्षत = वाचा क्षतं. त. त.

इत्येवमभिधाय कृकालिकया सह स्वाश्रयं गतः । अथ भयव्याकुलो वायसो व्यचिन्तयत् । अहो अकारणवैरमासाद्[1]यता मया किं व्याहृतम् । उक्तं च ।

[2]अदेशकालज्ञमनायतिक्षमं
यदप्रियं लाघवकारि चात्मनः ।
योऽत्राब्रवीत्कारणवर्जितं वचो
न तद्वचः स्याद्विषमेव तद्भवेत् ॥ ११२ ॥

[3]बलोपपन्नोऽपि हि बुद्धिमान्नरः
परं नयेन्न स्वयमेव वैरिताम् ।
भिषङ्ममास्तीति विचिन्त्य भक्षयेत्
अकारणात्को हि विचक्षणो विषम् ॥ ११३ ॥

एवमुक्त्वा काकोऽपि स्वभवनं प्रति प्रायात् । तद्वत्स एवमस्माभिः सह वैरं कौशिकानामन्व[4]यागतम् । मेघवर्ण आह । तात तदेवं [5]गतेऽस्माभिः किं क्रियते । स आह । वत्स एवं गतेऽपि षाड्गुण्याद[6]परः स्थूलो[7]ऽभिप्रायोऽस्ति । तमङ्गीकृत्य स्वयमेवाहं तद्विजया[8]य यास्यामि रिपून्वञ्चयित्वा वधिष्यामि । उक्तं च ।

१ Bringing upon, incurring. Instru. of आसादयत् Pre. P. of सद् with आ caus. २ The words uttered by one, in which there is no consideration of place and time, which are not good for the future, which are unpleasant, which bring meanness on one, and in which no object is secured, are not so (words) but are poison itself. अदेशकालज्ञं = न देशकालज्ञं. न. त. देशकालौ जानातीति. उप. अनायतिक्षमं = आयतेरक्षमं. पं. त. कारणवर्जितं. तृ. त. ३ A talented man, though possessed of strength, should not make an enemy of another of his own accord ; for, what wise man will eat poison without any reason, thinking that he has got an antidote against it (poison)? ४ Hereditary. ५ Such being the case. ६ Other than the usual six. ७ According to the rule of thumb. ८ For his conquest or for conquering him.

बहुबुद्धिसमुपेताः सुविज्ञाना बलोत्कटान् ।
शक्ता वञ्चयितुं धूर्ता ब्राह्मणं छागलादिव ॥ ११४ ॥

मेघवर्ण आह । कथमेतत् । सोऽब्रवीत् ।

॥ कथा ३ ॥

अस्ति कस्मिंश्चिदधिष्ठाने मित्रशर्मा नाम ब्राह्मणः कृताग्निहोत्रपरिग्रहः प्रतिवसति स्म । स कदाचिन्माघमासे सौम्यानिले प्रवाति मेघाच्छादिते गगने मन्दंमन्दं वर्षति पर्जन्ये पशुप्रार्थनार्थं कंचिद्ग्रामान्तरं गतः कंश्चियजमानो याचितः । भो यजमान आगामिन्याममावास्यायां यक्ष्यामि यज्ञम् । तदर्जनार्थे पशुमेकं समर्पय । अथ तेनातीव पीवरतनुः पशुः प्रदत्तः । सोपि समर्थस्तं पशुमितश्चेतश्च गच्छन्तं विज्ञाय स्कन्धे कृत्वा सत्वरं पुराभिमुखं प्रतस्थे । अथ तस्य गच्छतो मार्गे त्रयो धूर्ताः क्षुत्क्षामकण्ठाः संमुखा बभूवुः । तैस्तादृशं पीवरतनुं पशुं स्कन्धे कृतमालोक्य मिथोभिहितम् । भो अस्य पशोर्भक्षणादद्यतनीयो हिमपातो व्यर्थतां नीयते । तदेनं वञ्चयित्वास्य सकाशाद्गृह्यते । अथ तेषामेकतमो वेषपरिवर्तनं विधाय संमुखो भू-

१ Those, who are possessed of great talent, and are very wise, are able to deceive even the powerful, as did the rogues in the following story deprive a Brahman of his goat. २ Who had taken upon himself the vow of keeping up the sacred fire. ३ While a gentle breeze was blowing. ४ The owner of a certain house. ५ Coming or ensuing. ६ For sacrificing. ७ Fat-bodied. पीवरा तनुर्यस्य. ब. ८ Here there is evidently a mistake. समर्थ· ought to be समर्थं which is the reading of another edition. ९ Going here and there, that is, active. १० This is an idiomatic way of saying स्कन्धे धृत्वा or निधाय. ११ Belonging to this day, to-day's. १२ The falling down of frost will be rendered useless, that is, we shall not suffer from the effect of frost by eating this young goat. १३ One of many—because they were three. १४ Having changed his dress, that is, having assumed a disguise.

त्वापरमार्गेण तमाहिताग्निमूचे । भो भो[1] बालाग्निहोत्रिन्[2] किमेवं जनवि-रुद्धं हास्यकार्यमनुष्ठीयते[3] यदेष सारमेयोपवित्रः स्कन्धाधिरूढो नीयते । उक्तं च ।

[4]श्वानकुक्कुटचाण्डालाः समस्पर्शाः प्रकीर्तिताः ।
रासभोष्ट्रौ विशेषेण तस्मात्तान्नैव संस्पृशेत् ॥ ११५ ॥

ततश्च तेन कोपाविष्टेनाभिहितम् । अहो किमन्धो भवान्यत्पशुं सारमेयत्वेन प्रतिपादयासि[5] । स आह । ब्रम्हन् न कोपः कार्यः । यथेच्छं गम्यताम् । अथ यावत्किंचिद्वनान्तरं[6] गच्छति तावद्द्वितीयो धूर्तः संमुखमभ्युपेत्य तमुवाच । भो ब्रम्हन् कष्टं कष्टम् । यद्यपि वल्लभोयं मृतवत्सस्[7]तथापि स्कन्ध आरोपयितुमशक्यः । उक्तं च ।

[8]तिर्यञ्चं मानुषं वापि यो मृतं संस्पृशेत्कुधीः ।
पञ्चगव्येन शुद्धिः स्यात्तस्य चान्द्रायणेन वा ॥ ११६ ॥

अथासौ सकोपमाह । भोः किमन्धो भवान्यत्पशुं मृतवत्सं वदसि । सोब्रवीत् । भगवन् मा कोपं कुरु । अज्ञानान्मयाभिहितम् ।

१ The Brahma*n*a who kept the sacred fire. २ A foolish Agnihotrin. बालश्चासौ अग्निहोत्री. क. ३ A ridiculous action. ४ A dog, a cock and a Châ*nd*âla are declared to be of equal touch (that is, their touch is equally contaminating), and especially an ass and a camel ; therefore, one should never touch them. समस्पर्शाः–ब. समाः स्पर्शाः येषां. ५ Assert that a goat is a dog. ६ As he proceeded a little, forward in the woods ७ A dead calf. ८ That foolish person who touches either a lower animal or a human being that is dead, will be purified either by Panchagavya or by the vow called Chândrâya*n*a. *Chândrâyana* is a religious observance regulated according to the waxing and waning of the moon. In it the daily consumption of food is reduced from fifteen mouthfuls to nothing during the dark fortnight, and then increased in the same manner during the bright fortnight. पंचगव्य–Five products of the cow, taken collectively. They are :—मूत्र; गोमय; क्षार, दधि and आज्य.

वत्त्वमात्मन उचितेन समाचरेति[1]। अथ यावत्स्तोकं वनान्तरं गच्छति तावत्तृतीयो धूर्तः संमुखमुपेत्य तमुवाच । भो अयुक्तमेतद्यद्रासभं स्कन्धारूढं नयसि तत्त्यज्यतामेषः । उक्तं च ।

[2]यः स्पृशेद्रासभं मर्त्यो ज्ञानादज्ञानतोथवा ।
सचैलं स्नानमुद्दिष्टं तस्य पापप्रशान्तये ॥ ११७ ॥

तत्त्यजैनं यावत्कोपि न पश्यति । अथासौ तं पशुं राक्षसं मन्यमानो भयाद्भूमौ प्रक्षिप्य स्वगृहमुद्दिश्य[3] पलायितुं प्रारब्धः । ततस्तेपि त्रयो मिलित्वा पशुमादाय यथेच्छं भक्षितुमारब्धाः । अतोहं ब्रवीमि ।

बहुबुद्धिसमुपेताः सुविज्ञाना बलोत्कटान् ।
शक्ता वञ्चयितुं धूर्ता ब्राह्मणं छागलादिव ॥ ११८ ॥

अथवा साध्विदमुच्यते ।

[4]अभिनवसेवकविनयैः प्राघूर्णोक्तैर्विलासिनीरुदितैः ।
धूर्तजनवचननिकरैरिह कश्चिदवञ्चितो नास्ति ॥ ११९ ॥

तदत्रास्ति किंचिद्वक्तव्यमेव । तदवधार्य[5] यथोक्तमनुष्ठीयताम् । स आह । तर्हि समादिश । तवादेशो नान्यथा कार्यः[6] । स्थिरजीव्याह । वत्स आकर्णय तर्हि सामादीनतिक्रम्य यो मया पञ्चम उपायो निरूपितः । तन्मां विपक्षभूतं[7] कृत्वातिनिष्ठुरवचनैर्भर्त्सर्य[8] । यथा विप-

१ Act as you think proper. २ That man who touches an ass either knowingly or unknowingly, has a सचैल (with the garment on) bathing prescribed to him for the removal of the sin. ३ स्वगृहमुद्दिश्य = स्वगृहाभिमुखम्. ४ There is no body in this world that is not deceived by the modesty of new servants, by the words of guests, by the cries of amorous harlots and the expressions made use of by roguish persons. ५ Having attentively considered it. ६ Will not be disobeyed. ७ Considering me to have become your enemy. ८ Scold, upbraid.

क्षप्रणिधीनां प्रत्ययो भवति तथा समाहृतरुधिरैरालिप्य मां न्यग्रोध-स्याधः प्रक्षिप्य गम्यतां पर्वतमृष्यमूकं प्रति । तत्र सपरिवारस्तिष्ठ यावदहं सपत्नान्सुप्रणीतेन विधिना विश्वासाभिमुखान्कृत्वा कृतार्थो ज्ञातदुर्गमध्यो दिवसे तानन्धतां प्राप्तांस्त्वां नीत्वा व्यापादयिष्यामि । ज्ञातं मया सम्यक् । नान्यथा सिद्धिरस्ति । मत्वेक्षस्व । यतो दुर्गमेतदपसाररहितं केवलं वधाय भवति । उक्तं च ।

अपसारसमायुक्तं नयज्ञैर्दुर्गमुच्यते ।
अपसारपरित्यक्तं दुर्गव्याजेन बन्धनम् ॥ १२० ॥

न च त्वयास्मदर्थे कृपा कार्या । उक्तं च ।

अपि प्राणसमानिष्टान्पालितांल्लालितानपि ।
भृत्यान्युद्धे समुत्पन्ने पश्येन्म्लानामिव स्रजम् ॥ १२१ ॥

तथा च ।

प्राणवद्रक्षयेद्भृत्यान्स्वकार्यमिव पोषयेत् ।
सदैकदिवसस्यार्थे यत्र स्याच्छत्रुसंगमः ॥ १२२ ॥

तत्त्वया नात्र विघ्नं निषेधनीयोऽहम् । इत्युक्त्वा तेन सह शुष्क-

१ The emissaries of the enemy may be convinced that &c. २ With the blood brought together or collected. ३ Having made them confident about my being a deserter from your camp by a well-planned action. ४ Having known the interior of the fort. ५ Escape or way to escape. ६ Those who are conversant with politics say that that is a fort which has a way to escape; while that which has no means of escape is a prison in the shape of a fort. ७ Nor should you show any pity for me. ८ When a war arises one should look upon one's servants, though dear as life itself, protected and fondled, as upon a faded garland of flowers. ९ One should always protect one's servants as life itself and entertain them as one's own business, against that day on which there is an encounter with the enemy. For स्वकार्यमिव another edition reads स्वकार्यमपि which means one should also promote one's business. १० Vain or useless, and hence pretended (quarrel).

कलहं कर्तुमारब्धः । अथान्ये ते तस्य भृत्याः स्थिरजीविनमुच्छृङ्खल-वाचा जल्पन्तमवलोक्य तस्य वधायोद्यता मेघवर्णेनाभिहिताः । अहो निवर्तध्वं यूयम् । अहमेवास्य शत्रुपक्षपातिनो दुरात्मनः स्वनिग्रहं करिष्यामि । इत्यभिधाय तस्योपरि समारुह्य लघुचञ्चुप्रहारैस्तं निहत्य रुधिरेण प्लावयित्वा यथाभिप्रेतं सपरिजनो गतः । अत्रान्तरे कृकालिकया द्विषत्प्रणिधिभूतया सर्वं तदमात्यव्यसनं मेघवर्णस्य गमनं चोलूकराजाय निवेदितम् । यत्तवारिः संप्रति क्वापि भीतो भीतपरिवारैश्च प्रचलितः । उलूकोपि तदाकर्ण्यास्तमनवेलायां सामात्यपरिजनो वायसवधार्थं प्रचलितः । प्राह च । यदहो त्वर्यतां त्वर्यताम् । भीतः शत्रुः पलायनपरः पुण्यैर्लभ्यते । उक्तं च ।

शत्रोः प्रचलने छिद्रमेकमन्यत्र संश्रये ।
कुर्वाणो जायते वश्यो व्यग्रत्वे राजसेविनाम् ॥ १२३ ॥
न च च्छिद्रं विना शत्रुर्देवानामपि सिध्यति ।
छिद्रं शक्रेण संप्राप्य दितेर्गर्भो विदारितः ॥ १२४ ॥

एवं ब्रुवाणाः समन्तात्तं न्यग्रोधपादपमधः परिवेष्ट्यावस्थिताः यावन्न कश्चिद्वायसो दृश्यते तावच्छाखाग्रसमारूढो हृष्टमनाः स्तूयमानो वन्दिभिरुलूकराज एतदुवाच । अहो ज्ञायतां तेषां मार्गः । यत्कतमेन मार्गेण ते प्रनष्टाः काकाः । तत्र यावद्दुर्गं समाश्रयन्ति तावत्पृष्ठतो गत्वा व्यापाद्या भवन्ति । उक्तं च ।

१ With unrestrained words. २ Chastisement, punishment. ३ As he wished or intended. ४ Who was or acted as the spy of the enemies (the owls). ५ Whose retinue is frightened &c. ६ With his ministers and attendants. ७ It requires merit (performed in a former existence) to find an enemy timid and intent on flight. ८ One opportunity for attack is the removal of the enemy from one place and taking shelter in another; and he who moves from his place when the servants of the king are bewildered, is subdued. ९ An enemy cannot be conquered without the discovery of his weak point (छिद्र) even by Gods; S'akra tore open the fœtus of Diti after having found a hole (weak point). १० Having surrounded it from below. ११ The royal bards. १२ So long as they do not take shelter in the fort.

[1]वृत्तिमप्याश्रितः शत्रुरवध्यः स्याज्जिगीषुणा ।
किं पुनः संश्रितो दुर्गं सामग्र्या परया युतम् ॥ १२५ ॥

अथास्मिन्प्रस्तावे[2] स्थिरजीवी मन्दंमन्दं शब्दमकरोत् । तच्छ्रुत्वा सर्वेऽप्युलूकास्तस्य वधार्थं प्रजग्मुः । अथ तेनोक्तम् । अहो अहं स्थिरजीविनामा मेघवर्णस्य मन्त्री मेघवर्णेनेदृशीमवस्थां नीतः । तन्निवेदयध्वमात्मनः स्वामिने । तेन सह बहु वक्तव्यमस्ति । अथ तैर्निवेदिते स उलूकराजो विस्मयसमाविष्टस्[3]तत्सकाशं गत्वा प्रोवाच । भोः । केमेतां दशां गतस्त्वम् । तत्कथ्यताम् । स्थिरजीव्याह देव श्रूयताम् । अतीतदिने[4] स दुरात्मा मेघवर्णो युष्मद्व्यापादितप्रभूतवायसानां दृष्ट्वा युष्माकमुपरि कोपशोकग्रस्तो युद्धार्थं[5] प्रचलित आसीत् । ततो मयाभिहितम् । स्वामिन् न युक्तं भवतस्तदुपरि गन्तुम् । उक्तं च ।

[6]बलीयसा हीनबलो विरोधं
न भूतिकामो मनसापि वाञ्छेत् ।
न वध्यते वेतसवृत्तिरत्र
व्यक्तं प्रणाशो हि पतंगवृत्तेः ॥ १२६ ॥

तत्तस्योपप्रदानेन[7] संधिर्विधातुं युक्तः । उक्तं च ।

[8]बलवन्तं रिपुं दृष्ट्वा सर्वस्वमपि बुद्धिमान् ।
दत्त्वा प्ररक्षयेत्प्राणान्रक्षितैस्तैर्धनं पुनः ॥ १२७ ॥

---

१ An enemy who has taken shelter even beyond a once cannot be killed by one desirous of conquering ; much less, therefore, can he be killed who has taken shelter in a fort furnished with good provisions (of food). २ Opportunity. ३. Full of wonder or amazement. ४ Last day, yesterday. ५ Construe this with युद्धार्थं &c. ६ One who is deficient in strength should never, if he wishes his welfare, wish even in his mind to be on hostile terms with the powerful. He who assumes the humility of a reed, is never killed, while the destruction of him who acts like the moth, is quite evident. वेतसवृत्तिः—ब. वेतसस्येव वृत्तिर्यस्य. पतंगवृत्ति to be similarly dissolved. ७ By the offers of gifts. ८ Having seen that the enemy is powerful, a wise man should save his life by giving him everything ; that (life) being saved wealth is again obtained. तै रक्षितैः Instru. absolute.

तच्छ्रुत्वा तेन दुर्जनप्रकोपितेन त्वत्पक्षपातिनं मामशङ्कमानेनाह-मीदृशीमवस्थां नीतः । तत्तव पादाः सांप्रतं मे शरणम् । किं बहुना विज्ञप्तेन । यावदहं प्रचलितुं शक्नोमि तावत्त्वां तस्याश्रये नीत्वा सर्व-वायसक्षयं विधास्यामि । अथारिमर्दन एतदाकर्ण्य पितृपैतामहान्स-चिवानेकत्र स्थान आकार्य तैः सह मन्त्रितवान् । रक्ताक्षः क्रूराक्षो दीप्ताक्षो वक्रनास एते तस्य चत्वारः सचिवाः । तत आदौ रक्ताक्षं पृष्टवान् । भद्र तावदेष तस्य रिपोर्मन्त्री मम हस्तगतः । तत्किं क्रिय-ताम् । स आह । देव एष तस्याद्यो मन्त्री यद्यपि वेलामुहूर्तगुणेन दुर्जनोक्तेन वाक्येन वियोजितस्तदप्यस्य वाक्यं श्रोतव्यं यतो न सदैव विग्रहासक्तेन भूभुजा भाव्यम् । उक्तं च ।

कोषक्षयो न निद्रा च न विलासेषु च स्पृहा ।
विग्रहासक्तचित्तानां न रतिः क्वापि जायते ॥ १२८ ॥

तस्मादस्य द्वारेण तेन सह साम्ना वर्तितव्यम् । उक्तं च ।

सामादिदण्डपर्यन्तो नयः प्रोक्तः स्वयंभुवा ।
तेषां दण्डस्तु पापीयांस्तं पश्चाद्विनियोजयेत् ॥ १२९ ॥

तथा च ।

सामसिद्धानि कार्याणि विकृतिं यान्ति न क्वचित् ।
सज्जनानां मनांसीव भवन्ति प्रमुदे सदा ॥ १३० ॥

---

१ Suspecting me to be a partisan of yours. २ So that your majesty (your Majesty's feet) is now my recourse. ३ Handed down from forefathers, hereditary. ४ Having called. ५ First, in the first place. ६ Having the property of time and auspicious moment. ७ Estranged, alienated. ८ Always given to war. ९ When the minds of kings are intent on hostility, their treasure is wasted, they get no repose, have no desire for sports and find no pleasure any where. विग्रहा--नां--ब. विग्रहेषु आसक्तानि चित्तानि येषां. १० The self-born (Brahma) has said that policy has peace for its beginning and war for its end; but war or punishment is the worst of them, and one should make use of it after all the rest have failed. ११ Business accomplished by means of peace is never spoiled, and like the minds of the good it always produces great delight. प्रमुदे भ-वन्ति = प्रमुदं जनयंति.

[1] सामसाध्येषु कार्येषु यो दण्डं योजयेद्बुधः ।
स पित्ते शर्कराशाम्ये पटोलं कटुकं पिबेत् ॥ १३१ ॥

यत्केचिच्चैवं वदन्ति यच्छत्रवो दण्डसाध्याः स्युर्न सामसाध्यास्तदप्ययुक्तम् । उक्तं च ।

[2] पर्णशब्दमपि श्रुत्वा त्रस्यन्ति हरिणाश्च ये ।
तेपि साम्नात्र वध्यन्ते लुब्धकैः पश्य सर्वदा ॥ १३२ ॥

अन्यच्च ।

[3] शत्रोरुच्छेदनार्थाय न साम्नोस्त्यन्यदौषधम् ।
हेमन्ते हिमपातेन पद्मिनी किं न दह्यते ॥ १३३ ॥

तद्यदि मद्वचः प्रमाणं तत्संधानाय वधाय वा रिपोः साम प्रयोक्तव्यं यतो नीतावप्युक्तम् ।

[4] शनैः शनैर्ददात्येष पादौ भूतानुकम्पया ।
अहो जलचरः प्राणी बकः परमधार्मिकः ॥ १३४ ॥

एवं तस्याभिप्रायं बुद्ध्वा क्रूराक्षमाह । भद्र तवाभिप्रायमपि श्रोतुमिच्छामि । एवंविधे कृत्ये समुपस्थिते[5] किं मम कृत्यं भवति । स आह । देव तेन निसर्गवैरिणा[6] यत्सामप्रयोजनं तन्मम न भाति[7] । उक्तं च ।

---

१ That wise man, who employs punishment as the means to accomplish a thing fit to be accomplished by peace, is like a person who drinks पटोल to remove bile that can be made to subside by means of sugar. पटोल is कडू पडवळ in Marâthi. २ See! that those deer, which are frightened even at the sound of leaves of trees, are killed by hunters by means of peace. ३ For the extirpation of an enemy there is no remedy so good as peace; is not the lotus plant scorched in winter by the falling down of frost? ४ The heron wades gently through water through compassion for the creatures (lest they might be trodden under his foot) oh! the water-animal heron, is very pious or righteous. This of course is said ironically since the heron by going gently deludes the poor fishes and seizes them. ५ When such an affair has arisen. ६ Enemy by nature. ७ It does not recommend itself to me; I don't approve of it.

[1]चतुर्थोपायसाध्ये तु शत्रौ सान्त्वमपक्रिया ।
स्वेद्यमानज्वरं प्राज्ञः कोम्भसा परिषिञ्चति ॥ १३५ ॥

[2]तद्भेदसाध्यो दुष्टोपि रिपुर्भवति । उक्तं च ।

[3]अपि वीर्योत्कटः शत्रुर्यतो भेदेन सिध्यति ।
तस्माद्भेदः प्रयोक्तव्यः शत्रूणां विजिगीषुणा ॥ १३६ ॥

[4]असाध्यं शत्रुमालोक्य दायादं तस्य भेदयेत् ।
राज्यकामं समर्थं च यथा रामो विभीषणम् ॥ १३७ ॥

[5]कूटलेख्यैर्धनोत्सर्गैर्दूषयेच्छत्रुपक्षजम् ।
प्रधानपुरुषं यद्वद्विष्णुगुप्तेन राक्षसः ॥ १३८ ॥

[6]भेदयेच्च बलं राजा दुर्भेद्यमपि वित्ततः ।
यतः सुखेन भज्येत घुणोत्कीर्णसुदारुवत् ॥ १३९ ॥

एवं ज्ञात्वा विवेकिना शत्रुसाधनाय भेदः प्रयोक्तव्यः । सर्वो विजिगीषुर्गुणयुक्तोपि शत्रुर्भेदादत्र वश्यो भवति । उक्तं च ।

[7]अल्पच्छेनाविरुद्धेन सुवृत्तेनातिचारुणा ।
अन्तर्भिन्नेन संप्राप्तं मौक्तिकेनापि बन्धनम् ॥ १४० ॥

१ When an enemy is to be won by means of the fourth remedy—punishment, the employment of peace is an evil means; what wise preson will sprinkle water over a person who has got perspiration after fever ? २ To be won over by भेद already explained. ३ Since even a powerful enemy is conquered by means of भेद, it should be employed by him who is desirous of conquering his enemies ४ Having seen an enemy hard to subdue, one should seduce his (enemy's) enemy, who is desirous of getting a kingdom and who is able, just as Râma seduced Bibhîshana (from Râvana). ५ One should bring into disrepute the chief person on the side of the enemy by means of false writings and money freely distributed, just as Vishnugupta (Chânakya) did in the case of Rakshasa. शत्रुपक्षजं=शत्रुपक्षे जातं. ६ A king should seduce the army (of the enemy) though difficult to be seduced, by means of money, since it can then be easily separated from him like a good timber eaten through by worms. ७ For translation see Tantra I.

तद्यदि मम मतमनुष्ठीयते तदा स्वपक्षे भेदो रक्ष्यः परपक्षे प्रयोक्तव्यः । एवं तस्याभिप्रायं विदित्वा दीप्ताक्षमाह । भद्र अत्र विषये तव कोभिप्रायः। स आह । देव मम सामभेदौ द्वावपि न प्रतिभासेते यतो न साम्ना न च भेदेन तथा शत्रुः सिध्यति यथोपप्रदानेन लुब्ध उपप्रदानेन विश्वास्य वध्यः स्यात् । उक्तं च ।

[३]लोभाविष्टो नरो वित्तं वीक्षते न स चापदम् ।
दुग्धं पश्यति मार्जारो यतो न लकुटाहतिम् ॥ १४१ ॥
[४]शत्रुं वाञ्छाविघाताय बुद्धियुक्तो महीपतिः ।
साम्यं नयति सौम्येन यथैवाग्निं महोदधिः ॥ १४२ ॥
[५]अपि स्यात्पितृहा वैरी सोपि दानविलोभितः ।
गत्वा विश्वासभावं स शत्रोरात्मानमर्पयेत् ॥ १४३ ॥
[६]दुर्गस्था अपि वध्यन्ते शत्रवो दानसंश्रयात् ।
स्वल्पमांसप्रदानेन कैवर्तैस्तिमयो यथा ॥ १४४ ॥

अपरं यच्छत्रोरुपप्रदानं वर्जयन्ति तदप्ययुक्तं यत उपप्रदानव्याजाच्छत्रुर्निर्मूलतां याति । उक्तं च ।

[९]उच्छेद्यमपि विद्वांसो वर्धयन्त्यरिमेकदा ।
गुडेन वर्धितः श्लेष्मा यतो निःशेषतां व्रजेत् ॥ १४५ ॥

---

१ Should not be allowed to take place. २ Seduced by bribes. ३ A person overtaken by avarice sees only the wealth and not the calamity that fallows it; since a cat sees only the milk and not the stroke of the cudgel. ४ A talented king satisfies his enemy to remove his desire by mild means, just as the ocean does the fire (वाडव). ५ If an enemy be the killer even of the father, he too being allured by bribes and having placed confidence, will deliver himself to the enemy of his own accord. ६ Even those enemies, who are in difficult places, are killed by having recourse to bribery, as fishes are (killed) by giving a little bit of flesh. ७ Avoid, evade. ८ With or under the pretext of a gift or tribute. ९ Learned men once allow an enemy, though likely to be destroyed, to grow in strength, since asthma increased by means of treacle, is entirely cured.

एवं तद्वचनमाकर्ण्य वक्रनासमूचे। भो निवेद्यतामात्मनोभिप्रायः। स आह। देव किं वदामि यत्त्वयैषामेषां मध्यान्नैकेनापि नीति[१]शास्त्राश्रयमभिहितं यतोशक्तानामेते[२] सामभेददानोपायाः शक्तानां पुनः शत्रुविषये दण्ड एव। उक्तं च।

[३]दण्डं मुक्त्वा नृपो योन्यानुपायान्योजयेद्रिपोः।
स तं भीतमिव ज्ञात्वा स्वैरं तं प्रति धावति ॥१४६॥

[४]अपरं सामादिभिर्या लक्ष्मीर्भूभुजां दण्डं विना सा लक्ष्मीश्चिरं न प्रभवति। उक्तं च।

[५]अकृत्वा पौरुषं या श्रीर्विकासिन्यपि किं तया।
जरद्गवोपि चाश्नाति दैवादुपगतं तृणम् ॥ १४७ ॥

[६]मनसा सर्वलोकानां लक्ष्मीर्हस्तगतैव हि।
कर्मणोद्दामदण्डानामेव स्याद्वशवर्तिनी ॥ १४८ ॥

[७]दुर्लभा स्त्रीव चित्तेन लक्ष्मीः संसेव्यतेऽलसैः।
पण्यस्त्रीवोद्यतैश्चैव युद्धे वीर्यधनप्रदैः ॥ १४९ ॥

---

१ Was said something with respect to the science of politics २ Since these remedies such as peace &c. are for the weak. ३ That enemy, with respect to whom a king employs all the other remedies except punishment, having thought him to be afraid, runs against him unrestrained. ४ Besides that prosperity of kings which is obtained by means of peace &c does not become firm without दण्ड (punishment). ५ What is the use of that wealth though splendid which is obtained without manly efforts ; even an old ox eats the grass which is obtained by chance (without exertions). ६ Mentally (nominally) of course wealth is in the hands of all, but in reality it is said to be in the power of those only whose punishment is very severe. कर्मणा indeed, in reality. उद्दामदण्डानां—ब. उद्दामो दण्डो येषां. वशवर्तिनी-वशे वर्तते इति उप. ७ Wealth is enjoyed by the lazy only in the mind like a woman difficult of access (private woman); while it is enjoyed like a harlot by those who are industrious and who give away wealth in battle in the shape of valour. उद्यत means *ready*, active. वीर्यधन. क.

¹किरीटमणिचित्रेषु मूर्धसूत्तानरश्मिषु ।
नादत्त्वा द्विषतां पादं पुरुषः श्रियमश्नुते ॥ १५० ॥

²हेलाकृष्टस्फुरत्खड्गदीप्तांशुपरिपिञ्जरैः ।
श्रीमत्करिकराकारैराहार्यन्ते भुजैः श्रियः ॥ १५१ ॥

³पराक्रमपरामृर्षवशीकृतारिपोस्त्वसौ ।
लक्ष्मीरन्याङ्कसुप्तैव स्वयं गृहकुटुम्बिनी ॥ १५२ ॥

⁴शत्रोः श्रियं सदोत्थायी सैंहीं वृत्तिं समाश्रितः ।
कचग्रहेण भुञ्जीत दुर्विनीतामिव स्त्रियम् ॥ १५३ ॥

एवं चतुर्थो वक्रनासमन्त्रो दण्डसाध्यः⁵ । ततस्तस्यापि वचः समाकर्ण्य प्राकारकर्णमुदासीनं⁶ वृद्धसचिवमाह । भो अभिधीयतामात्मनोभिप्रायः । स आह । देव अवध्योयं विशेषात्तव पक्षाश्रयः⁷ शरणागतश्च । तदेनं स्वदुर्गे नीत्वा संमानय । ततोनेनाग्रसरेण⁸ शत्रवो व्यापादनीयाः स्युः । उक्तं च ।

१ A man does not obtain wealth without placing his foot on the heads of the enemies variegated with the lusture of head-ornaments and having rays issuing upwards. किरीट-मणिचित्रेषु त्. त. उत्तानरश्मिषु-ब. उत्ताना रश्म्ययो येषां. २ Wealth is obtained by those arms which resemble the trunks of elephants and which are reddish-brown by the shining rays issuing from glittering swords drawn in haste. हेलाकृष्टस्फुरत् an adjcetive of खड्ग-खड्गदीप्तांशु. ष. त. श्रीमत्करिकराकारैः- ब. श्रीमतां करिणां कराणामिव आकाराः येषां तैः. ३ The wealth of the enemy subdued by the force of valour, becomes one's own wife of her own accord, although she be sleeping on the lap of others (though she belong to others). ४ He, who is ever industrious, should enjoy the wealth of the enemy by having recourse to the conduct of the lion, by forcibly seizing her by the hair like an immodest woman. ५ To be accomplished by having recourse to *war*. ६ Who was indifferent or neutral. ७ Who has taken shelter with your party. ८ With this as the leader or the foremost person.

¹मत्स्यो मत्स्यमुपादत्ते ज्ञातिर्ज्ञातिमसंशयम्।
रावणोच्छित्तये रामो विभीषणमपूजयत् ॥ १५४ ॥

अपरमस्य वधान्महापातकमस्ति। उक्तं च।

²वदत्सु दैन्यं शरणागतेषु
बहुप्रहारेषु भयेन युक्ताः।
दयाविहीनाः प्रहरन्ति येऽत्र
ते रौरवादीनि निषेवयन्ति ॥ १५५ ॥

अपरं च।

³दक्षिणादिसमृद्धस्य वाजिमेधस्य यत्फलम्।
तत्फलं लभते सम्यग्यो रक्षेच्छरणागतम् ॥ १५६ ॥

एवं पञ्चमः प्राकारकर्णस्य मन्त्रः। अथ तस्य तदाकर्ण्य स्वय मरिमर्दनोभिहितवान्। भो ममाप्ययमभिप्रायः। एष तावत्कपटी न भवति। मदर्थे स्वामिना तिरस्कृतः। तद्युज्यते स्वे दुर्गे नेतुम्। युक्तमुक्तं प्राकारकर्णेन। यदि पुनरेष त्यज्यते हन्यते वा ततः कृतघ्नतादोषो भवति। तथा च।

१ One fish seizes another which is undoubtedly o. his own kind; Ráma honoured Bibhishana for th. extirpation of Râvana. २ Those who mercilessly strike those, who are uttering words of humility who have submitted themselves to them and who are fille with fear by having received various strokes, go to th hells such as Ra·rava and others. The reading for the 2n. pâda is कृतोपकारेषु भये सुखे वा which means those who have obliged them both in adversity and prosperity. This gives a better sense than the reading in the text. ३ He, who protects him well who has made a submission to obtains that fruit which is derived from a horse-sacrifice in which plentiful *Dakshina* is given away. *Dakshina* is money given away to Brâhmans and others by way of charity. ४ As to this crow, viz., Sthirajîvin.

[1]ब्रह्मघ्ने च सुरापे च चौरे भग्नव्रते शठे।
निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः ॥ १५७ ॥

तथा च

[2]सत्कृताश्च कृतार्थाश्च कृतज्ञा न भवन्ति ये।
मृतानामपि नो काकास्तेषां मांसानि भुञ्जते ॥ १५८ ॥

तस्मादस्याहं संमानं करिष्यामि। तच्छ्रुत्वा वक्रनास आह। [3]देव न युक्तमेतच्छत्रुपक्षपातिनां दुर्गदर्शनम्। उक्तं च।

[4]अज्ञाताः पुरुषा यस्य प्रविशन्ति महीपतेः
दुर्गं तस्य न संदेहः प्रविशन्ति द्रुतं द्विषः ॥ १५९ ॥

तच्छ्रुत्वारिमर्दन आह। भो न युक्तमुक्तं भवता। [5]दुर्गं दुर्गमिति कातरप्रवादोयम्। शूराणां तु स्वभुजवीर्यपञ्जर[6] दुर्गम्। उक्तं च।

[7]यस्य स्यात्सहजं वीर्यं हन्यते स तु नारिभिः।
मणिदीपस्य नोग्रोपि वायुर्बाधयते शिखाम् ॥ १६० ॥

[8]दुर्गाश्रयोपि कालेन नाशं यास्यति। उक्तं च।

---

१ Atonement is prescribed by the wise to him who kills ...ihmana, to a drunkard, to a thief, to one who breaks ... vow and to a rogue, but none to him who is ungrateful. ब्राह्मणं हन्तीति-ब्रह्मघ्न. सुरां पिबतीति= ...राप:-उप. भग्नव्रत. ब. २ The crows do not eat the flesh after ...eath of such persons, as being obliged by others and be...g happy, do not feel grateful to those who have obliged ...em. कृतार्था: ब. ३ It is not proper to show the fortress to ...ose who are the partisans of the enemy. ४ There is no ...oubt that when strangers (अज्ञाता: पुरुषा:) enter the fort of a king, the enemies also find entrance into it very soon. ५ To make much of a fort is the business of cowards. ६ The ...age in the form of the might of one's own arms. ...भुजवीर्यमेव पंजर:-कर्म. ७ He, who has inborn valour, is not killed by his enemies ; even a strong gust of wind does not extinguish the flame of a jewel-lamp. मणिदीप is कर्म. मणिरेव दीप: the jewel itself serving the purpose of light by its lustre. ८ He whose shelter is a fortress. दुर्गमेव आश्रयो यस्य. ब.

[1]स्थानं त्रिकूटं परिखा समुद्रो
रक्षांसि योधा धनदश्च वित्तम् ।
शास्त्रं च यस्योशनसा प्रणीतं
स रावणः कालवशाद्विपन्नः ॥ १६१ ॥

इत्युक्त्वा तमुवाच । भोः स्थिरजीविन् मया त्वं तावत्परिग्रहार्सं . : तेनापि रक्षितो गृहीतश्च । तदागम्यतां मे दुर्गम् । तत्र च यत्तव कुलोचितं तत्कुरुष्व । सोप्यन्तर्विहस्य तमुवाच । भोः स्थिरजीविनः किमतिबहुना व्यर्थप्रलपनेन । मदीयकुलीनतां फलेन ज्ञास्यति भवान् । तच्छ्रुत्वा वक्रनासः प्रोवाच । भो विनष्टं कुलमस्माकम् ।

[4]सा सा संपद्यते बुद्धिः सा मतिः सा च भावना ।
सहायास्तादृशा ज्ञेया यादृशी भवितव्यता ॥ १६२ ॥

कौशिकानां राजदोषेण विनाशः समागतः । तत्कस्य कथ्यते । उक्तं च ।

[6]दोषमार्त्तो जनः कृत्स्नं पार्थिवाय निवेदयेत् ।
यदा स्याद्दोषवान्भूपस्तदा कस्तं निषेधयेत् ॥ १६३ ॥

एवं तमनादृत्य स्थिरजीविनमादाय स्वदुर्गमाससादोलूकपतिः स्थिरजीव्यपि तद्दुर्गविषमतामालोक्य स्वचित्तेचिन्तयत् । एतद्दुर्ग

---

१ Even that Râvana, whose place of residence was the Trikûta mountain, whose rampart was the sea, whose soldiers were the demons, whose wealth was derived from *Kubera*, and whose royal policy was composed by Usanas (*Sukra*), perished in the course of time, i. e., when the right time approached. २ Even against the advice of my followers or ministers. ३ What need has Sthirajîvin to multiply words in vain ? ४ As is the fate of a person, so is his talent, such is his mind, so are his thoughts and such are his companions or assistants. ५ By a mistake or fault on the part of the king. ६ A person, who is in distress should lay all his griefs before his king ; but when the king himself is guilty of a crime, who will prevent him from so being ? ७ Unevenness, difficulty of ingress or egress.

यथोक्तं दुर्गविषमं परमसारं नास्ति¹। तदन्तर्मृत्युपाशबद्धा² मम वशे ...ताः। येन मन्त्रिणा वक्रनासेन स्वस्वामी मां प्रति स्थिरजीवी ...तामित्युक्तस्तत एषामुलूकानां मध्ये नीतिज्ञोयं ह्रितश्च। अन्ये तु ...नमाः स्वामिना सह⁴। अथ त उलूकास्तेनोलूकपतिनोक्ताः। यदहो ...रजीविनो भद्रतर आश्रयः समर्पणीय इति³। स्थिरजीवी तच्छ्रुत्वा ...न्तयत्। मया तावदेषां वधोपायश्चिन्तितव्यः। ततः स मया मध्य-स्थितेन न भविष्यत्येतेपि⁵ यतः सावधाना भविष्यन्ति। तदेतद्दुर्गद्वारमा-...गमि येनात्र स्थितोभिप्रेतं करोमि। ततश्चोलूकभूपमाह। देव त-...युक्तम्। परमहमपि नीतिज्ञो हितश्च। यद्यपि तत्त्वानुरक्तः⁶ शुचि-...र्यापि स्वदुर्गमध्ये⁷ न वासो ममार्हः। तदहमत्रैव दुर्गद्वारे स्थितः ... ...सेवां करिष्यामि। तथानुष्ठिते वक्रनासः स्ववर्गीयानाहूय ...च। भो एतावत्कालं⁸ यावदेतद्दुर्गं कुशलं चास्माकं भूपतेरभूत्। ... संप्रत्यन्यं पर्वतमाश्रित्य वयं सर्वेन्यद्दुर्गं संश्रयामः। उक्तं च।

⁹अनागतं यः कुरुते स शोभते
स शोचते यो न करोत्यनागतम्।
वनेत्र संस्थस्य समागता जरा
बिलस्य वाणी न कदापि नः श्रुता ॥ १६४ ॥

...प्रोचुः। कथमेतत्। सोब्रवीत्।

॥ कथा ४ ॥

कस्मिंश्चिद्वनप्रदेशे खरनखरो¹⁰ नाम सिंहः प्रतिवसति स्म। स ...चिदितश्चेतश्च परिभ्रमन्क्षुत्क्षामो न किंचित्सत्त्वमाससाद। तत-

---

१ Weak, feeble. २ Tied by the bonds of death. ३ With ...pect to me. ४ Together with the lord. ५ That will not ... accomplished when I am in the middle. ६ Attached to ...th. ७ In the fort belonging to you ८ For so a long ...me, up to this time. ९ He, who provides for what is to ...e, is a becoming person, while he who does not do so, ...omes to grief ; old age came on me while I lived in this ...orest, still I never heard the words of a cave before. १० Of sharp nails खराणि नखराणि यस्य.

श्चास्तमनसमये महतीं गुहामासाद्य प्रविश्य चिन्तितवान् । नूनमेतस्यां गुहायां रात्रौ केनचित्सत्त्वेनागन्तव्यम् । तन्निभृतो भूत्वा तिष्ठामि । एवं तस्य तत्र स्थितस्याधिपुच्छो नाम तत्स्वामी लोपाशकः समायातः । स यावत्पश्यति तावत्सिंहपदपद्धतिर्गुहायां प्रविष्टा भवति न च निष्क्रान्ता । ततश्चाचिन्तयत् । अहो विनष्टोस्मि । नूनमस्यामन्तर्गतेन सिंहेन भाव्यम् । तत्किं करोमि । कथं यास्यामि । एवं विचिन्त्य द्वारस्थः फूत्कर्तुमारब्धः । अहो बिल रे । इति प्रोच्य भूयोप्यभाषत । भोः किं न वेत्सि यत्त्वया सहैकः समयंधर्मोस्ति । मया त्वं वक्तव्यो बाह्यात्समायातेन त्वयाप्यहमाकारणीयः । तद्यदि मां नाह्वयसि ततोहं द्वितीयां गुहां यास्यामि । सिंहोपि तच्छ्रुत्वा चिन्तितवान् । नूनमेषा गुहा समायातस्याह्वानं सदा करोति । साद्य मद्भयान्न किंचिदूचे । अथवा साध्विदमुच्यते ।

भयसंत्रस्तमनसां हस्तपादादिकाः क्रियाः ।
प्रवर्तन्ते न वाणी च वेपथुश्चाधिको भवेत् ॥ १६५ ॥

तदहमप्याह्वानं करोमि येन प्रविश्य मम भोज्यतां यास्यतीति । एवं संप्रधार्य तस्याह्वानमकरोत् । अथ सिंहशब्देन सा गुहा प्रतिरवशतसंपूर्णान्यानपि दूरस्थान्सत्त्वांस्त्रासयामास । लोपाशकोपि पलायनपर इमं श्लोकमपठत् ।

अनागतं यः कुरुते स शोभते
स शोचते यो न करोत्यनागतम् ।
वनेत्र संस्थस्य समागता जरा
बिलस्य वाणी न कदापि नः श्रुता ॥ १६६ ॥

एवं मत्वा मया सह गम्यताम् । एवमभिधाय सपरिजनो वक्रनासोन्यं देशं गतः ।

---

१ A jackal. २ The marks of a lion's footprints. ३ To howl. ४ A covenant or agreement. ५ Should be accosted. ६ Calling out to. ७ The actions of the hands and feet of those who are frightened at heart, do not proceed and also the speech is stopped, while the tremour of limbs increases. ८ Filled with hundreds of echoes or reverberations.

अथ वक्रनासे गते स्थिरजीव्यपि प्रहृष्टमना व्यचिन्तयत् । अहो कल्याणमस्माकमुपस्थितम् । तदेते मूढतमाः सुवध्या मे संजाताः । उक्तं च ।

न दीर्घदर्शिनो यस्य मन्त्रिणः स्युर्महीपतेः ।
क्रमायाता ध्रुवं तस्य न चिरात्स्यात्परिक्षयः ॥ १६७ ॥

अथो साध्विदमुच्यते ।

मन्त्रिरूपा हि रिपवः संभाव्यास्ते विचक्षणैः ।
ये सन्तं नयमुत्सृज्य सेवन्ते प्रतिलोमतः ॥ १६८ ॥

एवं विचिन्त्य स्वकुलाये वनकाष्ठिकामेकैकां दिनं प्रति प्रक्षिपति गुहाप्रदीपनार्थम् । न च ते मूर्खा उलूका जानन्ति यदेष कुलायमस्मदुद्द्योतनाय वृद्धिं नयति । अथवा साध्विदमुच्यते ।

कृतान्तपाशबद्धानां दैवोपहतचेतसाम् ।
बुद्धयः कुब्जगामिन्यो भवन्ति महतामपि ॥ १६९ ॥

अथ प्रभूतकाष्ठसंभारे कुलायव्याजेन रचिते दुर्गद्वारे सूर्योदये संजातेन्धतां प्राप्तेषूलूकेषु स्थिरजीव्यृष्यमुकं गत्वा मेघवर्णमाह । स्वामिन् दाहसाध्या कृतासा मे रिपुगुहा । तत्सर्वपरिवारः समेत्यैकैकां वनकाष्ठिकां ज्वलन्तीं प्रान्ते गृहीत्वा तत्र गुहाद्वारेस्मत्कुलाये प्रक्षिपतु येन सर्वशत्रूणां कुम्भीपाकनरकन्यायो भवति । तच्छ्रुत्वा हृष्टो मेघवर्ण आह । तात तत्कथयात्मवृत्तान्तम् । चिराद्दृष्टोसि । स

---

१ Oh joy! good fortune has smiled upon us. २ The destruction of that king, whose hereditary ministers are not provident, will surely take place very soon. ३ Those, who having abandoned the proper and just course of conduct, follow the reverse of it (प्रतिलोमत. सेवंत) should be looked upon by wise persons as enemies in the form of ministers. प्रतिलोमतः in the opposite or contrary way. ४ Nest. ५ For the purpose of setting the cave on fire. ६ For burning us up ७ The talents even of the great, when fastened in the snares of the god of death (about to die) and having the intellect warped by fate, go astray or follow a crooked or wrong path. ८ Having a large heap of sticks. प्रभूतः काष्ठसंभारो यस्य. ब. ९ Fit to be destroyed by fire. १० Each one holding a burning stick in his beak. ११ The state of falling into the hell called कुंभीपाक.

आह । वत्स नायं कालो वक्तव्यस्य यतः कदाचित्तस्य रिपोः कश्चि-त्प्रणिधिः समागमनं निवेदयिष्यति । ततो ज्ञानादतोऽप्यपसरणमं कुर्वन्ति । तत्त्वर्यतां त्वर्यताम् । उक्तं च ।

शीघ्रकृत्ये समुत्पन्ने विलम्बयति यो नरः ।
तत्कृत्ये देवता तस्य कोपाद्विघ्नं प्रयच्छति ॥ १७० ॥

तथा च

यस्य यस्य हि कार्यस्य सफलस्य विशेषतः ।
क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम् ॥ १७१ ॥

तद्गुहायातस्ते हतशत्रोः सर्वं सविस्तरं निर्व्याकुलतया कथयि-ष्यामि । अथासौ तदाकर्ण्य सपरिजन एकैकां ज्वलन्तीं वनकाष्ठिकां चञ्च्वग्रेण गृहीत्वा तद्गुहाद्वारं प्राप्य स्थिरजीविकुलाये प्रक्षिप्तवान् । ततस्ते सर्वे दिवान्धा वक्रनासमन्त्रिवाक्यं स्मरन्तो द्वारस्यावृतत्वाद-निःसरन्तो गुहामध्ये कुम्भीपाकस्यापायमापन्ना मृताश्च । एवं शत्रू-न्निःशेषतां नीत्वा भूयोपि मेघवर्णस्तमेव न्यग्रोधपादपदुर्गं गतः प्रमु-दितमनाः सुखोपविष्टः सभामध्ये स्थिरजीविनमपृच्छत् । यत्तात त्वया कथं शत्रुगतेनैतावत्कालो नीतः । तदत्र कौतुकमस्माकं वर्तते । तत्क-थ्यताम् । स आह । आगामिफलवाञ्छयैव कष्टमपि सेवद्भिर्न ज्ञायते । उक्तं च

१ For speaking or exchanging words. २ My meeting you (here). ३ From here. ४ When anything to be done quickly has arisen, if a man delays its execution, the deity being angry places an obstacle in its way. शीघ्र कृत्य lit. a speedy action. ५ Time sucks away the juice of every action and especially of that which is to be attended with fruit, when it is not done speedily. ६ When your enemies are killed ७ At length, in detail. ८ Without any distraction of the mind. ९ Remembering the words of the counsellor, Vakranâsa. १० Not being able to go out by reason of the door being blocked up. ११ Subjected to the injuries to be experienced in *Kumbhîpâka* (a kind of hell in which the wicked are baked like the potter's vessels.) १२ Gone among the enemies. १३ Even miseries when experienced with the desire of a prospective fruit are not felt (to be such.)

¹शक्तेनापि सता जनेन विदुषा कालान्तरप्रेक्षिणा
वस्तव्यं खलु वज्रपातविषमे क्षुद्रेऽपि पापे जने।
दर्वीव्यग्रकरेण धूममलिनेनायासयुक्तेन किं
भीमेनातिबलेन मत्स्यभवनेऽपूपा न संघटिताः ॥ १७२ ॥

तथा च।

²कार्यस्यापेक्षया भुक्तं विषमप्यमृतायते।
सर्वेषां प्राणिनां यत्र नात्र कार्या विचारणा ॥ १७३ ॥

अन्यच्च।

³सिद्धिं वाञ्छयता जनेन विदुषा तेजो निगृह्य स्वकं
सत्त्वोत्साहवतापि दैवगतिषु स्थैर्यं प्रकार्यं क्रमात्।
देवेन्द्रद्रविणोपमैर्बहुगुणैरभ्यर्चितो भ्रातृभिः
किं क्लिष्टः सुचिरं विराटभवने पूर्वं न धर्मात्मजः ॥ १७४ ॥

तथा च।

१ Even though a person be powerful and learned, he should reside with a very mean and wicked sinner as hard as the stroke of adamant, in expectation of better days to come; did not the powerful Bhîma with hands occupied in holding the laddle, dirtied with smoke and tired, bake cakes in the house of Virâta? The latter half of the verse alludes to the fact of the Pàndavas living *incognito* at the house of Virâta, the king of Matsyapura, दर्वीव्यग्रकरेण-ब. दर्व्यां व्यग्रो करो यस्य. २ Where even poison drunk with the desire of accomplishing some object is turned into nectar in the case of all creatures, no hesitation is to be made there as to whether the poison should be taken or not. ३ A man, who wishes to accomplish some object, though wise and full of lustre and energy, having restrained his own might, should quietly assume patience; did not the son of Dharma (Yama) formerly suffer miseries for a long time in the house of Viráta, although he was highly honoured by his brothers resembling the god of gods in wealth and full of many virtues?

¹रूपेणाप्रतिमेन यौवनगुणैः श्रेष्ठे कुले जन्मना
गन्तव्यानि दिनानि दैववशतो भूयो धनं वाञ्छता ।
सैरन्ध्रीति विगर्हिता युवतिभिः साक्षेपमाज्ञाभया-
द्रौपद्या किल मत्स्यराजभवने घृष्टं न किं चन्दनम्॥१७५॥

तत्स एव नीतिज्ञो भवति योपमानमपि सहित्वा कार्यं साधयति । उक्तं च ।

²महत्वमेतन्महतां नयालंकारधारिणाम् ।
न मुञ्चन्ति यदारम्भं प्राप्तेपि व्यसनोदये ॥ १७६ ॥

तथा च ।

³प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैः सहस्रगुणितैरपि हन्यमानाः
प्रारब्धमुत्तमगुणा न परित्यजन्ति ॥ १७७ ॥

मेघवर्ण आह । तत्कृतं निष्कण्टकं⁴ मे राज्यं शत्रुनिःशेषतां⁵ नयता त्वया । अथवा युक्तमेतन्नयवादिनाम् । उक्तं च ।

---

१ Did not Draupadî although endowed with incomparable beauty, youth and brith in a noble family, rub sandle in the house of Viràta, notwithstanding she was revilingly called (सैरन्ध्री) a maid-servant by young females, for fear of violating the order of her husband who had to pass few days incognito with the desire of regaining his prosperity? वाञ्छता I do not know how this can be connected with द्रौपद्या. २ This is the greatness of the great who possess ornament in the shape of wisdom, viz., they do not leave off what is once begun even though a calamity befall them. नयालंकार--कर्म. नय एव अलंकारः ३ The mean do not begin anything through the fear of meeting with obstacles, the middling having begun anything, stop when interrupted by difficulties; while the best do not leave off what is once begun, although they are encountered by thousands of difficulties. For सहस्रगुणिते there is another reading which is पुनः पुनरपि again and again, repeatedly. ४ Free from danger or void of foes. कण्टक literally means a thorn and hence anything that is an object of danger &c. ५ Annihilating.

ऋणशेषं चाग्निशेषं शत्रुशेषं तथैव च।
पुनःपुनः प्रवर्धन्ते तस्माच्छेषं न धारयेत् ॥ १७८ ॥

तन्नास्ति त्वत्समोन्यो मन्त्री बुद्धिमान्येन शस्त्रमोक्षणं विनापि स्वबुद्ध्या शत्रवो हताः। अथवा साध्विदमुच्यते।

शस्त्रैर्हतास्तु रिपवो न हता भवन्ति
प्रज्ञाहताश्च नितरां सुहता भवन्ति।
शस्त्रं निहन्ति पुरुषस्य शरीरमेकं
प्रज्ञा कुलं च विभवं च यशश्च हन्ति ॥ १७९ ॥

स्थिरजीव्याह। स देवप्रतापभावोयं भविष्यद्वृद्धिसूचकः। वयं पुनर्मूकाः कृत्यानुष्ठानमात्राः। उक्तं च।

प्रसरति मनः कार्यारम्भे दृढीभवति स्पृहा
स्वयमुपनयन्नर्थान्मन्त्रो न गच्छति विप्लवम्।
फलति सकलं कृत्यं चित्तं समुन्नतिमश्नुते
भवति च रतिः श्लाघ्ये कृत्ये नरस्य भविष्यतः ॥ १८० ॥

तत्तव भविष्यतो विपक्षस्य भवितव्यतेति बुद्धिविपर्यासेन ज्ञातं मया। ये विज्ञा भवन्ति पुरुषाणां भविष्यतामभविष्यतां च व्यवहारादेव जानन्ति। उक्तं च।

---

१ The remnant of a debt, of fire and of an enemy, increases over and over again; therefore, one should never leave any remainder. २ Even without discharging a single weapon. ३ Those enemies, who are killed with weapons, are not really killed, but those who are destroyed by wisdom are said to be entirely killed; because a weapon destroys only the body, while wisdom destroys the family, wealth and fame of a person. ४ What you say is due to your majesty's glory indicating future prosperity; as to ourselves, we are only dumb agents of actions. ५ When a man is sure to prosper, his mind expands at the beginning of any work, his desire becomes firm, his counsel itself brings about the accomplishment of objects and never fails, his every undertaking is crowned with fruition, his mind attains to elevation and he has love produced in him for praiseworthy deeds. Here भविष्यतः=वर्धिष्यमाणस्य. ६ Destiny. ७ The errors of judgment committed by your enemy. ८ Wise, prudent. विशेषेण जानतीति = विज्ञाः. ९ Course of action, conduct in general.

१वाञ्छैव सूचयति पूर्वतरं भविष्यं
पुंसोऽन्यजन्मसुकृतं यदिवेतरच्च ।
विज्ञायते शिशुरजातकलापचिह्नः
प्रत्यक्पदैरपरन्सरसः कलापी ॥ १८१ ॥

तदस्य विधिः २संमुखो भवति स त्वामिव बुद्धिसंपन्नो भवति । उक्तं च ।

३न देवा यष्टिमादाय रक्षन्ति पशुपालवत् ।
यं तु वर्धितुमिच्छन्ति बुद्ध्या संयोजयन्ति तम् ॥ १८२ ॥
४न देवाः शस्त्रमादाय निघ्नन्ति रिपुवत्क्रुधा ।
यं तु हिंसितुमिच्छन्ति बुद्ध्या विश्लेषयन्ति तम् ॥ १८३ ॥
५बुद्धौ कलुषभूतायां विनाशे पर्युपस्थिते ।
अनयो नयसंकाशो हृदयान्नापसर्पति ॥ १८४ ॥

तथा तव रिपोः संजातो बुद्धिविश्लेषः ॥

॥ ६समाप्तं चेदं काकोलूकीयं नाम तृतीयं तन्त्रम् ॥

१ This verse is exactly equal to verse 80 except in the 2nd line, where for पुंसा यदन्यतनुजं त्वशुभं शुभं वा. This verse has पुंसोऽन्यजन्मसुकृतं यदिवेतरच्च । which means the merit or otherwise of a man in another birth, and in the 4th line for प्रत्युरतैः. Here we have प्रत्यक् पदैः which means by backward steps. २ Favourable. ३ The gods do not look after men like cow-herds with sticks in their hands; but they endow him whom they wish to raise to prosperity with talent. ४ The gods do not strike with weapons like enemies angrily (him whom they are displeased with) but they make him whom they wish to destroy, destitute of talent. ५ When the talent is clouded and when destruction is at hand, inequity resembling equity never leaves the mind.

६ And thus (here) ends this *Third Tantra* named Kakolúkíya (war between crows and owls).

THE PANCHATANTRAM.



There is no Sanskrit work which is more largely studied by the beginners than the *Panchatantram* of Vishnusharman. The stories contained in this immortal work are both interesting and instructive. The language is simple, terse and idiometic. Hence the popularity of the work has continued unabated for generations together. There was no handy edition of the work and we therefore have undertaken to supply this want. The work of editing and annotating has been kindly undertaken by Mr. Mahadev Shivaram Apte, B. A., Head Master, Training School, Dhulia, whose *Kádambarísára* has already secured for him reputation as a careful and conscientious editor and annotator. The present edition will contain :—

(1) A carefully revised text.
(2) A translation of almost all the verses.
(3) Meanings of words and phrases.
(4) Analysis of compounds.

Besides these *handiness of size, clearness of type* and *Printing*, and *contiguity of text* and *notes* are advantages which will be appreciated by the students for whom the edition is chiefly intended.

Name of the Book.	Rs.	Ans.	Postage.
Panchatantram (complete)	1	5	3
First Tantra	0	8	1
Second & Third Tantras................	0	7	1
Fourth & Fifth Tantras......	0	6	1
Merely the Text	0	9	1

MANAGER, "*Arya-Bhushana Press*"

POONA.

THE

FOURTH AND FIFTH TANTRAS

OF

VISHNUS'ARMAN.

(Containing a full Glossary and a literal translation of the verses occurring in the Text.)

BY

M. S. APTE, B. A.,

SOLD BY

MRS. RADHABAI ATMARAM SAGOON,

Bookseller and Publisher, Kalbadevi, Bombay.

ARYA-BHUSHANA PRESS, POONA.

A
POPULAR EDITION
OF THE
FOURTH AND FIFTH TANTRAS
OF
VISHNUS'ARMAN.

(Containing a full Glossary and a literal translation of the verses occurring in the Text.)

BY

MAHADEVA SHIVARAMA APTE, B. A.,
1st Assistant Master, High School, Satara.

SECOND EDITION

POONA:

Printed at the "Arya-Bhushana" Press.

Price 8 Annas.

1908.

Printed and published, by Hari Narayan Gokhale.

अथ

चतुर्थतंत्रम् ॥

समुत्पन्नेषु[1] कार्येषु बुद्धिर्[2]यस्य न हीयते[3] ।
स एव दुर्गं[4] तरति जलस्थो[5] वानरो यथा ॥ १ ॥

तद्यथानुश्रूयते[6] ।

अस्ति कस्मिंश्चित्समुद्रोपकण्ठे[7] महाञ्जम्बूपादपः[8] सदाफलः[9] । तत्र च रक्तमुखो नाम वानरः प्रतिवसति स्म । तत्र च तस्य तरोर[10]धः कदाचि[11]त्करालमुखो नाम मकरः[12] समुद्रसलिला[13]न्निष्क्रम्य[14] सुकोमलवालुका[15]सनाथे तीरोपा[16]न्ते निविष्टः[17] । ततश्च रक्तमुखेन स प्रोक्तः[18] । भो[19] भवान[20]भ्यागतो[21]ऽतिथिः[22] । तद्भक्षयतु मया दत्तान्यमृतकल्पानि[23] जम्बूफलानि । उक्तं[24] च ।

प्रियो[25] वा यदि वा द्वेष्यो[26] मूर्खो वा यदि पण्डितः ।
वैश्वदेवान्त[27]मासन्नः[28] सोऽतिथिः स्वर्गसंक्रमः[29] ॥ २ ॥

१ This is a Locative Absolute and means, when occasions arise २ Talent; presence of mind. ३ Is lost, fails. ४ A difficulty. ५ Living in water. ६ It is so heard; it is so related; it so runs. ७ Bank; vicinity. ८ A tree. ९ Always bearing fruit. १० A tree. ११ Once on a time; once. १२ (*Adj.*) Of a terrible look; (*m.*) a crocodile. १३ Water. १४ Having issued or come out. १५ Covered or filled with very soft sand or containing very smooth sand. १६ In the vicinity or end of. १७ (*p. p.* of विश with नि) had sat. १८ (*p. p.* of वच with प्र) was spoken to or addressed. १९ A vocative particle, oh ! २० Nom. Sing. of भवत्-your honour. २१ (*p p.* of गम with अभि & आ) approached; come near. २२ A guest. २३ Almost like nectar. कल्प,as a latter part of compounds, has this meaning. २४ And it is said. २५ Dear. २६ Hateful. २७ At the end of वैश्वदेव, a sacrifice which is daily offered to fire by house-holders. २८ (*p.p.* of सद with आ) approched; come near. २९ Is a compound which should be thus dissolved: स्वर्गस्य संक्रम. यस्मात्, from whom, or by association with whom, heaven is obtained.

न पृच्छेच्चरणं[१] गोत्रं[२] न च विद्यां[३] कुलं[४] न च ।
अतिथिं[५] वैश्वदेवान्ते श्राद्धे च मनुरब्रवीत् ॥ ३ ॥

दूरमार्गश्रमश्रान्तं[६] वैश्वदेवान्तमागतम् ।
अतिथिं पूजयेद्यस्तु स याति परमां गतिम् ॥ ४ ॥

एवमुक्त्वा तस्य जम्बूफलानि प्रयच्छति । सोपि तानि भक्षयित्वा तेन सह चिरं[७] गोष्ठीसुखमनुभूय[८] भूयोपि[९] स्वभवनमगात्[१०] । एवं नित्यमेव तौ वानरमकरौ जम्बूच्छायाश्रितौ[११] विविधशास्त्रगोष्ठ्या[१२] कालं नयन्तौ सुखेन तिष्ठतः । सोपि मकरो भक्षितशेषाणि[१३] जम्बूफलानि गृहं गत्वा स्वपत्न्याः[१४] प्रयच्छति । अथान्यतमे[१५] दिवसे तया स पृष्टः । नाथ क्वैवंविधान्यमृतकल्पानि[१६] फलानि प्राप्नोषि भवान् । स आह । भद्रे[१७] ममास्ति परमसुहृद्रक्तमुखो[१८] नाम वानरः । स प्रीतिपूर्वमिमानि फलानि प्रयच्छति नित्यम् । अथ तयाभिहितम् । यः सदैवामृतप्रायाणीदृशानि फलानि भक्षयति तस्य हृदयममृतमयं[१९] भविष्यति । तद्यदि मया भार्यया ते प्रयोजनं[२०] ततस्तस्य हृदयं मम प्रयच्छ येन[२१] तद्भक्षयित्वा जरामरणरहिता[२२] त्वया सह भोगान्[२३] भुनज्मि । स आह । भद्रे मा मैवं वद । यतः स प्रतिपन्नोस्माकं[२४] भ्राता । अपरं व्यापादयितुमपि[२५] न शक्यते । तत्त्यजैनं मिथ्याग्रहम्[२६] । उक्तं च ।

---

१ A vedic school to which one belongs. २ A family name; surname. ३ Sacred learning or knowledge of the scriptures. ४ Descent, family. ५ Here supply आगतं, a guest arrived or come at the end of वैश्वदेव. ६ Tired by the fatigues of a long journey. ७ Long or for a long time. ८ Conversation. ९ Again. १० A house. ११ Resorting to; sitting under. १२ By conversation regarding various sciences. १३ Is a विशेषणतत्पुरुष compound and means, what remains after eating or the remnant of what is eaten. १४ Wife. १५ One of many, certain, particular. १६ Of such sort; such. १७ Good lady. १८ A great friend. १९ Affectionately. २० Nectar-like. २१ Full of nectar. २२ If you want me who am your wife. २३ So that; whereby. २४ Free from old age and death. २५ Pleasure; enjoyment. २६ (*p. p.* of पद् with प्रति) become; turned. २७ To be killed. २८ Vain or useless obstinacy.

एकस्थानं[१] प्रसूते[२] वागन्यस्मिञ्जननी नृणाम् ।
वाग्जातमधिकं[४] प्रोचुः[५] सोदर्यादपि[६] बान्धवात् ॥ ५ ॥

अथ मकराह । त्वया कदाचिदपि वचनं मम नान्यथा[७] कृतम् । तन्नूनं[८] सा वानरी भविष्यति यतस्तस्या अनुरागतः[९] सकलमपि दिनं तत्र गमयसि । तत्त्वं ज्ञातः[१०] सम्यङ् मया । यतः ।

साह्लादं[११] वचनं प्रयच्छसि न मे नो[१२] वाञ्छितं किंचन
प्रायः प्रोच्छ्वसिषि द्रुतं[१३] हुतवहज्वालासमं[१४] रात्रिषु ।
कण्ठाश्लेषपरिग्रहे शिथिलता[१५] यन्नादरश्चुम्बने[१६]
तत्ते धूर्त[१७] हृदि स्थिता प्रियतमा काचिन्ममैवापरा[१८] ॥ ६ ॥

सोऽपि पत्न्याः पादोपसंग्रहं[१९] कृत्वाङ्कोपरि निधाय तस्याः कोपकोटिमापन्नायाः[२०] पत्न्याः सुदीनमुवाच[२१] । यतः ।

मयि ते पादपतिते किंकरे[२२] त्वमुपागते ।
प्रिये कामातुरः कोपं कान्ते कोऽपनेष्यति[२३] ॥ ७ ॥

सापि तद्वचनमाकर्ण्याश्रुप्लुतमुखी[२४] तमुवाच ।

सार्धं मनोरथशतैस्तव[२५] धूर्त[२६] कान्ता
सैव स्थिता मनसि कृत्रिमभावरम्या[२७] ।
अस्माकमस्ति न कथंचिदिहावकाशि-[२८,२९]

१ Firstly. २ Produces relationship. ३ Secondly. ४ पंचमीतत्पुरुष-what is produced from speech. ५ They say. ६ Of the whole blood. ७ Done otherwise, not complied with or granted. ८ Indeed. ९ Love, affection. १० I have tried you well; I have known you well. ११ Cheerful; delightful. १२ Not. १३ Quickly. १४ As hot as the flames of fire. १५ Since there is coldness or indifference in giving a close embrace. १६ Because, since. This word should be supplied before each of the preceding sentences. १७ A rogue. १८ Some woman other than myself. १९ Taking or holding, and पादोपसंग्रह means taking hold of the feet as a sign of submission. २० Who had reached the highest pitch of anger. २१ Very meekly. २२ A servant. २३ What other person, oh beautiful one, so much overcome by passion as I am, will try to pacify your anger? २४ With the face bedewed with tears. २५ A desire. २६ A rogue. २७ Charming on account of her feigned affection. २८ इह = अस्मिन् मनसि. २९ Scope; place.

तस्मादलं चरणपातविडम्बनाभिः ॥ ८ ॥

अपरं सा यदि तव वल्लभा न भवति तत्किं मया भणितोऽपि तं न व्यापादयसि । अथ यदि स वानरस्तत्किं तेन सह महास्नेहः । तत्किं बहुना । यदि तस्य हृदयं न भक्षयामि तन्मया प्रायोपवेशनं कृतं विद्धि । एवं तस्यास्तं निश्चयं ज्ञात्वा चिन्ताव्याकुलितचित्तः स प्रोवाच । अथवा साध्विदमुच्यते ।

वज्रलेपस्य मूर्खस्य नारीणां कर्कटस्य च ।
एको ग्रहस्तु मीनानां नीलीमद्यपयोस्तथा ॥ ९ ॥

तत्किं करोमि । कथं स मे वध्यो भविष्यति । इति विचिन्तयन्वानरपार्श्वमगमत् । वानरोऽपि चिरादायान्तं तं सोद्वेगमवलोक्य प्रोवाच । भो मित्र किमद्य चिरवेलायां समायातः । कस्मात्साह्लादं नालापयसि न सुभाषितानि पठसि । स आह । मित्र अहं तव भ्रातृजायया निष्ठुरतरैर्वाक्यैरभिहितः । भोः कृतघ्न मा मे संमुखं मुखं दर्शय यतस्त्वं मित्र नित्यमेवोपजीव्यागच्छसि तस्य पुनः प्रत्युपकारं गृहदर्शनमात्रेणापि न करोषि । तत्ते प्रायश्चित्तमपि नास्ति । उक्तं च ।

ब्रह्मघ्ने च सुरापे च चौरे भग्नव्रते तथा ।
निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः ॥ १० ॥

१ So enough of this mockery of falling down prostrate at my feet. २ Moreover. ३ Even when I ask you (to do it). ४ What need I say more? in short. ५ Then know it for certain that I shall kill myself by starving. ६ With his mind filled or overcome with anxiety. ७ It is well said. ८ (m.) A kind of cement made of diamond. ९ A crab. १० (Lit. there is only one grasp,) only one grasp of these is enough. ११ मद्य पिबतीति a drunkard. १२ How is it possible that he should be killed by me? १३ Side, nearness. १४ With dejection. १५ At a very late hour. १६ Full of joy or vivacity. १७ A good or pithy saying. १८ Was spoken to with very harsh words. १९ Before; in front. २० Having subsisted on. २१ An obligation in return. २२ There is no atonement for your sin of ingratitude; no act can atone for your sin. २३ The killer of a Brahmana. २४ One who drinks wine or liquor. २५ One who has broken his vow. २६ Atonement. २७ (p. p. of धा with वि) prescribed; ordained. २८ Ungrateful.

तत्त्वं मम देवरं गृहीत्वाद्य प्रत्युपकारार्थं गृहमागच्छ । अथवा त्वया सह मे परलोके दर्शनम् । तदहं तयैवं प्रोक्तस्तव सकाशमागतः । तदद्य तया सह कलहायत इयती वेला मे विलग्ना । तदागच्छ मे गृहम् । तव भ्रातृपत्नी रचितचतुष्का प्रगुणितमणिमाणिक्या द्वारदेशबद्धवन्दनमाला सोत्कण्ठा तिष्ठति । मर्कट आह । भो मित्र युक्तमभिहितं मद्भ्रातृपत्न्या । उक्तं च ।

वर्जयेत्कौलिकाकारं मित्रं प्राज्ञतरो नरः ।
आत्मनः संमुखं नित्यं य आकर्षति लोलुपः ॥ ११ ॥

तथा च । ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति ।
भुङ्क्ते भोजयते चैव षड्विधं प्रीतिलक्षणम् ॥ १२ ॥

परं वयं वनचराः । युष्मदीयं जलान्ते गृहं तत्कथमपि न शक्यते तत्र गन्तुम् । तस्मात्तामपि मे भ्रातृपत्नीमत्रानय येन तस्याः प्रणम्याशीर्वादं गृह्णामि । स आह । भो मित्र अस्ति समुद्रान्ते रम्ये पुलिनप्रदेशेऽस्मद्गृहम् । तन्मम पृष्ठमारूढः सुखेनाकृतभयो गच्छ । सोऽपि तच्छ्रुत्वा सानन्दमाह । भद्र यद्येवं तत्किं विलम्ब्यते । त्वर्यताम् । अहं तव पृष्ठमारूढः । तथानुष्ठिते

---

१ Husband's brother (in Marathi दीर). २ For returning obligations. ३ The other world, that is, heaven. ४ Proximity, side. ५ Of me who was engaged in dispute. ६ I required so much time. ७ Brother's wife. ८ One who has drawn (चतुष्क) square or four cornered figures in chalk round the seat of guests. Cf Marathi: [illegible]. ९ One who has put on splendid jewels and rubies. १० One who has erected an ornamented arch of a gateway [illegible]. ११ Full of eagerness. १२ My brother's or friend's wife has said well. १३ Should avoid. १४ Like a weaver. १५ Wiser. १६ Towards himself. १७ Draws, ... the batten and threads of the weft. १८ Greedy, covetous. १९ Takes back or in return. २० A secret. २१ Causes to eat or feeds. २२ Of six sorts or kinds. २३ A sign of affection. २४ Walkers or dwellers in the forest. २५ Belonging to you. २६ In the water. २७ Even with difficulty. २८ So, therefore. २९ Compare जलान्ते above. ३० Pleasant; charming. ३१ A sandy-bank. ३२ Seated or mounted on my back. ३३ Without fear or doubt. ३४ Joyfully; gladly. ३५ Good friend, or sir. ३६ Then why is it delayed? why do you tarry? ३७ Here I mount your back. ३८ It being so done, accordingly.

गच्छन्नगाधजले[1] मकरमवलोक्य भयत्रस्तमना[2] वानरः प्रोवाच । भ्रातः शनैः शनैर्[3]गम्यताम् । जलकल्लोलैः[4] प्लावितं[5] मे शरीरम् । तदाकर्ण्य[6] मकरश्चिन्तयामास । असावगाधं[7] जलं प्राप्तो वशः[8] संजातो मत्पृष्ठगतस्तिलमात्रमपि चलितुं न शक्नोति[9] । तस्मात्कथयामि निजाभिप्रायं[10] येनाभीष्टदेवता[11]स्मरणं करोति । आह च । मित्र त्वं मया वधाय समानीतो भार्यावाक्येन विश्वास्य[12] । तत्स्मर्यताम्[13]भीष्टदेवता । स आह । भ्रातः किं मया तस्यास्तवापि चापकृतं[14] येन मे वधोपायश्चिन्तितः । मकर आह । भोस्तस्यास्[15]तावत्तव हृदयस्यामृतमयरसफलास्वादनमृष्टस्य[16] भक्षणार्थं दोहदः[17] संजातः । तेनैतदनुष्ठितम्[18] । वानर आह । भद्र[19] यद्येवं तत्किं त्वया मम तत्रैव न व्याहृतं[20] येन स्वहृदयं जम्बूकोटरे[21] सदैव मया सुगुप्तं[22] कृतं तद्भ्रातृपत्न्या अर्पयामि । त्वयाहं शून्यहृदयो[23]ऽत्र कस्मादानीतः । तदाकर्ण्य मकरः सानन्दमाह । भद्र यद्येवं तदर्पय मे हृदयं येन सा दुष्टपत्नी तद्भक्षयित्वानशनादुत्तिष्ठति[24] । अहं त्वां तमेव जम्बूपादपं प्रापयामि[25] । एवमुक्त्वा निवर्त्य[26] जम्बूतलम्[27]गात् । वानरोऽपि कथमपि जल्पितविविधदेवतोपचारपूजस्[28]तीरमासादितवान्[29] । ततश्च दीर्घतरचङ्क्रमणेन[30] तमेव जम्बूपादपमारूढश्चिन्तयामास । अहो लब्धाः[31] प्राणास्तावत् । अथवा साध्विदमुच्यते ।

१ Deep water. २ Being frightened at heart. ३ Gently; slowly. ४ With the billows or waves of water. ५ (*p. p.* of प्लु) covered; immersed. ६ Having heard. ७ Deep, unfathomable. ८ Has come within my power. ९ Is not able to move even the length of a *tila*, a grain of sesamum; not able to go even a little. १० Object; motive. ११ Wished for or desired deity. १२ Having caused you to put faith in me. १३ Be remembered. १४ Wronged or injured. १५ As to her. १६ Purified (मृष्ट) by tasting the fruits full of nectar-like juice. १७ A longing desire peculiar to women in pregnancy. १८ Done or practised. १९ A term of address meaning 'good or dear sir.' २० Spoken or said. २१ In the hollow of the *Jambu* tree. २२ Kept closely guarded or well protected. २३ Without the heart. २४ Will break her fast. २५ Take or carry (caus. of आप् with प्र). २६ Having returned. here the form of the causal is used for the primitive निवृत्य. २७ Foot or root of. २८ This is a Bahuvrihi compound-जल्पिता विविधदेवताभ्यो उपचारपूजा येन—Who had promised worship, &c. to various deities. २९ Reached. ३० With a jump longer or higher than usual. ३१ Oh joy! I have obtained my life.

न विश्वसेदविश्वस्ते विश्वस्तेपि न विश्वसेत् ।
विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति ॥ १३ ॥

तन्ममैतदन्यत्सुन्तर्निर्दिनं संजातम् । इति चिन्तयन्तमनन्तरं मकर आह । भो मित्र अर्पय तद्धृदयं यथा ते भ्रातृपत्नी भक्षयित्वानशनादुत्तिष्ठति । अथ विहस्य निर्भर्त्सयन्वानरस्तमाह । धिङ्मूर्ख विश्वासघातक किं कस्यचिद्द्विहृदयद्वयं भवति । तद्गम्यताम् । जम्बूवृक्षस्याधस्तान्न भूयोपि त्वयात्रागन्तव्यम् ।

उक्तं च यतः । सकृद्दुष्टं च यो मित्रं पुनः संधातुमिच्छति ।
स मृत्युमुपगृह्णाति गर्भमश्वतरी यथा ॥ १४ ॥

तच्छ्रुत्वा मकरः सविलक्षं चिन्तितवान् । अहो मयातिमूढेन किमस्य स्वचित्ताभिप्रायो निवेदितः । तद्यद्यसौ पुनरपि कथंचिद्विश्वासं गच्छति तद्भूयोपि विश्वासयामि । आह च । मित्र हास्येन मया तेभिप्रायो लब्धः । तस्या न किंचित्तव हृदयेन प्रयोजनम् । तदागच्छ प्राघुर्णकन्यायेनास्मद्गृहम् । ते भ्रातृपत्नी सोत्कण्ठा वर्तते । वानर आह । भो दुष्ट गम्यताम् । अधुना नाहमागमिष्यामि ।

१ This is an irregular form-it ought to be विश्वस्यात्. २ Untrustworthy. ३ Cuts down or destroys. The line means, the danger arising from confidence destroys the very roots of the confidence. ४ The day of birth. ५ This is irregular for चिन्तयन्तम्. ६ Having laughed. ७ Reviling or scolding. ८ The destroyer or abuser of confidence placed in him by others. ९ Has any one two hearts? १० From under. ११ Again. १२ He who has once proved to be very wicked. १३ To make friends with. १४ Meets with or cherishes. १५ Construe: यथाश्वतरी गर्भमनुगृह्य मृत्युमुपगृह्णाति तथा —Just as a mare having conceived a *garbha* dies. १६ With shame. १७ The object or motive in the mind or at heart. १८ Places confidence (in me). १९ I have put your mind to the test or tried your feelings by a joke. २० She has nothing whatsoever to do with your heart. २१ In the manner of

उक्तं च । बुभुक्षितः किं न करोति पापं
क्षीणा नरा निष्करुणा भवन्ति ।
आख्याहि भद्रे प्रियदर्शनस्य
न गङ्गदत्तः पुनरेति कूपम् ॥ १५ ॥

मकर आह । कथमेतत् । स आह ।

॥ कथा १ ॥

अस्ति कस्मिंश्चित्कूपे गङ्गदत्तो नाम मण्डूकराजः प्रतिवसति स्म । स कदाचिद्दायादैरुद्वेजितोऽरघट्टघटीमारुह्य निष्क्रान्तः । अथ तेन चिन्तितम् । यत्कथं तेषां दायादानां मया प्रत्यपकारः कर्तव्यः ।

उक्तं च । आपदि येनापकृतं येन च हसितं दशासु विषमासु ।
अपकृत्य तयोरुभयोः पुनरपि जातं नरं मन्ये ॥ १६ ॥

एवं चिन्तयन्बिले प्रविशन्तं कृष्णसर्पमपश्यत् । तं दृष्ट्वा भूयोऽप्यचिन्तयत् । यदेनं तत्र कूपे नीत्वा सकलदायादानामुच्छेदं करोमि ।

उक्तं च । शत्रुभिर्योजयेच्छत्रुं बलिना बलवत्तरम् ।
स्वकार्याय यतो न स्यात्काचित्पीडात्र तत्क्षये ॥ १७ ॥

तथा च । शत्रुमुन्मूलयेत्प्राज्ञस्तीक्ष्णं तीक्ष्णेन शत्रुणा ।
व्यथाकरं सुखार्थाय कण्टकेनेव कण्टकम् ॥ १८ ॥

१ What sin or wicked action will a hungry person not do? *i.e.*, he is capable of doing anything. २ Poor or wretched. ३ Thus runs the story, the story runs as follows. ४ The king of frogs. ५ When used after a present tense it gives it the force of the past: *e.g.*, प्रतिवसति स्म =dwelt, resided. ६ A kinsman (lit. दायमादत्ते इति=दायादः.) ७ Persecuted or tormented. ८ Having mounted the jar of a water machine. ९ Went or issued out. १० Shows the way in which he contemplated. ११ Retaliation. १२ I consider that man to be so blessed as to be born again, who takes vengeance upon both the persons, viz., him who has wronged him in times of difficulty and also him who has laughed at him in his adverse circumstances. १३ A black serpent. १४ Total destruction. १५ Should use one enemy to destroy another. १६ Since there is no harm in destroying him (the enemy). १७ Deadly. १८ As one thorn is removed or taken out by means of another.

स एवं परिभाव्य बिलद्वारं गत्वा समाहूतवान्। एह्येहि प्रियदर्शन एहि। तच्छ्रुत्वा सर्पश्चिन्तयामास। एष मामाह्वयति। स स्वजातीयो न भवति यतो नैषा सर्पवाणी। अन्ये केनापि सह मम मर्त्यलोके संधानं नास्ति। तदत्रैव दुर्गे स्थितस्तावद्वेद्मि कोऽयं भविष्यति। उक्तं च।

यस्य न ज्ञायते शीलं न कुलं न च संश्रयः।
न तेन संगतिं कुर्यादित्युवाच बृहस्पतिः॥ १९॥

आः कदाचित्कोऽपि मन्त्रवाद्यौषधिधरो वा मामाहूय बन्धने क्षिपति। अथवा कश्चित्पुरुषो वैरमाश्रित्य कस्यचिद्भक्षणार्थे मामाह्वयति। आह च। भोः को भवान्। स आह। अहं गङ्गदत्तो नाम मण्डूकाधिपतिस्त्वत्सकाशे मैत्र्यर्थमागतः। तच्छ्रुत्वा सर्प आह। भो अश्रद्धेयमेतद्यत्तृणानां वह्निना सह संगमः।

उक्तं च। यो यस्य जायते वध्यः स स्वप्नेऽपि कथंचन।
न तत्समीपमभ्येति तत्किमेवं प्रजल्पसि॥ २०॥

गङ्गदत्त आह। भोः सत्यमेतत्। स्वभाववैरी त्वमस्माकम्। परं परपरिभवात्प्राप्तोऽहं ते सकाशम्। उक्तं च।

---

१ Having considered or thought. २ To the entrance of the hole. ३ Called out (it is the *p. p.* Act. of ह्वे with आ). ४ Here is some one (calling out to me). ५ Of one's own caste or race. ६ This seems to be a misprint for अन्येन. ७ The world of mortals. ८ Connection, friendship ९ Fortress, fort-like hole. १० First, in the first place. ११ Who this may be. १२ Disposition; character. १३ Habitation, abode. १४ Perhaps १५ A person skilled in the art of enchanting snakes. १६ A person possessing a medical herb curing snake-bite. १७ Confines or imprisons (me). १८ Having entertained enmity or spite. १९ To give me to some one to eat with the intention of poisoning him. २० Near you. २१ For making friendship. २२ Incredible. २३ That there can the friendship between grass and fire, that is, between two things or persons naturally enimical to each other. २४ He, who is destined to be killed by another, does not go near him (that another) even in a dream: why do you then speak thus? २५ Natural enemy. २६ On account of having met with defeat or disrespect at the hands of enemies.

सर्वस्व[1]नाशे संजाते प्राणानाम[2]पि संशये ।
अपि[3] शत्रुं प्रणम्यापि रक्षेत्प्राणधनानि[4] च ॥ २१ ॥

सर्प आह । कथय कस्मात्ते परिभवः । स आह । दायादेभ्यः । सोऽप्याह । क्व ते आश्रयो[5] वाप्यां कूपे तडागे ह्रदे[6] वा । तत्कथय स्वाश्रयम् । तेनोक्तम् । पाषाणचयनिबद्धे[7] कूपे । सर्प आह । अहो अपदा[8] वयम् । तर्हि नास्ति मम तत्र प्रवेशः[9] । प्रविष्टस्य च तत्र स्थानं नास्ति यत्र[10] स्थितस्तव दायादान्व्यापादयामि । तद्गम्यताम् ।

उक्तं च । यच्छक्यं[11] ग्रसितुं ग्रस्यं ग्रस्तं परिणमेच्च यत् ।
हितं च परिणामे यत्तदाद्यं भूतिमिच्छता ॥ २२ ॥

गङ्गदत्त आह । भोः समागच्छ[12] त्वम् । अहं सुखोपायेन[13] तत्र ते प्रवेशं कारयिष्यामि । तथा तस्य मध्ये जलोपान्ते[14] रम्यतरं कोटरमस्ति । तत्र स्थितस्त्वं लीलया[15] दायादान्व्यापादयिष्यसि । तच्छ्रुत्वा सर्पो व्यचिन्तयत् । अहं तावत्परिणतवयाः[16] । कदाचित्कथंचिन्[17]मूषकमेकं प्राप्नोमि । तत्सुखावहो[18] जीवनोपायो[19]ऽयमनेन कुलाङ्गारेण[20] मे दर्शितः । तद्गत्वा तान्मण्डूकान्भक्षयामीति । अथवा साध्विदमुच्यते ।

यो हि प्राणपरिक्षीणः[21] सहायपरिवर्जितः[22]
स हि सर्वसुखोपायां[23] वृत्ति[24]मावरयेद्[25]बुधः ॥ २३ ॥

---

१ The destruction of every thing one has. २ Even when one's life is in danger. ३ This अपि has no meaning, it is only an expletive. ४ प्राणांश्च धनानि च—Life and wealth. ५ Residence. ६ A ditch or deep lake. ७ In a well built with a collection of stones. ८ Without feet or having no feet. ९ I can have no access there. १० Remaining where or in which place. ११ That which is fit to be eaten, or which if eaten will be digested should be eaten; and also that which will be beneficial in the end should be eaten by him who wishes to prosper. १२ Come along. १३ With an easy remedy; easily. १४ Near the water. १५ With ease. १६ Advanced in age. १७ Rarely and with difficulty. १८ Bringing on happiness. १९ A remedy of gaining my livelihood. २० An enemy of his family. २१ He whose life is well nigh reduced to nothing. The compound ought to be परिक्षीणप्राणः. २२ Without help. २३ Which is a means of getting every happiness. २४ Livelihood. २५ Should choose.

एवं विचिन्त्य तमाह । भो गङ्गदत्त यद्येवं तदग्रे[1] भव येना[2]गच्छामि । गङ्गदत्त आह । भोः प्रियदर्शन अहं त्वां सुखोपायेन तत्र नेष्यामि स्थानं च दर्शयिष्यामि । परं त्वयास्मत्परिजनो रक्षणीयः । केवलं यानहं दर्शयामि त्वया त एव भक्षणीया इति । सर्प आह । सांप्रतं[4] त्वं मे मित्रं जातम् । तन्न भेतव्यम् । तव वचनेन[5] भक्षणीयास्ते दायादाः । एवमुक्त्वा बिलान्निष्क्रम्य तमालिङ्ग्य च तेनैव सह प्रस्थितः[6] । अथ कूपमासाद्यारघट्टघटिकामार्गेण सर्पस्तेनात्मना[7] स्वालयं नीतस्ततश्च गङ्गदत्तेन कृष्णसर्पं कोटरे धृत्वा[9] दर्शितास्ते दायादाः । ते च तेन शनैःशनैर्भक्षिताः । अथ मण्डूकाभावे[10] सर्पेणाभिहितम् । भद्र निःशेषितास्ते[11] रिपवस्तत्प्रयच्छान्यन्मे किंचिद्भोजनं यतोऽहं त्वयात्रानीतः । गङ्गदत्त आह । भद्र कृतं त्वया मित्रकृत्यम्[12] । तत्सांप्रतमनेनैव घटिकायन्त्रमार्गेण गम्यतामिति । सर्प आह । भो गङ्गदत्त न सम्यग्[13]भिहितं त्वया । कथमहं तत्र गच्छामि । मदीयं बिलदुर्गमन्येन विरुद्धं[14] भविष्यति । तस्मादत्रस्थस्य[15] मे मण्डूकमेकैकं[16] स्ववर्गीयं[17] प्रयच्छ नो[18] चेत्सर्वानपि भक्षयिष्यामीति । तच्छ्रुत्वा गङ्गदत्तो व्याकुलमना[19] व्यचिन्तयत् । अहो किमेतन्मया कृतं सर्पमानयता तद्यदि निषेधयिष्यामि[20] तत्सर्वानपि भक्षयिष्यति । अथवा युक्तमुच्यते[21] ।

अमित्रं कुरुते[22] मित्रं वीर्याभ्यधिकमात्मनः[23] ।
स करोति न संदेहः[24] स्वयं हि विषभक्षणम् ॥ २४ ॥

---

१ Walk forth; go before me. २ So that. ३ A servant. ४ Now. ५ At your bidding. ६ Set out. (It is the *p. p.* of स्था with प्र 1 A.) ७ Of himself, of his own accord. ८ To his own abode. ९ Having kept or placed in his hollow or residence. १० Absence. ११ All your enemies (the relations) have been killed to a man. १२ The business of a friend. १३ Well, properly. १४ Must have been occupied by another. १५ To me who am here. १६ One every day. १७ Of your tribe or kind. १८ If not, otherwise. १९ Bewildered at heart. २० [illegible] or object to. २१ Properly; aptly. २२ Understand यः as the subject of कुरुते. २३ Superior to oneself in valour. २४ There is no doubt that he himself eats poison.

तत्प्रयच्छाम्यस्यैकं[1] दिनं प्रति सुहृदम् । उक्तं च ।

सर्वस्वहरणे युक्तं शत्रुं बुद्धियुता[2] नराः ।
तोषयन्त्यल्पदानेन वाडवं सागरो यथा ॥ २५ ॥

तथा च । यो दुर्बलो[3] ह्यणुमपि याच्यमानो
बलीयसा यच्छति नैव साम्ना ।
प्रयच्छते नैव च दर्श्यमानं
खारीं स चूर्णस्य पुनर्ददाति ॥ २६ ॥

तथा च । सर्वनाशे[4] समुत्पन्ने अर्धं त्यजति पण्डितः ।
अर्धेन[5] कुरुते कार्यं सर्वनाशो हि दुस्तरः[6] ॥ २७ ॥

एवं निश्चित्य नित्यमेकैकमादिशति[7] । सोऽपि तं भक्षयित्वा तस्य परोक्षेऽन्यानपि[8] भक्षयति । अथवा साध्विदमुच्यते ।

यथा हि मलिनैर्वस्त्रैर्यत्र[9] तत्रोपविश्यते ।
एवं चलितवृत्तस्तु[10] वृत्तशेषं[11] न रक्षति ॥ २८ ॥

अथान्यदिने तेनापरान्मण्डूकान्भक्षयित्वा गङ्गदत्तसुतः पृथुदत्तो भक्षितः । तं भक्षितं मत्वा[12] गङ्गदत्तस्तारस्वरेण[13] धिग्धिक्प्रलापपरः[14] कथंचिदपि न विरराम[15] । ततः पत्न्याभिहितः ।

किं क्रन्दसि दुराक्रन्द[16] स्वपक्षक्षयकारक[17] ।
स्वपक्षस्य क्षये जाते त्वत्त्राणं[18] कः करिष्यति ॥ २९ ॥

---

१ One every day. २ Persons endowed with talent satisfy an enemy ready to take away everything by means of a small gift, just as the sea does the submarine fire. ३ That weak man who being asked for a particle of flour by a powerful one, does not give it quietly and also does not give that which is being pointed out, gives him afterwards a Khári, that is, a maund and a half. ४ When the destruction of the whole is imminent. ५ He satisfies his immediate want with the half of it. ६ Irreparable. ७ Orders or shows. ८ In (his) absence. ९ One can sit anywhere he pleases not caring that his clothes will be soiled. १० Just so a person who has fallen off from a virtuous course of conduct. ११ Does not (care to) keep straight the rest of his *i. e.*, his future, conduct. १२ Having known or learnt. १३ With a loud scream. १४ Crying out fie! fie! १५ Did not stop at all, continued screaming. १६ Not worthy of being implored. १७ One who brings about the destruction of his race or family (पक्ष). १८ Protection.

तदद्यापि विचिन्त्यतामात्मनो निष्क्रमणम्[1]स्य वधोपायश्च । अथ गच्छता[2] कालेन सकलमपि कवलितं[3] मण्डूककुलम् । केवलमेको गङ्गदत्तस्तिष्ठति । ततः प्रियदर्शनेन भणितम् । भो गङ्गदत्त बुभुक्षितो[4]ऽहम् । निःशेषिताः सर्वे मण्डूकाः । तद्दीयतां मे किंचिद्भोजनं यतोऽहं त्वयात्रानीतः । स आह । भो मित्र न त्वया[5] विषये मयावस्थितेन[6] कापि चिन्ता कार्या । तद्यदि मां प्रेषयसि ततोऽन्यकूपकाना[7]मपि मण्डूकानाश्वास्या[8]त्रानयामि । स आह । मम[9] तावत्त्वमभक्ष्यो भ्रातृस्थाने[10] । तद्यद्येवं करोषि तत्सांप्रतं पितृस्थाने भवसि । तदेवं क्रियतामिति । सोऽपि तदाकर्ण्यारघट्टघटिकामाश्रित्य[11] विविधदेवतोपकल्पितोपयाचित[12]स्तस्मात्कूपाद्विनिष्क्रान्तः[13] । प्रियदर्शनोऽपि तदाकाङ्क्षया[14] तत्रस्थः प्रतीक्षमाण[15]स्तिष्ठति । अथ चिरादनागते[16] गङ्गदत्ते प्रियदर्शनोऽन्यकोटरनिवासिनीं गोधामुवाच[17] । भद्रे क्रियतां स्तोकं[18] साहाय्यम् । त्वया सह परिचित[19]मास्ते । तद्गत्वा मण्डूकमन्विष्य[20] क्वचिज्जलाशये[21] गङ्गदत्ताय मम संदेशं[22] कथय । येनागम्यता[23]मेकाकिनापि द्रुततरं[24] यद्यन्ये मण्डूका नागच्छन्ति । अहं त्वया विना नात्र वस्तुं शक्नोमि । तथा यद्यहं तव विरुद्धमा[25]चरामि तत्सुकृतमन्तरे मया विधृतम्[26] । गोधापि तद्वचनाद्गङ्गदत्तं द्रुततरमन्विष्याह । भद्र गङ्गदत्त स तव सुहृत्प्रियदर्शनस्तव मार्गं समीक्षमाण[27]स्तिष्ठति । तच्छीघ्रमागम्यतामिति । अपरं च तेन तव विरूपकरणे[28] सुकृतमन्तरे धृतम् । तन्निःशङ्केन मनसागम्यताम् । तदाकर्ण्य गङ्गदत्त आह ।

---

१ Issuing or going out. २ In course of time or as time rolled on. ३ Devoured; lit. made mouthfuls of. ४ (*p. p.* of the Desi. of भुज 7 A.) Hungry. ५ In this respect. ६ So long as I live. This is an instance of the Instrumental Absolute. ७ Of small wells or ponds. ८ Having encouraged or persuaded. ९ As to myself. १० In place of a brother. ११ Having mounted. १२ Who promised vows to various deities. १३ Got out. १४ With eagerness for his return. १५ Waiting for him. १६ When Gangadatta did not come back for a long time. १७ An alligator, a lizard. १८ A little. १९. Acquaintance— it being equal to परिचय. २० Having searched for. २१ In a pool or reservoir of water. २२ Word; message. २३ Here येन = that, to say. २४ Quickly. २५ Act against your life. २६ I have pledged my word (not to do so). २७ Awaiting your return. Cf. Maráthi वाट पहाणें. २८ As regards doing you any harm or injury.

बुभुक्षितः किं न करोति पापं
क्षीणा नरा निष्करुणा भवन्ति ।
आख्याहि भद्रे प्रियदर्शनस्य
न गङ्गदत्तः पुनरेति कूपम् ॥ ३० ॥

एवमुक्त्वा स तां विसर्जयामास[१] । तद्भो दुष्ट जलचर । अहमपि गङ्गदत्त इव कथंचिद्दृष्टापायोऽपि[२] त्वद्गृहं न यास्यामि । तच्छ्रुत्वा मकर आह । भो मित्र नैतद्युज्यते ते कर्तुम् । सर्वथैव मे कृतघ्नतादोषमपनय[३] मद्गृहागमनेन अथवात्राहमनशनात्[४] प्राणत्यागं तवोपरि करिष्यामि[५] । वानर आह । मूढ किमहं लम्बकर्णो गर्दभो यो दृष्टापायमपि[६] तत्रैव गत्वा मृतः ।

आगतश्च गतश्चैव[७] दृष्ट्वा सिंहपराक्रमम् ।
अकर्णहृदयो[८] मूर्खस्तत्र मृत्युवशं गतः[९] ॥ ३१ ॥

मकर आह । भद्र स को लम्बकर्णो गर्दभः । कथं दृष्टापायोऽपि मृतः । तन्मे निवेद्यताम् । वानर आह ।

॥ कथा २ ॥

अस्ति कस्मिंश्चिद्वनोद्देशे[१०] करालकेसरो नाम सिंहः प्रतिवसति स्म । तस्य च धूसरको नाम शृगालः[११] सदैवानुयायी[१२] परिचारकोऽस्ति[१३] । अथ कदाचित्तस्य हस्तिना सह युद्ध्यमानस्य[१४] शरीरे प्रहाराः[१५] संजाताः पदमेकमपि[१६] चलितुं न शक्नोति । तस्याचलनाच्च[१७] धूसरकः क्षुत्क्षामकण्ठो[१८] दौर्बल्यं गतः[१९] । अन्यस्मिन्नहनि[२०] तमवोचत् । स्वामिन् बुभुक्षया पीडितोऽहं पदात्पदमपि[२१] चलितुं न शक्नोमि । तत्कथं ते शुश्रूषां[२२] करोमि । सिंह आह । भो गच्छान्वे-

१ Dismissed; sent. २ Who has seen that a harm was meant. ३ Free me entirely from the charge of ingratitude by coming to my house. ४ Want of eating; fasting. ५ Shall lay (the guilt of) suicide on you. ६ Danger. ७ Came and went. ८ Without ears and heart. ९ Fell a victim to death; died. १० In a certain part of the forest. ११ A jackal. १२ Always in attendance. १३ A servant. १४ While engaged in fighting with an elephant. १५ Strokes; wounds. १६ Even one step. १७ By reason of his non-movement or inactivity. १८ With the throat parched with hunger. १९ Became weak. २० One day or on another day. २१ From one step to another, even a step. २२ Service, waiting upon.

पय किंचित्सत्त्वं येनैतामवस्थां गतोऽपि व्यापादयामि । तदाकर्ण्य शृगालोऽन्वेषयन्कंचित्समीपवर्तिनं ग्राममासादितवान् । तत्र लम्बकर्णो नाम गर्दभस्तडागोपान्ते प्रविरलदूर्वाङ्कुरान्कृच्छ्रादास्वादयन्दृष्टः । ततश्च समीपीभूय तेनाभिहितः । माम नमस्कारोऽयं मदीयः संभाव्यताम् । चिराद्दृष्टोऽसि । तत्किमेवं दुर्बलः । स आह । भगिनीसुत किं कथयामि । रजकोऽतिनिर्दयोऽतिभारेण मां दुनोति । घासमुष्टिमपि न प्रयच्छति । केवलं दूर्वाङ्कुरान्धूलिमिश्रितान्भक्षयामि । तत्कुतो मे शरीरे पुष्टिः । शृगाल आह । माम यद्येवं तदस्ति रमणीयतरप्रदेशो मरकतसदृशशष्पप्रायो नदीसनाथः । तदागच्छ मया सह येन सुखेन सुभाषितगोष्ठीसुखमनुभवावः । लम्बकर्ण आह । भो भगिनीसुत युक्तमुक्तं भवता । परं वयं ग्राम्याः पशवोऽरण्यचारिणां वध्यास्तत्किं तेन भव्यप्रदेशेन । शृगाल आह । माम मैवं वद । मद्भुजपञ्जररक्षितः स देशः । नास्ति कश्चित्तत्र परः । परमनेनैव दोषेण रजककदर्थितास्तत्र तिस्रो रासभ्योऽनाथाः सन्ति । ताश्च पुष्टिमापन्ना यौवनोत्कटा इदं मामूचुः । यदि त्व-

१ A game, an animal. २ Though reduced to this condition. ३ Being or situated in the neighbourhood. ४ p. p. p. of the caus. of सद् with आ) Reached, arrived at. ५ The sprouts of Durva thinly grown. ६ Eating or grazing with difficulty. ७ Having approached. ८ Was addressed. ९ Let, oh uncle, this my salutation be honoured or duly accepted. १० You are seen after a long time. ११ A washerman. १२ Tires or wearies. १३ A handful of grass. १४ Mixed up with dust. १५ Fatness; plumpness. १६ Pleasanter, more charming. १७ Abounding in grass as green as emerald. १८ Containing a river in it. १९ The pleasure derived from conversation on good subjects. २० Belonging to or living in a village; domestic, as opposed to अरण्यचारिन्, wild. २१ Fit to be killed. २२ What is the use or good of that happy (भव्य) region? २३ Protected by my arms, that is, by my prowess or might. २४ Another person or enemy. २५ By reason of this very ill or bad luck described by you. २६ Ill-treated by washermen. २७ Female asses. २८ Without their lords or without husbands. २९ Become fat and plump. ३० Mad or furious with youth.

अस्माकं मन्त्री मातुल[१]स्तद्यदा किंचिद्ग्रामान्तरं[२] गत्वास्मद्योग्यं[३] कंचित्पशुमानय । तदर्थं[४] त्वामहं तत्र नयामि । अथ शृगालवचनानि श्रुत्वा कामपीडिताङ्ग[५]स्तमवोचत् । भद्र यद्येवं तदग्रे भव येनागच्छामि । अथवा साध्विदमुच्यते

[६]नामृतं न विषं किंचिदेकां मुक्त्वा नितम्बिनीम् ।
यस्याः सङ्गेन जीव्येत म्रियेत च वियोगतः ॥ ३२ ॥

तथा च[७] । यासां नाम्नापि कामः स्यात्संगमं दर्शनं विना ।
तासां दृक्संगमं प्राप्य यन्न द्रवति कौतुकम् ॥ ३३ ॥

तथानुष्ठिते[८] शृगालेन सह सिंहान्तिकमागतः । सिंहोऽपि व्यथाकुल[९]स्तं दृष्ट्वा यावत्[१०]समुत्तिष्ठति तावद्रासभः पलायितुमारब्धः । अथ तस्य पलायमानस्य सिंहेन तलप्रहारो[११] दत्तः । स च मन्दभाग्यस्य व्यवसाय इव व्यर्थतां गतः[१२] । अत्रान्तरे[१३] शृगालः कोपाविष्ट[१४]स्तमुवाच । भोः किमेवंविधः[१५] प्रहारस्ते यद्गर्दभोऽपि तव पुरतो बलाद्[१६]गच्छति । तत्कथं गजेन सह युद्धं करिष्यसि । तद्दृष्टं[१७] ते बलम् । अथ विलक्षस्मितं[१८] सिंह आह । भोः किमहं करोमि । मया न क्रमः सज्जीकृत[१९] आसीत् । अन्यथा गजोऽपि मत्क्रमाक्रान्तो[२०] न गच्छति । शृगाल आह । अद्याप्येकवारं[२१] तवान्तिके तमानेष्यामि । परं त्वया सज्जीकृतक्रमेण

१ Maternal uncle २ Another village (अन्यग्रामः, Kar. Comp.). ३ Fit for, or suitable to, us. ४ For their sake (तासां अर्थं, Gen Tat Comp.) ५ With the mind (अंग) afflicted by love (काम) ६ There is no nectar or poison except in a woman, by union with whom one can live or by separation from whom one is sure to die. ७ It is a wonder if one does not melt by actually seeing those (women), the mere mention of whom inflames passion even without union or sight. ८ When it was so done; accordingly ९ Overcome with affliction १० यावत्–तावत्, no sooner than, as soon as. ११ A stroke with the palm of the hand १२ And it proved fruitless like the exertions made by an unfortunate person. १३ In the meanwhile. १४ Full of indignation. १५ How is your stroke so (weak). १६ Forcibly, against your will १७ So then your valour or strength is seen, i. e., I see that you have no strength enough to kill even an ass. १८ With a smile of shame visible on his face १९ I was not ready to spring upon him. २० When once in my power. २१ For once, for one time.

स्थातव्यम्। सिंह आह। यो मां प्रत्यक्षतया दृष्ट्वा गतः स पुनः कथमत्रागमिष्यति। तदन्यं कमपि सत्त्वमन्विष्यताम्। शृगाल आह। किं तवानेन व्यापारेण। त्वं केवलं सज्जितकर्मा तिष्ठ। तथानुष्ठिते शृगालोऽपि यावद्रासभमार्गेण गच्छति तावत्तत्रैव स्थाने चरन्दृष्टः। अथ शृगालं दृष्ट्वा रासभः प्राह। भो भगिनीसुत शोभनस्थाने त्वयाहं नीतः। द्राङ्मृत्युवशं गतः। तत्कथय किं तत्सत्त्वं यस्यातिरौद्रवज्रसदृशकरप्रहारादहं मुक्तः। तच्छ्रुत्वा प्रहसञ्शृगाल आह। भद्र रासभी त्वामायान्तं दृष्ट्वा सानुरागमालिङ्गितुं समुत्थिता। त्वं च कातरत्वान्नष्टः। सा पुनर्न शक्ता त्वां विना स्थातुम्। तया तु नश्यतस्तेऽवलम्बनार्थं हस्तः क्षिप्तो नान्यकारणेन। तदागच्छ। सा त्वत्कृते प्रायोपवेशनोपविष्टा तिष्ठति। एतद्वदति। यल्लम्बकर्णो यदि मे भर्ता न भवति तदहमग्नौ जले वा प्रविशामि विषं वा भक्षयामि। पुनस्तस्य वियोगं सोढुं न शक्नोमि। तत्प्रसादं कृत्वा तत्रागम्यतामिति। नो चेत्तव स्त्रीहत्या भविष्यति। अपरं च भगवान्कामः कोपं तव करिष्यति। उक्तं च।

स्त्रीमुद्रां मकरध्वजस्य महतीं सर्वार्थसंपत्करीं
ये मूढाः प्रविहाय यान्ति कुधियो मिथ्याफलान्वेषिणः।

१ Actually. २ What have you to do with this business? ३ Along the way taken by the ass. ४ (Understand सः or रासभः as the subject of दृष्टः) चरन्-Grazing. ५ To a good place (said ironically). ६ I would have instantly perished (if I had not fled). ७ From the stroke of the hand resembling a very terrible adamant. ८ Smiling. ९ Full of the passion of love. १० Got up. ११ Fled through timidity or fear. १२ For seizing hold of you who were fleeing. १३ Put or stretched forth. १४ Starving herself to death. १५ But. १६ Doing or showing me favour, being pleased. १७ You will be guilty of a woman-murder. १८ Moreover. १९. Those foolish and ill-advised (कुधियः) persons who having left off the great banner of Cupid in the shape of woman (स्त्रीमुद्रां) which accomplishes all objects, go in search of vain pursuits, are by that very Cupid, mercilessly struck and turned into ascetics (the naked ones and the scull-bearers), and some again are made to wear red garments, some matted hair and some human sculls.

ते तेनैव निहत्य निर्दयतरं नग्नीकृता मुण्डिताः
केचिद्रक्तपटीकृताश्च जटिलाः कापालिकाश्चापरे ॥ ३४ ॥

अथासौ तद्वचनं श्रद्धेयतया[1] श्रुत्वा भूयोऽपि तेन सह प्रस्थितः । अथवा साध्विदमुच्यते ।

जानन्नपि[2] नरो दैवात्प्रकरोति विगर्हितम् ।
कर्म किं कस्यचिल्लोके गर्हितं रोचते कथम् ॥ ३५ ॥

अत्रान्तरे संजातकोपेन सिंहेन स लम्बकर्णो व्यापादितः । ततस्तं हत्वा शृगालं रक्षपालं[3] निरूप्य[4] स्वयं स्नानार्थं नद्यां गतः । शृगालेनापि लौल्योत्सुक्यात्[5] तस्य कर्णहृदयं[6] भक्षितम् । अत्रान्तरे सिंहो यावत्स्नात्वा कृतदेवार्चनः[7] प्रतर्पितपितृगणः[8] समायाति तावत्कर्णहृदयरहितो[9] रासभस्तिष्ठति । तं दृष्ट्वा कोपपरीतात्मा[10] सिंहः शृगालमाह । आः पाप किमिदमनुचितं[11] कर्म समाचरितं[12] यदस्य कर्णसहितं[13] हृदयं भक्षितम् । शृगाल आह । स्वामिन् मा मैवं वद यत्कर्णहृदयरहितोऽयं रासभ आसीत् । तेनेहागत्य त्वामवलोक्य भूयोऽप्यागतः । अथ तद्वचनं श्रद्धेयं[14] श्रुत्वा सिंहस्तेनैव सह संविभज्य[15] निःशङ्कितमनास्तं[16] भक्षितवान् ।

अतोऽहं ब्रवीमि ।

आगतश्च गतश्चैव दृष्ट्वा सिंहपराक्रमम् ।
अकर्णहृदयो मूर्खस्तेन मृत्युवशं गतः ॥ ३६ ॥

तन्मूर्ख कपटं कृतं त्वया । परं युधिष्ठिरेणेव सत्यवचनेन विनाशितम्[17] । अथवा साध्विदमुच्यते ।

१ Faithfully. २ A person though wise (जानन) does any censurable action only through misfortune. How else (कथं) will any body in this world like a censurable thing (for its own sake) ? ३ A guard, a sentinel. ४ Having appointed. ५ Through eagerness and greed. ६ A समाहारद्वंद्व. ears and heart. ७ Who had worshipped gods. ८ Who had satisfied the manes by offering libations of water. ९ Without; wanting in. १० Angry at heart. ११ Unbecoming. १२ Practised, done. १३ Together with the ears. १४ Reliable. १५ Having shared with him १६ Without any doubt or fear at heart. १७ Frustrated.

स्वार्थमुत्सृज्य यो दम्भी सत्यं ब्रूते स मन्दधीः ।
स स्वार्थाद्भ्रश्यते नूनं युधिष्ठिर इवापरः ॥ ३७ ॥

मकर आह । कथमेतत् । स आह ।

॥ कथा

कस्मिंश्चिदधिष्ठाने कुम्भकारः प्रतिवसति स्म । स कदाचित्प्रमदाधमत्त-कर्परतीक्ष्णाग्रस्योपरि महता वेगेन धावन्पतितः । ततः कर्परकोट्या पाटि-तललाटो रुधिरप्लावितनतुः कृच्छ्रादुत्थाय स्वाश्रयं गतः । ततश्चापथ्यसेव-नात्स प्रहारस्तस्य करालतां गतः कृच्छ्रेण नीरोगतां नीतः । अथ कदाचि-द्दुर्भिक्षपीडिते देशे स कुम्भकारः क्षुत्क्षामकण्ठः कैश्चिद्राजसेवकैः सह देशा-न्तरं गत्वा कस्यापि राज्ञः सेवको बभूव । सोऽपि राजा तस्य ललाटे विक-रालं प्रहारक्षतं दृष्ट्वा चिन्तयामास । यद्वीरः पुरुषः कश्चिदयम् । नूनं तेन ललाटपट्टे सम्मुखप्रहारः । अतस्तं समानादिभिः सर्वेषां राजपुत्राणां सकाशा-द्विशेषप्रसादेन पश्यति । तेऽपि राजपुत्रास्तस्य तं प्रसादातिरेकं पश्यन्तः पर-मेर्ष्याधर्मं वहन्तो राजभयान्न किंचिदूचुः । अथान्यस्मिन्नहनि तस्य भूप-

१ That hypocrite, who, having left off or disregarded his own benefit, speaks the truth, is a block-head, and he indeed loses his benefit like another युधिष्ठिर. २ A potter. ३ Intoxicated. ४ Upon the sharp end of a half-broken earthen pot. ५ With speed or velocity. ६ End. ७ Whose forehead was torn or split up. ८ With the body covered with blood. ९ With difficulty. १० By eating unwholesome food. ११ Wound, scar. १२ Festered. १३ Was cured or healed. १४ When the country became famine-striken. १५ With the throat parched with hunger. १६ Terrible. १७ The wound caused by a blow. १८ Powerful, stong. १९ In consequence of that. २० The tablet of the forehead. २१ This is I think a misprint for संमुख which means " in the front." २२ Honour, respect. २३ Looked upon him with greater favour than on all other राजपुत्र (warriors or Rajputs).
jealousy.

तेर्वीरसंभावनायां क्रियमाणायां विग्रहे समुपस्थिते प्रकल्प्यमानेषु गजेषु सन्नह्यमानेषु वाजिषु योधेषु प्रगुणीक्रियमाणेषु तेन भूभुजा स कुलालः प्रस्तावानुगतं पृष्टो निर्जने । भद्र राजपुत्र कस्मिन्संग्रामे प्रहारोऽयं ललाटे लग्नः । स आह । देव नायं शस्त्रप्रहारः । कुलालोऽहं प्रकृत्या । मद्गेहेऽनेकखर्पराण्यासन् । अथ कदाचिन्मद्यपानं कृत्वा निर्गतः प्रधावन्खर्परोपरि पतितः । तस्य प्रहारविकारोऽयं मे ललाटे एवं विकरालतां गतः । तदाकर्ण्य राजा सव्रीडमाह । अहो वञ्चितोऽहं राजपुत्रानुकारिणानेन कुलालेन । तद्दीयतां द्रागेतस्य चन्द्रार्धः । तथानुष्ठिते कुम्भकार आह । मा मैवं कुरु । पश्य मे रणे हस्तलाघवम् । राजा प्राह । भोः सर्वगुणसंपन्नो भवान् । तथापि गम्यताम् । उक्तं च ।

शूरश्च कृतविद्यश्च दर्शनीयोऽसि पुत्रक ।
यस्मिन्कुले त्वमुत्पन्नो गजस्तत्र न हन्यते ॥ ३८ ॥

॥ कथा ४ ॥

कुलाल आह । कथमेतत् । राजा प्राह । कस्मिंश्चिद्वनोद्देशे सिंहदंपती प्रतिवसतः स्म । अथ सिंही पुत्रद्वयमजीजनत् । सिंहोऽपि नित्यमेव मृगान्व्यापाद्य सिंह्यै ददाति । अथ कदाचित्तेन किमपि नासादितम् । वने

१ When the king was doing honour to the warriors in his service according to their merits. २ When hostilities arose. ३ While the elephants were being prepared, the horses were being caparisoned and the soldiers were being equipped. ४ By that king. ५ The potter. ६ With respect to the opportunity that had presented itself. ७ In private, secretly. ८ A wound caused by a weapon. ९ By birth. १० In my house. ११ Gone abroad. १२ The wound caused by the blow. १३ With shame. १४ Deceived. १५ Resembling a warrior. १६ Quickly at once. १७ To give अर्धचंद्र or चन्द्रार्ध, as in the text, is to seize a person by the neck and turn him out. १८ Skill of arms. १९ Endowed with all qualities. २० कृतविद्य means, One who has studied a science or lore. २१ Handsome. २२ In that family (here तत्र=तस्मिन्कुले). २३ A couple; a pair. २४ Gave birth to two cubs. २५ Animals; game in general.

भ्रमतो[१]पि तस्य रविरस्तंगतः । अथ तेन स्वगृहमागच्छता शृगालशिशुः[२] प्राप्तः । स च बालकोऽयमिति मत्वा यत्नेन दंष्ट्रामध्यगतं[३] कृत्वा सिंह्या जीवन्तमपि समर्पितवान्[४] । ततः सिंह्याभिहितम् । भोः कान्त आनीतं किंचिदस्माकं भोजनम् । सिंह आह । प्रिये मयाद्येनं शृगालशिशुं परित्यज्य[५] न किंचित्सत्त्वमासादितम् । स च मया बालो[६]ऽयमिति मत्वा न व्यापादितः । उक्तं च ।

स्त्री[७]लिङ्गिविप्रबालानां प्रहर्तव्यं न कर्हिचित् ।
प्राणत्यागेऽपि संजाते विश्वस्तानां विशेषतः ॥ ३९ ॥

इदानीमेनं भक्षयित्वा[८] पथ्यं कुरु । प्रभाते[९]ऽन्यदुपार्जयिष्यामि[१०] । साह । भोः कान्त त्वया बालकोऽयमिति मत्वा न व्यापादितः । तदहं कथं स्वोदरार्थे[११] व्यापादयामि । उक्तं च ।

अकृत्यं[१२] नैव कृत्यं स्यात्प्राणत्यागेऽपि संस्थिते ।
न च कृत्यं विमुञ्चेत एष धर्मः सनातनः ॥ ४० ॥

तस्मान्ममायं तृतीयः पुत्रो भविष्यति । इत्युक्त्वा तमपि स्वस्तनक्षीरेण[१३] परां पुष्टिमनयत् । एवं ते त्रयोऽपि शिशवः परस्परमज्ञातजातिविशेषा[१४] एकत्र विहारिणो[१५] बाल्यसमयं[१६] निर्वाहयन्ति[१७] । अथ कदाचित्तत्र वने भ्राम्य[१८]न्वनगजो दृष्टः । तद्दृष्ट्वा तौ सिंहसुतौ द्वावपि कुपिताननौ[१९] तं प्रति प्रचलितौ[२०] यावत्तावत्तेन

१ While yet he was wandering (in the forest). २ The young one. ३ Placing it carefully between his jaws so as not to hurt it. ४ Handed over; delivered. ५ Excepting; without. ६ Thinking it was too young to be killed. ७ Even when life is in danger, one should never kill a woman, one who bears on his person the sacred लिङ्ग, a Bráhmana and a child and particularly those who have put faith in one. ८ Take your meals using this as a condiment. ९ In the morning. १० Shall procure. ११ For the shake of my belly. १२ Even when life is in imminent danger, that which is unfit to do will not be fit to do; nor should one avoid doing what should be done—this is the time-honoured duty of all. १३ With the milk of her own breast. १४ Not knowing the difference between the castes of each other. १५ Sporting; playing. १६ Passed their childhood. १७ Wandering. १८ A wild elephant. १९ With angry looks. २० Marched or ran upon him.

शृगालसुतेनाभिहितम्। अहो गजोऽयं युष्मत्कुलशत्रुः[1]। तन्न गम्यतेऽस्याभि-मुखम्[2]। एवमुक्त्वा गृहं प्रधावितः। तावपि ज्येष्ठभ्रातृभङ्गान्[3]निरुत्साहतां गतौ[4]। अथवा साध्विदमुच्यते।

एकेनापि सुधीरेण सोत्साहेन रणं प्रति।
सोत्साहं जायते सैन्यं भग्ने भङ्गमवाप्नुयात्॥ ८१ ॥
अत एव हि वाञ्छन्ति भूपा योधान्महाबलान्।
शूरान्धीरान्कृतोत्साहान्वर्जयन्ति च कातरान्॥ ८२ ॥

ततो द्वावपि पितरौ प्राप्तौ विहसन्तौ[7] ज्येष्ठभ्रातृचेष्टितमूचतुर्यथा[8] गजं दृष्ट्वा दूरतोऽपि नष्टः[9]। सोऽपि तदाकर्ण्य कोपाविष्टः प्रस्फुरिताधरपल्लवस्ताम्रलोचन-स्त्रिशिखां[10][11] भ्रुकुटिं कृत्वा तौ[12] निर्भर्त्सयन्परुषतरवचनान्युवाच। ततः सिंह्यै-कान्ते नीत्वा प्रबोधितः। वत्स मैवं कदाचिज्जल्प भवदीयलघुभ्रातरावेतौ। अथासौ प्रभूतकोपाविष्टस्तामित्युवाच। किमहमेताभ्यां शौर्यरूपेण विद्या-भ्यासेन वा न्यूनो येन मामुपहसतः। तन्मयावश्यमेतौ व्यापादनीयौ। तदा-कर्ण्य सिंही तस्य जीवितमिच्छन्ती प्राह।

शूरोऽसि कृतविद्योऽसि दर्शनीयोऽसि पुत्रक।
यस्मिन्कुले त्वमुत्पन्नो गजस्तत्र न हन्यते॥ ८३ ॥

१ The enemy of your race. २ Before him or in front of him. ३ On account of the fright taken by the eldest. ४ Became void of spirit or energy. ५ Even by means of one bold and energetic leader in a battle the whole army becomes enspirited, but when he breaks down or is put to flight, the army breaks down or loses all courage. ६ It is for this very reason that kings want soldiers who are strong, brave, bold and spirited or energetic and avoid those who are timid. ७ Laughing. ८ Spoke of the action of their eldest brother that, &c. ९ Fled. १० With his sproutlike lower lip throbbing. ११ With eyes red with anger. १२ Having frowned in such a way as to knit up the eye-brows three times. १३ Reviling them. १४ Spoke in very harsh terms. १५ Was remonstrated with. १६ Belonging to you; your १७ Little brothers. १८ Full of great anger. १९ This is a समाहारद्वन्द्व, means bravery and handsomeness. २० Inferior, less. २१ Wishing for his life, wishing to save his life. २२ तस्मिन्कुले, in that family.

परं शृगालसुतस्त्वं कृपया मया स्वकीयक्षीरपानेन पुष्टिं नीतः । तद्यावन्नेतौ त्वां शृगालं जानीतस्तावद्द्रुतं गत्वा स्वजातिमध्ये भव । नो चेदाभ्यां हतो मृत्युपथं समेष्यसि । सोऽपि तद्वचनं श्रुत्वा भयव्याकुलमनाः क्षणात्प्रनष्टः ।

तस्मात्त्वमपि यावदेते राजपुत्रास्त्वां कुलालं न जानन्ति तावद्द्रुततरं गच्छ । नो चेदेतेषां सकाशाद्विडम्बनां प्राप्स्यसि । कुलालोऽपि तदाकर्ण्य द्रुततरं प्रनष्टः ।

अतोऽहं ब्रवीमि । धिङ्मूर्ख इव स्त्रीवचनात्त्वं तामापदमापन्नः । तद्भो दुष्ट मकर त्वमपि कुलालवत्स्ववचनेन प्रकटीकृतः । उक्तं च ।

आत्मनो मुखदोषेण बध्यन्ते शुकसारिकाः ।
बकास्तत्र न बध्यन्ते मौनं सर्वार्थसाधनम् ॥ ४४ ॥

उक्तं च । सुगुप्तं रक्ष्यमाणोऽपि दर्शयन्दारुणं वपुः ।
व्याघ्रचर्मप्रतिच्छन्नो वाक्कृते रासभो हतः ॥ ४५ ॥

मकर आह । कथमेतत् । स आह ।

॥ कथा ५ ॥

अस्ति कस्मिंश्चिदधिष्ठाने शुद्धपटो नाम रजकः प्रतिवसति स्म । तस्यैको रासभोऽस्ति । सोऽपि घासाभावादतिदुर्बलः । अथ तेन रजकेन क्वापि व्याघ्रचर्म प्राप्तम् । ततश्चाचिन्तयत् । अहो शोभनमापतितम् । एतच्चर्म परिधाप्य रासभं रात्रौ यावत्क्षेत्रेषूत्सृजामि येन व्याघ्रं मत्वा समीपवर्तिनः

१ My own. २ Mix with your race ३ Will die. ४ Overcome with fear at heart ५ At the hands of these. ६ Incurred that calamity ७ Exposed ८ Parrots and female parrots are confined (in cages) for the fault of their tongues; while cranes are not so confined. Silence is the means of accomplishing all objects. ९ An ass dressed in the skin of a tiger and displaying a big form, though well guarded, was killed by reason of his voice (that is, being found out to be an ass from his braying). १० For want of grass. ११ Oh, a good thing has come to pass ; Oh, it is a god-send. १२ Having made to put on or having coverd with. १३ So long as there is night, that is, during night time. १४ Fields.

क्षेत्रान्न निष्कासयन्ति। तथानुष्ठिते रासभो रात्रौ यथेच्छया यवभक्षणं करोति। रात्रिशेषेऽपि भूयो रजकः स्वाश्रयं नयति। एवं गच्छता कालेन स रासभः पीवरतनुर्जातः। कृच्छ्राद्बन्धनेऽपि नीयते। अथान्यस्मिन्नहनि स मदोद्धतो दूराद्रासभीशब्दं शृण्वंस्तारस्वरेण शब्दयितुमारब्धः। अत्र ते क्षेत्ररक्षका रासभोऽयं व्याघ्रचर्मप्रतिच्छन्न इति मत्वा लकुटशरपाषाणप्रहारैस्तं व्यापादितवन्तः।

अतोऽहं ब्रवीमि।

सुगुप्तं रक्षमाणोऽपि दर्शयन्दारुणं वपुः।
व्याघ्रचर्मप्रतिच्छन्नो वाक्कृते रासभो हतः॥ ८२॥

तत्किं श्यालकवदपमानसहनादर्धचन्द्रदानेन यास्यामि। मकर आह कथमेतत्। स आह।

॥ कथा ६ ॥

अस्त्यत्र धरापीठे विकण्टकं नाम पुरम्। तत्र महाधनो ईश्वरो नाम भाण्डपतिः। तस्य चत्वारो जामातृका अवन्तीपीठात्प्राघूर्णिका विकण्टकपुरे समायाताः। ते च तेन महता गौरवेणार्चिता भोजनाच्छादनादिभिः। एवं तेषां तत्र वसतां मासषट्कं संजातम्। ततः ईश्वरेण स्वभार्योक्ता। यदेते जामातरः परमगौरवेणावर्जिताः स्वानि गृहाणि न गच्छन्ति। तत्किं कथ्यते।

१ Turn out (caus. of क्रम् 1 P with निस्). २ This stands for यथेच्छम्, at his will or pleasure. ३ Barley, corn in general. ४ Even before night was spent. ५ Was fettered or tied. ६ Blinded by passion. ७ With a loud sound. ८ To cry out, to bray. ९ The protectors of the field. १० With strokes of sticks, stones and arrows. ११ By reason of his having put up with a great insult, even when he was greatly insulted. १२ On the surface of the earth. १३ महत् धनं यस्य of great riches; very rich. १४ The possessor of a large capital. १५ Sons-in-law. १६ Honour. १७ Respected, treated hospitably. १८ By means of food, clothing, &c. १९ A collection of six months, six months. २० Received or treated (it is the p. p. of the caus. of वृज्, 1. 7 P. & A.). २१ Then what do you say?

विनापमानं न यास्यन्ति । तदद्य भोजनवेलायां पादप्रक्षालनार्थं जलं न देयं येनापमानं ज्ञात्वा परित्यज्य गच्छन्तीति । तथानुष्ठिते गर्गः पादप्रक्षालनापमानात्सोमो लघ्वासनदानाद्दत्तः कदशनतो यातः । एवं ते त्रयोपि परित्यज्य गताः । चतुर्थः श्यामलको यावन्न याति, तावदर्धचन्द्रप्रदानेन निष्कासितः ।अतोहं ब्रवीमि ।

गर्गो हि पादशौचाल्लघ्वासनदानतो गतः सोमः ।
दत्तः कदशनभोज्याच्छ्यामलकश्चार्धचन्द्रेण ॥ ४७ ॥ इति ॥

तत्किमहं रथकारवन्मूर्खो यतः स्वयमपि दृष्ट्वा तं विकारं पश्चाद्विश्वसिमि । उक्तं च ।

प्रत्यक्षेपि कृते पापे मूर्खः साम्ना प्रशाम्यति ।
रथकारः स्वकां भार्यां सजारां शिरसावहत् ॥ ४८ ॥

मकर आह । कथमेतत् । स आह ।

॥ कथा ७ ॥

कस्मिंश्चिदधिष्ठाने कश्चिद्रथकारः प्रतिवसति स्म । तस्य भार्या पुंश्चली जनापवादसंयुक्ता । सोऽपि तस्याः परीक्षार्थं व्यचिन्तयत् । कथं मयास्याः परीक्षणं कार्यम् । न चैतद्युज्यते कर्तुम् । यतः ।

नदीनां च कुलानां च मुनीनां च महात्मनाम् ।
परीक्षा न प्रकर्तव्या स्त्रीणां दुश्चरितस्य च ॥ ४९ ॥
वसोर्वीर्योत्पन्नामभजत मुनिर्मत्स्यतनयां

---

१ For washing the feet with. २ Will leave us and go. ३ By having been given a small seat. ४ By being given coarse food. ५ Concerning or about the washing of feet. ६ Change for the worse. ७ Even though sin be committed in his presence, a fool is satisfied by conciliation; a carpenter carried on his head his wife with her paramour. ८ A harlot, an unchaste woman. ९ Was branded with infamy; was badly spoken of. १० In order to put her chastity to the test. ११ Misconduct, unchastity. १२ Born from the seed of a Vasu, a kind of demi-god. १३ Loved. १४ The daughter of a fish, so called because Satyavati was found in the belly of a fish.

तथा[१] जातो व्यासः शतगुणनिवासः[२] किमपरम्[३] ।
स्वयं वेदान्व्यस्यञ्[४]छमितकुरुवंशप्रसविता[५]
स एवाभूच्छ्रीमानहह[६] विषमाः कर्मगतयः[७] ॥ ५० ॥

कुलीनामिति[८] पाण्डवानामपि महात्मनां नान्यत्तगर्भोऽवगन्तव्या[९] यतः क्षेत्रजा[१०] इति । स्त्रीदुश्चारित्रं संधृक्ष्यमाणम्[११]अनेकदोषान्प्रकटयति[१२] स्त्रीणामिति । तथा च ।

यदि स्यात्पावकः[१३] शीतः प्रोष्णो[१४] वा शशलाञ्छनः[१५] ।
स्त्रीणां[१६] तदा सतीत्वं स्याद्यदि स्याद्दुर्जनो हितः[१७] ॥ ५१ ॥

तां[१८] चापि शुद्धामशुद्धां वापि जानामि लोकवचनात् । उक्तं च ।

यन्न वेदेषु शास्त्रेषु न दृष्टं न च संश्रुतम् ।
तत्सर्वं वेत्ति लोकोऽयं यत्स्याद्ब्रह्माण्डमध्यगम्[१९] ॥ ५२ ॥

एवं संप्रधार्य[२०] तामवोचत् । प्रिये अहं प्रातर्ग्रामान्तरं यास्यामि । तत्र दिनानि कतिचिल्लगिष्यन्ति[२१] । तत्त्वया किंचित्पाथेयं[२२] मम योग्यं कार्यम् । सापि तदाकर्ण्य हर्षितचित्तौत्सुक्येन[२३] सर्वकार्याणि संत्यज्य

१ In that way, that is, from the union of the मुनि पराशर and सत्यवती. २ The seat of a hundred good qualities, that is, one in whom hundreds of good qualities were centred. ३ What more need we say about his mental possessions? ४ Pres. p. of अस् 4 P with वि Separating or arranging. ५ The progenitor of the extinct race of the Kurus. ६ A particle expressing wonder. ७ Uneven, indeed, are the ways of Fate. ८ With respect to what has been said above about कुल in verse 49. ९ Should be studied; obtained. १० Born in an unnatural way. ११ Nom. Sing. of the 2nd Fut. p. of [illegible] with सम्—Being closely inquired into. १२ Brings to light. १३ Fire. १४ Very hot (प्रकर्षेण उष्णः). १५ The Moon so called from the sign of (शश) a hare supposed to be on it. १६ Then only it is possible for women to be chaste, when fire will be cool &c. &c. १७ Friendly, favourable. १८ I know her to be either pure or otherwise only from hearsay, or from what the people say and not from personal knowledge. १९ That which may be in the centre of the universe. २० Having come to this conclusion or resolution. २१ Will be required, will be spent. २२ Provisions for the journey. २३ With the eagerness of one delighted at heart.

सिद्धमन्नं घृतशर्करापायमकरोत्[1]। अथवा साध्विदमुच्यते।

दुर्दिवसे घनतिमिरे दुःसंचारासु नगरवीथीषु।
पत्यौ विदेशयाते परमसुखं जघनचपलायाः॥ ५३॥[2]

अथासौ प्रत्यूषे[3] उत्थाय स्वगृहान्निर्गतः। सापि तं प्रस्थितं विज्ञाय प्रहसितवदना[4]ङ्गसंस्कारं[5] कुर्वाणा कथंचित्तं दिवसमत्यवाहयत्[6]। ततश्च पूर्वपरिचितं[7] कंचिद्विटगृहं[8] गत्वाभ्यर्थ्योक्तवती। यत्स ग्रामान्तरं गतः स दुरात्मा मे पतिः। तदद्य त्वयास्मद्गृहे प्रसुप्ते जने[9] समागन्तव्यम्। तथानुष्ठिते स रथकारोऽप्यरण्ये दिनमतिवाह्य प्रदोषे[10] स्वगृहमपरद्वारेण[11] प्रविश्य शय्यातले[12] निभृतो[13] भूत्वा स्थितः। अत्रान्तरे स देवदत्तः शयन आगत्योपविष्टः। तं दृष्ट्वा रथकारो रोषाविष्टचित्तो[14] व्यचिन्तयत्। किमेनमुत्थाय विनाशयाम्य-थवा द्वावप्येतौ[15] सुप्तौ हेलया[16] हन्मि। परं पश्यामि तावच्चेष्टितमस्याः[17] शृणोमि चानेन सहालापान्। अथान्तरे सा गृहद्वारं निभृतं[18] विधाय शयनतलमारूढा। तस्यास्तच्छयनमारोहन्त्या[19] रथकारशरीरे पादो लग्नः[20]। ततो व्यचिन्तयत्। नूनमेतेन दुरात्मना रथकारेण मत्परीक्षणार्थं भाव्यम्[21]। तत्स्त्रीचरित्रविज्ञानं करोमि[22]। एवं तस्याश्चिन्तयन्त्याः स देवदत्तः स्पर्शोत्सुको[23] बभूव। ततश्च तया कृताञ्जलिपुटया[24]भिहितम्। यन्महानुभाव[25] त्वया न

१ Ready food mostly consisting of ghee and sugar. २ When the day is rainy or cloudy, when the streets of a city are impassable on account of darkness, and when the husband is gone abroad; great is the delight felt by an adulterous woman. ३ Early morning, dawn. ४ With a cheerful countenance. ५ Decorating her person. ६ Passed. ७ One with whom she was familiarly acquainted. ८ A lover, a paramour. ९ When the inmates in it are asleep. १० At night fall. ११ By another or some secret gate. १२ Below the bed-stead. १३ Hidden, concealed. १४ Full of anger at heart. १५ Both these, viz. my wife and her paramour. १६ At once, easily. १७ Let me first watch her movements. १८ Having shut or bolted fast. १९ While she was mounting the bed-stead. २० Come in contact with. २१ Should have been here to watch my conduct. २२ Show him what wisdom a woman possesses. २३ Desirous of touching her. २४ Who had folded her hands, or joined her hands in supplication. २५ A person of dignity.

मे गात्रं स्प्रष्टव्यं यतोहं पतिव्रता महासती च। नो[१]चेच्छापं दत्त्वा त्वां भस्मसा[२]त्करिष्यामि। स आह। यद्येवं तत्किमर्थमहं त्वयात्रानीतः। सा प्राह। भोः शृण्वेकाग्र[३]मनाः। अहमद्य प्रत्यूषे देवतादर्शनार्थं चण्डिकाय[४]तनं गता। तत्राकस्मि[५]की खे[६] वाणी संजाता। पुत्रि किं करोमि। भक्तासि मे त्वम्। परं षण्मासाभ्य[७]न्तरे [८]विधिनियोगाद्विध[९]वा भविष्यसि। ततो मयाभिहितम् यद्भगवति यथा त्वमेतज्जानासि तथा प्रतीकार[१०]मपि वेत्सि तदस्ति कश्चिदुपायो येन मे पतिः शतसंवत्सर[११]जीवी भवति। ततस्तयाभिहितम्। वत्से [१२]सन्नपि नास्ति यतस्त्वदा[१३]यत्तः स प्रतीकारः। तच्छ्रुत्वा मयोक्तम्। देवि यन्मम [१४]प्राणैर्भवति तदादे[१५]शय करोमि। ततो देव्याभिहितम्। यदि परपु[१६]रुषेण सहैकस्मिञ्छयने समारुह्यालिङ्गनं करोषि तत्तव भर्तृसक्तोप[१७]मृत्युस्तस्य सं[१८]चरति त्वद्भर्ता पुनरन्यद्वर्षशत[१९]द्वयं जीवति। तेन मया त्वमभ्यर्थितः। ततो यत्किंचित्कर्तुमनास्तत्कुरुष्व। न हि देवतावच[२०]नमन्यथा भविष्यतीति मे निश्चयः। सोपि रथकारो मूर्खस्तस्यास्तद्वचनमाकर्ण्य पुलको[२१]द्भिन्नतनुः शय्यातलान्निष्क्रम्य तामुवाच। साधु पवित्रे पतिव्रते साधु कुल[२२]नन्दिनि साधु। अहं दुर्जनवच[२३]नैशङ्कितहृदयस्त्वत्परीक्षार्थं ग्रामान्त[२४]रव्याजं कृत्वात्र नि[२५]भृतं खट्वा[२६]तले लीनः [२७]स्थितः। तदेह्यालिङ्गय माम्। एवमुक्त्वा तामा

---

१ Otherwise, that is, if you do not grant my prayer, not to touch my person. २ Will reduce you to ashes. ३ With an attentive mind. ४ An abode, a temple. ५ Sudden unexpected. ६ A voice in the sky was heard. ७ Within six months. ८ Through the order of Fate. ९ A widow (विगतो धवो यस्याः सा). १० Remedy. ११ Living for a hundred years. १२ Though there is one, it is equivalent to none. १३ Dependent on you; in your hands. १४ That which can be accomplished even at the cost of my life. १५ Order. १६ A person other than your husband. १७ Untimely death attaching to your husband. १८ Will be transferred. १९ A period of two hundred more years. २० Will be false. २१ With the hair standing on the ends through joy. २२ One that is the delight of the family. २३ Suspecting at heart your fidelity; believing the words of the malicious. २४ Pretending as if I was really going to another place. २५ Secretly. २६ Under the bed-stead. २७ Remained concealed.

लिङ्ग्य स्वस्कन्धे कृत्वा तं देवदत्तमप्युवाच। भो महानुभाव मत्पुण्यैस्त्वमिहागतः। त्वत्प्रसादात्प्राप्तमद्य मया वर्षशतद्वयप्रमाणमायुः। ततस्त्वमपि मां समालिङ्ग्य स्कन्धे मे समारोह। इति जल्पन्ननिच्छन्तमपि देवदत्तं बलादालिङ्ग्य स्कन्धे समारोपितवान्। ततश्च तूर्यध्वनिच्छन्देन नृत्यन्सकलगृहद्वारेषु बभ्राम। अतोऽहं ब्रवीमि।

प्रत्यक्षेऽपि कृते पापे मूर्खः साम्ना प्रशाम्यति।
रथकारः स्वकां भार्यां सजारां शिरसावहत्॥ ५४॥

तन्मूढ दीर्घविकारस्त्वम्। तत्कथं तव गृहं गच्छामि। अथवा यन्मां त्वं विश्वासयसि तत्ते दोषो नास्ति यत ईदृशी स्वभावदुष्टा युष्मज्जातिर्या शिष्टसङ्गादपि सौम्यत्वं न याति। अथवा स्वभावोऽयं दुष्टानाम्। उक्तं च।

सद्भिः संबोध्यमानोऽपि दुरात्मा पापपौरुषः।
घृष्यमाण इवाङ्गारो निर्मलत्वं न गच्छति॥ ५५॥

अथवा साध्विदमुच्यते।

सूर्यं भर्तारमुत्सृज्य पर्जन्यं मारुतं गिरिम्।
स्वयोनिं मूषिका प्राप्ता स्वजातिर्दुरतिक्रमा॥ ५६॥

मकर आह। कथमेतत्। सोऽब्रवीत्।

---

१ Having placed on the shoulder. २ You are come here by my good-luck. ३ Through your favour. ४ Lasting for two hundred years. ५ Even against the will of Devadatta. ६ Dancing to the sound of a horn. ७ That you should induce me to put confidence in you is not your fault. ८ Even when come in contact with respectable persons. ९ Mildness. १० Or, rather; used to correct or modify a foregoing statement. ११ An evil disposed and wicked person though well-advised by the good, does not become upright or pure. like a charcoal which, though rubbed, does not become white. १२ Having refused to take the sun, the God of rain. wind and mountain for a husband, a female mouse became united with one of her own race—it is difficult to free oneself from the instincts of one's race.

॥ कथा ८ ॥

अस्ति कस्मिंश्चिदधिष्ठाने तपोवने[1] शालङ्कायनो नाम तपोधनो[2] जाह्नव्यां स्नानार्थं गतः । तस्य च सूर्योपस्थानं[3] कुर्वतस्तत्र प्रदेशे मूषिका काचित्खरतरनखाग्रपुटेन[4] श्येनेन[5] गृहीता । तां दृष्ट्वा स मुनिः करुणार्द्रहृदयो[6] मुञ्च मुञ्चेति[7] कुर्वाणस्तस्य पाषाणखण्डं[8] प्राक्षिपत् । सोऽपि पाषाणखण्डप्रहारव्याकुलेन्द्रियो[9] भ्रष्टमूषिको[10] भूमौ निपपात । मूषिकापि भयत्रस्ता कर्तव्यमजानती[11] रक्ष रक्षेति जल्पन्ती मुनिचरणान्तिकमुपाविशत् । श्येनेनापि चेतनां[12] लब्ध्वा मुनिरुक्तः । यद्भो मुने न युक्तमनुष्ठितं भवता यदहं पाषाणेन[13] ताडितः । किं त्वमधर्मान्न[14] बिभेषि । तत्समर्पय ममैतां मूषिकाम् । नो चेत्प्रभूतं पातकमेवाप्स्यसि[15] । इति ब्रुवाणं श्येनं प्रोवाच सः । भो विहंगाधम[16] रक्षणीयाः प्राणिनां प्राणाः । दण्डनीया दुष्टाः । संमाननीयाः साधवः । पूजनीया गुरवः । स्तुत्या देवाः । तत्किमसंबद्धं[17] प्रजल्पसि । श्येन आह । मुने न त्वं सूक्ष्मधर्मं[18] वेत्सि । इह हि सर्वेषां प्राणिनां विधिना[19] सृष्टिं कुर्वताहारोऽपि विनिर्मितः[20] । ततो यथा भवतामन्नं तथास्माकं मूषिकादयो विहिताः । तत्स्वाहारकाङ्क्षिणं[21] मां किं दूषयसि । उक्तं च ।

१ A penance-forest or grove. २ One who is rich in penance (तपो धनं यस्य, Bah. Comp.) ३ Waiting upon or offering prayers to the sun. ४ The ends of whose nails were sharp or pointed. ५ A hawk. ६ Whose heart was moved with pity. ७ Saying, leave her, leave her. ८ A piece, a bit. ९ Smarting under the pain caused by the stroke of the stone. १० भ्रष्टा मूषिका यस्मात्सः. From whose talons dropped the female mouse. ११ Not knowing what to do; being at a loss what to do. १२ Having recovered consciousness. १३ A stone. १४ Are you not afraid of irreligion? १५ You will be guilty of great sin. १६ The worst of birds. १७ Irrelevantly; at random. १८ The minute details of religion. १९ The creator. २० Made; created. २१ Wishing to seize what is my proper food.

यद्यस्य विहितं भोज्यं न तत्तस्य प्रदुष्यति।
अभक्ष्ये बहुदोषः स्यात्तस्मात्कार्यो न व्यत्ययः॥ ५७॥
मद्यं यथा द्विजातीनां मद्यपानां यथा हविः।
भक्ष्यमभक्ष्यतामेति तथान्येषामपि द्विज॥ ५८॥
भक्ष्यं भक्षयतां श्रेयो अभक्ष्यं तु महदघम्।
तत्कथं मां वृथाचारं त्वं दण्डयितुमर्हसि॥ ५९॥

अपरं मुनीनां न चैष धर्मो येनमेदृग्मदृष्टं श्रुतमश्रुतमलोभ्यत्वमशत्रुत्वं प्रशस्यते। उक्तं च।

समः शत्रौ च मित्रे च समलोष्टाश्मकाञ्चनः।
सुहृन्मित्रे ह्युदासीनो मध्यस्थो द्वेष्यबन्धुषु॥ ६०॥
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते।
साधूनां निरवद्यानां सदाचारविचारिणाम्॥ ६१॥
योगी युञ्जीत सततमात्मानं रहसि स्थितः।

१ That which is created as the proper food for any one, does not, if eaten, make him guilty of murder, but there is great sin in eating what is unfit to eat no opposition should, therefore, be made to me. As wine in the cases of the twice-born, as sacrificial oblation in the case of drunkards, though fit to be eaten, become unfit to eat, same is the case, oh Bráhman, with others as regards other things. There is good in eating what is fit to eat, and great sin in eating what is unfit to eat; how is it then proper for you to punish me as one who does an improper act? (वृथाचार is a Bahuvrihi compound and is the secondary object of दण्डयितुम्.) Since when they consider what is seen as unseen, what is heard as unheard, and when they possess no greediness and enmity, their action is declared to be the best. ३ He who looks upon a lump of earth, a stone and gold as equal in value. ४ Indifferent as regards his conduct towards friends and relatives, and remaining neutral towards those who are hateful and those who are friendly. ५ Is preferable to saints in the next line. ६ Blameless. ७ Of those who are well-behaved and thoughtful. ८ Should always direct his soul. ९ Himself remaining in privacy, and not coming in contact with the people.

तत्त्वमनेन कर्मणा भ्रष्टतपाः संजातः ।

उक्तं च । मुञ्च मुञ्च पतत्येको मा मुञ्चेति द्वितीयकः ।

उभयोः पतनं दृष्ट्वा मौनं सर्वार्थसाधनम् ॥ ६२ ॥

शालङ्कायन आह । कथमेतत् । श्येन आह ।

॥ कथा ९ ॥

कस्मिंश्चिन्नदीतटे एकतद्वितत्रिताभिधानास्त्रयोपि भ्रातरो मुनयस्तपः कुर्वन्ति । तेषां च तपःप्रभावादाकाशस्था धौतपोतिका निरालम्बा जलार्द्रा भूस्पर्शनभयेन स्नानसमये तिष्ठन्ति । अथान्येद्युर्मयेव काचिन्मण्डूकिका केनापि गृध्रेण बलेन नीता । अथ तां गृहीतां विलोक्य तेषां ज्येष्ठेन करुणार्द्रहृदयेन भवतेव व्याहृतम् । मुञ्च मुञ्चेति । अत्रान्तरे तस्य धौतपोतिकाकाशाद्भूमौ पतिता । तां पतितां दृष्ट्वा द्वितीयेन तद्भयार्तेन मा मुञ्च मा मुञ्चेत्यभिहितं यावत्तावत्तस्यापि पपात । ततस्तृतीयो द्वयोरपि धौतपोतिकां भूमौ पतितां दृष्ट्वा तूष्णीं बभूव । अतोहं ब्रवीमि ।

मुञ्च मुञ्च पतत्येको मा मुञ्चेति द्वितीयकः ।

उभयोः पतनं दृष्ट्वा मौनं सर्वार्थसाधनम् ॥ ६३ ॥

तच्छ्रुत्वा मुनिर्विहस्याह । भो मूर्ख विहंगम कृतयुगे धर्म आसीत् । यतः कृतयुगे पापालापतोपि पापं जायते तेन धौपपोतिके पतिते अशिष्टालापेन न सदपवचनदोषतः । एष पुनः कलियुगः । अत्र सर्वोपि पापात्मा । तत्कर्म

१ One who has fallen off from his penance. २ One falls off from virtue by simply saying let alone, let alone, and the second by saying, don't, don't; having seen the fall of both, the third thinks to himself— silence secures all object. ३ Through the power of penance. ४ White or washed garments. ५ Without support. ६ Wet with water. ७ Through the fear of touching the ground. ८ On one day. ९ A female frog. १० Was forcibly seized by a vulture. ११ Being overtaken by the fear of his fall. १२ Kept silent. १३ Sin is committed by simply talking with a sinner. १४ By talking with one who is disrespectable. १५ Not through the fault of talking ill of the good. १६ Sinful.

कृतं विना पापं न लगति[१]। उक्तं च।

[२]संचरन्तीह पापानि युगेष्वन्येषु देहिनाम्।
कलौ तु पापसंयुक्ते यः करोति स लिप्यते॥ ६४॥

उक्तं च। [३]आसनाच्छयनाद्यानात्संगतेश्चापि भोजनात्।
कृते संचरते पापं तैलबिन्दुरिवाम्भसि॥ ६५॥

तत्किं वृथाप्रलपितेन। गच्छ त्वम्। नो चेच्छापयिष्यामि। अथ गते श्येने मूषिकया स मुनिरभिहितः। भगवन् नय मा स्वाश्रयम्। नो चेदन्यो दुष्टपक्षी कश्चिन्मां व्यापादयिष्यति। तदहं तत्रैवाश्रये त्वद्दत्तान्नाहारमुष्ट्या[४] कालं नेष्यामि। सोऽपि दाक्षिण्यवान्[५]सकरुणो[६] व्यचिन्तयत्। कथं मया मूषिका हस्ते धृता नेया जनहास्यकारिणी[७]। तदेनां कुमारिकां कृत्वा नयामि। एवं सा कन्यका कृता। तथानुष्ठिते कन्यासहितं मुनिमवलोक्य पत्नी पप्रच्छ। भगवन् कुत इयं कन्या। स आह। एषा मूषिका श्येनभयाच्छरणार्थिनी[८] कन्यारूपेण तव गृहमानीता। तत्त्वया यत्नेन रक्षणीया। भूयोऽप्येनां मूषिकां करिष्यामि। सा प्राह। भगवन् मैवं कार्षीः[९]। अस्यास्त्वं धर्मपिता[१०]। उक्तं च।

[११]जनिता चोपनेता च यस्तु विद्यां प्रयच्छति।
अन्नदाता भयत्राता पञ्चैते पितरः स्मृताः॥ ६६॥

१ Sin does not become attached to anyone. २ In ages other than the Kali age, sins infected people; but in the Kali age, which is full of sin, he who actually commits sin, becomes guilty of it. ३ In the Krita age, sin infected people by sitting together, sleeping together, by going together and also from associating with each other, just as a drop of oil flits on the surface of water. ४ With a handful of food given by you. ५ Full of kindness. ६ Full of compassion. ७ Exciting the laughter of the people. ८ Who sought my protection through the fear of a hawk. ९ This is the 2nd P. Sing. of the Aorist of कृ with the अ dropped and मा prefixed, in the sense of the prohibitive. १० A religious father, as distinguished from the real one. ११ These five, viz., he who gives birth, he who brings up, he who gives education, he who supports and he who protects from fear, are said, in Smritis, to be fathers.

तत्त्वयास्या प्राणाः प्रदत्ताः । अपरं ममाप्यपत्यं नास्ति । तस्मादेषा मम सुता भविष्यति । तथानुष्ठिते सा कन्यका शुक्लपक्षचन्द्रकलिकेव नित्यमेव वृद्धिं प्राप्नोति । सापि तस्य मुनेः शुश्रूषां कुर्वती सपत्नीकस्य यौवनमाश्रयात् । अथ तां यौवनोन्मुखमिवलोक्य शालङ्कायनः स्वपत्नीमुवाच । प्रिये यौवनोन्मुखी वर्तते इयं कन्या । अनर्हा सांप्रतं मद्भवनस्य । उक्तं च ।

अनूढा मन्दिरे यस्य रजः प्राप्नोति कन्यका ।
पतन्ति पितरस्तस्य स्वर्गस्था अपि तैर्गुणैः ॥ ६७ ॥

तत्कस्मैचिच्छ्रेष्ठवराय प्रदीयते । उक्तं च ।

वरं वरयते कन्या माता वित्तं पिता श्रुतम् ।
बान्धवाः कुलमिच्छन्ति मिष्टान्नमितरे जनाः ॥ ६८ ॥

तथा च । यावन्न लज्जते कन्या यावत्क्रीडति पांसुना ।
यावत्तिष्ठति गोमार्गे तावत्कन्यां विवाहयेत् ॥ ६९ ॥
माता चैव पिता चैव ज्येष्ठभ्राता तथैव च ।
त्रयस्ते नरकं यान्ति दृष्ट्वा कन्यां रजस्वलाम् ॥ ७० ॥

तथा च ।

कुलं च शीलं च सनाथतां च विद्यां च वित्तं च वपुर्वयश्च ।
एतान्गुणान्सप्त परीक्ष्य देया कन्या बुधैः शेषमचिन्तनीयम् ॥ ७१ ॥

---

१ Granted. २ Like the digit of the moon in the bright half of the month. ३ Accompanied with his wife. ४ आशु = quickly. ५ About to attain her youth. ६ Now she is not fit to live in my house. ७ The manes of him, in whose house an unmarried girl attains her puberty go to hell even if they be in heaven before, by the demerit arising therefrom. ८ So let her be given in marriage to some eminent husband. ९ A girl chooses a husband, her mother prefers wealth, her father learning, her relatives wish for a noble family and other people simply wish for dainties. १० One should marry one's daughter before she acquires the sense of shame, while she plays with dust and while she stands in the way of cattle (that is knows no fear). ११ By seeing or when they see their daughter attaining her puberty before marriage. १२ Wise men should give away their daughters after having examined the following seven requisite qualities, viz, nobility of birth, good disposition, having supporters, learning, wealth, bodily constitution and age,—other things need not be inquired into.

अन्यच्च । दूरस्थानामविद्यानां मोक्षधर्मानुवर्तिनाम् ।
शूराणां निर्धनानां च न देया कन्यका बुधैः ॥ ७२ ॥

तद्यद्यस्या रोचते तद्भगवन्तमादित्यमाकार्य तस्मै प्रयच्छामि ।

उक्तं च । अनिष्टः कन्यकाया यो वरो रूपान्वितोऽपि यः ।
यदि स्यात्तस्य न देया कन्या श्रेयोभिवाञ्छता ॥ ७३ ॥

साह । को दोषोऽत्र विषये । एवं क्रियताम् । अथ मुनिना समाहूतः सविता तत्क्षणमवाभ्युपेत्य प्रोवाच । भगवन् वद द्रुतं किमर्थमहमाहूतः । स आह । एषा मत्कन्या यदि त्वां वृणोति तद्विवाहय । एवमुक्त्वा स भगवांनस्या दर्शितः । प्रोवाच च । पुत्रि किं तव रोचत एष भगवांस्त्रैलोक्यदीपः । सा प्राह । तात अतिदहनात्मकोऽयम् । नाहमेनमभिलषामि । अस्मादपि यः कश्चिदुत्कृष्टतरः स आहूयताम् । अथ तस्यास्तद्वचनमाकर्ण्य भास्करोऽपि तां मूषिकां विदित्वा निःस्पृहस्तमुवाच । भगवन्नास्ति ममाप्युत्तमो मेघो येनाच्छादितस्य मे नामापि न ज्ञायते । अथ मुनिना मेघोऽप्याहूतः । एष रोचते । सा मुनिमाह । यन्मां मेघादपि श्रेष्ठाय प्रयच्छ । अथ मेघोऽपि मुनिना पृष्टः । भोस्त्वत्तोऽप्यधिकः कोऽप्यस्ति । स आह । यदस्ति ममाप्यधिको वायुः । वायुना हतोऽहं सहस्रधा यामि । तच्छ्रुत्वा मुनिना वायुराहूतः । आह च एष उत्तमो वायुस्तव प्रतिभाति । सा प्राह । तात चलोऽप्ययं चञ्चलः । तदभ्यधिकः श्रेष्ठतर आनीयताम् । मुनिराह । भो वायो त्वत्तोऽभ्यधिकोऽस्ति कश्चित् । स आह । ममाप्यधिकाः पर्वताः सन्ति यैः संस्तभ्य बलवन्तोऽपि वयं ध्रियामहे । अथ मुनिः पर्वतमाहूय कन्याया

१ Wise men should not give their daughters in marriage to those who live far away from them, who are illiterate, who observe such a course of conduct as tends to salvation, who are brave and who are poor. २ If it be to her liking. ३ Having invited. ४ One who wishes his own welfare should not give his daughter to one who is not liked by her, though he may be endowed with beauty. ५ Having approached. ६ Was shown to her. ७ The lamp of the three worlds. ८ Possessing the property of burning. ९ Wish for, love. १० Superior. ११ Disinterested. १२ Even my name is not known, I am totally obsured. १३ Superior to you. १४ I go in thousands of ways, that is I am scattered wide. १५ Activfickle. १६ We are stopped and checked in our course.

अदर्शयत् । पुत्रिके त्वामस्मै प्रयच्छामि । साह । तात कठिनात्मकोयम्[1] । तदन्यस्य प्रदीयताम् । अथ स मुनिना पृष्टः । यद्रोः पर्वतराज तवाप्यधिकः कश्चिदस्ति । स आह । सन्ति ममाप्यधिका मूषका येस्मद्देहं बलात्सर्वतो भेदयन्ति । तदाकर्ण्य मुनिर्मूषकमाहूय तस्या अदर्शयत् । पुत्रिके एष ते प्रतिभाति मूषकराजो येन यथोचितमनुष्ठीयते[2] । सापि तं दृष्ट्वा स्वजातीयमिति मन्यमाना प्रोद्धृषितशरीरा[3] सती प्रोवाच । तात मां मूषिकां कृत्वास्मै मूषकाय प्रयच्छ येन स्वजातिविहितं गृहस्थधर्ममनुभवामि[4] । तच्छ्रुत्वा तेन स्त्रीधर्मविचक्षणेन[5] तां मूषिकां कृत्वा मूषकाय प्रदत्ता । अथवा साध्विदमुच्यते ।

न[6] सुवर्णं न रत्नानि न च राज्यपरिक्रियाम् ।
तथा वाञ्छन्ति कामिन्यो यथाभीष्टतमं वरम् ॥ ७४ ॥

तद्यथा सा मूषिका देवपदं[7] त्यक्त्वा स्वजातिदोषेण नीचसंगमं गता[8] तथा त्वमपि मया संगतोपि स्नेहगृहीतोपि[9] स्वजातिधर्मदुष्टः[10] संजातः । अतोहं ब्रवीमि ।

सूर्यं भर्तारमुत्सृज्य पर्जन्यं मारुतं गिरिम् ।
स्वजातिं मूषिका प्राप्ता स्वजातिर्दुरतिक्रमा ॥ ७५ ॥

तन्मूर्ख स्त्रीलुब्ध[11] स्त्रीजित[12] अन्येपि ये त्वद्विधा भवन्ति ते स्वकार्यं विभवं मित्रं च परित्यजन्ति त्यजन्ते[13] । उक्तं च ।

[14]या ममोद्विजते नित्यं साद्य मामवगूहते ।
प्रियकारक भद्रं ते यन्ममास्ति हरस्व तत् ॥ ७६ ॥

---

१ Hard. २ Can do as is proper to do. ३ Inwardly delighted. ४ The duties of a house-holder peculiar to any race. ५ Conversant with the duties of women. ६ Women do not so much long for gold, jewels and the comforts of royalty as they do for a husband who is the dearest to their hearts. ७ The position of a god. ८ Become united with one of her race through her own fault. ९ Though favoured with my affection. १० Spoiled by the instincts of your own race. ११ Uxorious. १२ Subdued by one's wife. १३ Lose; forfeit. १४ She who always shrinks from me, embraces me to-day. Oh my benefactor, may good attend you Take away whatever is mine.

मकर आह । कथमेतत् । सोऽब्रवीत् ।

॥ कथा १० ॥

अस्ति कस्मिंश्चिदधिष्ठाने कामातुरो नाम महाधनी वणिक्पुत्रो वृद्धः । तेन मृतभार्येण[१] कामोपहतचेतसा काचिन्निर्धनस्य दुहिता प्रभूतवित्तं दत्त्वोद्वाहिता[२] । अथ सा दुःखाभिभूता तं वृद्धतमं वणिजं वीक्षितुमपि[३] न शक्नोति । अथवा साध्विदमुच्यते ।

[४]श्वेतं पदं शिरसि वीक्ष्य शिरोरुहाणां
स्थानं परं परिभवस्य तदेव पुंसाम् ।
आरोपितास्थिशकलं परिहृत्य यान्ति
चाण्डालकूपमिव दूरतरं तरुण्यः ॥ ७७ ॥

तथा च । [५]गात्रं संकुचितं गतिर्विगलिता दन्ताश्च नाशं गता-
श्चक्षुर्भ्राम्यति रूपमेव ह्रसते वक्त्रं च लालायते ।
वाक्यं नैव करोति बान्धवजनः पत्नी न शुश्रूषते
हा कष्टं जरयाभिभूतपुरुषः पुत्रैरवज्ञायते ॥ ७८ ॥

अथ कदाचित्सा तेन सहैकशयने पराङ्मुखी[६] स्थिता यावत्तिष्ठति तावत्तस्य गृहे चौरः प्रविष्टः । सापि तं चौरमवलोक्य भयव्याकुलमनास्तं वृद्धमप्यालिङ्गितवती । सोऽपि विस्मयात्पुलकाङ्कितसर्वगात्रश्चिन्तयामास[७] । किमेषा मामद्यावगूहते । अहो चित्रमेतत्[८] । ततश्च यावन्निपुणतया[९]वलोकयति ताव-

---

१ He who had lost his wife. २ Was married. ३ Even to look at. ४ Having seen a white spot of hair on the head, which circumstance is a great cause of disrespect to men, young women go far away, having abandoned their husbands just as if they were wells belonging to Chandalas having pieces of bones placed over them. ५ The limbs become contracted, the gait falters, the teeth fall away, the eye becomes unsteady, beauty wanes, the mouth gives out saliva, brothers and relatives do not obey orders and the wife does not wait upon or serve. Alas ! a man overcome with old age is disobeyed even by his sons. ६ Lying down with the face turned away from him. ७ Having the hair on the whole body standing on its end through wonder. ८ Oh ! it is very strange. ९ With minuteness.

चौरः प्रविष्टः कोणैकदेशे तिष्ठति । पुनराचिन्तयत् । नूनमेषा चौरस्य शङ्कया मां समालिङ्गति । तज्ज्ञात्वा चौरमाह ।

या ममोद्विजते नित्यं साद्य मामवगूहते ।
प्रियकारक भद्रं ते यन्ममास्ति हरस्व तत् ॥ ७९ ॥

भूयोपि निर्गच्छन्तमवादीत् । भो चोर नित्यमेव त्वया रात्रावागन्तव्यम् मदीयोयं विभवस्त्वदीय इति । अतोहं ब्रवीमि ।

या ममोद्विजते नित्यं साद्य मामवगूहते ।
प्रियकारक भद्रं ते यन्ममास्ति हरस्व तत् ॥ ८० ॥

किं बहुना । तेन च स्त्रीलुब्धेन स्वं सर्वमपि चौरस्य समर्पितम् । त्वयापि तथानुष्ठितम् । अथैवं तेन सह तस्य विवदतो जलचरेण केनाप्यागत्याभिहितम् । भो मकर त्वदीयभार्यानशनोपविष्टा त्वयि चिरयति प्रणयाभिभवाद्विपन्ना । सोपि तच्छ्रुत्वातीव व्याकुलमना व्यचिन्तयत् । अहो किमिदं संजातं मम मन्दभाग्यस्य । उक्तं च ।

न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते ।
गृहं तु गृहिणीहीनं कान्तारादतिरिच्यते ॥ ८१ ॥
वृक्षमूलेपि दयिता यत्र तिष्ठति तद्गृहम् ।
प्रासादोपि तया हीनो अरण्यसदृशः स्मृतः ॥ ८२ ॥

तथा च । माता यस्य गृहे नास्ति भार्या च प्रियवादिनी ।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् ॥ ८३ ॥

तन्मित्र क्षम्यतां मया तेपराधः कृतः । संप्रत्यहं तद्वियोगाद्वह्निप्रवेशं करिष्यामि । तदाकर्ण्य वानरः प्रहस्य प्रोवाच । भो ज्ञातस्त्वं मया प्रथम-

---

१ In a part of the corner. २ Indeed. ३ Through fear. ४ Again. ५ Riches; wealth. ६ Wealth; belongings. ७ While he was thus disputing with him. ८ Remaining without food. ९ When you delayed. १० Perished through disappointment in love. ११ They say that what we consider to be our home is not really so, but the wife is our home; for a house without the house-wife surpasses even a forest (in desolateness). १२ Even the root of a tree where one's beloved dwells is one's home; even a palace without her is said to be like a desert. १३ As is the forest so is the house—because there is no wife in it. १४ I have done you wrong.

मेव यस्त्वं स्त्रीजितः । स्त्रीवश्यश्च[1] । सांप्रतं पुनः प्रत्ययः[2] संजातः[3] । तन्मूढ आनन्दे कार्ये त्वं कस्माद्विषादं गतः । नादृग्दुष्टभार्यायां मृतायामुत्सवः कर्तुं युज्यते[4] । उक्तं च ।

या भार्या दुश्चरिता[5] सततं कलहप्रिया[6] ।
भार्यारूपेण[7] सा ज्ञेया विदग्धैर्दारुणा जरा ॥ ८४ ॥
तस्मात्सर्वप्रयत्नेन[8] नामापि परिवर्जयेत्[9] ।
स्त्रीणामिह हि सर्वासां य इच्छेत्सुखमात्मनः ॥ ८५ ॥
के नाम न विनश्यन्ति[10] मिथ्याज्ञानान्नितम्बिनीम्[11][12] ।
रम्यां बुद्ध्योपसर्पन्ति[13] ये ज्वालां शलभा[14] इव ॥ ८६ ॥
अन्तर्विषमया[15] ह्येता बहिर्वृत्त्या मनोरमाः ।
गुञ्जाफलसमाकाराः स्वभावादेव योषितः ॥ ८७ ॥
यदन्तस्तन्न[16] जिह्वायां यज्जिह्वायां न तद्बहिः ।
यद्बहिस्तन्न कुर्वन्ति विचित्रचरिताः[17] स्त्रियः ॥ ८८ ॥
ताडिता अपि दण्डेन शस्त्रैरपि विखण्डिताः[18] ।
न वशं[19] योषितो यान्ति न दानैर्न च संस्तवैः[20] ॥ ८९ ॥

---

१ Under the thumb of your wife. २ Evidence; proof. ३ Why do you feel grieved when you ought to be delighted. ४ It is proper to celebrate a festival. ५ Ill-behaved. ६ Fond of quarreling. ७ That woman should be considered by the wise as horrible old age in the form of a wife. ८ With all efforts. ९ Should avoid. १० Who indeed do not perish? ११ Through false information. १२ A woman. १३ Go near, approach; this has ये for its subject. १४ Just as moths throw themselves on the flame of a lamp. १५ These women are, by their very nature, inwardly full of poison and attractive only in their outwards appearance, and, therefore, resembling the Gunja fruits in form. १६ That which is in the heart is not in the speech, that is, they have one thing in the mind, and express quite a different one. The following are to be similarly translated. १७ Of a very strange conduct. विचित्राणि चरितानि यासां ता: Bah. comp. १८ Dismembered; cut. १९ Are not subdued. २० Neither by gifts nor by parises.

आस्तां तावत्किमन्येन दौरात्म्येनात्र योषिताम् ।
विधृतं स्वोदरेणापि घ्नन्ति पुत्रमपि स्वकम् ॥ १० ॥
रूक्षायां स्नेहसंभारं कठोरायां सुमार्दवम् ।
नीरसायां रसं बालो बालिकायां विकल्पयेत् ॥ ११ ॥

मकर आह । भो अस्त्वेतत् । परं किं करोमि । अनर्थद्वयमेतत्संजातम् । एकस्तावद्गृहभङ्गोपरस्तु त्वद्विधेन मित्रेण सह चित्तविश्लेषः । अथवा भवत्येवं दैवोपहतानाम् । उक्तं च ।

यादृशं मम पाण्डित्यं तादृशं द्विगुणं तव ।
नै जारो न च भर्ता च किं निरीक्षसि नग्निके ॥ १२ ॥

वानर आह । कथमेतत् । सोऽब्रवीत् ।

॥ कथा ११ ॥

कस्मिंश्चिदधिष्ठाने हालिकदंपती प्रतिवसतः स्म । सा च हालिकपत्नी पतिवृद्धभावात्सदैवान्यचित्ता न किंचिदपि गृहे स्थैर्यमालम्बते । केवलं परपुरुषान्वेषणा भ्रमति । अन्यदा केनचित्परवित्तापहारकेण धूर्तेन सा लक्षिता विजने प्रोक्ता च । सुभगे मृतभार्योऽहं तव रूपलावण्यदर्शनेन हृदये स्मरबाणेन पीडितः । तद्दीयतां मे रतिदक्षिणा । ततस्तयाभिहितम् । भोः

---

१ Let it be; what is the use of mentioning here any more wickedness of women; they kill even their own sons, whom they have borne in their wombs. २ A fool expects to find great affection in a woman who is very harsh, mildness in one who is very hard-hearted and sentiment in one who is void of it. ३ Two calamities. ४ The loss of home. ५ The loss of confidence; alienation of affection. ६ Overtaken by Fate. ७ Cleverness; wisdom. ८ Two-fold. ९ There is neither your paramour, nor your husband. १० A couple of peasants. ११ On account of the old age of her husband. १२ Whose heart was devoted to another. १३ Remain steady. १४ Searching after persons other than her husband. १५ On one occasion, once. १६ He who robbed people of their wealth. १७ A rogue, a swindler. १८ In private. १९ One whose wife is dead, a widower. २० At the sight of the loveliness of your form. २१ Cupid, god of love. २२ Charity in the form of your love.

सुभग यद्येवं तदस्ति मे पत्युः प्रभूतं धनम् । स वृद्धभावात्प्रचलितुमसमर्थः । अतस्तद्धनमादायाहमागच्छामि । पश्चात्त्वया सहान्यत्र गत्वा यथेच्छं रतिसौख्यमनुभवामि । स आह । रोचते ममाप्येतत् । प्रत्यूषेऽत्र स्थाने समागन्तव्यं येन शुभतरं किंचिन्नगरं गत्वा त्वया सह जीवलोकसुखमनुभवामि । सापि तथेति प्रतिज्ञाय प्रहसितवदना स्वं गृहं गत्वा प्रसुप्तस्य पत्युः सर्वं धनं रात्रावादाय प्रत्यूषे तत्कथितस्थानमुपाद्रवत् । धूर्तोऽपि तामग्रे कृत्वा दक्षिणां दिशमाश्रित्य सत्वरगतिः प्रस्थितः । अथ तयोर्व्रजतोर्योजनद्वयमात्रेणाग्रतो नदीं समुपस्थितां दृष्ट्वा धूर्तश्चिन्तयामास । किमहमनया यौवनप्रान्ते वर्तमानया करिष्यामि । कदाचित्पृष्ठतः कश्चित्समागमिष्यति । तत्केवलं वित्तमादाय गच्छामि । इति निश्चित्य तामुवाच । प्रिये सुदुस्तरेयं नदी । तत्तावदहं द्रव्यमात्रं पारे धृत्वा समागच्छामि येन त्वामेकाकिनीं सुखेन पृष्ठमारोप्य नयामि । सा प्राह । भद्र एवं क्रियताम् । एवमुक्त्वा तस्मा अशेषं वित्तमर्पयामास । अथ तेनाभिहितम् । प्रिये परिधानवस्त्रमपि समर्पय येन जलमध्ये निःशङ्को व्रजसीति । तथानुष्ठिते केवलं वित्तमादाय वाञ्छितविषयं धूर्तो गतः । सापि कण्ठनिवेशितहस्तयुगला सोद्वेगा नदीतीरे यावदुपविष्टा तिष्ठति तावत्तत्रान्तरे काचिच्छृगालिका वदनगृहीतमांसपिण्डा तत्रागमत् । अथ यावत्पश्यति तावन्नदीतीरे महामत्स्यः सलिलान्निष्क्रम्य बहिः स्थितः । तं दृष्ट्वा सा मांसपिण्डमुत्सृज्य तं मत्स्यं प्रत्युपा-

१ A fortunate man. २ Much, plentiful. ३ To my heart's content; to my fill. ४ The pleasure of love. ५ In the morning. ६ Better, more prosperous. ७ This world of mortals. ८ Having promised. ९ With smiling looks. १० Ran; went in haste. ११ Having placed her before him. १२ Having recourse to. १३ Going with speed. १४ At a distance of 2 Yojanas, that is, 8 Koss. १५ Whose age borders on youth. १६ Very difficult to cross. १७ Having carried across or to the opposite bank. १८ All, the whole. १९ Wearing garment. २० Without fear as to its getting wet. २१ To the desired or wished for country. २२ Who had clasped her neck with both her hands. २३ Anxious. २४ A female jackal. २५ With a ball of flesh in the mouth. २६ Having issued or come out.

द्रवेत्[1]। अत्रान्तरे गृध्रस्तं[2] दृष्ट्वा मांसपिण्डमादाय च समुत्पपाद[3]। मत्स्योऽपि शृगालिकां दृष्ट्वा नद्यां प्रविष्टः। अथ सा व्यर्थश्रमा[4] तं गृध्रं विलोकयन्ती तया देवदत्तया सस्मितमभिहिता।

गृध्रेणापि हृतं मांसं मत्स्योऽपि सलिलं गतः।
मत्स्यमांसपरिभ्रष्टे[5] किं निरीक्षसि जम्बुके[6] ॥ १३ ॥

तच्छ्रुत्वा कोपयुक्तया शृगाल्याभिहितम्।

यादृशं मम पाण्डित्यं तादृशं द्विगुणं तव।
न जारो न च भर्ता च किं निरीक्षसि नग्निके ॥ १४ ॥

एवं तस्य कथयतः। पुनरन्येन जलचरेणागत्य निवेदितम्। यदहो त्वदीयं गृहमप्यपरेण महामकरेण संगृहीतम्[7]। तच्छ्रुत्वासौ दुःखितमनास्तं[8] गृहान्निःसारयितुम्[9] उपायं चिन्तयन्नाह। अहो पश्यत मे दैवम्।

[10]मित्रं चामित्रतां यातमपरं मे प्रिया मृता।
गृहमन्येन च व्याप्तं [11]किमद्यापि भविष्यति ॥ १५ ॥

अथवा युक्तमिदमुच्यते। [12]छिद्रेष्वनर्था बहुली भवन्तीति।

तत्किं करोम्यनेन सह युद्धं किंवा साम्नैव[13] संबोध्य गृहान्निःसारयामि किंवा भेददानं करोमि। अथवामुमेव वानरं मित्रं पृच्छामि। उक्तं च।

[14]यः पृष्ट्वा कुरुते कार्यं प्रष्टव्यान्स्वान्हितान्गुरून्।
न तस्य जायते विघ्नः कस्मिंश्चिदपि कर्मणि ॥ १६ ॥

१ Rushed upon, fell upon. २ A vulture. ३ To the sky. ४ She whose efforts were in vain. ५ One who has lost the fish as well as the ball of flesh. ६ Voc. sing. of जम्बुका, a female jackal. ७ Occupied, taken possession of. ८ Grieved at heart. ९. To drive out. १० A friend is truned into an enemy. ११ What more will happen hereafter, what more is in store for me? १२ Misfortunes never come single; one misery closely follows another. १३ Instr. sing. of सामन्, conciliation, one of the four remedies or means of success of which भेद in the following line is he third, meaning sowing dissension or discord. १४ He who does anything with the advice of those relatives of his who are fit to be asked, of those who are favourable and of those who are elderly, meets with no obstacle in any undertaking.

इति विचिन्त्य भूयोपि जम्बूपादपमारूढं कपिमपृच्छत् । भो मित्र पश्य मे मन्दभाग्यतां यत्संप्रति गृहमपि मे बलवन्मकरेण रुद्धम् । तदहं पृच्छामि कथय किं करोमि । सामादीनामुपायानां मध्ये कस्यात्र विषयः । स आह । भोः कृतघ्न मया निषिद्धोपि किं भूयो मामनुसरसि । नाहं तव मूर्खस्योपदेशमपि ददामि । उक्तं च यतः ।

उपदेशो न दातव्यो यादृशे तादृशे नरे ।
पश्य वानरमूर्खेण सुगृही निर्गृही कृता ॥ १७ ॥

मकर आह । कथमेतत् । सोऽब्रवीत् ।

॥ कथा १२ ॥

कस्मिंश्चिदरण्ये वृक्षशाखाकृतकुलायौ पक्षिदंपती प्रतिवसतः कदाचिन्मासे कालवृष्टिसमाहतासौम्यवातकम्पिततनुः कश्चिद्वानरः मूलमुपागतः सोपि दन्तवीणां वादयन्संकुचितकरचरणश्चटकयाभिहितः ।

हस्तपादसमायुक्तो दृश्यसे पुरुषाकृतिः ।
शीतवातहतो मूढ कथं न कुरुषे गृहम् ॥ १८ ॥

सोपि तदाकर्ण्य व्यचिन्तयत् । अहो आत्मसंतुष्टो जीवलोको यदेषा क्षुद्रचटकात्मानं बहु मन्यते ।

स्वचित्तकल्पितो गर्वः कस्य नाम न विद्यते ।
उत्क्षिप्य टिट्टिभी पादौ शेते भङ्गभयाद्दिवः ॥ १९ ॥

---

१ Obstructed. २ Of सामन् &c. For meaning see note. १३, last page. ३ Scope, use. ४ Prohibited. ५ Advice should not be given to any person whatsoever; behold! one who possessed a good dwelling was deprived of it by a foolish monkey. ६ Who had made their nests on the branch of a tree. ७ In a certain. कदाचित्=कस्मिंश्चित्. ८ Who was beaten by an untimely shower and whose body was shaking with violent wind. ९ Chattering his teeth. १० Whose hands and feet had become contracted. ११ A female lap-wing. १२ Endowed with hands and feet, you seem to have the form of a human being; why do you then not construct a house beaten as you are by cold and wind? १३ This world is self-satisfied. १४ Thinks highly of herself). १५ Who indeed has no pride conceived in his own mind? The female टिट्टिभ sleeps having thrown up its feet for fear the sky might break (otherwise).

एवं विचिन्त्य तामाह ।

सूचीमुखि दुराचारे रण्डे पण्डितमानिनि ।

तूष्णीं भव करिष्यामि नो चेत्त्वां निर्गृहामहम् ॥ १०० ॥

एवं तेन निषिद्धापि पुनराश्रयकरणोपदेशेन तमुद्वेजयति । तदासौ तं वृक्षमारुह्य तस्या कुलायं खण्डशः कृत्वा बभञ्ज । अतोहं ब्रवीमि ।

उपदेशो न दातव्यो यादृशे तादृशे जने

पश्य वानरमूर्खेण सुगृही निर्गृही कृता ॥ १०१ ॥

तच्छ्रुत्वा मकर आह । भो मित्र सापराधस्यापि मे कथय पूर्वस्नेहात् । वानर आह । नाहं करिष्यामि यतस्त्वयाहं भार्यावाक्येन समुद्रे प्रक्षेपणाय नीतः । तदेतन्न युक्तम् । यद्यपि भार्या सर्वलोकादपि वल्लभा भवति तथापि न मित्रबान्धवाद्यो भार्यावाक्येन समुद्रे प्रक्षिप्यन्ते । तन्मूर्खो मूढचेतनो यतस्त्वया स्त्रियोर्थमेतत्कार्यमनुष्ठातुमारब्धम् । न हि स्त्रीणां कथंचिद्विश्वासमुपगच्छेत् ।

येदर्थे स्वकुलं त्यक्तं जीविताधं च हारितम् ।

सा मां त्यजति निःस्नेहा कः स्त्रीणां विश्वसेन्नरः ॥ १०२ ॥

मकर आह । कथमेतत् । सोब्रवीत्

॥ कथा १३ ॥

अस्ति कस्मिंश्चिदधिष्ठाने कोपि ब्राह्मणः । तस्य च प्रियातिप्राणप्रिया । सापि कुटुम्बेन समं प्रतिदिनं कलहं कुर्वाणा न क्षणमपि विश्राम्यति ।

---

१ Oh! you needle-mouthed and ill-behaved wench, who entertain a high opinion of yourself, hold your tongue, or I shall make you homeless. २ Teased him again with the advice of making a house to live in. ३ Having broken to pieces. ४ Full of faults, one who has committed an offence. ५ Former friendship. ६ At the entreaty of a wife. ७ For being thrown into. ८ Dear, beloved. It ought to have been वल्लभतरा (dearer). ९ Friends, relatives and others. १० One who has become silly or mad. ११ Begun to do. १२ Should put faith or confidence in. १३ That cold-hearted woman, for whose sake I left off my family and gave up also half of my life, abandons me. What man can put faith in women? १४ Dear to life. १५ Did not cease quarreling with her family, that is, always quarreled with, &c.

सोपि ब्राह्मणः कलहमसहमानो भार्यावात्सल्यात्स्वकुटुम्बं परित्यज्य ब्राह्मण्या सह विप्रकृष्टदेशान्तरं गतः । अथ महाटवीमध्ये ब्राह्मण्याभिहितम् । यदार्यपुत्र तृषा मां बाधते । तदुदकं कुतोप्यानय । अथासौ तद्वचनानन्तरं यावदुदकं नीत्वागच्छति तावत्तां मृतामपश्यत् । अतिवल्लभतया विषादं कुर्वन्यावद्विलपति तावदाकाशे वाचं शृणोति । यदि भो ब्राह्मण त्वं स्वजीवितस्यार्धं ददासि तत्ते जीवति ब्राह्मणी। तदा ब्राह्मणेन शुचीभूय तिसृभिर्वाचाभिः स्वजीवितार्धं दत्तम् । वाक्यसममेव जीविता सा ब्राह्मणी। अथ तौ जलं पीत्वा वनफलानि भक्षयित्वा गन्तुमारब्धौ । ततः क्रमेण कस्यचिन्नगरस्य प्रवेशे पुष्पवाटिकां प्रविश्य ब्राह्मणो भार्यामभिहितवान् । भद्रे यावदहं भोजनं गृहीत्वा समागच्छामि तावत्त्वयात्र स्थातव्यम् । इत्यभिधाय ग्रामं गतः । अथ तस्यां पुष्पवाटिकायां पङ्गुररघट्टं खेलयमानो दिव्यगिरा गीतमुद्गिरति । तच्च श्रुत्वा कुसुमेषुणाभिहतया तया तत्सकाशं गत्वाभिहितम् । भद्र यदि मां न कामयसे तन्मदीया स्त्रीहत्या तव । पङ्गुराह । किं व्याधिग्रस्तेन मया करिष्यसि । साह । इतः प्रभृति यावज्जीवं मयात्मा भवतो दत्तः । इति ज्ञात्वा भवानप्यावाभ्यां सहागच्छतु । सोब्रवीत् एवमस्तु । अथ ब्राह्मणो भोजनं गृहीत्वा समागत्य तया सह भोक्तुमारब्धः । साब्रवीत् । एष पङ्गुर्बुभुक्षितः । तदेतस्यापि कियन्तमपि ग्रासं देहीति । यथानुष्ठिते ब्राह्मण्याभिहितम् । भो विप्र सहायहीनस्त्वम् । यदा ग्रामान्तरं गच्छसि तदा मम वचनसहायोपि नास्ति । तत एनं पङ्गुं

१ Fondness. २ Remote, distant. ३ In the midst of a large desert. ४ A husband (lit. son of the father-in-law). ५ Sorrow. ६ Having become pure, that is, having bathed or touched water. ७ By solemnly repeating the words, "I give," three times. ८ The moment the words were pronounced. ९ At the entrance. १० Flower-garden. ११ A cripple, a lame man. १२ Drawing, turning. १३ With a charming voice. १४ Sang a song. १५ Who was smitten by the flower-arrowed god, Love. १६ The woman-murder caused by my death. १७ Disabled by a disease. १८ As long as I live. १९ p. p. of the desid. of भुज्. Hungry. २० Without a companion. २१ Any one to talk to.

गृहीत्वा गच्छावः । सोऽब्रवीत् । [१]त्वं न शक्तोऽस्यात्मानमात्मना वोढुं किं पुनरिमं पङ्गुम् । सा प्राह । [२]यत्पेटाभ्यन्तरस्थमहं नेष्यामि । अथ [३]तत्कृतकवचनव्यामोहितचित्तेन तेनापि [४]प्रतिपन्नम् । तथानुष्ठिते चान्यस्मिन्दिने [५]कूपोपकण्ठविश्रान्तो ब्राह्मणस्तया [६]पङ्गुपुरुषासक्तया [७]संप्रेर्य कूपान्तः पातितः । सापि पङ्गुं गृहीत्वा कस्मिंश्चिन्नगरे प्रविष्टा । तत्र च [८]चौर्यरक्षानिमित्तं राजपुरुषैरितस्ततो भ्रमद्भिस्तन्मस्तकस्थां पेटां दृष्ट्वा [९]बलादाच्छिद्य राज्ञोऽग्रे नीता । यावत्तामु[१०]द्घाटयति राजा तावत्पङ्गुं ददर्श । ततः सा ब्राह्मणी [११]विलापान्कुर्वती राजपुरुष[१२]पदैरेव तत्रागता राज्ञा पृष्टा । को वृत्तान्त इति । साब्रवीत् ममैष भर्ता व्याधिग्रस्तो दायादसमूहैरुद्वेजितो मया स्नेह[१३]व्याकुलितचित्तया [१४]शिरसि कृत्वा त्वत्सकाशमानीतः । एतच्छ्रुत्वा राजाब्रवीत् । यन्मम त्वं भगिनी । ग्राम[१५]द्वयं गृहीत्वा भर्त्रा सह भोगान्भुञ्जाना सुखेन तिष्ठ । अथ स ब्राह्मणो दैववशात्केनापि साधुना कूपा[१६]दुत्तारितः परिभ्रमंस्तदेव नगरमायातः । तया दुष्टभार्यया दृष्टो राज्ञे [१७]निवेदितः । राजन्नयं मद्भर्तुर्वैरी समायातः । राज्ञापि [१८]वधार्थं समादिष्टः । सोऽब्रवीत् । देव अनया [१९]मम सत्कं किंचिद्गृहीतमस्ति । ततो यदि त्वं [२०]धर्मवत्सलस्ततो दापय । राजाब्रवीत् । भद्रे त्वयास्य सत्कं किंचिद्गृहीतमस्ति तत्समर्पय । सा प्राह । देव मया न किंचिद्गृहीतम् । ब्राह्मण आह । यन्मया [२१]त्रिवाचिकं स्वजीवितार्धं तव दत्तं तद्देहि मे । अथ सा राजभयात्तत्रैव त्रिवाचिकमेव जीवितं

---

१ You are not able to carry even your own self, much less this cripple. २ Placed inside a box. ३ Whose mind was deluded by her pretended love ४ Was agreed to; granted. ५ Who had rested near the side of a well. ६ Who was attached to a lame man. ७ Being pushed or shaken. ८ For the purpose of guarding against thefts. ९ Having snatched. १० Opens. ११ Lamenting. १२ Closely following the footsteps of the king's officers. १३ With my heart moved with compassion. १४ Having placed on the head. १५ Two villages. १६ Taken out of the well. १७ Was accused before the king as the enemy already mentioned. १८ Was ordered to be executed. १९ Belonging to me. २० Devoted to religion. २१ Accompanied with an assertion thrice repeated.

मया दत्तमिति जल्पन्ती प्राणैर्विमुक्ता । ततः सविस्मयं राजाब्रवीत् । किमेतदिति । ब्राह्मणेनापि सकलोपि वृत्तान्तस्तस्मै निवेदितः । अतोहं ब्रवीमि ।

यदर्थं स्वकुलं त्यक्तं जीवितार्धं च हारितम् ।
सा मां त्यजति निःस्नेहा कः स्त्रीणां विश्वसेन्नरः ॥ १०३ ॥

अथ तच्छ्रुत्वा मकर आह । भो वयस्य मे कृतद्रोहस्य[1] बुद्धेः[2] परमकृपया ममोपरि प्रसादं कृत्वा शोभनोपायः कथ्यतां येनोपायेन सुखेन गृहं प्राप्नोमि । तच्छ्रुत्वा कपिराह । भो दुर्बुद्धे भवान्कथितमपि न संविधास्यति[3] । यथा ।

सतां वचनमादिष्टं यो मोहादवमन्यते ।
स एव नाशमाप्नोति सिंहाद्दासेरको यथा ॥ १०४[4] ॥

मकर आह । कथमेतत् । सोब्रवीत् ।

॥ कथा १४ ॥

अस्ति कस्मिंश्चिदधिष्ठाने मन्दमतिनामा रथकारः प्रतिवसति स्म । तेन स्वकर्मानभिज्ञेनोष्ट्री[5][6] गृहीता । तस्याः खादनपानादिकं कुर्वन्कालं नयति । ततो महतोष्ट्रेण संगमो जातः सा गर्भं दधार[7] । अथ प्रसवसमये[8] प्रसूता । दासेरको जातः । अथ नगरनिकटवाटिकायां[9] धवखदिरपलाशाम्रजम्बून्यग्रोधादीनां[10] पल्लवभक्षणादहर्निशं पीवरतनुरुष्ट्री[11] संजाता । सोपि दासेरको महातनुः संजातः । ततः स नित्यमेव दुग्धं नीत्वा कुटुम्बं परिपालयति । रथकारेण वल्लभत्वाद्दासेरकग्रीवायां[12] घण्टा बद्धा । पश्चाद्रथकारो व्यचिन्त-

१ Of one who intended to take (your) life. २ Good, useful. ३ To do, to act according to. ४ He who through folly disregards the advice given by the good, meets with certain destruction as the young camel met death at the hands of a lion. ५ Not knowing, ignorant of. ६ A she-camel. ७ Had conception. ८ At the time of delivery. ९ In the garden situated in the vicinity of the town. १० These are the names of various trees. ११ Fat, bulky. १२ Neck.

यत् । किमन्यैर्दुष्कृतकर्मभिः[१] । एतदेवोष्ट्रीपरिपालनमस्य कुटुम्बस्य भरणपोषणे भव्यं[२] जातम् । तत्किमन्येन व्यापारेण । तत एतस्या उपरि द्रम्मा[३] गृह्यन्ते । एवं विचिन्त्य गृहमागत्य प्रियामाह । मयास्या उष्ट्र्या उपरि बहवो द्रम्मा गृहीतव्याः । ततस्त्वयैषा यत्नेन रक्षणीया यावदहमपरामुष्ट्रीं गृहीत्वागच्छामि । ततश्च द्रम्मानादाय गुर्जरग्रामे[४] गत्वा करभाः[५] संक्रीताः । अथ तेन महद्यूथं[६] कृत्वा रक्षापुरुषाणां प्रतिवर्षं करभमेकं च निवेद्याहर्निशं[७] दुग्धपानमादिष्टम्[८] । एवं स रथकारो नित्यमेवोष्ट्रव्यापारं कुर्वन्सुखेन तिष्ठति । अथ ते दासेरका अधिष्ठानोपवन[९] आहारार्थं गच्छन्ति । कोमलवल्लीर्भक्षयित्वा[१०] महासरसि पानीयं पीत्वा च प्रायं सर्वे मन्दंमन्दं लीलया[११] गृहमागच्छन्ति । स च मदातिरेकात्[१२] पूर्वदासेरकः[१३] पृष्ठ आगत्य मिलति[१४] । ततस्तैरभिहितम् । अहो मन्दमतिरयं[१५] दासेरको यूथाद्भ्रष्टः[१६] पृष्ठे[१७] स्थित्वा घण्टां वादयन्नागच्छति । यदि कस्यापि दुष्टस्य सत्त्वस्य[१८] संदर्शे[१९] पतिष्यति तन्नूनं मरिष्यति । अथ तेषां तद्वनं गाहमानानां[२०] कश्चित्सिंहो घण्टारवमाकर्ण्य[२१] समायातः । यावदवलोकयति तावदुष्ट्रीदासेरकाणां यूथं गच्छति । एकस्तु पृष्ठे क्रीडां कुर्वन्वल्लीं चरन्[२२] यावद्गच्छति तावदन्यदासेरकाः पानीयं पीत्वा स्वगृहे गताः । सोऽपि चिरैरान्निष्क्रम्य[२३] यावद्दिशोऽवलोकयति[२४] तावन्न कथंचिन्मार्गं[२५] वेत्ति । यूथाद्भ्रष्टो महाशब्दं कुर्वन्मन्दंमन्दं[२६] यावत्किंचिद्दूरं गच्छति तावच्छब्दानुसारेण[२७] सज्जितक्रमो भूत्वा सिंहोऽग्रे स्थितः । यावदुष्ट्रः समीपमागतस्तावत्सिंहेनोल्ललयित्वा[२८] ग्रीवायां[२९] गृहीत्वा मारितः । अतोऽहं ब्रवीमि ।

---

१ What is the good of other vile profession? २ Prosperous, good. ३ Many *drammas*, a *dramma* being equal in value to 4 annas or six pence. ४ To a village or town in Gujrât. ५ Camels. ६ A herd. ७ Having assigned. ८ Permitted, allowed. ९ A town. १० Creepers. ११ Playfully, sportively. १२ On account of the excess of pride. १३ The young camel mentioned first. १४ Would join (the rest). १५ Dull-headed, foolish. १६ Fallen away from. १७ Having remained behind. १८ An animal. १९ Sight, view. २० While entering. २१ Sound of the bell. २२ Grazing. २३ Having wandered about. २४ Looked at the quarters, looked about. २५ Would by no means find out his way. २६ Slowly and slowly. २७ Following the sound. २८ Having jumped up. २९ Having seized by the neck.

सतां वचनमादिष्टं यो मोहादवमन्यते।
स एव नाशमाप्नोति सिंहाद्गामेरको यथा॥ १०५॥

अथ तच्छ्रुत्वा मकर आह। भद्र।

प्राहुः साप्तपदं मैत्रं जनाः शास्त्रविचक्षणाः।
मित्रतां च पुरस्कृत्य किंचिद्वक्ष्यामि तच्छृणु॥ १०६॥
उपदेशोपदातॄणां नराणां हितमिच्छताम्।
इह लोके परत्रे च व्यसनं नोपपद्यते॥ १०७॥

ततः कृतघ्नस्य मे कुरु प्रसादमुपदेशप्रदानेन।

उपकारिषु यः साधुः साधुत्वे तस्य को गुणः।
अपकारिषु यः साधुः स साधुः सद्भिरुच्यते॥ १०८॥

तदाकर्ण्य वानर आह। भद्र यद्येवं तद्गत्वा तेन सह युद्धं कुरु। उक्तं च।

उत्तमं प्रणिपातेन शूरं भेदेन योजयेत्।
नीचमल्पप्रदानेन समं तुल्यपराक्रमैः॥ १०९॥

मकर आह। कथमेतत्। सोऽब्रवीत्।

॥ कथा १५ ॥

अस्ति कस्मिंश्चिद्वने महाचतुरको नाम शृगालः प्रतिवसति स्म। तेन कदाचिदरण्ये स्वयंमृतो गजः समासादितः। तस्य समन्ताद् भ्रमति। परं कठिनत्वचं भेत्तुं न शक्नोति। तत्रान्तरे भ्रमंस्तत्र प्रदेशे कश्चित्सिंहः समायातः। तं दृष्ट्वा स क्षितितलविन्यस्तमौलिः प्रणम्य प्रोवाच। स्वामिन्

१ Persons versed in the scriptures say that friendsh[illegible] is made or gained by seven steps. Hear what little I sh[illegible] say respecting friendship. २ No calamity befalls those w[illegible] volunteer advice to, and wish the welfare of, people either in this world or the next. ३ What is the use of the goodness of him who is good to those who have done him good; but he is said by sages to be really good who is so towards those who have done him harm. ४ One should gain over the best by means of salutation, a brave person by means of sowing discord, and a mean person by a small gift, and an equal by equal valour. ५ Naturally dead. ६ Round about. ७ Skin. ८ Place, region. ९ With the head placed on the ground in adoration.

त्वदीयो लाकुटिकः सन्नहं गजं रक्षयामि । तद्भक्षयतु स्वामी । तं दृष्ट्वा भद्र आह । भो नाहमन्यहतं सत्त्वं कदाचिद्भक्षयामि । तन्मया प्रसादीकृत एष ते गजः । तच्छ्रुत्वा सानन्दमाह । युक्तमेतत्स्वामिनः । उक्तं च ।

अन्त्यावस्थागतोऽपि महान्स्वगुणान्न जहाति न शुद्धतया ।
न श्वेतभावमुज्झति शङ्खः शिखिभुक्तमुक्तोऽपि ॥ ११० ॥

तदाकर्ण्य सिंहो गतः । अथ तस्मिन्गते कश्चिद्व्याघ्रः समायातः । तमपि दृष्ट्वा व्यचिन्तयत् । कथमेको दुरात्मा सिंहस्तावत्प्रणिपातेनापवाहितः । तदस्य कथमिदानीं निवारणं भविष्यति । शूरोऽयं भेदं विना साध्यो न भविष्यति । उक्तं च ।

न यस्य शक्यते कर्तुं साम दानमथापि वा ।
भेदस्तत्र प्रयोक्तव्यो यतः स वशकारकः ॥ १११ ॥

यतः सर्वगुणसंपन्नोऽपि भेदेन बध्यते । उक्तं च ।

अत्यच्छेनाविरुद्धेन सुवृत्तेनातिचारुणा ।
अन्तर्भिन्नेन संप्राप्तं मौक्तिकेन निबन्धनम् ॥ ११२ ॥

एवं संप्रधार्य तस्याभिमुखो भूत्वोन्नतकंधरः प्रोवाच । माम अद्य भवानत्र मृत्युमुखे प्रविष्टः । एष गजो व्यापादितः सांप्रतं सिंहेन । स च मां

१ The word लाकुटिक is the same as लागुडिक which means—one armed with a club; a sentinel. २ Killed by another (अन्येन हतं, Instr. Tat.). ३ Made a present, presented. ४ A great man though reduced to the last extremity does not given up his naturally bright qualities by reason of his inborn purity. A conch, though put in fire and taken out, does not lose its whiteness. ५ Somehow. ६ Removed or got rid of. ७ Removal. ८ The remedy भेद (sowing discord) should be employed in the case of him who is not likely to be won over either by साम (peace) or by दान (gift), because it accomplishes the object in view (wins over). ९ Is won or gained over. १० A man desirous of salvation (मौक्तिकः) though very upright in conduct (अत्यच्छ), of a yielding disposition, well-behaved and very pleasant, is tied down to this worldly existence, when he is not able to recognize the unity of the Soul and of Brahma (अन्तर्भिन्नः); just as a pearl (मौक्तिकम्), though very bright, smooth, round and beautiful, is tied or put in garlands when bored through (अन्तर्भिन्नम्). ११ With neck a little up-lifted. १२ Have fallen into the jaws of death.

रक्षपालं निधाय स्नानार्थं गतः। तेन च मम निवेदितं गच्छता। यदि व्याघ्रः समागच्छति तन्मम सुगुप्तं निवेदनीयं येन मया निर्व्याघ्रं वनं कार्यम्। यतो व्याघ्रेणैकेन मया हतो गजः शून्ये भक्षयित्वोच्छिष्टतां नीतः। तच्छ्रुत्वा भयत्रस्तमनाः स आह। भो भागिनेयसुत देहि मे प्राणदक्षिणां त्वया यतश्चिरयागतस्य तस्य मदीया किंवदन्ती न कथ्येया। एवमुक्त्वा सत्वरं प्रनष्टः। अथ तस्मिन्गते कश्चिद्वानरः समायातः। तमपि दृष्ट्वा व्यचिन्तयत्। दृढदंष्ट्रोयम्। तदस्य पार्श्वाद्गजचर्मच्छेदं कारयामि। एवं निश्चित्य तमुवाच। भो भागिनेयसुत चिराद्दृष्टोऽसि। अपरं बुभुक्षितः समागतस्त्वमतिथिश्च। एष गजः सिंहेन हतस्तिष्ठति। अहं तु रक्षपालः। अतो वदामि। मांसं भक्षयित्वा तृप्तिं कृत्वा व्रज यावत्स नागच्छति। स आह। माम यद्येवं तन्न कार्यं मे मांसाशनेन। यतो जीवन्नरो भद्रशतानि पश्यति। उक्तं च।

> यच्छक्यं ग्रसितुं ग्रस्यं ग्रस्तं परिणमेच्च यत्
> हितं च परिणामे यत्तदाद्यं भूतिमिच्छता ॥ ११३ ॥

तदहं यास्यामि। शृगाल आह। भो विश्रब्धो भक्षय त्वम्। तस्यागमनं दूरतोहं ते निवेदयिष्यामि। तथानुष्ठिते चर्मभेदं ज्ञातं विज्ञाय तेनाभिहितम्। भो भागिनेयसुत गम्यतां गम्यताम्। एष सिंहः समायाति। तच्छ्रुत्वा सोऽपि प्रनष्टः। अथ यावदसौ वानरकृतेद्वारेण तन्मांसं भक्षयति तावदपरः शृगालः संक्रुद्धः समायातः। तमपि दृष्ट्वेम श्लोकमपठत्।

> उत्तमं प्रणिपातेन शूरं भेदेन योजयेत्।
> नीचमल्पप्रदानेन समशक्तिं पराक्रमैः ॥ ११४ ॥

१ Having placed me as a sentinel or guard. २ Secretly. ३ I shall make the forest tiger-less, that is, I shall kill all the tigers in the forest. ४ In solitude. ५ Has been defiled. ६ Give me the gift of my life, that is, save my life. ७ The intelligence or news about me. ८ Having strong jaws. ९ At his hands or by him. १० While he does not come back, *i. e.*, before he returns. ११ I have nothing to do with the eating of flesh. १२ If a man lives he can see or enjoy hundreds of good things. १३ Without fear or doubt. १४ Having known that the skin was torn. १५ Through the opening made by the monkey. १६ Angry. १७ Equal in strength.

ततस्तं जित्वा स्वदंष्ट्राभिर्विदार्य दिशोभाजं कृत्वा स्वयं सुखेन चिरकालं तन्मांसं बुभुजे । त्वमपि युद्धेन तं पराभवं नीत्वा दिशोभाजं कुरु । नो चेद्विनाशमवाप्स्यसि । उक्तं च ।

संभाव्यं गोषु संपन्नं संभाव्यं ब्राह्मणे तपः ।
संभाव्यं स्त्रीषु चापल्यं संभाव्यं ज्ञातितो भयम् ॥ ११५ ॥

तथा च । सुभक्ष्याणि विचित्राणि शिथिलाश्चैव योषितः ।
एको दोषो विदेशस्य स्वजातिर्यद्विरुध्यते ॥ ११६ ॥

मकर आह । कथमेतत् । सोऽब्रवीत् ।

॥ कथा १६ ॥

अस्ति कस्मिंश्चिदधिष्ठाने चित्राङ्गो नाम सारमेयः प्रतिवसति स्म । एकदा महद्दुर्भिक्षमभवत् । अन्नाभावेन सर्वापि सारमेयजातिर्निष्कुलतां गच्छति । अत्रान्तरे स चित्राङ्गः क्षुत्क्षामकण्ठः सुभिक्षं श्रुत्वान्यदेशं गतः । तत्रैकस्मिन्गृहे शिथिलगृहिणीप्रसादेन तृप्तिं गच्छति । परं बहिर्निर्गतोन्यैः सारमेयैश्चतुर्दिशं दंष्ट्राभिर्विदार्यते । ततस्तेन विचिन्तितम् । अहो वरं स्वदेशो यत्र दुर्भिक्षेपि सुखेन स्थीयते न कोपि युद्धं करोति । तत्स्वदेशं गच्छामि । इत्यवधार्य तथाकरोत् । अथासौ देशान्तरात्समायातः सर्वैरपि स्वजनैः पृष्टः । भोश्चित्राङ्ग कथयास्माकं देशान्तरवार्त्ताम् । कीदृग्देशः । किंचेष्टितो लोक इति । स आह । किं कथ्यते देशस्य विपर्यये ।

१ Having shared (it) with the quarters, that is, having thrown portions of it about himself. This is usually done by persons before they eat anything. Here the word is दिशस् which is rarely used for दिशा or दिश. २ Prosperity is thought possible from cows, penance in a Bráhmana, unsteadiness in woman and fear from one's own race. (In this verse संपन्नं is equal to संपत्तिः.) ३ There are various kinds of good eatables and the women thereof are careless; there is only one defect in the foreign land, viz., the same race or caste is hated. ४ A dog. (सरमाया अपत्यम्.) Saramá was the bitch of gods. ५ Became annihilated. ६ Having heard that there was plenty (in another place). ७ In the four directions, that is, on all sides. ८ One can live happily. ९ What are the occupations of the people, how are the people engaged? १० In the matter of the country (the foreign country from which the dog had returned).

सुभक्ष्याणि विचित्राणि शिथिलाश्चैव योषितः ।
एको दोषो विदेशस्य स्वजातिर्यद्विरुध्यते ॥ ११७ ॥

सोपि तच्छ्रुत्वा मरणे[१] कृतनिश्चयो भूत्वा वानरमनुज्ञाप्य[२] स्वाश्रयं गतः । तत्र च तेन गृहप्रविष्टेन सह विग्रहं कृत्वा तं व्यापाद्य स्वाश्रयं सुखेनाधिष्ठितवान्[३] । अथवा साध्विदमुच्यते ।

अकृत्वा[४] पौरुषं या श्रीः किं तयापि सुभोग्यया ।
जरद्गवोपि चाश्नाति दैवादुपगतं तृणम् ॥ ११८ ॥

॥ इति[५] समाप्तं लब्धप्रणाशं नाम चतुर्थं तन्त्रम् ॥

१ Having resolved to die. २ Having taken leave of the monkey. ३ Lived or dwelt in. ४ What is the use even of that wealth which is obtained without any manly exertions? It is only the old ox that eats the grass which is obtained by fate, that is, without any trouble on his part. The reading नाश्नाति for चाश्नाति given by other editions gives a better sense, as it very aptly serves to illustrate the first half of the verse. ५ This word is used to mark the end of a work, just as अथ is used to mark the beginning.

अथ

पञ्चमतंत्रम् ।

[1]कुदृष्टं कुपरिज्ञातं कुश्रुतं कुपरीक्षितम् ।
तन्नरेण न कर्तव्यं नापितेनात्र यत्कृतम् ॥ १

तद्यथानुश्रूयते ।

॥ कथा १ ॥

अस्ति दाक्षिणात्ये[2] जनपदे[3] पाटलिपुत्रं नाम नगरम् । तत्र मणिभद्रो नाम श्रेष्ठी[4] प्रतिवसति स्म । तस्य च धर्मार्थकाम[5]कर्माणि कुर्वतो विधि-[6]वशाद्धनक्षयः संजातः । ततो विभवक्षयादपमानपरंपरया[7] परं विषादं[8] गतः । रात्रौ सुप्तश्चिन्तितवान् । अहो धिगियं[9] दरिद्रता । उक्तं च ।

[10]शीलं शौचं क्षान्तिर्दाक्षिण्यं मधुरता कुले जन्म ।
न विराजन्ति हि सर्वे वित्तविहीनस्य पुरुषस्य ॥ २ ॥
मानो वा दर्पो वा विज्ञानं विभ्रमः[11] सुबुद्धिर्वा ।
सर्वं प्रणश्यति समं[12] वित्तविहीनो यदा पुरुषः ॥ ३ ॥

१ Whatever is imperfectly seen, known or examined, should never be acted up to by any person, as was done by the barber in the following story. २ Southern. ३ Country. ४ A big merchant. ५ Duties as regards religion, wealth, and desire, these being the first three of the four duties of man in this world. ६ Unluckily, as Fate would have it. ७ By a series of insults consequent on the loss of wealth. ८ Grief, sorrow. ९ Fie on this poverty. १० Good disposition, purity of conduct, forbearence, kindness or politeness, sweetness of temper and birth in a noble family-all these make no figure when a man is without wealth. ११ Beauty. १२ Together.

प्रतिदिवसं याति लयं वसन्तवाताहतेव शिशिरश्रीः ।
बुद्धिर्बुद्धिमतामपि कुटुम्बभरचिन्तया सततम् ॥ ४ ॥
नश्यति विपुलमतेरपि बुद्धिः पुरुषस्य मन्दविभवस्य ।
घृतलवणतैलतण्डुलवस्त्रेन्धनचिन्तया सततम् ॥ ५ ॥
गगनमिव नष्टतारं शुष्कं सरः श्मशानमिव रौद्रम् ।
प्रियदर्शनमपि रूक्षं भवति गृहं धनविहीनस्य ॥ ६ ॥
न विभाव्यन्ते लघवो वित्तविहीनाः पुरोपि निवसन्तः ।
सततं जातविनष्टाः पयसामिव बुद्बुदाः पयसि ॥ ७ ॥
सुकुलं कुशलं सुजनं विहाय कुलकुशलशीलविकलेपि ।
आढ्ये कल्पतराविव नित्यं रज्यन्ति जननिवहाः ॥ ८ ॥
विफलमिह पूर्वसुकृतं विद्यावन्तोपि कुलसमुद्भूताः ।
यस्य यदा विभवः स्यात्तस्य तदा दासतां यान्ति ॥ ९ ॥
लघुरयमाह न लोकः कामं गर्जन्तमपि पतिं पयसाम् ।
सर्वमलज्जाकरमिह यत्कुर्वन्तीह परिपूर्णाः ॥ १० ॥

१ Through the anxiety of supporting the family, the talent even of the talented, daily and constantly declines like the beauty of Sisira when struck by the gales of the spring. २ The talent even of a every talented man, when his fortune declines, is lost by the constant anxiety of acquiring clarified butter, salt, oil, rice, clothing and fuel (for the support of his family). ३ The house of a poor man becomes or appears like the sky, the stars in which are invisible. like a dry lake and a terrible burial ground and seems quite ugly though originally beautiful.. 4 Insignificant and poor people, though they live before (the eyes of rich persons), are not seen to exist as the bubbles of water that constantly rise on the surface and disappear. ५ Multitudes of people are always attached to a rich person (आढ्ये) though void of noble birth, virtue (कुशल) and good disposition, as if he were the wish-tree (कल्पतरु), after having left him off who is noble-born, clever and humane (if he be poor). ६ Good actions done in the previous existence are of no use in this. Even learned men born in a noble family, become the slaves of a person when he possesses wealth. ७ Though the lord of waters (ocean) roars as it pleases, still people do not say that it is mean or low. Everything that the opulent do here is not considered shameful.

एवं संप्रधार्य भूयोप्यचिन्तयत् । यदहमनशनं कृत्वा प्राणानुत्सृजामि । किमनेन व्यर्थजीवित[1]व्यसनेन । एवं निश्चयं कृत्वा सुप्तः । अथ तस्य स्वप्ने पद्मनिधिः[2] क्षपणकरूपी[3] दर्शनं[4] गत्वा प्रोवाच । भोः श्रेष्ठिन् मा त्वं वैराग्यं[5] गच्छ । अहं पद्मनिधिस्तव पूर्वपुरुषोपार्जितः[6] । तदनेनैव रूपेण प्रातस्त्वद्गृहमागमिष्यामि । तत्त्वयाहं लकुटप्रहारेण[7] शिरसि ताडनीयो येन कनकमयो भूत्वाक्षय्यो[8] भवामि । अथ प्रातः प्रबुद्धः[9] सन्स्वप्नं स्मरंश्चिन्ताचक्रमा[10]रूढस्तिष्ठति । अहो सत्योयं स्वप्नः किंवासत्यो भविष्यति न ज्ञायते । अथवा नूनं मिथ्या भाव्यं यतोहं केवलं वित्तमेव चिन्तयामि । उक्तं च ।

> व्याधितेन[11] सशोकेन चिन्ताग्रस्तेन जन्तुना ।
> कामार्त्तेनाथ मत्तेन दृष्टः स्वप्नो निरर्थकः ॥ ११ ॥

एतस्मिन्नन्तरे तस्य भार्यया कश्चिन्नापितः पादप्रक्षालनाया[12]हूतः । अत्रान्तरे च यथानिर्दिष्टः[13] क्षपणकः सहसा प्रादुर्बभूव[14] । अथ स तमालोक्य प्रहृष्टमना यथासन्नकाष्ठदण्डेन[15] तं शिरस्यताडयत् । सोऽपि सुवर्णमयो भूत्वा तत्क्षणाद्भूमौ निपतितः । अथ तं स श्रेष्ठी निभृतं[16] स्वगृहमध्ये कृत्वा नापितं संतोष्य[17] प्रोवाच । यदेतद्धनं वस्त्राणि च मया दत्तानि गृहाण । भद्र पुनः[18] कस्यचिन्नाख्येयो वृत्तान्तः । नापितोपि स्वगृहं गत्वा व्यचिन्तयत् । नूनमेते सर्वेपि नग्नकाः[19] शिरसि दण्डहताः काञ्चनमया भवन्ति । तदहमपि

१ A fond attachment to life. २ A treasure amounting to one Padma, that is, 10,00,00,000 coins. ३ Disguised as a Buddhist monk. ४ Having appeared. ५ Do not become so disinclined to wordly pleasures. ६ Acquired by your ancestors. ७ With the stroke of a stick or cudgel. ८ Ever-lasting, eternal. ९ Awakened. १० Lit. placed on the wheel of anxiety, that is, in great anxiety ११ The dream seen by one who is diseased, sorry, distressed by anxiety, afflicted by the passions of love and intoxicated, is of no use, that is, whatever is seen by such persons will never be realized. १२ For washing the feet. १३ As already described. १४ Became manifest, appeared. १५ With a wooden cudgel which happened to be near. १६ Having concealed (him) closely in the middle of the house. १७ Having satisfied (the barbor) with some reward. १८ But. १९ The naked ones, that is, Buddhist ascetics.

प्रातः प्रभूतान्[1]आहूय लकुटैः शिरसि हन्मि येन प्रभूतं हाटकं[2] मे भवति। एवं चिन्तयतो महता[3] कष्टेन निशातिचक्राम[4]। अथ प्रभातेऽभ्युत्थाय बृहल्लकुटमेकं प्रगुणीकृत्य[5] क्षपणकविहारं[6] गत्वा जिनेन्द्रस्य[7] प्रदक्षिणात्रयं[8] विधाय जानुभ्यामवनिं[9] गत्वा वक्त्रद्वारन्यस्तोत्तरीयाञ्चलस्[10]तारस्वरेणेमं श्लोकमपठत्।

जयन्ति[11] ते जिना येषां केवलज्ञानशालिनाम्।
आजन्मनः स्मरोत्पत्तौ मानसेनोषरायितम्॥ १२॥

अन्यच्च। सा[12] जिह्वा या जिनं स्तौति तच्चित्तं यज्जिने रतम्।
तावेव च करौ श्लाघ्यौ यौ तत्पूजाकरौ करौ॥ १३॥

तथा च। ध्यानव्याजमुपेत्य[13] चिन्तयसि कामुन्मील्य चक्षुः क्षणं
पश्यानङ्गशरातुरं जनमिमं त्रातापि नो रक्षसि।
मिथ्याकारुणिकोऽसि निर्घृणतरस्त्वत्तः कुतोऽन्यः पुमान्
सेर्ष्यं मारवधूभिरित्यभिहितो बुद्धो जिनः पातु वः॥ १४॥

एवं संस्तुत्य ततः प्रधानक्षपणक[14]मासाद्य क्षितिनिहितजानुचरणो[15] नमोऽस्तु वन्द इत्युच्चार्य लब्धधर्मवृद्ध्याशीर्वादः[16] सुखमालिकानुग्रह[17]लब्धव्रतादेश

---

१ Many. २ Gold. ३ With great difficulty. ४ Passed away, wore out. ५ Having made ready. ६ A monastory. ७ The lord of Jains, that is, Buddha. ८ Having gone round him three times. ९ Having knelt down (in adoration). १० Having placed on his mouth the end of his upper garment. ११ A victory to those Jinas, who possess the highest knowledge leading to salvation, and whose minds since their birth are quite barren as regards the production of love. १२ That is certainly a tongue which praises Jina, and that is the mind which is attached to Jina, and those hands alone are praiseworthy which worship Jina. १३ What woman are you thinking of under the pretext of meditation? Open your eyes for a moment and look at this person afflicted by the arrows of the bodiless Cupid. Though our protector you do not save us. You only pretend to be merciful; what other person is more cruel than you? May Buddha Jina, thus angrily addressed by love-striken woman, protect you! १४ The principal monk. १५ With the knees and feet touching the ground. १६ Who received a blessing for the prosperity of religion—the blessing is thus worded "धर्मो वर्धताम्." १७ Who was initiated into the observance of vows, a favour calculated to confer a series of happiness.

उत्तरीयनिबद्धग्रन्थिः तमभ्यर्थ्येदमाह । भगवन्नद्य विहरणक्रिया समस्तमुनिसमेतेनास्मद्गृहे कर्तव्या । स आह । भोः श्रावक धर्मज्ञोऽपि किमेवं वदसि । किं वयं ब्राह्मणसमाना यत आमन्त्रणं करोषि । वयं सदैव तत्कालपरिचर्यया भ्रमन्तो भक्तिभाजं श्रावकमवलोक्य तस्य गृहे गच्छामस्तेन कृच्छ्रादभ्यर्थिताः । तद्गृहे प्राणधारणमात्रामशनक्रियां कुर्मः । तद्गम्यतां नैवं भूयोऽपि वाच्यम् । तच्छ्रुत्वा नापित आह । भगवन् वेद्म्यहं युष्मद्धर्मम् । परं भवतो बहुश्रावका आह्वयन्ति सांप्रतं पुनः पुस्तकाच्छादनयोग्यानि कर्पटानि बहुमूल्यानि प्रगुणीकृतानि तथा पुस्तकानां लेखनाय लेखकानां च वित्तं दत्तमास्ते । तत्सर्वथा तत्कालोचितं कार्यम् । ततो नापितोऽपि स्वगृहं गतः । तत्र च गत्वा खादिरमयं लकुटं सज्जीकृत्य कपाटयुगलं द्वारे समाधाय सार्धप्रहरद्वयोद्देशे भूयोऽपि विहारद्वारमाश्रित्य सर्वान्क्रमेण निष्क्रामतो गुरुप्रार्थनया स्वगृहमानयत् । तेऽपि सर्वे कर्पटवित्तलोभेन भक्तियुक्तानपि परिचितश्रावकान्परित्यज्य प्रहृष्टमनसस्तस्य पृष्ठतो ययुः । अथवा साध्विदमुच्यते

एकाकी गृहसंत्यक्तः पाणिपात्रो दिगम्बरः ।
सोऽपि संबाध्यते लोके तृष्णया पश्य कौतुकम् ॥ १५ ॥
जीर्यन्ते जीर्यतः केशा दन्ता जीर्यन्ति जीर्यतः ।
चक्षुःश्रोत्रे च जीर्येते तृष्णैका तरुणायते ॥ १६ ॥

१ Who had a knot tied in his upper garment. २ Respectfully. ३ The act of going about for alms. ४ Together with all the sages (monks). ५ A buddhist votary. ६ Wandering about in search of immediate hospitality. ७ Devoted full of devotion. ८ We eat only as much as is just sufficient to support life. ९ To serve as fit coverings for the books. १० Pieces of cloth. ११ So you may do what befits the occasion. १२ A pair of the leaves of a door. १३ At the time when 2½ प्रहर or about 8 hours of the day were over. १४ Issuing or going out one by one. १५ With the greed of getting cloth and wealth. १६ Votaries of acquaintance. १७ Behold a wonder, that even that man who is alone who has left off his home, who carries in his hands a begging-pot and who is naked, is overtaken by greed. १८ When a man grows old his hair wears out, his teeth fall off, his eyes become dim, and the ears become hard of hearing, but his desire alone becomes fresh (lit. youthful).

अपरं गृहमध्ये तान्प्रवेश्य द्वारं निभृतं विधाय लकुटप्रहारैः शिरस्यताडयत्। तेऽपि ताड्यमाना एके[१] मृता अन्ये[२] भिन्नमस्तकाः[३] फूत्कर्तुमुपचक्रमिरे[४]। अत्रान्तरे तमाक्रन्दमाकर्ण्य[५] कोटरक्षपालैरभिहितम्[६]। भो भोः किमयं महान्कोलाहलो[७] नगरमध्ये। तद्गम्यतां गम्यताम्। ते च सर्वे तदादेशकारिणस्तत्सहिता[८] वेगात्तद्गृहं गताः। तावद्रुधिरप्लावितदेहाः[९] पलायमाना नग्नका दृष्टाः। तैः स नापितो बद्धः। हतशेषैः[१०] सह धर्माधिष्ठानं[११] नीतः। तैर्नापितः पृष्टः। भोः किमेतद्भवता कुकृत्यमनुष्ठितम्[१२]। स आह। किं करोमि। मया श्रेष्ठिमणिभद्रगृहे दृष्ट एवंविधो व्यतिकरः[१३]। सोऽपि सर्वं मणिभद्रवृत्तान्तं[१४] यथादृष्टमकथयत्[१५]। ततः श्रेष्ठिनमाहूय भणितवन्तः। भोः श्रेष्ठिन् किं त्वया कश्चित्क्षपणको व्यापादितः। ततस्तेनापि सर्वः क्षपणकवृत्तान्तस्तेषां निवेदितः। अथ तैरभिहितम्।

अहो शूलमारोप्यतामसौ[१६] दुष्टात्मा कुपरीक्षितकारी[१७] नापितः। तथानुष्ठिते तैरभिहितम्।

कुदृष्टं कुपरिज्ञातं कुश्रुतं कुपरीक्षितम्।
तन्नरेण न कर्तव्यं नापितेनात्र यत्कृतम्॥ १७॥

अथवा साध्विदमुच्यते।

अपरीक्ष्य[१८] न कर्तव्यं कर्तव्यं सुपरीक्षितम्।
पश्चाद्भवति संतापो ब्राह्मणी नकुले यथा॥ १८॥

मणिभद्र आह। कथमेतत्। ते धर्माधिकारिणः[१९] प्रोचुः।

१ Some. २ Others. ३ With heads broken. ४ To scream or sob. ५ Cry. ६ The guardians or sentinels of the fort. ७ Noise. ८ Doing their bidding. ९ With the bodies smeared with blood. १० With those that had survived the slaughter. ११ The seat of judgment, court. १२ A bad or wicked action. १३ Such an incident or occurrence. १४ The incident or occurrence at the house of Manibhadra. १५ As he had witnessed it. १६ Let him be impaled. १७ The doer of anything which is not well examined or inquired into. १८ Nothing should be done without due inquiry, and everything should be done after due examination. (If anything is done without due care), it leads to repentance afterwards, just as the wife of a Brâhmana felt repentance in the case of an ichneumon. १९ Justices, judges.

॥ कथा २ ॥

कस्मिंश्चिदधिष्ठाने देवशर्मा नाम ब्राह्मणः प्रतिवसति स्म । तस्य भार्या प्रसूता सुतमजनयत्[1] । तस्मिन्नेव दिने नकुली[2] नकुलं प्रसूता । अथ सा सुतवत्सला[3] दारकवत्[4] तमपि नकुलं स्तन्यदानाभ्यङ्गपोषणादिभिः[5] पुपोष । परं तस्य न विश्वसिति यत्कदाचिदेष स्वजातिदोषवशात्[6] अस्य दारकस्य विरुद्धमाचरिष्यति[7] इति । एवं जानाति स्वचित्ते । उक्तं च ।

कुपुत्रोऽपि[8] भवेत्पुंसां हृदयानन्दकारकः ।
दुर्विनीतः कुरूपोऽपि मूर्खोऽपि व्यसनी खलः ॥ १९ ॥
एवं[9] च भाषते लोकश्चन्दनं किल शीतलम् ।
पुत्रगात्रस्य संस्पर्शश्चन्दनादतिरिच्यते ॥ २० ॥
सौहृदस्य[10] न वाञ्छन्ति जनकस्य हितस्य च ।
लोकाः प्रपालकस्यापि यथा पुत्रस्य बन्धनम् ॥ २१ ॥

अथ सा कदाचिच्छय्यायां पुत्रं शाययित्वा[11] जलकुम्भमादाय पतिमुवाच । ब्राह्मण जलार्थमहं तडागे यास्यामि । त्वया पुत्रोऽयं नकुलाद्रक्षणीयः । अथ तस्यां गतायां पृष्ठे ब्राह्मणोऽपि शून्यं गृहं मुक्त्वा[12] भिक्षार्थं क्वचिन्निर्गतः । अत्रान्तरे दैववशात्कृष्णसर्पो[13] बिलान्निष्क्रान्तः । नकुलोऽपि तं स्वभाववैरिणं[14] मत्वा भ्रातू रक्षणार्थं सर्पेण सह युद्ध्वा सर्पं खण्डशः कृतवान्[15] । ततो रुधिरप्लावितवदनः[16] सानन्दं स्वव्यापारप्रकाशनार्थं[17] मातुः

---

१ Brought fourth, gave birth to (caus. of जन्). २ A female नकुल. ३ Fond of sons. ४ Like a son. ५ By giving it her own milk, unguent, and nourishment, &c. ६ Through the fault incident to its race. ७ Will act against. ८ Even that son, who is wicked, ill-behaved, ugly, foolish and vicious, gives delight to the hearts of men. ९ People generally say that sandal is very cool, but the touch of the body of the son is cooler than that, or surpasses it (sandal) in coolness १० As people wish for the ties of relation of a son, so they do not wish for those of a brother, father, friend and protector. ११ Having caused to lie down, having placed. १२ Having left the house empty or unoccupied. १३ A black serpent. १४ Having thought that it was a natural enemy. १५ Cut him to pieces. १६ With the face covered with blood. १७ For making know or bringing to light his own action.

संमुख गतः । मातापि तं रुधिरक्लिन्नमुखमवलोक्य [१]शङ्कितचित्ता यदनेन दुरात्मना दारको भक्षित इति विचिन्त्य कोपात्तस्योपरि तं जलकुम्भं चिक्षेप । एवं सा नकुलं व्यापाद्य यावत्प्रलपन्ती गृह आगच्छति तावत्सुतस्तथैव सुप्तस्तिष्ठति । समीपे कृष्णसर्पं खण्डशः कृतमवलोक्य [२]पुत्रवधशोकेनात्मशिरो वक्षस्थलं च ताडयितुमारब्धा । अत्रान्तरे ब्राह्मणो [३]गृहीतनिर्वापः समायातो यावत्पश्यति तावत्पुत्रशोकाभितप्ता ब्राह्मणी प्रलपति । भो भो [४]लोभात्मन् । [५]लोभाभिभूतेन त्वया न कृतं मद्वचः । [६]तदनु भव साम्प्रत पुत्रमृत्युदुःखवृक्षफलम् । [७]अथवा साध्विदमुच्यते ।

[८]अतिलोभो न कर्तव्यो लोभं नैव परित्यजेत् ।
अतिलोभाभिभूतस्य चक्रं भ्रमति मस्तके ॥ २२ ॥

ब्राह्मण आह । कथमेतत् । सा आह ।

॥ कथा ३ ॥

कस्मिंश्चिदधिष्ठाने चत्वारो ब्राह्मणपुत्राः [११]परस्परं मित्रतां गता वसन्ति स्म । ते चापि दारिद्र्योपहताः [१३]परस्परं मन्त्रं चक्रुः । अहो धिगियं दरिद्रता । उक्तं च ।

[१४]वरं वनं व्याघ्रगजादिसेवितं
जलेन हीनं बहुकण्टकावृतम् ।
तृणानि शय्या परिधानवल्कलं
न बन्धुमध्ये धनहीनजीवितम् ॥ २३ ॥

१ See १६ page. 7 २ Full of suspicion at heart. ३ With sorrow for the murder of her son. ४ Who had collected alms. ५ Afflicted with sorrow for her son. ६ Greedy. ७ Possessed by avarice. ८ As a consequence of that. ९ The fruit in the form of sorrow for the death of your son. १० One should not have too much greed, nor should one leave off greed altogether, for a wheel turns over the head of him who is overtaken by excessive avarice. ११ Who had become fast friends of each other. १२ Over taken by poverty. १३ Consulted with each other. १४ Better to resort to a forest inhabited by tigers, wild elephants, &c. without water and full of many thorns ; it is also better to have grass for one's bed and the barks of tree for wearing apparel, than living without wealth (in poverty) in the midst of one's relations.

तथा च ।

१ स्वामी द्वेष्टि सुसेवितोऽपि सहसा प्रोज्झन्ति सद्बान्धवा
राजन्ते न गुणास्त्यजन्ति तनुजाः स्फारीभवन्त्यापदः ।
भार्या साधुसुवंशजापि भजते नो यान्ति मित्राणि च
न्यायारोपितविक्रमाण्यपि नृणां येषां न हि स्याद्धनम् ॥ २४ ॥

२ शूरः सुरूपः सुभगश्च वाग्मी
शस्त्राणि शास्त्राणि विदांकरोतु ।
अर्थं विना नैव यशश्च मानं
प्राप्नोति मर्त्योऽत्र मनुष्यलोके ॥ २५ ॥

३ तानीन्द्रियाण्यविकलानि तदेव नाम
सा बुद्धिरप्रतिहता वचनं तदेव ।
अर्थोष्मणा विरहितः पुरुषः स एव
बाह्यः क्षणेन भवतीति विचित्रमेतत् ॥ २६ ॥

तद्गच्छामः कुत्रचिदर्थाय । इति संमन्त्र्य स्वदेशं पुरं च ४ स्वसुहृत्सहितं ५ बान्धवयुतं गृहं च परित्यज्य प्रस्थिताः । अथवा साध्विदमुच्यते ।

६ सत्यं परित्यजति मुञ्चति बन्धुवर्गं
शीघ्रं विहाय जननीमपि जन्मभूमिम् ।

---

१ When persons are without wealth, their masters though well-served hate them, their good relations desert them all of a sudden, their virtues do not shine forth, their sons leave them off, their adversity is heightened, their wives though born of good and noble families do not serve them, and their friends, whose valour is based on justice, go away. २ Even if a man may be brave, handsome, well formed, eloquent and however conversant he may be with the use of weapons and versed in sciences or lores, he does not obtain glory and respect in this world of mortals without the possession of wealth. ३ It is strange that those sound organs, that very name, that unimpeded talent, that very speech and very man when deprived of the warmth of wealth, are changed (बाह्यं भवन्ति) in a moment. ४ Containing their own friends. ५ The house containing their kith and kin. ६ When the mind of a man is, in this world, confounded by anxiety, he forsakes truth, abandons his relations, and goes at once to a desired foreign country, having left behind him even his own mother and mother-country.

संत्यज्य गच्छति विदेशमभीष्टलोकं
चिन्ताकुलीकृतमतिः पुरुषोऽत्र लोके ॥ २७ ॥

एवं क्रमेण गच्छन्तोऽवन्तीं प्राप्ताः । तत्र सिप्राजले[1] कृतस्नाना महाकालं प्रणम्य यावन्निर्गच्छन्ति तावद्भैरवानन्दो नाम योगी संमुखो बभूव । ततस्तं ब्राह्मणोचितविधिना[2] संभाव्य तेनैव सह तस्य मठं[3] जग्मुः । अथ तेन ते पृष्टाः । कुतो भवन्तः समायाताः । क यास्यथ । किं प्रयोजनम् । ततस्तैरभिहितम् । वयं सिद्धियात्रिकास्तत्र यास्यामो यत्र धनाप्तिर्मृत्युर्वा भविष्यतीत्येष निश्चयः । उक्तं च ।

दुष्प्राप्याणि बहूनि च लभ्यन्ते वाञ्छितानि द्रविणानि ।
अवसरतुलिताभिरलं तनुभिः साहसिकपुरुषाणाम् ॥ २८ ॥

तथा च ।

पतति कदाचिन्नभसः खाते पातालतोऽपि जलमेति ।
दैवमचिन्त्यं कारणबलवान्ननु पुरुषकारोऽपि ॥ २९ ॥
अभिमतसिद्धिरशेषा भवति हि पुरुषस्य पुरुषकारेण ।
दैवमिति यदपि कथयसि पुरुषगुणः सोऽप्यदृष्टाख्यः ॥ ३० ॥

१ In the waters of the river Siprá (the modern Betwa). २ Having received or saluted him according to the form prescribed for Bráhmanas. ३ Monastery. ४ Travelling abroad for the accomplishment of some desired object by learning the magic art. ५ This or such is our resolve. ६ Many unobtainable things and wished-for riches are obtained by means of the bodies of adventurous persons which are quite or sufficiently equal to the occasion. ७ A man sometimes falls down from the sky into a ditch and goes from the lower world to the ocean. The fate, therefore, is not to be thought of. Do I not say that manly exertion is a very powerful cause ? (of the rise or fall of a man) कारणाद्बलवान्-powerful, because it is the cause. ८ The entire accomplishment of the desired object of a person takes place by human exertion. What you call fortune is nothing but human exertion with the name, of अदृष्ट that is, it is not called पुरुषकार or पुरुषगुण but it is really so.

[1]भयमतुलं गुरुलोकात्तृणमिव तुलयन्ति साधु साहसिकाः ।
प्राणानद्भुतमेतच्चरितं चरितं ह्युदाराणाम् ॥ ३१ ॥
[2]क्लेशस्याङ्गमदत्त्वा सुखमेव सुखानि नेह लभ्यन्ते ।
मधुभिन्मथनायस्तैराश्लिष्यति बाहुभिर्लक्ष्मीम् ॥ ३२ ॥
[3]तस्य कथं न चला स्यात्पत्नी विष्णोर्नृसिंहकस्यापि ।
मासांश्चतुरो निद्रां यः सेवति जलगतः सततम् ॥ ३३ ॥
[4]दुरधिगमः परभागो यावत्पुरुषेण पौरुषं न कृतम् ।
जयति तुलामधिरूढो भास्वानिह जलदपटलानि ॥ ३४ ॥
तत्कथ्यतामस्माकं कश्चिद्धनोपायो विवर[5]प्रवेशशाकिनी[6]साधनश्मशान[7]सेव-[8]महामांसविक्रयसाधकवर्ति[9]प्रभृतीनामेकतम इति । [10]अद्भुतशक्तिर्भवाञ्छ्रूयते वयमप्यतिसाहसिकाः । उक्तं च ।
[11]महान्त एव महतामर्थं साधयितुं क्षमाः ।
ऋते समुद्रादन्यः को बिभर्ति वडवानलम् ॥ ३५ ॥
भैरवानन्दोपि तेषां सिद्ध्यर्थं [12]बहूपाय सिद्धिवर्ति[13]चतुष्टयं कृत्वार्पयत् । आह च । गम्यतां हिमालयदिशि । तत्र संप्राप्तानां यत्र वर्तिः पतिष्यति

---

1 Adventurous persons consider the great fear of powerful men as light as grass and so also their own lives ; this mode of life of the generous is indeed extraordinary. २ Without exposing ourselves to fatigue, no happiness is easily obtained in this world. The destroyer of the demon मधु (*Krishna*) embraces Lakshmi with arms fatigued by churning (the ocean). ३ How will the wife of that Vishnu who assumed the from of नृसिंह, not be fickle, since he always enjoys repose under water for four months ? ४ So long as valour is not displayed by a man, the kingdom of an enemy is difficult to obtain. The sun dispels multitudes of clouds when he crosses the sign of the Zodiac called *Libra* (तुलामधिरूढः), so when a man becomes equal to another (तुलामधिरूढः) he can easily conquer him (another). ५ Entering a cave. ६ Propitiating a female demon. ७ Resorting to the cemetery. ८ Human flesh. ९ Magic wick १० Possessed of superhuman powers. ११ The great alone are able to accomplish the object of the great ; who but the sea can bear the submarine fire ? १२ Very powerful. १३ A collection of four.

तत्र निधानं प्राप्स्यथासंदिग्धम्[२]। तत्र स्थानं खनित्वा निधिं गृहीत्वा व्याघुट्यताम्[३]। तथानुष्ठिते तेषां गच्छतामेकतमस्य हस्ताद्वर्तिर्निपपात। अथासौ यावत्तं प्रदेशं खनति तावत्ताम्रमयी[४] भूमिः। ततस्तेनाभिहितम्। अहो गृह्यतां स्वेच्छया ताम्रम्। अन्ये प्रोचुः। भो मूढ किमनेन क्रियते। तत्प्रभूतमपि दारिद्र्यं न नाशयति। तदुत्तिष्ठाग्रतो गच्छामः। सोऽब्रवीत्। यान्तु भवन्तो नाहमग्रे यास्यामि। एवमभिधाय ताम्रं यथेच्छया गृहीत्वा प्रथमो निवृत्तः। ते त्रयोऽप्यग्रे प्रस्थिताः। अथ किंचिन्मात्रं[५] गतस्याग्रेसरस्य वर्तिर्निपपात। सोऽपि यावत्खनितुमारब्धवांस्तावद्रूप्यमयी[६] क्षितिः[७]। ततः प्रहर्षितः प्राह। यद्भो गृह्यतां यथेच्छया रूप्यम्। नाग्रे गन्तव्यम्। तावूचतुः। भोः पृष्ठतस्ताम्रमयी भूमिरग्रतो रूप्यमयी। तन्नूनमग्रे सुवर्णमयी[८] भविष्यति। तदनेन प्रभूतेनापि दारिद्र्यनाशो न भवति। तदावामग्रे यास्यावः। एवमुक्त्वा द्वावप्यग्रे प्रस्थितौ। सोऽपि स्वशक्त्या रूप्यमादाय निवृत्तः। तयोरपि गच्छतोरेकस्याग्रे वर्तिः पपात। सोऽपि प्रहृष्टो यावत्खनति तावत्सुवर्णभूमिं दृष्ट्वा द्वितीयं प्राह। भो गृह्यतां स्वेच्छया सुवर्णम्। सुवर्णादन्यन्न किंचिदुत्तमं भविष्यति। स प्राह। मूढ न किंचिद्वेत्सि। प्राक्[९] ताम्रं ततो रूप्यं ततः सुवर्णं तन्नूनमतः परं रत्नानि भविष्यन्ति येषामेकतमेनापि दारिद्र्यनाशो भवति। तदुत्तिष्ठाग्रे गच्छावः। किमनेन भारभूतेनापि[१०] प्रभूतेन। स आह। गच्छतु भवान्। अहमत्र स्थितस्त्वां प्रतिपालयिष्यामि[११]। तथानुष्ठिते सोऽपि गच्छन्नेकाकी ग्रीष्मार्कप्रतापसंतप्ततनुः[१२] पिपासाकुलितः[१३] सिद्धिमार्गच्युतो[१४] इतश्चेतश्च[१५] बभ्राम। अथ भ्राम्यन्स्थलोपरि पुरुषमेकं रुधिरप्लावितगात्रं भ्रमच्चक्रमस्तकमपश्यत्[१६]। ततो द्रुततरं गत्वा तमवोचत्। भोः को भवान्। किमेवं चक्रेण भ्रमता शिरसि तिष्ठसि।

१ A treasure. २ Undoubtedly. ३ Should come back or return. ४ Full of copper ५ When he had gone only a little distance. ६ Full of silver. ७ The earth, ground. ८ Golden land. ९ First. १० Even if as much as a load be carried. ११ Shall wait for. १२ With the body heated by the scorching summer sun. १३ Afflicted by thirst. १४ Who lost the way leading to the success of his undertaking. १५ Here and there, to and fro. १६ With a wheel turning over his head.

तत्कथय मे यदि कुत्रचिज्जलमस्ति। एवं तस्य प्रवदतस्तच्चक्रं तत्क्षणात्तस्य शिरसो ब्राह्मणमस्तके चटितम्[१]। स आह। भद्र किमेतत्। स आह। यन्ममाप्येवमेवैतच्छिरसि चटितम्। तत्कथय कदैतदुत्तरिष्यति[२]। महती मे वेदना वर्तते। स आह। यदा त्वमिव कश्चिद्धृतसिद्धिवर्तिरेवमागत्य त्वामालापयिष्यति[३] तदा तस्य मस्तके चटिष्यति। स आह। कियान्कालस्तवैवं स्थितस्य। स आह। सांप्रतं को राजा धरणीतले। आह। वीणावत्सराजः। स आह। अहं तावत्कालसंख्यां न जानामि[४]। परं यदा रामो राजासीत्तदाहं दारिद्र्योपहतः सिद्धिवर्तिमादायानेन पथा समायातः। ततो मयान्यो नरो मस्तकधृतचक्रो[५] दृष्टः पृष्टश्च। ततश्चैतज्जातम्। आह। भद्र कथं तवैवं स्थितस्य भोजनजलप्राप्तिरासीत्[६]। स आह। भद्र धनदेन[७] निधानहरणभयात्सिद्धानामेतद्भयं दर्शितम्। तेन कश्चिदपि नागच्छति। यदि कश्चिदायाति स क्षुत्पिपासा[९]निद्रारहितो जरामरणवर्जितः केवलमेवं वेदनामनुभवतीति। तदाज्ञापय मां। मुक्तोऽस्मि सांप्रतं स्वगृहं यास्यामि। इत्युक्त्वा गतः। अथ तस्मिंश्चिरयति स सुवर्णसिद्धिस्तस्यान्वेषणपर[१०]स्तत्पदपङ्क्त्या[११] यावत्किंचिद्वनान्तरमागच्छति तावद्रुधिरप्लावितशरीरस्तीक्ष्णचक्रेण मस्तके भ्रमता सवेदनः[१२] क्वणन्[१३]नुपविष्टस्तिष्ठति। ततः समीपवर्तिना भूत्वा सबाष्पं[१४] पृष्टः। भद्र किमेतत्। स आह। विधिनियोगः[१५]। स आह। कथं तत्। कथय कारणमेतस्य। सोऽपि तेन पृष्टः सर्वं चक्रवृत्तान्तमकथयत्। तच्छ्रुत्वासौ तं विगर्हयन्[१६]निदमाह। भो निषिद्धस्त्वं मयानेकशो न शृणोषि मे वाक्यम्। तत्किं क्रियते। विद्यावानपि कुलीनोऽपि बुद्धिरहितः। अथवा साध्विदमुच्यते।

१ Was placed or mounted. Cf. Mârathî चढलें. २ Will come down (Mârathî उतरेल). ३ Will speak to you. ४ I do not exactly know what time has elapsed. ५ Holding a wheel on his head. ६ The getting of food and water. ७ Kubêra. ८ He who is endowed with supernatural faculties. ९ Thirst. १० Intent on finding him out. ११ Following the trace of his foot-steps. १२ Full of agony. १३ Groaning. १४ With tears in his eyes. १५ The command of Fate. १६ Censuring, reproaching.

वरं बुद्धिर्न सा विद्या विद्याया बुद्धिरुत्तमा ।
बुद्धिहीना विनश्यंति यथा ते सिंहकारकाः ॥ ३६ ॥

चक्रधर आह । कथमेतत् । सुवर्णसिद्धिराह ।

॥ कथा ४ ॥

कस्मिंश्चिदधिष्ठाने चत्वारो ब्राह्मणपुत्राः परं मित्रभावमुपगता वसन्ति स्म । तेषां त्रयः शास्त्रपारं गताः परंतु बुद्धिरहिताः । एकस्तु बुद्धिमान्केवलं शास्त्रपराङ्मुखः । अथ तैः कदाचिन्मित्रैर्मन्त्रितम् । को गुणो विद्याया येन देशान्तरं गत्वा भूपतीन्परितोष्यार्थोपार्जना न क्रियते । तत्पूर्वदेशं गच्छामः । तथानुष्ठिते कंचिन्मार्गं गत्वा तेषां ज्येष्ठतरः प्राह । अहो अस्माकमेकश्चतुर्थो मूढः केवलं बुद्धिमान् । न च राजप्रतिग्रहो बुद्ध्या लभ्यते विद्यां विना । तन्नास्मै स्वोपार्जितं दास्यामि । तद्गच्छतु गृहम् । ततो द्वितीयेनाभिहितम् । भोः सुबुद्धे गच्छ त्वं स्वगृहे यतस्ते विद्या नास्ति । ततस्तृतीयेनाभिहितम् । अहो न युज्यत एवं कर्तुं यतो वयं बाल्यात्प्रभृत्येकत्र क्रीडिताः । तदागच्छतु महानुभावोऽस्मदुपार्जितवित्तस्य संविभागी भविष्यतीति । उक्तं च ।

किं तया क्रियते लक्ष्म्या या वधूरिव केवला ।
या न वेश्येव सामान्या पथिकैरुपभुज्यते ॥ ३७ ॥

तथा च ।

अयं निजः परो वेत्ति गणना लघुचेतसाम् ।
उदारचरितानां च वसुधैव कुटुम्बकम् ॥ ३८ ॥

---

१ Talent is preferable to learning, that is, talent is better than learning. Persons void of talent perish, as did the makers of a lion. २ Gone beyond or to the other side of learning, that is, had mastered all sciences. ३ Averse to the study of science. ४ What is the good or use of? ५ Acquisition of wealth ६ Having gone some distance. ७ The favour of a king, such as an allowance or grant. ८ Since childhood. ९ Of great dignity. १० Sharer. ११ What is the use of that wealth, which is only like one's wife and which is not a common property like a harlot enjoyed by travellers? १२ This is their own or another-is the consideration of the little-minded; as to the generous-minded the whole earth is their family.

तदागच्छत्वेषोपानि । तथानुष्ठिते तैर्मार्गाश्रितैररण्यां मृतसिंहस्यास्थीनि दृष्टानि । ततश्चैकेनाभिहितम् । यदहो विद्याप्रत्ययः क्रियते । किंचिदेतत्सत्त्वं मृतं तिष्ठति । तद्विद्याप्रभावेन जीवसहितं कुर्मः । अहमस्थिसंचयं करोमि । ततश्चैकेनौत्सुक्यादस्थिसंचयः कृतः । द्वितीयेन चर्ममांसरुधिरं संयोजितम् । तृतीयोपि यावज्जीवं संचारयति तावत्सुबुद्धिना निषिद्धः । भोस्तिष्ठतु भवान् । एष सिंहो निष्पाद्यते । यद्येनं सजीवं करिष्यसि ततः सर्वानपि व्यापादयिष्यति । इति तेनाभिहितः । स आह । धिङ्मूर्ख नाहं विद्याया विफलतां करोमि । ततस्तेनाभिहितम् । तर्हि प्रतीक्षस्व क्षणं यावदहं वृक्षमारोहामि । तथानुष्ठिते यावत्सजीवः कृतस्तावत्ते त्रयोपि सिंहेनोत्थाय व्यापादिताः । स च पुनर्वृक्षादवतीर्य गृहे गतः । अतोहं ब्रवीमि ।

वरं बुद्धिर्न सा विद्या विद्याया बुद्धिरुत्तमा ।
बुद्धिहीना विनश्यन्ति यथा ते सिंहकारकाः ॥ ३९ ॥

अतः परमुक्तं च ।

अपि शास्त्रेषु कुशला लोकाचारविवर्जिताः ।
सर्वे ते हास्यतां यान्ति यथा ते मूर्खपंडिताः ॥ ४० ॥

चक्रधर आह । कथमेतत् । सोब्रवीत् ।

॥ कथा ५ ॥

कस्मिंश्चिदधिष्ठाने चत्वारो ब्राह्मणाः परस्परं मित्रत्वमापन्ना वसन्ति स्म । बालभावे तेषां मतिर्जायत । भो देशान्तरं गत्वा विद्याया उपार्जनं क्रियते । अथान्यस्मिन्दिवसे ब्राह्मणाः परस्परं निश्चयं कृत्वा विद्योपार्जनार्थं

---

१ When they had resumed travelling. २ Let us make an experiment of our learning. ३ With the power of learning. ४ Alive. ५ The collecting of the bones. ६ Through eagerness. ७ United or joined together. ८ To transmit, to put in. ९ Is being created. १० I shall not allow my learning to go in vain ११ Wait. १२ Though well-versed in sciences, but ignorant of the ways of the world, people come to be ridiculed just as the learned fools (in the following story). १३ During infancy. १४ A thought occurred to them.

कन्यकुब्जे गताः । तत्र च विद्यामठे गत्वा पठन्ति। एवं द्वादशाब्दानि याव-द्दकचित्ततया विद्याकुशलास्ते सर्वे संजाताः । ततस्तैश्चतुर्भिर्मिलित्वोक्तम् वयं सर्वविद्यापारं गताः । तदुपाध्यायमुत्कलापयित्वा स्वदेशे गच्छामः । तथैव क्रियतामित्युक्त्वा ब्राह्मणा उपाध्यायमुत्कलापयित्वानुज्ञां लब्ध्वा पुस्तकानि नीत्वा प्रचलिताः । यावत्कंचिन्मार्गं यान्ति तावद् द्वौ पन्थानौ समायातौ । उपविष्टाः सर्वे । तत्रैकः प्रोवाच । केन मार्गेण गच्छामः । एतस्मिन्समये तस्मिन्पत्तने कश्चिद्वणिक्पुत्रो मृतः । तस्य दाहार्थे महाजनो गतोभूत् । ततश्चतुर्णां मध्यादेकेन पुस्तकमवलोकितम् । महाजनो येन गतः स पन्था इति तन्महाजनमार्गेण गच्छामः । अथ ते पण्डिता याव-न्महाजनमेलापकेन सह यान्ति तावद्रासभः कश्चित्तत्र श्मशाने दृष्टः । अथ द्वितीयेन पुस्तकमुद्घाट्यावलोकितम् ।

आतुरे व्यसने प्राप्ते दुर्भिक्षे शत्रुसंकटे ।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ॥ ४१ ॥

तदहो अयमस्मदीयो बान्धवः । ततः कश्चित्तस्य ग्रीवायां लगति । कोपि पादौ प्रक्षालयति । अथ यावद्दिशामवलोकनं ते पण्डिताः कुर्वन्ति तावत्कश्चिदुष्ट्रो दृष्टः । तैश्चोक्तम् । एतत्किम् । तावत्तृतीयेन पुस्तकमुद्घाट्योक्तम् । धर्मस्य त्वरिता गतिः । एषधर्मस्तावत् । चतुर्थेनोक्तम् । इष्टं धर्मेण योजयेत् । अथ तैश्च रासभ उष्ट्रग्रीवायां बद्धः । केनचिद्रजकस्याग्रे कथितम् । यावद्रजकस्तेषां मूर्खपण्डितानां प्रहारकरणाय समायातस्तावत्ते

१ A seminary, a college. २ Year. ३ With intent application ४ Having asked the preceptor permission to go. ५ Town. ६ For burning. ७ That road by which the majority of people goes is to be followed; and the ordinary sense—that course which is followed by many people, is the proper one. ८ An assemblage, multitude. ९ He who stands by or assists another when he is sick, when he is overtaken by calamity, in a famine, in hostility with an enemy at the Court of a King, and in the cemetery is his friend. Here the foolish Pandits take the literal sense of श्मशाने तिष्ठति. १० One of them clung to his neck ११ Looking at the quarters १२ The motion of religion is fast, that is, the effect of a religious action is instantaneous. १३ Let a thing which one likes to do, be given the form of some religious ceremony. १४ For striking.

प्रनष्टाः । यावदग्रे किंचित्स्तोकं मार्गं यान्ति तावत्कांचिन्नद्यासादिता[१] । त-त्रस्या जलमध्ये पलाशपत्रमायातं दृष्ट्वा[२] पण्डितेनैकेनोक्तम् । आगमिष्यति यत्पत्रं तदस्मांस्तारयिष्यति । एतत्कथयित्वा तत्पत्रस्योपरि पतितो याव-न्नद्या नीयते[३] तावत्तं नीयमानमवलोक्यान्येन पण्डितेन केशान्तं गृहीत्वोक्तम्[४] ।

सर्वनाशे[५] समुत्पन्ने अर्धं त्यजति पण्डितः ।

अर्धेन कुरुते कार्यं सर्वनाशो हि दुःसहः ॥ ४२ ॥

इत्युक्त्वा तस्य शिरच्छेदो विहितः । अथ तैश्च पश्चाद्गत्वा कश्चिद् ग्राम आसादितः । तेऽपि ग्रामीणैर्[६]निमन्त्रिताः पृथक्पृथग्गृहेषु नीताः[७] । तत एक-स्य सूत्रिका[८] घृतखण्डसंयुक्ता[९] भोजने दत्ता । ततो विचिन्त्य पण्डितेनोक्तम् । यद्दीर्घसूत्री विनश्यति[१०] । एवमुक्त्वा भोजनं परित्यज्य गतः । तथा द्विती-यस्य मण्डका[११] दत्ताः । तेनाप्युक्तम् । अतिविस्तारविस्तीर्णं न तद्भवेच्चिरायु-षम्[१२] । स च भोजनं त्यक्त्वा गतः । अथ तृतीयस्य वटिका[१३]भोजनं दत्तम् । तत्रापि पण्डितेनोक्तम् । छिद्रेष्वनर्था बहुलीभवन्ति[१४] । एवं तेऽपि त्रयः प-ण्डिताः क्षुत्क्षामकण्ठा लोकैर्हस्यमाना[१५]स्ततः स्थानात्स्वदेशं गताः । अथ सुवर्णसिद्धिराह । तत्त्वं लोकव्यवहार[१६]मजानन्मया वार्यमाणो[१७]ऽपि न स्थितस्तत ईदृशीमवस्थामुपगतः । अतोऽहं ब्रवीमि ।

---

१ Was reached. २ (*a*) A leaf (*b*) A boat. ३ While he was being carried along by the current of the river. ४ The end of his hair. ५ When the destruction of the whole is impending, a wise man foregoes half of it and does his business with the remaining half, for the loss of the whole is unbearable. ६ Villagers or citizens. ७ Were taken separately to different houses. ८ A kind of dish called शेवई in Maráthi. ९ Mixed with a little quantity of clarified butter. १० A dilatory person perishes; lit. Anything having long threads is destroyed. ११ A dish called मांडे, a kind of thin wheaten cake. १२ That which prematurely grows very extensive, does not last long ; the literal sense is plain enough. १३ A kind of cake picered with many holes and made of rice and black pulse (Maráthi आंबोळी.) १४ When there are weak points, misfortunes or calamities multiply. १५ Being ridiculed or laughed at. १६ The ways of the world, worldly transactions. १७ Being warded off or prevented.

अपि शास्त्रेषु कुशला लोकाचारविवर्जिताः।
सर्वे ते हास्यतां यान्ति यथा ते मूर्खपण्डिताः ॥ ४३ ॥

तच्छ्रुत्वा चक्रधर आह। अहो अकारणमेतत्। बहुबुद्ध्यापि विनश्यन्ति दुष्टदैवेन नाशिताः। स्वल्पबुद्ध्योप्येकस्मिन्कुले नन्दन्ति संततम्। उक्तं च।

अरक्षितं तिष्ठति दैवरक्षितं सुरक्षितं दैवहतं विनश्यति।
जीवत्यनाथोपि वने विसर्जितः कृतप्रयत्नोपि गृहे न जीवति ॥४४॥

तथा च। शतबुद्धिः कृतोन्नामः सलम्बश्च सहस्रधीः।
एकबुद्धिरहं भद्रे क्रीडामि विमले जले ॥ ४५ ॥

सुवर्णसिद्धिराह। कथमेतत्। स आह।

॥ कथा ६ ॥

कस्मिंश्चिज्जलाशये शतबुद्धिः सहस्रबुद्धिश्च द्वौ मत्स्यौ निवसतः। अथ तयोरेकबुद्धिर्नाम मण्डूको मित्रतां गतः। एवं ते त्रयोपि जलतीरे कंचित्कालं वेलायां सुभाषितगोष्ठीसुखमनुभूय भूयोपि सलिलं प्रविशन्ति। अथ कदाचित्तेषां गोष्ठीगतानां जालहस्तधीवराः प्रभूतैर्मत्स्यैर्व्यापादितैर्मस्तके विधृतैरस्तमनवेलायां तस्मिञ्जलाशये समायाताः। ततः सलिलाशयं दृष्ट्वा मिथः प्रोचुः। अहो बहुमत्स्योयं ह्रदो दृश्यते स्वल्पसलिलश्च। तत्प्रभाते आगमिष्यामः। एवमुक्त्वा स्वगृहं गताः। मत्स्याश्च विषण्णवदना मिथो

१ This is without any cause, that is, what you assign as the cause of my misfortune is not the real one. २ Even if persons be possessed of great talent, they perish when overtaken by wicked fate. ३ Possessed of little talent. ४ Always. ५ That which is unprotected stands protected by fate, and that which is well-protected perishes when struck by fate; even a forlorn person when abandoned in the forest lives, and one who is greatly taken care of does not live (perishes) even at home. ६ Shatabuddhi (having a hundred talents) is carried aloft, Sahasrabudhi (having a thousand talents) is hung down; while, oh fortunate one, I who possess only one talent, am sporting, in clear water. ७ A shore, a bank. ८ While engaged in conversation. ९ Fishermen with nets in hand. १० At the time of sun-set. ११ A reservoir of water. १२ Among themselves. १३ Full of or abounding in many fishes.

मन्त्रं चक्रुः। ततो मण्डूक आह। भोः शतबुद्धे श्रुतं धीवरोक्तं भवद्भ्याम्। तत्किमत्र युज्यते कर्तुं पलायनमवष्टम्भं वा। यत्कर्तुं युक्तं भवति तदादिश्यतामद्य। तच्छ्रुत्वा सहस्रबुद्धिः प्रहस्य प्राह। भोः पुत्र मा भैषीर्यतो वचनस्मरणमात्रादेव भयं न कार्यम्। न भेतव्यम्। उक्तं च।

सर्पाणां च खलानां च सर्वेषां दुष्टचेतसाम्।
अभिप्राया न सिध्यन्ति तेनेदं वर्तते जगत्॥ ४६॥

तत्तावत्तेषामागमनमपि न संपत्स्यते। भविष्यति वा तर्हि त्वां बुद्धिप्रभावेनात्मसहितं रक्षयिष्यामि यतोनेकां सलिलगतिचर्यामहं जानामि। तदाकर्ण्य शतबुद्धिराह। भो युक्तमुक्तं भवता। सहस्रबुद्धिरेव भवान्। अथवा साध्विदमुच्यते।

बुद्धेर्बुद्धिमतां लोके नास्त्यगम्यं हि किंचन।
बुद्ध्या यतो हता नन्दाश्चाणक्येनासिपाणयः॥ ४७॥

तथा च। न यत्रास्ति गतिर्वायो रश्मीनां च विवस्वतः।
तत्रापि प्रविशत्याशु बुद्धिर्बुद्धिमतां सदा॥ ४८॥

ततो वचनश्रवणमात्रादपि पितृपर्यायागतं जन्मस्थानं त्यक्तुं न शक्यते। उक्तं च।

न तत्स्वर्गेपि सौख्यं स्याद्दिव्यस्पर्शनशोभने।
कुस्थानेपि भवेत्पुंसां जन्मनो यत्र संभवः॥ ४९॥

१ Remaining here or resisting. २ Simply by remembering the words spoken. ३ The motives or objects in view of serpents, wicked persons and all evil-minded people, do not succeed; hence this world exists. ४ Will take place or come to pass. ५ The modes of moving in water. ६ There is nothing in this world that is inaccessible to the talent of the talented; since the Nandás armed with swords were destroyed by Chánakya with the power of talent. ७ The talent of the talented always quickly penetrates even there where wind and the rays of the sun have no access. ८ Handed down from the ancestors in succession. ९ That happiness which one enjoys in the place of his birth, though it be a bad one, is not found even in heaven charming on account of the contact with celestial being.

तन्न कदाचिदपि गन्तव्यम् । अहं त्वां सुबुद्धिप्रभावेन रक्षयिष्यामि । मण्डूक आह । भद्रौ मम तावदेकैव बुद्धिः पलायनपरा । तदहमन्यं जलाशयमद्यैव सभार्यो यास्यामि । एवमुक्त्वा स मण्डूको रात्रावेवान्यजलाशयं गतः । धीवरैरपि प्रभात आगत्य जघन्यमध्यमोत्तमजलचरा मत्स्यकूर्ममण्डूककर्कटादयो गृहीताः । तावपि शतबुद्धिसहस्रबुद्धी सभार्यौ पलायमानौ चिरमात्मानं गतिविशेषविज्ञानै रक्षन्तौ जाले पतितौ व्यापादितौ च । अथापराह्णसमये प्रहृष्टास्ते धीवराः स्वगृहं प्रति प्रस्थिताः । गुरुत्वाच्चैकेन शतबुद्धिः स्कन्धे कृतः । सहस्रबुद्धिः प्रलम्बमानो नीयते । ततश्च वापीकण्ठोपगतेन मण्डूकेन तौ तथा नीयमानौ दृष्ट्वाभिहिता स्वपत्नी । प्रिये पश्य पश्य ।

शतबुद्धिः कृतोन्नामो लम्बते च सहस्रधीः ।
एकबुद्धिरहं भद्रे क्रीडामि विमले जले ॥ ५० ॥

अतोहं ब्रवीमि । नैकान्ते बुद्धिरपि प्रमाणम् । सुवर्णसिद्धिराह । यद्यप्येतदस्ति तथापि मित्रवचनमनुल्लङ्घनीयम् । परं किं क्रियते । निवारितोपि मया न स्थितोतिलौल्याद्विद्याहंकाराच्च । अथवा साध्विदमुच्यते ।

साधु मातुल गीतेन मया प्रोक्तोपि न स्थितः ।
अपूर्वोयं मणिर्बद्धः संप्राप्तं गीतलक्षणम् ॥ ५१ ॥

चक्रधर आह । कथमेतत् । सोब्रवीत् ।

॥ कथा ७ ॥

कस्मिंश्चिदधिष्ठान उद्धतो नाम गर्दभः प्रतिवसति स्म । स सदैव रजकगृहे कर्म कृत्वा रात्रौ स्वेच्छया पर्यटति । ततः प्रत्यूषे बन्धनभयात्स्वयमेव रजकगृहमायाति । रजकोपि ततस्तं बन्धनेन नियुनक्ति । अथ तस्य

---

१ Which advises me to run away from here. २ The lowest. ३ A crab. ४ With the knowledge of some special movements. ५ By reason of his being heavy. ६ Who had come near the bank of the well. ७ Exclusively. ८ Standard of wisdom. ९ Should not be disregarded or transgressed. १० Through the pride of learning ११ Well sung, oh uncle, you did not stop singing, though advised by me to do so. Very resplendent is this jewel tied round your neck, and you have justly obtained a medal (लक्षण) for your proficiency in music. १२ Through the fear of being tied or tethered.

रात्रौ पर्यटतः क्षेत्राणि कदाचिच्छृगालेन सह मैत्री संजाता । स च पीवरत्वाद् वृत्तिभङ्गं कृत्वा कर्कटिकाक्षेत्रे शृगालसहितः प्रविशति । एवं तौ स्वेच्छया चिर्भटिकाभक्षणं कृत्वा प्रत्यहं प्रत्यूषे स्वस्थानं व्रजतः । अथ कदाचित्तेन मदोद्धतेन रासभेन क्षेत्रमध्यस्थितेन शृगालोऽभिहितः । भो भगिनीसुत पश्य पश्य । अतीव निर्मला रजनी । तदहं गीतं करिष्यामि । तत्कथय कतमेन रागेण करोमि । स आह । माम किमनेन वृथार्थप्रचालनेन यतश्चौरकर्मप्रवृत्तावावां निभृतैश्च चौरजारैरत्र स्थातव्यम् । उक्तं च ।

कासी विवर्जयेच्चौर्यं निद्रालुश्च स चौरिकाम् ।
जिह्वालौल्यं रुजाक्रान्तो जीवितं योऽत्र वाञ्छति ॥ ५२ ॥

अपरं त्वदीयं गीतं न मधुरस्वरम् । शङ्खशब्दानुकारं दूरादपि श्रूयते । तदत्र क्षेत्रे रक्षापुरुषाः सुप्ताः सन्ति । त उत्थाय वधं बन्धं वा करिष्यन्ति । तद्भक्षय तावदमृतमयीश्चिर्भटीः । मा त्वमव्यापारपरो भव । तच्छ्रुत्वा रासभ आह । भो न त्वं वेत्सि गीतरसं वनाश्रयत्वात् । तेनैतद् ब्रवीषि । उक्तं च ।

शरज्ज्योत्स्नाहते दूरं तमसि प्रियसन्निधौ ।
धन्यानां जायते कर्णे गीतझङ्कारजा सुधा ॥ ५३ ॥

शृगाल आह । माम अस्त्येतत्परं न वेत्सि त्वं गीतम् केवलमुन्नदसि । तत्किं तेन स्वार्थभ्रंशकेन । रासभ आह । धिग्धिङ् मूर्ख किमहं न जानामि गीतम् । तद्यथा तस्य भेदाञ्छृणु ।

---

१ Having broken through the fence. २ Cucumber. ३ A kind of cucumber. ४ Clear, free from clouds. ५ A musical mode or harmony. ६ By moving or mooting a vain subject. ७ Engaged in a thievish affair. ८ A paramour. ९ He who is affected with cough should avoid theft, so also he who is very fond of sleep; and he who is suffering from a disease should avoid the greediness of tongue, if he wishes to live. १० Full of sweet tunes. ११ Resembling the sound of a conch. १२ You should not concern yourself with an affair with which you are not concerned. १३ Taste or liking for music. १४ Through constant residence in the forest. १५ It is only the blessed that have the sweet humming sounds of music pleasing their ears, when darkness is dispelled far away by the moonlight of *Sarat* and when they are in the company of their beloved persons. १६ Cry out, bray. १७ The loss of one's own interest.

सप्त स्वरास्त्रयो ग्रामा मूर्छनाश्चैकविंशतिः ।
तानास्त्वेकोनपञ्चाशदित्येतत्स्वरमण्डलम् ॥ ५४ ॥
स्थानत्रयं यतीनां च षडास्यानि रसा नव ।
रागाः षट्त्रिंशतिर्भावाश्चत्वारिंशत्ततः स्मृताः ॥५५ ॥
पञ्चाशीत्यधिकं ह्येतद्गीताङ्गानां शतं स्मृतम् ।
स्वयमेव पुरा प्रोक्तं भरतेन श्रुतेः परम् ॥ ५६ ॥
नान्यद्गीतात्प्रियं लोके देवानामपि दृश्यते ।
शुष्कस्नायुस्वराह्लादात्त्र्यक्षं जग्राह रावणः ॥ ५७ ॥

तत्कथं भगिनीसुत मामनभिज्ञं वदन्निवारयसि । शृगाल आह । माम यैवं तदहं तावद्वृतेर्द्वारस्थितः क्षेत्रपमवलोकयामि । त्वं पुनः स्वेच्छया गीतं कुरु । तथानुष्ठिते रासभरटनमाकर्ण्य क्षेत्रपः क्रोधाद्दन्तान्घर्षयन्प्रधावेनः । यावद्रासभो दृष्टस्तावल्लकुटप्रहारैस्तथा हतो यथा प्रताडितो भूपृष्ठे पतितः । ततश्च सच्छिद्रोलूखले मद्ध्वा गतो भूयोपि प्रसुप्तः । रासभोपि स्वजातिस्वभावाद्गतवेदनः क्षणेनाभ्युत्थितः । उक्तं च ।

सारमेयस्य चाश्वस्य रासभस्य विशेषतः ।
मुहूर्तात्परतो न स्यात्प्रहारजनिता व्यथा ॥ ५८ ॥

ततस्तमेवोलूखलमादाय वृतिं चूर्णयित्वा पलायितुमारब्धः । अत्रान्तरे

१ There are seven sounds, three octaves and twenty one scales; as to quavers they are forty-nine. This is the collection of Svarás. २ Three are the positions of the peauses, six and nine sentiments, thirty-six rágas and forty bhávas. ३ These are said to be the 185 Angas of music and laid down by Bharata himself formerly, and second in order after the Vedas. ४ There seems to be nothing that is more liked even by gods than music, Rávana captivated the three-eyed God (Shiva) by the delight felt at the sounds proceeding from his dried tendons or muscles. ५ Ignorant. ६ The protector of the field ७ Braying. ८ Grinding his teeth with rage ९ Greatly belaboured. १० Having tied him to a mortar with a hole in it. ११ Freed from the agonies caused by beating, according to the nature of his race १२ Beyond a moment a period of 48 minutes. १३ Caused by beating. १४ Having broken to pieces.

शृगालोपि दूरादेव तं दृष्ट्वा सस्मितमाह ।

साधु मातुल गीतेन मया प्रोक्तोपि न स्थितः ।

अपूर्वोयं मणिर्बद्धः संप्राप्तं गीतलक्षणम् ॥ ५९ ॥

तद्भवानपि मया वार्यमाणोपि न स्थितः । तच्छ्रुत्वा चक्रधर आह । भो मित्र सत्यमेतत् । अथवा साध्विदमुच्यते ।

यस्य नास्ति स्वयं प्रज्ञा मित्रोक्तं न करोति यः ।

स एव निधनं याति यथा मन्थरकौलिकः ॥ ६० ॥

सुवर्णसिद्धिराह । कथमेतत् । सोब्रवीत् ।

॥ कथा ८ ॥

कस्मिंश्चिदधिष्ठाने मन्थरको नाम कौलिकः प्रतिवसति स्म । तस्य कदाचित्पटकर्माणि कुर्वतः सर्वपटकर्मकाष्ठानि भग्नानि । ततः स कुठारमादाय वने काष्ठार्थं गतः । स च समुद्रतटं यावद्भ्रमन्प्रयातः । ततश्च तत्र शिंशपापादपस्तेन दृष्टः । ततश्चिन्तितवान् । महानयं वृक्षो दृश्यते । तदनेन कर्तितेन प्रभूतानि पटकरणवस्तूनि भविष्यन्ति । इत्यवधार्य तस्योपरि कुठारमुत्क्षिप्तवान् । अथ तत्र वृक्षे कश्चिद्व्यन्तरः समाश्रित आसीत् । अथ तेनाभिहितम् । भो मदाश्रयोयं पादपः सर्वथा रक्षणीयो यतोहमत्र महासौख्येन तिष्ठामि समुद्रकल्लोलस्पर्शनाच्छीतवायुनाप्यायितः । कौलिक आह । भोः किमहं करोमि दारुसामग्रीं विना मे कुटुम्बं बुभुक्षया पीड्यते । तस्मादन्यत्र शीघ्रं गम्यताम् । अहमेनं कर्तयिष्यामि । व्यन्तर आह । भोस्तुष्टस्तवाहम् । तत्प्रार्थ्यतामभीष्टं किंचित् । रक्षैनं पादपमिति । कौलिक आह । यद्येवं तदहं स्वगृहं गत्वा स्वमित्रं स्वभार्यां च पृष्ट्वागमिष्यामि । ततस्तथा

१ He who having no sense himself does not act up to the advice of a friend meets with death, as did the weaver Manthara (in the following story). २ While engaged in weaving cloths. ३ The instruments used in weaving. ४ An axe. ५ A kind of tree. ६ When hewn or cut into pieces. ७ Instruments. ८ Raised to strike against. ९ A sprite. १० Refreshed by the cool breezes blowing over the sea-waves. ११ Materials or apparatus of wood. १२ Shall hew or cut down

देयम् । अथ तथेति प्रतिज्ञाते व्यन्तरेण स कौलिकः प्रहृष्टः स्वगृहं प्रतिनिवृत्तः । यावदग्रे गच्छति तावद् ग्रामप्रवेशे निजसुहृदं नापितमपश्यत् । यतस्तस्य व्यन्तरवाक्यं निवेदयामास । यदहो मित्र मम कश्चिद्व्यन्तरः सिद्धः तत्कथय किं प्रार्थयामि । अहं त्वां प्रष्टुमागतः । नापित आह । भद्र यद्येवं तद्राज्यं प्रार्थय येन त्वं राजा भवस्यहं त्वन्मन्त्री । द्वावपीह सुखमनुभूय परलोकसुखमनुभवावः ।

उक्तं च । राजा व्ययपरो नित्यमिह कीर्तिमवाप्य च ।
तत्प्रभावात्पुनः स्वर्गे स्पर्धते त्रिदशैः सह ॥ ६१ ॥

कौलिक आह । अस्त्येतत्परं तथापि गृहिणीं पृच्छामि । स आह । भद्र शास्त्रविरुद्धमेतद्यत्स्त्रिया सह मन्त्रो यतस्ताः स्वल्पमतयो भवन्ति । उक्तं च

भोजनाच्छादने दद्यादृतुकाले च संगमम् ।
भूषणाद्यं च नारीणां न ताभिर्मन्त्रयेत्सुधीः ॥ ६२ ॥

यत्र स्त्री यत्र कितवो बालो यत्र प्रशासिता ।
राजन्निर्मूलतां याति तद्गृहं भार्गवोऽब्रवीत् ॥ ६३ ॥

तावत्स्यात्सुप्रसन्नास्यस्तावद्गुरुजने रतः ।
पुरुषो योषितां यावन्न शृणोति वचो रहः ॥ ६४ ॥

१ When the sprite had promised to do as settled. २ At the entrance of the village. ३ Gained over. ४ A king who is always liberal having obtained fame in this world, again equals the gods in heaven through its power (of his liberality in this world). ५ Consultation with a woman. ६ A wise man should give his wife food and clothing, enjoyment at the prescribed time and ornaments, &c., but he should never ask her advice (in anything). ७ Oh king, that house in which a woman, a gambler and a boy are the rulers, is destroyed, so said Bhárgava. (Sukra as a writer on politics is well-known.) ८ As long as a person does not listen to the advice of his wife in private, he is cheerful-looking and devoted to his elders.

एताः स्वार्थपरा नार्यः केवलं स्वसुखे रताः ।
न तासां वल्लभः कोपि सुतोपि स्वसुखं विना ॥ ६५ ॥

कौलिक आह । तथापि प्रष्टव्या सा मया यतः पतिव्रता सा । अपरं तामपृष्ट्वाहं न किंचित्करोमि । एवं तमभिधाय सत्वरं गत्वा तामुवाच । प्रिये अद्यास्माकं कश्चिद्व्यन्तरः सिद्धः । स वाञ्छितं प्रयच्छति । तदहं त्वां प्रष्टुमागतः । तत्कथय किं प्रार्थयामि । एष तावन्मम मित्रं नापितो वदत्येवं यद्राज्यं प्रार्थय । साह । आर्यपुत्र का मतिर्नापितानाम् । तन्न कार्यं तद्वचः । उक्तं च ।

चारणैर्वन्दिभिर्नीचैर्नापितैर्बालकैरपि ।
न मन्त्रं मतिमान्कुर्यात्सार्धं भिक्षुभिरेव च ॥ ६६ ॥

अपरं महती क्लेशपरंपरैषा राज्यस्थितिः संधिविग्रहयानासनसंश्रयद्वैधीभावादिभिः कदाचित्पुरुषस्य सुखं न प्रयच्छतीति । यतः ।

यदैव राज्ये क्रियतेभिलाषस्तदैव याति व्यसनेषु बुद्धिः ।
घटा नृपाणामभिषेककाले सहाम्भसैवापदमुद्गिरन्ति ॥ ६७ ॥

तथा च । रामप्रव्रजनं वने निवसनं पाण्डोः सुतानां वने

१ These women are intent on self-interest, and are always attached to the happiness of their selves. No one is their favourite—nor even their son—but their own happiness. २ What sense have the barbers ? ३ A talented person should not hold consultation with strolling players, bards, mean persons, barbers, boys and beggars. ४ The kingly or royal state. ५ These are the six lines of conduct to be observed by kings with other sovereigns. They are :—१. Peace; २. Hostility ; ३. Marching against; ४. Maintaining a post against an enemy; ५. Taking shelter and ६. Duplicity. ६ At the very time when a desire for a kingdom is shown, the mind runs to miseries ; the jars of water at the time of coronation of kings pour misery upon their heads along with water. ७ Seeing that Ráma was banished to the forest, the sons of Pandu had to live in the forest, the destruction of the Yádavas, Nalá being deprived of his kingdom, the King Saudás too in that condition, the murder of Arjuna (son of Kritavírya) and the lord of Lanká subjected to indignity for the sake of a kingdom, one should not wish for it (kingdom).

वृष्णीनां निधनं नलस्य नृपते राज्यात्परिभ्रंशनम् ।
सौदासं तदवस्थमर्जुनवधं संचिन्त्य लङ्केश्वरं
दृष्ट्वा राज्यकृते विडम्बनगतं तस्मान्न तद्वाञ्छयेत् ॥ ६८ ॥

यदर्थं भ्रातरः पुत्रा अपि वाञ्छन्ति ये निजाः ।
वधं राज्यकृते राज्ञां तद्राज्यं दूरतस्त्यजेत् ॥ ६९ ॥

कौलिक आह । सत्यमुक्तं भवत्या । तत्कथय किं प्रार्थयामि । साह । त्वं तावदेकं पटं नित्यमेव निष्पादयसि । तेन सर्वा व्ययशुद्धिः संपद्यते । इदानीं त्वमात्मनोऽन्यद्बाहुयुगलं द्वितीयं शिरश्च प्रार्थय येन पटद्वयं संपादयसि पुरतः पृष्ठतश्च । एकस्य मूल्येन गृहे यथापूर्वं व्ययः शुध्यति द्वितीयस्य मूल्येन विशेषकृत्यानि क्रियन्ते । एवं सौख्येन स्वजातिमध्ये श्लाघ्यमानस्य कालो यास्यति । लोकद्वयस्योपार्जना भविष्यति । सोपि तदाकर्ण्य प्रहृष्टः प्राह । साधु पतिव्रते साधु । युक्तमुक्तं भवत्या । तदेवं करिष्यामि । एष मे निश्चयः । ततोसौ गत्वा व्यन्तरं प्रार्थयामास । भो यदि ममेप्सितं प्रयच्छसि तद्देहि मे द्वितीयं बाहुयुगलं शिरश्च । एवमभिहिते तत्क्षणादेव द्विशिराश्चतुर्बाहुश्च संजातः । ततो हृष्टमना यावद्गृहमागच्छति तावल्लोकै राक्षसोयमिति मन्यमानैर्लकुटपाषाणप्रहारैस्ताडितो मृतश्च । अतोहं ब्रवीमि ।

यस्य नास्ति स्वयं प्रज्ञा मित्रोक्तं न करोति यः ।
स एव निधनं याति यथा मन्थरकौलिकः ॥ ७० ॥

चक्रधर आह । भोः सत्यमेतत् । सर्वोपि जनोश्रद्धेयामाशापिशाचिकां प्राप्य हास्यपदवीं याति । अथवा साध्विदमुच्यते केनापि ।

---

१ One should avoid even from a distance that kingdom for the sake of which, brothers, sons and other relatives seek the death of kings. २ Produce, prepare. ३ The defraying of expenses. ४ A pair of hands. ५ Price. ६ Special things, as distinguished from ordinary ones. ७ Being praised among your own race. ८ Both the worlds will have been acquired, that is, the duties pertaining to this as well as the next world will have been duly discharged. ९ Having two heads and four hands. १० The delusive phantom in the form of hope.

[1]अनागतवतीं चिन्तामसंभाव्यां करोति यः ।
स एव पाण्डुरः शेते सोमशर्मपिता यथा ॥ ७१ ॥

सुवर्णसिद्धिराह । कथमेतत् । सोऽब्रवीत् ।

॥ कथा ९ ॥

कस्मिंश्चिन्नगरे कश्चित्स्वभावकृपणो[2] नाम ब्राह्मणः प्रतिवसति स्म । तस्य भिक्षार्जितैः सक्तुभिर्[3]भुक्तोर्वरितैर्[4]घटः परिपूरितः । तं च घटं नागदन्तेऽवलम्ब्य[5] तस्याधस्तात्खट्वां[6] निधाय सततमेकदृष्ट्या तमवलोकयति । अथ कदाचिद्रात्रौ सुप्तश्चिन्तयामास यत्परिपूर्णोऽयं घटस्तावत्सक्तुभिर्वर्तते । तद्यदि दुर्भिक्षं भवति तदनेन रूपकाणां शतमुत्पद्यते[7] ततस्तेन मयाजाद्वयं[8] गृहीतव्यम् । ततः षण्मासिकप्रसववशात्ताभ्यां[9] यूथं भविष्यति । ततोऽजाभिः प्रभूता गा ग्रहीष्यामि गोभिर्महिषीभिर्[10]वडवीः[11] । वडवाप्रसवतः[12] प्रभूता अश्वा भविष्यन्ति । तेषां विक्रयात्प्रभूतं सुवर्णं भविष्यति । सुवर्णेन चतुःशालं गृहं[13] संपद्यते । ततः कश्चिद्ब्राह्मणो मम गृहमागत्य प्राप्तवयां[14] रूपाढ्यां[15] कन्यां दास्यति । तत्सकाशात्पुत्रो मे भविष्यति । तस्याहं सोमशर्मेति नाम करिष्यामि । ततस्तस्मिन्जानुचलनयोग्ये[16] संजातेऽहं पुस्तकं गृहीत्वाश्वशालायाः[17] पृष्ठदेशे उपविष्टस्तदवधारयिष्यामि[18] । अत्रान्तरे सोमशर्मा मां दृष्ट्वा जनन्युत्सङ्गाज्[19]जानुप्रचलनपरोऽश्वखुरासन्नवर्ती[20] मत्समीपमागमिष्यति । ततोऽहं ब्राह्मणीं कोपाविष्टोऽभिधास्यामि । गृहाण तावद्बालकम् । सापि गृहकर्मव्यग्रतयास्मद्वचनं[21] न श्रो-

1 He who troubles himself with the thought of what is not come and what is impossible, lies down covered all over with white as did the father of Soma *Sarma*. 2 Miserly by nature 3 Barley meal. 4 Remaining after what he had eaten. 5 A peg, a nail. 6 A cot. 7 A hundred rupees will be raised. 8 Two she-goats. 9 By reason of their producing young ones six-monthly. 10 She-buffaloes. 11 Mares. 12 Procreation. 13 A house with a court in the middle and rooms on all sides. Cf. Maráthí चौसोपी घर. 14 Who has attained puberty. 15 Rich in beauty. 16 When he becomes able to creep on his knees. 17 A stable. 18 Shall read. 19 Lap. 20 Being near the hoofs of horses. 21 Being deeply engaged in house-hold affairs.

ष्यति । ततोऽहं समुत्थाय तां पादप्रहारेण ताडयिष्यामि । एवं तेन ध्यानस्थितेन तथैव पादप्रहारो दत्तो यथा स घटो भग्नः । सक्तुभिः पाण्डुरतां गतः । अतोऽहं ब्रवीमि ।

अनागतवतीं चिन्तामसंभाव्यां करोति यः ।
स एव पाण्डुरः शेते सोमशर्मपिता यथा ॥ ७२ ॥

सुवर्णसिद्धिराह । एवमेतत् । कस्ते दोषो यतः सर्वोऽपि लोभेन विडम्बितो बाध्यते । उक्तं च

यो लौल्यात्कुरुते कर्म नैवोदर्कमवेक्षते ।
विडम्बनामवाप्नोति स यथा चन्द्रभूपतिः ॥ ७३ ॥

चक्रधर आह । कथमेतत् । स आह ।

॥ कथा १० ॥

अस्ति कस्मिंश्चिन्नगरे चन्द्रो नाम भूपतिः प्रतिवसति स्म । तस्य पुत्रा वानरक्रीडारता वानरयूथं नित्यमेवानेकभोजनभक्ष्यादिभिः पुष्टिं नयन्ति स्म । अथ वानरयूथाधिपो यः स औशनसबार्हस्पत्यचाणक्यमतवित्तदनुष्ठाता च तान्सर्वानप्यध्यापयति स्म । अथ तस्मिन्राजगृहे लघुकुमारवाहनयोग्यं मेषयूथमस्ति । तन्मध्यादेको जिह्वालौल्यादहर्निशं निःशङ्कं महानसे प्रविश्य यत्पश्यति तत्सर्वं भक्षयति । ते च सूपकारा यत्किंचित्काष्ठं मृन्मयं भाजनं कांस्यपात्रं ताम्रपात्रं वा पश्यन्ति तेनाशु ताडयन्ति । सोऽपि वानरयूथपस्तद्दृष्ट्वा व्यचिन्तयत् । अहो मेषसूपकारकलहोऽयं वानराणां क्षयाय भविष्यति यतोऽन्नस्वादलम्पटोऽयं मेषो महाकोपाश्च सूप-

---

१ With a stroke of the foot. २ Absorbed in a reverie. ३ Deceived, mocked. ४ Is afflicted. ५ He who does an action through greed and never pays attention to the result, meets with mortification, as did the King Chandra. ६ Fond of sporting with apes. ७ With food and other eatables. ८ Conversant with the opinions of Usanas, Brihaspati and Chánakya, famous writers on Niti. ९ Who practised what they have set down. १० Fit for little boys to ride on. ११ Ram. १२ Through the greediness of tongue. १३ Day and night. १४ In the kitchen. १५ Cooks. १६ Earthen. १७ Made of bell metal. १८ The quarrel between the goat and the cooks. १९ Excessively fond of tasting food. २० Very passionate.

कारा यथासन्नवस्तुना प्रहरन्ति । तद्यदि वस्तुनोभावात्कदाचिदुल्मुकेन ताडयिष्यन्ति तदूर्णाप्रचुरोयं मेषः स्वल्पेनापि वह्निना प्रज्वलिष्यति । तद्दह्यमानः पुनरश्वकुट्यां समीपवर्तिन्यां प्रवेक्ष्यति । सापि तृणप्राचुर्याज्ज्वलिष्यति । ततोश्वा वह्निदाघमवाप्स्यन्ति । शालिहोत्रेण पुनरेतदुक्तम् । यद्वानरवसयाश्वानां वह्निदाघदोषःप्रशाम्यति । तन्नूनमेतेन भाव्यमत्र निश्चयः । एवं निश्चित्य सर्वान्वानरगनाहूय रहसि प्रोवाच । यत्

मेषेण सूपकाराणां कलहो यत्र जायते ।
स भविष्यत्यसंदिग्धं वानराणां क्षयावहः ॥ ७४ ॥
तस्मात्स्यात्कलहो यत्र गृहे नित्यं निकारणः ॥
तद्गृहं जीवितं वाञ्छन् दूरतः परिवर्जयेत् ॥ ७५ ॥

तथा च । कलहान्तानि हर्म्याणि कुवाक्यान्तं च सौहृदम् ।
कुराजान्तानि राष्ट्राणि कुकर्मान्तं यशो नृणाम् ॥ ७६ ॥

तन्न यावत्सर्वेषां संक्षयो भवति तावदेतद्राजगृहं संत्यज्य वनं गच्छामः । अथ तत्तस्य वचनमश्रद्धेयं श्रुत्वा मदोद्धता वानराः प्रहस्य प्रोचुः । भो भवतो वृद्धभावाद् बुद्धिवैकल्यं संजातं येनैतद्ब्रवीषि । उक्तं च ।

वदनं दशनैर्हीनं लाला स्रवति नित्यशः ।
न मतिः स्फुरति क्वापि बाले वृद्धे विशेषतः ॥ ७७ ॥

---

१ In the absence of anything else. २ A fire-brand. ३ Replete with wool. ४ A stable for horses. ५ On account of its having much grass in it. ६ Will be burnt by fire. ७ A famous ancient writer on veterinary surgery. ८ With the fat of, &c. ९ It is certain that the same will happen in this case. १० When a quarrel takes place between a goat and cooks, it will undoubtedly bring about the destruction of monkeys. ११ He, therefore, who wishes to live, should avoid even from a distance that house where quarrels always take place without any cause. १२ Palaces are destroyed by dissensions, friendship by ill words, kingdoms by bad kings and the fame of men by evil deeds (कलहान्तानि Bah. comp. कलहः अंतो येषां तानि). The three other compounds in this verse are to be similarly dissolved. १३ The intellect is weakened. १४ In the case of a child its mouth is without teeth, saliva always comes out of it, the intellect does not shine forth, such especially is the case with an old person.

न वयं स्वर्गसमानोपभोगान्नानाविधान्भक्ष्यविशेषान्राजपुत्रैः स्वहस्तदत्तानमृतकल्पान्परित्यज्य तत्राटव्यां कषायकटुतिक्तक्षारूक्षफलानि भक्षयिष्यामः । तच्छ्रुत्वाश्रुकलुषां दृष्टिं कृत्वा स प्रोवाच । रे रे मूर्खा युयमेतस्य सुखस्य परिणामं न जानीथ । पाकरसास्वादनप्रायमेतत्सुखं परिणामे विषवद्भविष्यति । तदहं कुलक्षयं स्वयं नावलोकयिष्यामि । सांप्रतं वनं यास्यामि । उक्तं च ।

मित्रं व्यसनसंप्राप्तं स्वस्थानं परपीडितम् ।
धन्यास्ते ये न पश्यन्ति देशभङ्गं कुलक्षयम् ॥ ७८ ॥

एवमभिधाय सर्वांस्तान्परित्यज्य स गृध्राधिपोऽटव्यां गतः । अथ तस्मिन्गतेऽन्यस्मिन्नहनि स मेषो महानसं प्रविष्टो यावत्सूपकारेण नान्यत्किंचित्समासादितं तावदर्धज्वलितेनकाष्ठेन ताड्यमानो जाज्वल्यमानशरीरः शब्दायमानोऽश्वकुट्यां प्रत्यासन्नवर्तिन्यां प्रविष्टः । तत्र तृणप्राचुर्ययुक्तायां क्षितौ तस्य प्रलुठतः सर्वत्रापि वह्निज्वालास्तथा समुत्थिता यथा केचिदश्वाः स्फुटितलोचनाः पञ्चत्वं गताः केचिद्बन्धनानि त्रोटयित्वार्धदग्धशरीरा इतश्चेतश्च हेषायमाणा धावमानाः सर्वमपि जनसमूहमाकुलीचक्रुः । अत्रान्तरे राजा सविषादः शालिहोत्रज्ञान्वैद्यानाहूय प्रोवाच । भोः प्रोच्यतामेषामश्वानां कश्चिद्दाहोपशमनोपायः । तेऽपि शास्त्राणि संचिन्त्य प्रोचुः । देव प्रोक्तमत्र विषये भगवता शालिहोत्रेण । यत्

१ Special dainties. २ Pungent, bitter, sharp, salt and tasteless. ३ Looking at them with eyes full of tears. ४ Mostly consisting in tasting ripe juice. ५ Blessed are those persons who do not see a friend engrossed in misery, their own place harassed by others (enemies), the destruction of their country and also that of their families. ६ With a half-burnt piece of wood. ७ With his body horribly burning. ८ Bleeting. ९ While rolling or wallowing on the ground. १० Spread. ११ Had their eyes blinded. १२ Died. १३ Having broken. १४ With their bodies half-burnt. १५ Neighing. १६ Threw into confusion. १७ Proficient in veterinary surgery. १८ A remedy to allay the burning heat. १९ Having consuledt.

कपीनां मेदसा दोषो वह्निदाहसमुद्भवः ।
अश्वानां नाशमभ्येति तमः सूर्योदये यथा ॥ ७९ ॥

तत्क्रियतामेतच्चिकित्सितं द्राग्यावन्नैतेन दाहदोषेण विनश्यन्ति । सोपि तदाकर्ण्य समस्तवानरवधमादिष्टवान् । किं बहुना । सर्वेपि ते वानरा विविधायुधलकुटपाषाणादिभिर्व्यापादिता इति । अथ सोपि वानरयूथपस्तं पुत्रपौत्रभ्रातृसुतभागिनेयादिसंक्षयं ज्ञात्वा परं विषादमुपागतः । स त्यक्ताहारक्रियो वनाद्वनं पर्यटति । अचिन्तयच्च । कथमहं तस्य नृपापसदस्यानृणनार्कृत्येनापकृत्यं करिष्यामि । उक्तं च ।

मर्षयेद्धर्षणां योत्र वंशजां परनिर्मिताम् ।
भयाद्वा यदि वा कामात्स ज्ञेयः पुरुषाधमः ॥ ८० ॥

अथ तेन वृद्धवानरेण कुत्रचित्पिपासाकुलेन भ्रमता पद्मिनीषण्डमण्डितं सरः समासादितम् । तद्यावत्सूक्ष्मेक्षिकयावलोकयति तावद्वनचरैर्मनुष्याणां पदपङ्क्तिप्रवेशोस्ति न निष्क्रमणम । ततश्चिन्तितम् । नूनमत्र जलान्ते दुष्टग्राहेण भाव्यम् । तत्पद्मिनीनालमादाय दूरस्थोपि जलं पिबामि । तथानुष्ठिते तन्मध्याद्राक्षसो निष्क्रम्य रत्नमालाविभूषितकण्ठस्तमुवाच । भो अत्र यः सलिले प्रवेशं करोति स मे भक्ष्य इति । तन्नास्ति धूर्ततरस्त्वत्समोन्यो यत्पानीयमनेन विधिनापिबसि । ततस्तुष्टोहम् । प्रार्थय हृदयवाञ्छितम् । कपिराह । भोः कियती ते भक्षणशक्तिः । स आह ।

१ The injury caused to horses by burning is cured by the fat of monkeys as darkness disappears at the rise of the sun. २ Medicine. ३ A sister's son. ४ He who had given up eating. ५ A low or mean king. ६ By way of paying him off (for the injury received). ७ He, who will calmly suffer the insult given by another to his own family (वंशजां), either through fear or self-interest, should be considered as the meanest of men. ८ Adorned with a collection of lotus-plants. ९ With a minute scrutiny or observation. १० Of human beings living in the forest. ११ The marks of foot-steps going towards the lake and not of such as go away from it. १२ A crocodile or shark. १३ A hollow lotus-stalk. १४ With the neck adorned with a garland of jewels.

शतसहस्रायुतलक्षाण्यपि जलप्रविष्टानि भक्षयामि । बाह्यतः शृगालोपि मां दूषयति । वानर आह । अस्ति मे भूपतिना सहात्यन्तं वैरम् । यद्येनां रत्नमालां मे प्रयच्छसि तत्सपरिवारमपि तं भूपतिं वाक्प्रपञ्चेन लोभयित्वात्र सरसि यथा प्रविशति तथा करोमि । सोपि श्रद्धेयं वचस्तस्य श्रुत्वा रत्नमालां दत्वा प्राह । भो मित्र यत्समुचितं भवति तत्कर्तव्यमिति । वानरोपि रत्नमालाविभूषितकण्ठो वृक्षप्रासादेषु परिभ्रमञ्जनैर्दृष्टः पृष्टश्च । भो यूथप भवानियन्तं कालं कुत्र स्थितः । भवतेदृग्रत्नमाला कुत्र लब्धा या दीप्त्या सूर्यमपि तिरस्करोति । वानरः प्राह । अस्ति कुत्रचिदरण्ये गुप्ततरं महत्सरो धनदनिर्मितम् । तत्र सूर्येऽर्धोदिते रविवारे यः कश्चिन्निमज्जति स धनदप्रसादादीदृग्रत्नमालाविभूषितकण्ठो निःसरति । अथ भूभुजा तदाकर्ण्य स वानरः समाहूतः पृष्टश्च । भो यूथाधिप किं सत्यमेतत् । रत्नमालासनाथं सरोस्ति क्वापि । कपिराह । स्वामिन् एष प्रत्यक्षतया मत्कण्ठस्थितया रत्नमालया प्रत्ययस्ते । तद्यदि रत्नमालाप्रयोजनं तन्मया सह कमपि प्रेषय येन दर्शयामि । तच्छ्रुत्वा नृपतिराह । यद्येवं तदहं सपरिजनः स्वयमेष्यामि येन प्रभूताः रत्नमालाः संपद्यन्ते । वानर आह । स्वामिन् एवं क्रियताम् । तथानुष्ठिते भूपतिना सह रत्नमालालोभेन सर्वे कलत्रभृत्याः प्रस्थिताः । वानरोपि राज्ञा दोलाधिरूढेन स्वोत्सङ्ग आरोपितः सुखेन प्रीतिपूर्वमानीयते । अथवा साध्विदमुच्यते ।

तृष्णे देवि नमस्तुभ्यं यया वित्तान्विता अपि ।
अकृत्येषु नियोज्यन्ते भ्राम्यन्ते दुर्गमेष्वपि ॥ ८१ ॥

---

१ Ten thousand. २ Injures or hurts. ३ Dexterity or amplification of words. ४ On trees and mansions. ५ Which is so resplendent that it surpasses even the sun. ६ Hidden, concealed. ७ When the orb of the sun has come up half above the horizon. ८ Bathes. ९ Comes out. १० The king, lit: the enjoyer of the earth. ११ Proof, conviction. १२ The need of a diamond necklace. १३ Wives and servants. १४ Mounted on a swing or hammock. १५ Oh goddess avarice, a bow to thee, by whom even rich persons are led into wicked actions and are made to wander even in impassable deserts.

तथा च । इच्छति शती सहस्रं सहस्री लक्षमीहते
लक्षाधिपस्तथा राज्यं राज्यस्थः स्वर्गमीहते ॥ ८२ ॥
जीर्यन्ते जीर्यतः केशा दन्ता जीर्यन्ति जीर्यतः ।
जीर्यतश्चक्षुषी श्रोत्रे तृष्णैका तरुणायते ॥ ८३ ॥

अथ तत्सरः समासाद्य वानरः प्रत्यूषसमये राजानमुवाच । देव अर्धोदिते सूर्येऽत्र प्रविष्टानां सिद्धिर्भवति । तत्सर्वोऽपि जन एकदैव प्रविशतु । त्वया पुनर्मया सह प्रवेष्टव्यं येन पूर्वदृष्टस्थानमासाद्य प्रभूतास्ते रत्नमाला दर्शयामि । अथ प्रविष्टास्ते लोकाः सर्वे भक्षिता राक्षसेन । अथ तेषु चिरायमाणेषु राजा वानरमाह । भो यूथाधिप किमिति चिरायते मे जनः । तच्छ्रुत्वा वानरः सत्वरं वृक्षमारुह्य राजानमुवाच । भो दुष्टनरपते राक्षसेनान्तः सलिलस्य स्थितेन भक्षितस्ते परिजनः । साधितं मया कुलक्षयजं वैरम् । तद्गम्यताम् । त्वं स्वामीति मत्वा नात्र प्रवेशितः । उक्तं च ।

कृते प्रतिकृतं कुर्याद्धिंसिते प्रतिहिंसितम् ।
न तत्र दोषं पश्यामि दुष्टे दुष्टं समाचरेत् ॥ ८४ ॥

तत्त्वया मम कुलक्षयः कृतो मया पुनस्तवेति । अथैतदाकर्ण्य राजा शोकाविष्टः पदातिरेकाकी यथायातमार्गेण निष्क्रान्तः । अथ तस्मिन्भूपतौ गते राक्षसस्तृप्तो जलान्निष्क्रम्य सानन्दमिदमाह ।

हतः शत्रुः कृतं मित्रं रत्नमाला न हारिता ।
नालेनास्वादितं तोयं साधु भो वटवानर ॥ ८५ ॥

१ One who has a hundred (coins) wishes for a thousand, he who has a thousand wishes to have a hundred thousand; he who is a master of a hundred thousand longs for a kingdom, and he who has secured a throne wishes to get the heaven. २ Eyes and ears. ३ Having got to the place seen (by me) before. ४ When they delayed coming back. ५ Arising from the destruction of my family. ६ An injury should be retaliated, a murder should be met by a murder in return and a wicked deed by a wicked one – I see no sin in that. ७ Going on foot. ८ Along the way by which he had come. ९ The enemy is killed, a friend is made, a diamond necklace is not lost and water is drunk by means of a lotus-stalk. Well done, oh monkey on the fig-tree !

अतोहं ब्रवीमि ।

यो लौल्यात्कुरुते कर्म नैवोदर्कमवेक्षते ।
विडम्बनामवाप्नोति स यथा चन्द्रभूपतिः ॥ ८६ ॥

एवमुक्त्वा भूयोपि स चक्रधरमाह । भो मित्र प्रेषय मां येन स्वगृहं गच्छामि । चक्रधर आह । भद्र आपदर्थे धनमित्रसंग्रहः क्रियते । तन्मामेवंविधं त्यक्त्वा क्व यास्यसि । उक्तं च ।

त्यक्त्वा सापदं मित्रं याति निष्ठुरतां सुहृत् ।
कृतघ्नस्तेन पापेन नरके यात्यसंशयम् ॥ ८७ ॥

सुवर्णसिद्धिराह । भोः सत्यमेतद्यदि गम्यस्थाने शक्तिर्भवति । एतत्पुनर्मनुष्याणामगम्यस्थानम् । नास्ति कस्यापि त्वामुन्मोचयितुं शक्तिः । अपरं यथा यथा चक्रभ्रमवेदनया तव मुखविकारं पश्यामि तथा तथाहमेतज्जानामि यद्गागच्छामि मा कश्चिन्ममाप्यनर्थो भवेत् । यतः

यादृशी वदनच्छाया दृश्यते तव वानर ।
विकालेन गृहीतोसि यः परैति स जीवति ॥ ८८ ॥

चक्रधर आह । कथमेतत् सोब्रवीत् ।

॥ कथा ११ ॥

कस्मिंश्चिन्नगरे भद्रसेनो नाम राजा प्रतिवसति स्म । तस्य सर्वलक्षणसंपन्ना रत्नवती नाम कन्यास्ति । तां कश्चिद्राक्षसो जिहीर्षति । रात्रावा-

१ Against a misfortune. २ What will become of you ! ३ That man who becomes cruel and deserts his friend in misery, is ungrateful and goes to hell in consequence of that sin—there is no doubt in this. ४ If one has the power to help another in a case which admits of a remedy (गम्यस्थाने). ५ Inaccessible. ६ Besides the more I see your face showing signs of agony caused by the turning of the wheel, the more I am inclined to go away from here quickly, lest some calamity may befall me also. ७ Oh monkey, from what I see of the colour of your face, I think you are seized by Vikála (a demon) and he who runs away, saves himself. ८ Endowed with all the signs thought desirable in a woman. ९ Wishes to take away (Desid. P. of हृ).

गत्वोपभुङ्क्ते । परं कृतरक्षोपधानां[1] हर्तुं न शक्नोति । सापि तत्समये रक्षः-सांनिध्यजामवस्थामनुभवति[2] कम्पादिभिः । एवमतिक्रामति काले कदाचित्सराक्षसो मध्यनिशायां[3] गृहकोणे[4] स्थितः । सापि राजकन्या स्वसखीमुवाच । सखि पश्यैष विकालसमये[5] नित्यमेव मां कदर्थयति[6] । अस्ति तस्य दुरात्मनः प्रतिषेधोपायः कश्चित् । तच्छ्रुत्वा राक्षसोपि व्यचिन्तयत् नूनं यथाहं तथान्योपि कश्चिद्विकालनामास्या हरणाय नित्यमेवागच्छति । परं सोप्येनां हर्तुं न शक्नोति । तत्तावदश्वरूपं[7] कृत्वाश्वमध्यगतो निरीक्षयामि किंरूपः[8] स किंप्रभाव[9] इति । एवं राक्षसोश्वरूपं कृत्वाश्वानां मध्ये तिष्ठति । तथानुष्ठिते निशीथसमये[10] राजगृहे कश्चिदश्वचोरः प्रविष्टः । स च सर्वानश्वानवलोक्य तं राक्षसमश्वतमं[11] विज्ञायाधिरूढः । अत्रान्तरे राक्षसश्चिन्तयामास । नूनमेष विकालनामा मां चोरं मत्वा कोपान्निहन्तुमागतः । तत्किं करोमि । एवं चिन्तयन्सोपि तेन खलीनं[12] मुखे निधाय कशाघातेन[13] ताडितः । अथासौ भयत्रस्तमनाः प्रधावितुमारब्धः । चोरोपि दूरं गत्वा खलीनाकर्षणेन तं स्थिरं कर्तुं[14]मारब्धवान् । स तु केवलं वेगाद्वेगतरं[15] गच्छति । अथ तं तथागणितखलीनाकर्षणं[16] मत्वा चोरश्चिन्तयामास । अहो नैवंविधा वाजिनो भवन्ति नैवमगणितखलीनाः । तन्नूनमनेनाश्वरूपेण राक्षसेन भवितव्यम् । तद्यदि कंचित्पांसुलं[17] भूमिदेशमवलोकयामि तदात्मानं तत्र पातयामि । नान्यथा मे जीवितव्यमस्ति । एवं चिन्तयत इष्टदेवतां[18] स्मरतस्तस्य सोश्वो वटवृक्षस्य

---

1 Her, who was securely guarded. 2 A state (hard) on account of the proximity of the evil spirit. 3 At the dead of night. 4 In a corner of the house. 5 At an unseasonable hour. 6 Torments. 7 Having assumed the form of a horse 8 Of what form? 9 Of what strength, how powerful 10 At midnight. 11 The best horse. 12 A bridle-bit 13 With the stroke of a whip. 14 To stop. 15 More and more swiftly. 16 He who had disregarded the drawing in of the bridle-bit. 17 Full of dust. 18 While he was calling upon his tutelary deity to save him.

तले निष्क्रान्तः । चौरोपि वटप्ररोहमासाद्य तत्र एवं विलग्नः । ततो द्वावपि तौ पृथग्भूतौ परमानन्दभाजौ जीवितविषये लब्धप्रत्याशौ संपन्नौ । अथ तत्र वटे कश्चिद्राक्षससुहृद्वानरः स्थित आसीत् । तेन राक्षसं त्रस्तमालोक्य व्याहृतम् । भो मित्र किमेवं पलाय्यतेलीकभयेन । त्वद्भक्ष्योयं मानुषः । भक्ष्यताम् । सोपि वानरवचो निशम्य स्वरूपमाधाय शंकितमनाः स्खलितगतिर्निवृत्तः । चौरोपि तं वानराहूतं ज्ञात्वा कोपात्तस्य लाङ्गूलं लम्बमानं मुखे निधाय चर्वितवान् । वानरोपि तं राक्षसाभ्यधिकं मन्यमानो भयान्न किंचिदुक्तवान्केवलं व्यथार्त्तो निमीलितनयनस्तिष्ठति यथा भवानिति । राक्षसोपि तं तथा भूतमवलोक्य श्लोकमेकमेनमपठत् ।

यादृशी वदनच्छाया दृश्यते तव वानर ।
विकालेन गृहीतोसि यः परैति स जीवति ॥ ८९ ॥

प्रनष्टश्च । तत्प्रेषय मां येन गृहं गच्छामि । त्वं पुनरनुभुङ्क्ष्वात्र स्थित एव लोभवृक्षफलम् । चक्रधरः प्राह । भो अकारणमेतत् । दैववशात्संपद्यते नृणां शुभाशुभम् । उक्तं च ।

दुर्गं त्रिकूटः परिखा समुद्रो रक्षांसि योधा धनदाच्च वित्तम् ।
शास्त्रं च यस्योशनसा प्रणीतं स रावणो दैववशाद्विपन्नः ॥ ९० ॥

तथा च । अन्धकः कुब्जकश्चैव त्रिस्तनी राजकन्यका ।
त्रयोप्यन्यायतः सिद्धाः संमुखे कर्मणि स्थिते ॥ ९१ ॥

सुवर्णसिद्धिराह कथमेतत् । सोब्रवीत् ।

१ Sprouts. २ Clung. ३ Who had regained hopes. ४ False, imaginary. ५ With a stumbling gait. ६ Tail. ७ Bit (*p. p.* A. of चर्व् to bite). ८ Afflicted with pain. ९ With eyes closed. १० Experience. ११ The fruit of the tree of avarice. १२ That Rávana, who had the mountain Trikuta for his fort, the sea for its ditch, the demons for warriors, the god Kubera for his treasurer, and for whom Usanas (Sukra) composed the science of politics, perished through the power of Fate. १३ Fate being favourable, a blind man, a hump-backed person and a princess with three breasts-all the three succeeded in their objects through faults.

॥ कथा १२ ॥

अस्त्यत्र धरातल उत्तरपथे मधुपुरं[१] नाम नगरम् । तत्र मधुसेनो नाम राजा बभूव । तस्य कदाचिद्विषयसुखमनुभवत[२]स्त्रिस्तनी कन्या बभूव । अथ तां त्रिस्तनीं जातां श्रुत्वा स राजा कञ्चुकिनः प्रोवाच । यद्भोस्त्यज्यतामियं त्रिस्तनी गत्वा दूरेरण्ये यथा कश्चिन्न जानाति । तच्छ्रुत्वा कञ्चुकिनः प्रोचुः । महाराज ज्ञायते यदनिष्टकारिणी[३] त्रिस्तनी कन्या भवति । तथापि ब्राह्मणा आहूय प्रष्टव्या येन[४] लोकद्वयं न विरुध्यते । यतः ।

> यः[५] सततं परिपृच्छति शृणोति संधारयत्यनिशम् ।
> तस्य दिवाकरकिरणैर्नलिनीव विवर्धते बुद्धिः ॥ १२ ॥

तथा च । [६]पृच्छकेन सदा भाव्यं पुरुषेण विजानता ।

> राक्षसेन्द्रगृहीतोपि प्रश्नान्मुक्तो द्विजः पुरा ॥ १३ ॥

राजाह । कथमेतत् । ते प्रोचुः ।

॥ कथा १३ ॥

देव कस्मिंश्चिद्वनोद्देशे चण्डकर्मा नाम राक्षसः प्रतिवसति स्म । एकदा तेन भ्रमताटव्यां कश्चिद्ब्राह्मणः समासादितः । ततस्तस्य स्कन्धमारुह्य प्रोवाच । भो अग्रेसरो गम्यताम् । ब्राह्मणोपि भयत्रस्तमनास्तमादाय प्रस्थितः । अथ तस्य कमलोदरकोमलौ[७] पादौ दृष्ट्वा ब्राह्मणो राक्षसमपृच्छत् । भोः किमेवंविधौ ते पादावतिकोमलौ । राक्षस आह । भोः व्रतमस्ति[८] । नाहमार्द्रपादो[९] भूमिं स्पृशामि । ततस्तच्छ्रुत्वात्मनो मोक्षोपायं चिन्तयंस्तत्सरः प्राप्तः । ततो राक्षसेनाभिहितम् । भो यावदहं स्नानं कृत्वा देवतार्चनविधिं[१०] विधायागच्छामि तावत्त्वयातः स्थानान्नान्यत्र गन्तव्यम् । तथानुष्ठिते द्विजश्चिन्तयामास । नूनं देवतार्चनविधेरूर्ध्वं मामेष भक्षयिष्यति

---

१ The modern Mathurá. २ While enjoying the pleasures of love. ३ Doing or causing evil. ४ So that you will not have acted against both the worlds. ५ The intellect of him, who always inquires, hears and considers anything, increases or prospers like a lotus by the rays of the sun. ६ He, who is ignorant, should be always inquiring. Formerly a Bráhmana, though seized by a formidable giant, was saved by a question. ७ As delicate as the interior of a lotus. ८ I have a vow. ९ With wet feet. १० The ceremony of worshipping gods.

तद्दुत्तरं गच्छामि येनैष आर्द्रपादो न मम पृष्ठमेष्यति । तथानुष्ठिते राक्ष-
सोऽव्रतभङ्गभयात्तस्य पृष्ठं न गतः । अतोऽहं ब्रवीमि ।

पृच्छकेन सदा भाव्यं पुरुषेण विजानता ।
राक्षसेन्द्रगृहीतोपि प्रश्नान्मुक्तो द्विजः पुरा ॥ १४ ॥

अथ तेभ्यस्तत्श्रुत्वा राजा द्विजानाहूय प्रोवाच । भो ब्राह्मणाः त्रिस्तनी
मे कन्यी संजाता । तत्किं तस्याः प्रतिविधानमस्ति किं वा न । ते प्रोचुः ।
देव श्रूयताम् ।

हीनाङ्गी वाधिकाङ्गी वा या भवेत्कन्यका नृणाम् ।
भर्तुः स्यात्सा विनाशाय स्वशीलनिधनाय च ॥ १५ ॥
या पुनस्त्रिस्तनोपेता याति लोचनगोचरम् ।
पितरं नाशयत्येव सा द्रुतं नात्र संशयः ॥ १६ ॥

तस्मादस्या दर्शनं परिहरतु देवः । तथा यदि कश्चिदुद्वाहयति त
तस्मै दत्त्वा देशत्यागेन नियोजयितव्य इति । एवं कृते लोकद्वयाविरु
भवति । अथ तेषां तद्वचनमाकर्ण्य स राजा पटहशब्देन सर्वत्र घोषणां
ज्ञापयामास । अहो त्रिस्तनीं राजकन्यां यः कश्चिदुद्वाहयति स सुवर्ण
लक्षमाप्नोति देशत्यागं च । एवं तस्यामाघोषणायां क्रियमाणायां महान्का
व्यतीतः । न कश्चित्तां प्रतिगृह्णाति । सापि यौवनोन्मुखी संजाता सुगुप्तस्थ
नस्थिता यत्नेन रक्ष्यमाणा तिष्ठति । अथ तत्रैव नगरे कश्चिदन्धस्तिष्ठति
तस्य च मन्थरकनामा कुब्जोऽग्रेसरो यष्टिग्राही । ताभ्यां स पटहशब्दमा

---

१ Will not come after me, will not follow me. २ Act
against or counteracting. ३ If a daughter, either want
in a limb or having a superfluous one, be born to men,
will be the cause of her husband's death, as also the
of the loss of her own virtue. ४ Again, if that girl,
has three breasts, be seen (by the father) she will
destroy her father-there is no doubt in this. ५ Avoid.
should be got rid of by being made to leave the coun
७ By the sound of a drum. ८ Proclamation. While the
clamation was being issued. ९ Living in a place
guarded. १० Going before him and carrying a stick.

मिथो मन्त्रितम् । [१]स्पृश्यतेयं पटहो यदि कथमपि दैवात्कन्या लभ्यते सुवर्णप्राप्तिश्च भवति । सुखेन सुवर्णप्राप्त्या कालो व्रजति । अथ यदि तस्या दोषतो मृत्युर्भवति दारिद्र्योपा[२]र्जितस्यास्य क्लेशस्य पर्यन्तो[३] भवति । उक्तं च ।

लज्जा स्नेहः स्वरविशदता बुद्धयः सौम्यनस्त्वं
प्राणोनङ्गः पठनसमता दुःखहानिर्विलासाः ।
धर्मः शास्त्रं सुरगुरुमतिः शौचमाचारचिन्ता
सस्यैः पूर्णे जठरपिठरे प्राणिनां संभवन्ति ॥ १७ ॥

एवमुक्त्वान्धेन गत्वा स पटहः स्पृष्टः । भो अहं तां कन्यामुद्वाहयामि यदि राजा मे प्रयच्छति । ततस्तै राजपुरुषैर्गत्वा राज्ञो निवेदितम् । देव अन्धकेन केनचित्पटहः स्पृष्टः । [५]तदत्र विषये देवः प्रमाणम् । किं क्रियतामिति । राजा प्राह ।

[६]अन्धो वा बधिरो वापि कुष्ठी वाप्यन्त्यजोपि वा ।
प्रतिगृह्णातु तां कन्यां सलक्षां स्याद्विदेशगः ॥ १८ ॥

अथ राजादेशात्तै रक्षापुरुषैस्तं नदीतीरे नीत्वा सुवर्णलक्षेण समं विवाहेन त्रिस्तनीं तस्मै दत्वा [७]जलयाने निधाय [८]कैवर्ताः प्रोक्ताः । भो देशान्तरं नीत्वा कस्मिंश्चिदधिष्ठानेन्धः सपत्नीकः कुब्जकेन सह मोचनीयः । तथानुष्ठिते [९]विदेशमासाद्य कस्मिंश्चिदधिष्ठाने कैवर्तदर्शिते ते त्रयोपि मूल्येन

---

१ Let this drum be touched by way of showing that we have accepted the offer. २ Brought on by poverty. ३ End. ४ When the pot-like belly of men is filled with food, that is, when a man has enough to eat, he is said to have modesty, affection, distinctness of sound, talent, goodness of heart, spirit, love, equality in study with the learned, absence of grief, sportive nature, religion, science, the intellect of the preceptor of gods, purity of conduct and a thought about the correctness or otherwise of conduct. ५ In this case your majesty is an authority, i. e. your majesty should decide what course to follow. ६ Let a man whether blind, deaf, affected with leprosy or of the lowest caste, take that girl along with the promised lac of coins and leave the country (lit: be an exile). ७ A vehicle for going by water, that is, a boat. ८ Fisherman. ९ A foreign land.

गृहं प्राप्ताः सुखेन कालं नयन्ति स्म । केवलमन्धः पर्यङ्के सुखासीनस्तिष्ठति । गृहव्यापारं मन्थरकः करोति । एवं गच्छता कालेन त्रिस्तन्याः कुब्जकेन सह विकृतिः समपद्यत । अथवा साध्विदमुच्यते ।

यदि स्याच्छीतलो वह्निश्चन्द्रमा दहनात्मकः ।
सुस्वादः सागरः स्त्रीणां तत्सतीत्वं प्रजायते ॥ ९९ ॥

अथान्येद्युस्त्रिस्तन्या मन्थरकोऽभिहितः । भोः सुभग यद्येषोऽन्धः कथंचिद्व्यापाद्यते तदावयोः सुखेन कालो याति । तदन्विष्यतां कुत्रचिद्विषं येनास्मै तत्प्रदाय सुखिनी भवामि । अन्यदा कुब्जकेन परिभ्रमता मृतः कृष्णसर्पः प्राप्तः । तं गृहीत्वा प्रहृष्टमना गृहमभ्येत्य तामाह । सुभगे लब्धोऽयं कृष्णसर्पः । तदेनं खण्डशः कृत्वा प्रभूतशुण्ठ्यादिभिः संस्कार्यामुष्मै विकलनेत्राय मत्स्यामिषं भणित्वा प्रयच्छ येन द्राग्विनश्यति यतोऽस्य मत्स्यामिषं सदा प्रियम् । एवमुक्त्वा मन्थरको बाह्ये गतः । सापि प्रदीप्तवह्नौ कृष्णसर्पं खण्डशः कृत्वा तक्रमादाय गृहव्यापाराकुला तं विकलाक्षं सप्रश्रयमुवाच । आर्यपुत्र तवाभीष्टं मत्स्यमांसं समानीतं यतस्त्वं सदैव तत्पृच्छसि । ते च मत्स्या वह्नौ पाचनाय तिष्ठन्ति । तद्यावदहं गृहकृत्यं करोमि तावत्त्वं दर्वीमादाय क्षणमेकं तान्प्रचालय । सोऽपि तदाकर्ण्य हृष्टमनाः सृक्किणी परिलिहन्द्रुतमुत्थाय दर्वीमादाय प्रमथितुमारब्धः । अथ तस्य मत्स्यान्मथतो विषगर्भबाष्पेण संस्पृष्टं नीलपटलं चक्षुर्भ्यामगलत् । असावप्यन्धो बहुगुणं मन्यमानो विशेषान्नेत्राभ्यां बाष्पग्रहणमकरोत् । ततो लब्धदृष्टिर्जातो यावत्पश्यति तावत्तक्रमध्ये कृष्णसर्पखण्डानि केवलान्येवावलोकयति । ततो व्यचिन्तयत् । अहो किमेतत् । मम मत्स्यामिषं कथितमासीदनया

---

१ May mean either—"Having bought a house," or "having hired a house." २ Domestic affai[rs]. ३ Change of feeling—here of course it means a feeli[ng] of love. ४ "If fire be cold, if the moon be burning ho[t] and if the sea be sweet to the taste, then there c[an be] chastity of women. ५ Having refined it by means of [a] large quantity of dry ginger. ६ The blind man. ७ [illegible] ८ Affectionately, modestly. ९ Are placed over the [fire] being cooked. १० A laddle. ११ Stir. १२ The corners [of the] mouth. १३ Licking. १४ To stir, to [illegible] १५ [The] steam having poison in it. १६ A black [illegible] ing. १७ Very efficacious. १८ One who has regained his [illegible]

...नि तु कृष्णसर्पखण्डानि । तत्तावद्विजानामि सम्यक् त्रिस्तन्याश्चेष्टितं ... मम वधोपायकमः कुब्जस्य वोताहो अन्यस्य वा कस्यचित् । एवं चिन्त्य स्वाकारं गूहन्नन्धवत्कर्म करोति यथा पुरा । अत्रान्तरे कुब्जः समागत्य निःशङ्कस्तथालिङ्गनचुम्बनादिभिस्त्रिस्तनीं सेवितुमुपचक्रमे । सोऽप्यन्धस्तमवलोकयन्नपि यावन्न किञ्चिच्छस्त्रं पश्यति तावत्कोपव्याकुलमनाः ...वच्छयनं गत्वा कुब्जं चरणाभ्यां संगृह्य सामर्थ्यात्स्वमस्तकोपरि भ्रामयित्वा त्रिस्तनीं हृदये व्यताडयत् । अथ कुब्जप्रहारेण तस्यास्तृतीयः स्तनः ...सि प्रविष्टः । तथा बलान्मस्तकोपरि भ्रामणेन कुब्जः प्राञ्जलतां गतः । ...हं ब्रवीमि ।

अन्धकः कुब्जकश्चैव त्रिस्तनी राजकन्यका ।
त्रयोऽप्यन्यायतः सिद्धाः संमुखे कर्मणि स्थिते ॥ १०० ॥

सुवर्णसिद्धिराह । भोः सत्यमेतत् । दैवानुकूलतया सर्वं कल्याणं संप-... । तथापि पुरुषेण सतां वचनं कार्यम् । न पुनरेवमेव यो वर्तते स त्व-... विनश्यति । तथा च ।

एकोदराः पृथग्ग्रीवा अन्योन्यफलभक्षिणः ।
असंहता विनश्यन्ति भारण्डा इव पक्षिणः ॥ १०१ ॥

चक्रधर आह । कथमेतत् । सोऽब्रवीत्

॥ कथा १४ ॥

...स्मिन्सरोवरे भारण्डनामा पक्ष्येकोदरः पृथग्ग्रीवः प्रतिवसति स्म । ...समुद्रतीरे परिभ्रमता किंचित्फलममृतकल्पं तरंगोत्क्षिप्तं संप्राप्तम् । सोऽपि ...यमिदमाह । अहो बहूनि मयामृतप्रायाणि समुद्रकल्लोलाहृतानि फला... भक्षितानि । परमपूर्वोऽस्यास्वादः । तत्किं पारिजातहरिचन्दनतरुसंभवं ...

---

१ Trick. २ A plan to kill me. ३ Or. ४ Concealing his real ...ate. ५ To enjoy. ६ As before, that is, as he went groping ... way in his blindness. ७ Having turned him round and ...und. ८ Became straight. ९ Those, who are disunited like ... bird ... who had one belly but separate necks ... each other's fruit, perish (as they ...) ... up by the waves. ११ Brought (to the shore) ... waves of the sea. १२ Extraordinary, wonderful ... of trees renowned for fragrance.

किं वा किंचिदमृतमयफलमप्यकेनापि विधिनापतितम् । एवं तस्य श्रुत्वा द्वितीयमुखेनाभिहितम् भो यद्येवं तन्ममापि स्तोकं प्रयच्छ येन जिह्वासौख्यमनुभवामि । ततो विहस्य प्रथमवक्त्रेणाभिहितम् । आवयोस्तावदेकमुदरमेका तृप्तिश्च भवति । ततः किं पृथग्भक्षितेन । वरमनेन शेषेण प्रिया तोष्यते । एवमभिधाय तेन शेषं भारण्डयाः प्रदत्तम् । सापि तदास्वाद्य प्रहृष्टतमालिङ्गनचुम्बनसंभावनानेकचाटुपरा बभूव । द्वितीयं मुखं तद्दिनादेव प्रभृति सोद्वेगं सविषादं च तिष्ठति । अथान्येद्युर्द्वितीयमुखेन विषफलं प्राप्तम् तद्दृष्ट्वापरमाह । भो निस्त्रिंश पुरुषाधम निरपेक्ष मया विषफलमासादितं तत्तवापमानाद्भक्षयामि । अपरेणाभिहितम् । मूर्ख मा मैवं कुरु । एवं कृते द्वयोरपि विनाशो भविष्यति । अथैवं वदता तेनापमानेन फलं भक्षितं किं बहुना द्वावपि विनष्टौ । अतोऽहं ब्रवीमि ।

एकोदराः पृथग्ग्रीवा अन्योन्यफलभक्षिणः ।
असंहता विनश्यन्ति भारण्डा इव पक्षिणः ॥ १०२ ॥

चक्रधर आह । सत्यमेतत् । तद्गच्छ गृहम् । परमेकाकिना न गन्तव्यम् । उक्तं च ।

एकः स्वादु न भुञ्जीत नैकः सुप्तेषु जागृयात् ।
एको न गच्छेदध्वानं नैकश्चार्थान्प्रचिन्तयेत् ॥ १०३ ॥

अपि च । अपि कापुरुषो मार्गे द्वितीयः क्षेमकारकः ।
कर्कटेन द्वितीयेन जीवितं परिरक्षितम् ॥ १०४ ॥

सुवर्णसिद्धिराह । कथमेतत् । सोऽब्रवीत् ।

---

१ Fallen down by some invisible agency २ A little. ३ What need or use is there in eating it separately? ४ It is better to gratify our beloved by means of this remaining portion. ५ Became intent on giving him a hearty embrace, kiss, respect and also exchanging sweet words. ६ Cruel, heartless. ७ The worst of men. ८ Indifferent, free from desire. ९ In order to wreak vengeance on you who have wronged me. १० One should not eat any sweet thing alone, one should not wake alone while others are asleep, one should not go on a journey alone and one should not think about wealth alone. ११ However insignificant a person may be, he is a useful companion on a journey; a crab who was taken as a companion saved the life (of his fellow-traveller.)

॥ कथा १५ ॥

कस्मिंश्चिदधिष्ठाने ब्रह्मदत्तनामा ब्राह्मणः प्रतिवसति स्म । स च प्रयोजनवशाद्ग्रामे प्रस्थितः स्वमात्राभिहितः । यद्वत्स कथमेकाकी व्रजसि । तदन्विष्यतां कश्चिद्द्वितीयः सहायः । स आह । अम्ब मा भैषीः । निरुपद्रवोयं मार्गः । कार्यवशादेकाकी गमिष्यामि । अथ तस्य तं निश्चयं ज्ञात्वा समीपस्थवाप्याः सकाशात्कर्कटमादाय मात्राभिहितः वत्स अवश्यं यदि गन्तव्यं तदेष कर्कटोपि सहायः । तदेनं गृहीत्वा गच्छ । सोपि मातुर्वचनादुभाभ्यां पाणिभ्यां तं संगृह्य कर्पूरपुटिकामध्ये निधाय पात्रमध्ये संक्षिप्य शीघ्रं प्रस्थितः । अथ गच्छन्ग्रीष्मोष्मणा संतप्तः कंचिन्मार्गस्थं वृक्षमासाद्य तत्रैव प्रसुप्तः । अत्रान्तरे वृक्षकोटरान्निर्गत्य सर्पस्तत्समीपमागतः । सोपि कर्पूरसुगन्धं सहजप्रियत्वात्तं परित्यज्य वस्त्रं विदार्याभ्यन्तरगतां कर्पूरपुटिकामतिलौल्यादभक्षयत् । सोपि कर्कटस्तत्रैव स्थितःसन्सर्पप्राणानपाहरत् । ब्राह्मणोपि यावत्प्रबुद्धः पश्यति तावत्समीपे कृष्णसर्पो निजपार्श्वे कर्पूरपुटिकोपरि स्थितस्तिष्ठति । तं दृष्ट्वा व्यचिन्तयत् । कर्कटेनायं हत इति प्रसन्नो भूत्वाब्रवीत् । भोः सत्यमभिहितं मम मात्रा यत्पुरुषेण कोपि सहायः कार्यो नैकाकिना गन्तव्यम् । ततो मया श्रद्धापूरितचेतसा तद्वचनमनुष्ठितम् । तेनाहं कर्कटेन सर्पव्यापादनाद्रक्षितः । अथवा साध्विदमुच्यते ।

मन्त्रे तीर्थे द्विजे देवे दैवज्ञे भेषजे गुरौ ।
यादृशी भावना यस्य सिद्धिर्भवति तादृशी ॥ १०५ ॥

१ About to go to a village on some business. २ A companion, a friend. ३ Free from any injury. ४ Let this crab serve as your companion. ५ Any hollow cup or concavity. ६ By the heat of summer. ७ On account of his natural fondness for camphor. ८ With my mind filled with faith (in what she said). ९ From being killed by the serpent. १० As is the faith of a person in an incantation, a holy place or worthy person, a Brahmana, a god, an astrologer, a physician, an elderly person or preceptor, so is the success that attends him.

एवमुक्त्वासौ ब्राह्मणो यथाभिप्रेतं गतः । अतोऽहं ब्रवीमि ।

अपि कापुरुषो मार्गे द्वितीयः क्षेमकारकः ।
कर्कटेन द्वितीयेन जीवितं परिरक्षितम् ॥ १०६ ॥

ततश्च सुवर्णसिद्धिरपि तं चक्रधरं ब्राह्मणेयथानुज्ञाप्य स्वगृहं गतः ।

समाप्तं चेदमपरीक्षितकारकं नाम पञ्चमं तन्त्रम् ॥

१ As desired. २ Having taken leave of Chakradhara in
3 manner of a Brahmana or as a Brahmana ought to do.
Here ends the fifth Tantra entitled अपरीक्षितकारक the
er of an inconsiderate action.
